तस्मादसंभावनानिरासाय प्रमाणात् पृथगेव संभावनाऽपि वक्तव्यैव ।
तथा चान्यैरपि लक्षणसंभावनापूर्वकत्वं प्रमाणस्योक्तम् ।

मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात् ।
तच्चाध्यक्षादिमानेषु गीर्वाणैरप्यवारणम् ॥१॥
संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना ।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥२॥ इति ।

परन्तु इस परोक्षज्ञानसे 'मैं मनुष्य हूँ' इस प्रत्यक्षभ्रमकी निवृत्ति नहीं हो सकती, क्योंकि प्रत्यक्षज्ञानसे ही प्रत्यक्षभ्रम निवृत्त हो सकता है । इससे जब भ्रम बना है, तब उक्त परोक्षज्ञानसे अध्यासकी असम्भावना भी बनी है यही उत्तरका तात्पर्य है] । इसलिए असम्भावनाकी निवृत्तिके लिए प्रमाणसे पृथक् सम्भावनाका भी कथन सर्वथा सङ्गत है ।

इस पूर्वोक्त आशयसे ही दूसरे तन्त्रकारोंने भी प्रमाणको लक्षण तथा सम्भावनापूर्वक ही माना है—

प्रमेयकी सिद्धि प्रमाणके अधीन है अर्थात् प्रमाणसे ही प्रमेयकी सिद्धि होती है और प्रमाणकी सिद्धि लक्षणसे होती है। और वह लक्षण यदि प्रत्यक्ष आदि प्रमाणोंमें है, तो देवताओंसे भी उन प्रत्यक्ष आदि प्रमाणोंका निवारण नहीं हो सकता ॥१॥

[प्रमाणसंवाद आदि हेतुसे ही पक्षकी पुष्टि होती है, इसमें प्रमाण देते हैं]—

प्रतिज्ञावाक्यमें सम्भावित पक्ष (वह्नियुक्त पर्वतादि) हेतुके (धूमादिके) द्वारा यदि सिद्ध किया जाता है और जो पक्ष प्रतिज्ञा वाक्यमें वास्तवमें संभावित नहीं है अर्थात् उत्पत्ति कालमें ही नष्ट हो गया है । उसकी हेतुओंसे रक्षा (साधन) नहीं हो सकती है [अभिप्राय यह है कि 'पर्वतो वह्निमान्' इस प्रतिज्ञावाक्यसे जब पर्वतमें वह्निकी संभावना होती है, तभी धूमादि हेतुसे वह्निकी सिद्धि होती है। यदि प्रतिज्ञावाक्यसे पर्वतमें वह्निकी सिद्धि न हो तो हेतुसे भी उसका साधन देवता भी नहीं कर सकते हैं ॥२॥]

होनेसे ही भ्रमकी उत्पत्ति होती है, यह सावयव पदार्थोंमें ही सङ्गत है । आत्मा निरवयव है, अतः उसमें सादृश्य भी नहीं बन सकता ।

तत्राऽपि लक्षणपूर्विका संभावना। लक्षणेन हि व्यावृत्तस्वरूपे उपस्थापिते पश्चादिदं संभाव्यते न वेति विचारो युज्यते। अन्यथा निर्विषयो विचारः स्यात्। ततो लक्षणमेव प्रथमं वक्तव्यम्। तदुच्यते—द्विविधो ह्यध्यासो ज्ञानविशिष्टोऽर्थोऽर्थविशिष्टं ज्ञानं चेति। तत्राऽर्थस्य तावत् स्मर्यमाणसदृशोऽन्यात्मनाऽवभास्यमानोऽन्योऽर्थोऽध्यास इति लक्षणम्। ज्ञानस्य तु स्मृतिसमानोऽन्यस्यान्यात्मतावभासोऽध्यास इति।

ननु 'इदं रजतम्' इत्यत्र चक्षुरादिप्रमाणाभावात् पारिशेष्यात् स्मर्यमाणमेव रजतं न पुनस्तत्सदृशमित्यख्यातिवादिन आहुरिति चेद्, मैवम्;

इन दोनोंमें अर्थात् लक्षण और संभावनामें लक्षणपूर्वक सम्भावना होनी चाहिए अर्थात् सम्भावनासे पूर्व लक्षणका होना आवश्यक है, क्योंकि लक्षण द्वारा इतर पदार्थोंसे व्यावृत्त स्वरूप (असंकीर्ण) उपस्थापित वस्तुमें पीछे 'यह सम्भव है या नहीं' यह विचार करना युक्त होता है। [घट या वन्ध्यापुत्रादि पदार्थका शब्दादि द्वारा ज्ञान हो जानेपर ही तद्विषयक 'है या नहीं' इत्यादि विकल्प हो सकता है, इसी भावको लेकर आगे विपर्यय दिखलाते हैं]—अन्यथा—इसके विपरीत लक्षण किये विना पूर्व ही 'यह वस्तु है या नहीं' इत्यादि विचार करना—विषयहीन हो जायगा। अतः विचारके विषयका प्रतिपादन करनेके लिए सर्वप्रथम लक्षण करना आवश्यक होता है। इससे अब अध्यासका लक्षण कहते हैं।

['स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इस भाष्यलक्षणकी व्याख्याके उद्देश्यसे भेदप्रदर्शनपूर्वक लक्षण करते हैं]—

अध्यास दो प्रकारका है—एक ज्ञानविशिष्ट अर्थ और दूसरा अर्थविशिष्ट ज्ञान। उद्देशक्रमसे पहले अर्थाध्यासका लक्षण करते हैं—उनमें स्मर्यमाणके—स्मरणविषयके—सदृश और दूसरी वस्तुके रूपसे प्रतीयमान होनेवाला अर्थ अर्थाध्यास कहलाता है। और दूसरा 'स्मरणके समान अर्थात् असन्निहित विषयक और दूसरी वस्तुका दूसरे रूपसे अवभास ज्ञानाध्यास कहलाता है।

यहाँपर मीमांसक शङ्का करता है कि 'इदं रजतम्' (यह रजत है) इस शुक्ति-रजतज्ञानमें रजतके साथ चक्षुरादि प्रमाणके (संप्रयोगके) न होनेसे परिशेषसे स्मरणका ही रजत विषय है, स्मर्यमाणके सदृश रजतान्तर नहीं है? यह उसकी शङ्का

पुरोवस्थितत्वेनावभासमानत्वाद् । न चेदमंशस्यैव तथाऽवभासो न रजतस्येति मन्तव्यम्; यथा सम्यक्स्थलेष्विदं रजतमयं घट इत्यादिष्वितरेतरसंसृष्टौ सामान्यविशेषावपरोक्षाववभासेते तथेहापि प्रतिभासात् । अथ मतं सामान्यविशेषयोर्नैरन्तर्येण प्रतिभासात्तथा व्यवहारः, न तु संसर्गसंवित्सद्भावादिति, तन्न; परमार्थस्थलादीपन्न्यूनताया अप्यदर्शनात् । पुरोवर्ति-

भी युक्त नहीं है, क्योंकि 'यह रजत है, इस प्रकार शुक्तिमें सामने स्थितरूपसे रजतकी प्रतीति होती है। [जो स्मर्यमाण—स्मरणका विषय है, वह पदार्थ सामने विद्यमान है, ऐसा प्रतीत नहीं होता । और यह शुक्तिरजत सामने विद्यमान मालूम होता है] । मीमांसक फिर शङ्का करता है कि यह सामने विद्यमानताकी प्रतीति इदमंशमें है, रजतांशमें नहीं । इसका वेदान्ती खण्डन करता है कि यह भी कहना उचित नहीं है, क्योंकि जैसे सच्चे 'व्यावहारिक' रजतस्थलमें 'इदं रजतम्' (यह रजत है) तथा 'अयं घटः' (यह घड़ा है) इत्यादि ज्ञानमें एक दूसरेके साथ मिले हुए सामान्य और विशेष दोनों अंश प्रत्यक्ष भासित होते हैं, वैसे ही 'यह रजत है' इस भ्रमात्मक शुक्तिरजतज्ञानमें भी दोनों अंशोंका (इदम् सामान्य अंश और रजत विशेष अंशका) प्रत्यक्ष अवभास होता है । मीमांसकका यह कथन भी कि सामान्य विशेष दोनों अंशोंका नैरन्तर्य (अव्यवधान) होनेसे ऐसा (दोनों अंशोंका प्रत्यक्ष) मालूम होता है, दोनोंके परस्पर संसर्गज्ञानका सद्भाव है, इससे नहीं [अर्थात् दोनों (यह और रजत) अंश अव्यवहित रहते हैं, इससे दोनों अंशोंका प्रत्यक्ष ज्ञान जान पड़ता है, इससे यह समझना उचित नहीं है कि दोनों अंशोंका परस्पर संसर्ग (तादात्म्य) ज्ञान है । अतः दोनोंका प्रत्यक्ष होता है, क्योंकि भ्रममें संसर्गज्ञान नहीं है । सामान्य अंशका ही प्रत्यक्ष तथा रजतका ही स्मरण है] ।

ठीक नहीं, क्योंकि परमार्थ स्थलसे कुछ भी प्रकृतमें कमी नहीं है । [अर्थात् 'इदं रजतम्' इस भ्रमज्ञानमें और 'इदं रजतम्' इस प्रमाज्ञानमें जरा-सी भी न्यूनताका अनुभव नहीं होता है । जब तक परमार्थ रजतज्ञानसे भ्रमज्ञानमें कोई न्यूनताका अनुभव न हो, तब तक यह कहना सङ्गत नहीं होता कि भ्रमज्ञानीय सामान्य और विशेष दोनों अंशोंका परस्पर संसर्गग्रह नहीं होता] यदि कहो कि भ्रमज्ञानमें पुरोवर्ती

रजताभाव एवं न्यूनतेति चेद्, नः; किमपरोक्षसंविदभावाद्रजताभावनिश्चयः, किं वा नेदं रजतमिति बाधकज्ञानात्? नाद्यः, संविदभावस्यैवाऽसंप्रतिपत्तेः। अर्थाभावेनैव संविदभावनिश्चये स्यादन्योन्याश्रयता। तस्मादपरोक्षसंवित्सद्भावादेव पुरोवर्तिरजतसत्ताऽभ्युपगन्तव्या। न च वैपरीत्येनार्थसत्तानिश्चयाधीनः संवित्सत्तानिश्चय इति वाच्यम्, तथा सत्यर्थनिश्चयोऽपि तथैव निश्चयान्तराधीन इत्यनवस्थाप्रसङ्गात्। तस्मात् संविन्निश्चयः स्वत एव तदधीना चार्थसत्ता। नापि द्वितीयः, 'इदं रजतम्' इति पूर्वज्ञानेन विरुद्ध-

---

रजतके अभावकी ही कमी है, तो यह भी ठीक नहीं है, क्योंकि इस अवस्थामें प्रश्न होता है कि क्या प्रत्यक्षज्ञानके अभावसे रजतके अभावका निश्चय किया जाता है अथवा 'नेदं रजतम्' (यह रजत नहीं है) इस बाधक ज्ञानसे? पहला पक्ष तो सङ्गत नहीं है, क्योंकि भ्रमात्मक रजतका प्रत्यक्षज्ञान नहीं है, इस प्रकार संविद्का अभाव सम्प्रतिपन्न—उभय वादियोंको सम्मत—नहीं है। यदि अर्थके (रजतादि विषयके) अभावसे ही प्रत्यक्षज्ञानका अभाव माना जाय, तो अन्योन्याश्रय दोष होगा। कारण कि अर्थाभावसे ज्ञानाभाव और ज्ञानाभावसे अर्थाभावका निश्चय होगा। इससे अपरोक्ष ज्ञान होनेसे ही पुरोवर्ती रजतकी सत्ता माननी चाहिए। ऐसा भी नहीं कह सकते कि आपके (वेदान्तीके) उक्त कथनके विपरीत अर्थकी (रजतादि विषयकी) सत्ताके निश्चयसे ही ज्ञानकी सत्ताका निश्चय हो सकता है, क्योंकि ऐसा माननेमें रजत आदि अर्थका निश्चय भी इसी तरहसे दूसरे-दूसरे निश्चयोंके अधीन होगा, इस प्रकार अनवस्था हो जायगी। [यदि अर्थसत्ताके निश्चयानन्तर संवित्सत्ताका निश्चय कहो, तो अर्थसत्ताका निश्चय भी तो किसी निश्चयान्तरसे ही होगा और इस अर्थसत्ताके निश्चायक निश्चयान्तरका भी निश्चय तो निर्विषयत्व रूपी दोषभयसे निश्चयान्तरसे ही करना होगा, इस प्रकार अनवस्थासे मूलभूत अर्थसत्ताका निश्चय ही नहीं बनेगा। स्वतः तो अर्थसत्ताका निश्चय अर्थके जड़ होनेसे नहीं बनेगा, यह तात्पर्य हुआ]। इससे संवित्—प्रत्यक्षज्ञानकी सिद्धि स्वतः है और इस स्वतः सिद्ध प्रत्यक्ष ज्ञानके निश्चयसे अर्थकी सत्ता सिद्ध होती है। द्वितीय पक्ष—बाधक ज्ञानसे अर्थाभावका निश्चय भी उचित नहीं है, क्योंकि 'इदं रजतम्' (यह रजत है) इस पूर्वज्ञानसे विरुद्ध 'नेदं रजतम्' (यह

स्योत्तरज्ञानस्य बाधासामर्थ्यात् । तर्ह्युत्तरज्ञानस्य का गतिरिति चेत्, पूर्वज्ञानस्य त्वन्मते या गतिः सैव भविष्यति। यथा त्वयेदं रजतमित्यत्रेदमाकाररजताकारयोरविवेकः कल्पितः तथा निषेधेऽप्यविवेक एव न तु संसर्गसंविदिति किं न कल्प्यते? व्यवहारसंवादज्ञानान्निषेधसंसर्गसंविदस्तीति निश्चीयत इति चेत्, तर्हि संविदः स्वप्रकाशत्वं हीयेत। विप्रतिपन्नं

रजत नहीं है) इस द्वितीय ज्ञानमें बाधकत्वका सामर्थ्य नहीं बन सकता। जिस समय 'इदं रजतम्' (यह रजत है) ऐसा प्रथम ज्ञान हुआ उस समय कोई विरोधी तो है नहीं, अतः वह उत्पन्न हो जायगा। अनन्तर 'नेदं रजतम्' (यह रजत नहीं है) उत्पन्न हुआ भी विरोधी ज्ञान प्रथम उत्पन्न ज्ञानका बाध कैसे कर सकेगा, यह अभिप्राय है] मीमांसक प्रश्न करता है—यदि वह बाधक नहीं है, तो उत्तरज्ञानका कैसे समन्वय होगा? वेदान्ती प्रतिबन्दी उत्तर देता है—जैसा समन्वय आपके मतमें पूर्ववाक्यका है, वैसा ही समन्वय उत्तर वाक्यका भी होगा। इसीको स्पष्ट करते हैं—जैसे तुमने, 'इदं रजतम्' (यह रजत है) इस भ्रमज्ञानमें—इदमाकार (सामान्य अंश) और रजताकार (विशेष अंश) इन दोनोंका अविवेक (असंसर्गाऽज्ञान) कल्पित है [संसर्गसंवित् नहीं], ऐसा माना है, वैसे ही निषेधवाक्यमें भी अविवेक ही कल्पित होगा न कि निषेधका संसर्गज्ञान (संवित्)। [यह, रजत और अभाव—इन तीनोंके भी अविवेककी (असंसर्गाग्रह–संसर्गके अभावके अज्ञान की) कल्पना करके संगति हो जानेसे उत्तरवाक्यमें 'न' पदसे 'निषेधका संसर्गज्ञान ही बोधित होता है' ऐसा क्यों माना जाय? यह आशय हुआ।] 'नेदं रजतम्' (यह रजत नहीं है) इस निषेधवाक्यसे रजताभावका ज्ञान होनेसे प्रवृत्त्यभावरूप व्यवहार देखा जाता है, इससे उत्तर वाक्यमें निषेधका संसर्गज्ञान रहता है, इस आशयसे मीमांसक प्रतिबन्दीका खण्डन करता है—व्यवहार—रजताभावज्ञानसे होनेवाला प्रवृत्त्यभावरूप व्यवहार—के संवादसे 'नेदं रजतम्' इस उत्तर वाक्यमें निषेधका सम्बन्धग्रह है, ऐसा निश्चय होता है और पूर्ववाक्यमें रजतज्ञानसे व्यवहार नहीं होता है, अतः उसमें सम्बंधसंवित्का सद्भाव नहीं है। वेदान्ती इसका खण्डन करता है—'व्यवहारसंवादज्ञानसे निषेधके सम्बन्धका ज्ञान होता है,' यदि ऐसा मानते हो, तो संविद्-

प्रत्येवैवं प्रसाधनान्न ममापसिद्धान्त इति चेत्, तथाप्यनवस्था दुष्परिहरा। न च पुरोवर्त्तिरजताभावः सर्वसम्प्रतिपन्न इति वाच्यम्, यथाप्रतिभासमेव मिथ्यारजतस्य शुक्तिज्ञानेन निरसनयोग्यस्याऽस्माभिरभ्युपगमात्। मिथ्यारजताभ्युपगमोऽपि नेदं रजतमिति त्रैकालिकनिषेधेन विरुध्यत इति चेत्, न; तस्य निषेधस्य लोकप्रसिद्धपरमार्थरजतविषयत्वात्। न चैवमप्रसक्तप्रतिषेधः शङ्कनीयः, मिथ्याभूते रजते परमार्थरजतार्थिप्रवृत्तिदर्शनेन परमार्थरजतत्वस्य सामान्योपाधौ प्रसक्तेरङ्गीकार्यत्वात्। अन्यथा भूतले

ज्ञानके स्वप्रकाशत्वका विधान हो जायगा। (मीमांसक संविद्को स्वप्रकाश मानता है, अतः उक्त रीतिसे अपसिद्धान्त दोष आ जाता है)। यदि मीमांसक आग्रह करे कि हम ऐसा प्रसाधन (व्यवहारसंवादसे संसर्गसंवित्का ग्रह कहना) उनके प्रति है, जो संवित्के स्वप्रकाशत्वमें विवाद करते हैं अर्थात् ज्ञानको अनुमेय मानते हैं, तो भी अनवस्थाका परिहार तो नहीं हो सकता। सामने विद्यमान शुक्त्यादिमें रजतका अभाव सभी वादी मानते हैं, यह कथन भी उचित नहीं है, क्योंकि हम वेदान्ती प्रतिभासके अनुसार शुक्तिज्ञानसे बाधने योग्य मिथ्या रजतका स्वीकार करते ही हैं, इससे रजतका अभाव सर्ववादिसिद्ध है, ऐसा नहीं मान सकते। मीमांसक पुनः शंका करता है—'नेदं रजतम्' (यह रजत नहीं है) इस त्रैकालिक निषेधसे प्रतिभासकालमें भी मिथ्यारजतका स्वीकार विरुद्ध होगा। वेदान्ती उत्तर देता है—ऐसा नहीं, 'नेदं रजतम्' (यह रजत नहीं है) यह निषेध लोकप्रसिद्ध परमार्थ (व्यावहारिक) रजतको विषय करता है। मीमांसकको यह शङ्का नहीं करनी चाहिए कि लौकिक रजत तो यहाँपर प्रसक्त ही नहीं है। 'इदं रजतम्' प्रतिभासका तो मिथ्यारजत विषय है, इससे जो प्रसक्त नहीं है, उसके निषेधका प्रसङ्ग होगा, (जो किसीको भी अभीष्ट नहीं है), क्योंकि मिथ्यारजतमें लोकप्रसिद्ध परमार्थ रजतकी इच्छावाले पुरुषकी प्रवृत्ति देखनेसे परमार्थ रजतत्वकी भी सामान्य उपाधि (इदमंश) में प्रसक्तिका अङ्गीकार माना गया है [यदि इदमंशमें केवल प्रातिभासिक रजत ही प्रसक्त होता, तो उसमें लौकिक रजतसे काम लेनेवाले पुरुषकी प्रवृत्ति नहीं होती; किन्तु प्रवृत्ति देखी जाती है, अतः रजतप्रतिभासकी प्रसक्तिसे एक

घटनिषेधोऽपि दुर्भणः स्यात् । घटसत्त्वे निषेधो व्याहन्येत घटासत्त्वे चाऽप्रसक्तप्रतिषेधः । ततो देशसामान्योपाधिना कालसामान्योपाधिना घटप्रसक्तिर्न तु साक्षात् । तथैव परमार्थरजतस्याप्यस्तु । एवं च सत्युत्तरकालीनो नाऽस्त्यत्र रजतमिति प्रत्ययः परमार्थरजतविषयो मिथ्यैव रजतमभादिति प्रत्ययश्च मिथ्यारजतविषय इत्युभयमप्युपपद्यते । अन्यथैकः प्रत्ययोऽपलप्येत ।

ननु रजतापरोक्ष्यानुपपत्त्या तु संसृष्टावभासं परिकल्प्य तदुपपत्तये हि मिथ्यारजतकल्पनाक्लेशः क्रियते । रजतापरोक्ष्यं तु संसृष्टावभासमन्त-

---

सम्बन्धी ज्ञान दूसरे सम्बन्धीका स्मारक होता है, इस न्यायके बलसे परामार्थ रजत भी बुद्धिमें आ जाता है, यह भाव हुआ] । ऐसा न माननेमें बाधक दिखाते हैं—अन्यथा—इसके विपरीत माननेमें—तो भूतलमें घटका अभाव भी नहीं कहा जा सकता, क्योंकि घटकी सत्तामें (घटके रहते हुए) घटका निषेध करना व्याहत—असङ्गत—होगा । और घटके न रहनेपर उसका निषेध करना अप्रसक्तप्रतिषेध हो जायगा । इसलिए देशसामान्य तथा कालसामान्य उपाधिसे ही घटकी प्रसक्ति कहनी होगी, साक्षात् तद्देश या तत्काल ही में प्रसक्ति प्राप्त नहीं है । एवं परमार्थ रजतकी भी सामान्यतः प्रसक्ति समझनी चाहिए । पूर्वोक्त प्रक्रियाका अङ्गीकार करनेपर उत्तरकालमें होनेवाले 'यहांपर रजत नहीं है' यह प्रत्यय (ज्ञान) लोकप्रसिद्ध परामार्थ रजतको विषय करता है । और झूठा ही रजत भासता था, यह ज्ञान मिथ्यारजतको विषय करता है, इस तरह दोनों ज्ञानोंकी व्यवस्थाकी उपपत्ति बन गई; नहीं तो एक ज्ञानका अपलाप हो जाता । [अर्थात् उत्तरकालमें यहां रजत नहीं है, अब तक मिथ्या ही रजत भासित हुआ था, ऐसी दो तरहकी प्रतीति होती है । यही दो प्रकारका अनुभव उक्त व्यवस्थामें प्रमाण है, यदि उक्त व्यवस्था न मानी जाय, तो परस्पर विरुद्ध होनेसे कोई एक ज्ञान नहीं होना चाहिए, यह अभिप्राय हुआ] ।

मीमांसक पुनः शङ्का करता है—रजतके प्रत्यक्षकी अनुपपत्तिसे 'इदं रजतम्' ज्ञानको परस्पर संसर्गयुक्त ज्ञान मानना पड़ता है । और माने हुए इस संसृष्ट ज्ञानकी उपपत्तिके लिए मिथ्यारजतकी कल्पनाका क्लेश उठाना पड़ता है । (ये सब क्लेश क्यों उठाए जायँ) रजतका प्रत्यक्ष तो संसर्गयुक्त ज्ञान माने बिना

रेणैवाऽपरोक्षशुक्तिज्ञानाविवेकादप्युपपद्यत इति चेद्, न; तथा सति विवेक-ज्ञानसमयेऽप्येतावन्तं कालं तद्रजतमनेनाऽविविक्तमित्यविवेक एव परा-मृश्येत, न च तथा परामृश्यते; किं त्वेतावन्तं कालमिदं रजतमित्यभादिति प्रत्यभिज्ञया संसृष्टावभास एव परामृश्यते। अतः पुरोवर्त्तिमिथ्यारजतम-ङ्गीकर्त्तव्यम्; अन्यथा शुक्तिं दृष्ट्वा रजते प्रवर्तत इति किं केन सङ्गच्छेत ?

तस्मात् न स्मर्यमाणमिदं रजतम्, किन्तु स्मर्यमाणसदृशमेव। तत्सादृश्यं च पूर्वानुभवसापेक्षज्ञानगम्यत्वादुपपन्नम्। नह्यननुभूतरजतस्य रजतभ्रान्तिर्दृश्यते।

ही सामने विद्यमान चक्षुगोचर (प्रत्यक्षविषय) शुक्तिका विवेक न होनेसे (अर्थात् शुक्तिका रजतसे पृथक्‌रूपसे ज्ञान न होनेसे) भी बन सकता है। उत्तर देते हैं—यह शङ्का ठीक नहीं है, क्योंकि यदि ऐसा (शुक्तिज्ञानके अविवेकसे रजतका आपरोक्ष्य (प्रत्यक्ष) होता, तो शुक्तिज्ञानके विवेकके अनन्तर या विवेककालमें 'इतने समय तक, वह रजत इससे विविक्त (शुक्तिसे भिन्न) नहीं जाना' इस तरह अविवेक ही का परामर्श होता' परन्तु ऐसा परामर्श नहीं होता है; (प्रत्युत इसके विपरीत विवेकज्ञान होनेपर) 'इतने समय तक यह रजत है' ऐसा प्रतीत हुआ' इस प्रकारकी प्रत्यभिज्ञासे संसृष्टज्ञानका ही परामर्श होता है। इसलिए (संसृष्टज्ञानकी उपपत्तिके लिए) पुरोवर्ती मिथ्यारजतका अङ्गीकार करना ही चाहिए। अन्यथा शुक्तिको देखकर रजतमें प्रवृत्ति होती है, यह प्रवृत्ति क्या किसी प्रकार संगत हो सकती है ? [नियम है कि पुरुषकी जहां-कहीं भी प्रवृत्ति होती है, वह तद्विषयक ज्ञानके अनन्तर ही होती है। रजतकी इच्छा रखने-वाले पुरुषकी पुरोवर्ती 'इदम्' पदार्थमें प्रवृत्ति देखी जाती है; इससे इदंपदार्थको उसने रजतरूपसे अवश्य जाना है, ऐसा मानना ही होगा, यह भाव है।]

इससे इस भ्रमज्ञानके विषय रजतको स्मर्यमाण अर्थात् स्मरणका विषय नहीं कह सकते, किन्तु स्मर्यमाणके सदृश ही कह सकते हैं। और यह स्मर्यमाणका सादृश्य पूर्व अनुभवकी अपेक्षावाले ज्ञानसे ज्ञेय होनेके कारण संगत होता है। जिस पुरुषको कभी भी रजतका अनुभव नहीं हुआ है, उसको रजतभ्रम नहीं होता। [जैसे स्मर्यमाण पदार्थ स्मृतिसे ज्ञेय होता है, और स्मृतिज्ञान अनुभवकी अपेक्षा रखता है; वैसे ही भ्रमज्ञानका विषय पदार्थ भी रजतके संस्कारज्ञानसे ज्ञेय है और संस्कार पूर्वानुभवकी अपेक्षा रखता है, अतः स्मर्यमाण और भ्रमात्मक पदार्थमें

अत एव संस्कारजन्यत्वाद् ज्ञानाध्यासस्याऽपि स्मृतिसाम्यमवगन्तव्यम्। विमतं न संस्कारजम्, स्मृतिव्यतिरिक्तज्ञानत्वात्, प्रत्यक्षवत्; इति चेद्, न; संप्रयोगमात्रजन्यत्वस्योपाधित्वात्। न चाऽनुमानागमादिज्ञानेषु साध्याव्याप्तिः शङ्कनीया, व्याप्त्यादिज्ञानसापेक्षत्वेन संस्कारजेषु तेषु साध्याभावात्। स्यादेतत्—विमताः प्रत्यया यथार्थाः, प्रत्ययत्वात्,

पूर्वानुभवसापेक्षज्ञानगम्यत्व रूप सादृश्य बन गया।]

यह अर्थाध्यासमें सादृश्य कहा गया। अब ज्ञानाध्यासमें सादृश्य कहते हैं कि अतएव अनुभवसापेक्षसंस्कारगम्य होनेसे ही ज्ञानाध्यासमें भी स्मृतिकी समानता समझ लेनी चाहिए। * विमत—भ्रम संस्कारजन्य नहीं है, स्मृतिभिन्न ज्ञान होनेसे, प्रत्यक्षके समान। [कहनेका तात्पर्य यह है कि प्रत्यक्षमें स्मृतिभिन्नत्व और संस्कारजन्यत्वाभावका साहचर्य नियमरूप व्याप्ति देखी गई है, अतः आपका वेदान्तीका] अभिमत स्मृतिभिन्न भ्रम भी संस्कारजन्य नहीं हो सकता। इस प्रकारके अनुमानसे स्मृतिसाम्य भ्रममें नहीं है, यदि वादी ऐसा कहे, तो उसका यह कथन उचित नहीं है, क्योंकि उक्त अनुमानमें संप्रयोगमात्रजन्यत्व अर्थात् केवल इन्द्रियसंनिकर्षसे जन्यत्वरूप उपाधि † है। अनुमान, आगम आदि ज्ञानोंमें संस्कारजन्यत्वके अभावरूप साध्यकी अव्याप्ति है, अर्थात् अनुमानादिमें संस्कारजन्यत्वाभावरूप साध्य है, किन्तु सम्प्रयोगमात्रजन्यत्वरूप उपाधि नहीं हैं, अतः साध्यकी व्यापक उपाधि नहीं हुई, ऐसी शङ्का नहीं करनी चाहिए, क्योंकि उन अनुमान आदि ज्ञानोंमें व्याप्तिज्ञानकी भी अपेक्षा है, अतः संस्कारजन्य होनेसे संस्कारजन्यत्वाभावरूप

* विमतपदसे वह पक्ष लिया जाता है, जो विवादका विषय न हो। प्रकृतमें भ्रमज्ञानको वेदान्ती संस्कारजन्य और स्मृतिसे भिन्न एक ही ज्ञान मानते हैं। मीमांसक इससे विपरीत भ्रमको अनुभव और स्मरण रूप दो ज्ञान मानते हैं, इससे भ्रम विमतिग्रस्त होनेसे विमत कहलाता है।

† साध्यके व्यापक और साधनके अव्यापकको उपाधि कहते हैं। उपाधिको दिखानेके लिए स्मरण रखना चाहिए कि प्रायः पक्षमें साधनाव्यापकत्व और दृष्टान्तमें साध्यव्यापकत्व दिखाया जाता है। जैसे प्रकृतमें भ्रमज्ञान पक्ष है, उसमें साधन (हेतु) स्मृतिभिन्नज्ञानत्व विद्यमान है और सम्प्रयोगमात्रजन्यत्व नहीं है। क्योंकि भ्रम दोषादिसे भी जन्य होता है। अतः साधनाव्यापकत्व उक्त उपाधिमें आ गया। दृष्टान्त प्रत्यक्षज्ञानमें संस्काराजन्यत्वरूप साध्य और उपाधि दोनों हैं, अतः उपाधि साध्यव्यापक हो गई। यहांपर व्यापकका लक्षण समानाधिकरणघटित समझना चाहिए।

संमतवत्, इति न्यायेन प्रमाणं स्मृतिश्चेति द्वैराश्यमेव ज्ञानस्य। तथा च रजतज्ञानमपि नाऽध्यासः, किन्तु स्मृतिः, संस्कारमात्रजन्यत्वात्, संमतवत्। न च स्मृतित्वे सत्यतिसादृश्याच्छुक्त्यन्तरमेव किं न स्मर्येत इति वाच्यम्, कर्तृगतरागादिदोषाणामपि निमित्तत्वात्, शुक्त्यन्तरे तदभावात्। तैरेव दोषैः स्मरणाभिमानस्य प्रमुषितत्वान्न रजतस्मरणे तत्तांश उल्लिख्यते। तथाविशेषावभासकत्वस्य तैरेव प्रतिबद्धत्वान्न शुक्तिग्रहणेऽपि नीलपृष्ठत्वादिकमवभासते। तथा च ग्रहणस्मरणे उभे अप्यविविक्ते संपद्येते, ततो रजतार्थी पुरोवर्त्तिनि प्रवर्त्तते।

ननु किं ग्रहणस्मरणे द्वे अपि प्रवर्त्तके ? आहोस्विदेकैकम्। आद्येऽपि

साध्य भी उनमें नहीं है। मीमांसक अपना मत प्रकट करता है—विमत—सभी भ्रमादिज्ञान यथार्थज्ञान—प्रमाज्ञान—ही हैं, ज्ञान होनेसे—संमतके अर्थात् प्रत्यक्षादि ज्ञानके समान, इस अनुमानसे इन्द्रियसम्प्रयोगादिजन्य प्रमाण ज्ञान और स्मरण इस प्रकार ज्ञानके दो ही भेद हो सकते हैं। इस दशामें भ्रमात्मक रजतज्ञान भी अध्यास नहीं है, किन्तु स्मृति ही है, क्योंकि वह संस्कार-मात्रजन्य है, जैसे कि सम्मत। अर्थात् माता, पिता आदिके स्मरणात्मक ज्ञान संस्कारजन्य हैं। 'यदि भ्रमको स्मरण माना जाय, तो शुक्तिके अत्यन्त सादृश्यसे दूसरी शुक्तिका ही स्मरण होना चाहिए, रजतका नहीं' यह शङ्का उचित नहीं है, क्योंकि रजतार्थीमें विद्यमान रागादि दोष भी भ्रममें निमित्त माने गये हैं, वे दोष दूसरी शुक्तिमें नहीं हैं। इन्हीं दोषोंके कारण स्मरणाभिमानके प्रमेय हो जानेसे रजतके स्मरणमें तत्तांशका उल्लेख नहीं होता है। एवम् इन्हीं दोषोंके कारण विशेषताके सूचक धर्मोंके भी प्रति-बद्ध हो जानेसे शुक्तिका अनुभव होते हुए भी नीलपृष्ठत्वादिका अवभास नहीं होता है। इस प्रकार अनुभव और स्मरण दोनों भी अविविक्त हो जाते हैं अर्थात् पार्थक्यरूपसे गृहीत नहीं होते हैं, इसलिए रजतार्थी पुरुषकी पुरोवर्ती पदार्थमें ही प्रवृत्ति होती है।

वेदान्ती मीमांसकके मतमें दोष देते हैं—आपने (मीमांसक ने) कहा कि अविविक्त हुए ग्रहण और स्मरण प्रवृत्ति कराते हैं, इसमें हम (वेदान्ती) आपसे पूछते हैं कि ग्रहण (अनुभव) और स्मरण दोनों प्रवर्तक हैं या एक-एक प्रवर्तक

किं संभूय प्रवर्त्तके ? किं वा क्रमेण ? नाऽऽद्यः, स्मृतिग्रहणयोर्यौगपद्याभावात्। क्रमविशिष्टयोर्द्वयोः प्रवर्त्तकत्वमित्ययुक्तम्; पूर्वज्ञानस्य प्रवृत्तिं प्रति व्यवहितस्याऽकारणत्वात्। नाऽप्येकैकस्य प्रवर्त्तकत्वम्, व्यवहारस्य विशिष्टविषयत्वात्। ततो विशिष्टप्रवृत्तये संसृष्टप्रत्यय एष्टव्य इति चेद्, न; ग्रहणस्मरणनैरन्तर्योत्पत्तेः प्रवर्तकत्वात्। इदं रजतमित्यभादिति संसर्गप्रत्ययः प्रत्यभिज्ञायत इति चेद्, न; तादृशव्यवहारमात्रत्वात्। यस्तु जातमात्रस्य बालस्य मधुरे तिक्तत्वावभासस्थूत्काराद्यनुमेयः, सोऽपि जन्मान्तराद्यनुभूततिक्तत्वस्मृतिरेव, न तु भ्रान्तिरूपः संसर्गप्रत्ययः। माधुर्यविशेपतत्तांशौ

हैं। यदि प्रथमपक्ष मानते हो, तो क्या दोनों मिलकर प्रवर्तक होते हैं ? या क्रमशः ? पहला पक्ष नहीं बनता, क्योंकि ग्रहण और स्मरण इन दोनोंका एक कालमें होना असम्भव है, कारण कि ज्ञानेच्छादि योग्य विभु गुणोंका उत्तरगुणनाश्यत्व माना गया है। क्रमसे होनेवाले दोनों ज्ञानोंको क्रमशः प्रवर्तक मानना भी अयुक्त है, क्योंकि पूर्वज्ञान उत्तर ज्ञानसे व्यवहित है, अतः वह प्रवृत्तिके प्रति कारण नहीं हो सकता। एक-एक भी प्रवृत्तिका कारण नहीं हो सकता, क्योंकि व्यवहार विशिष्टको विषय करता है अर्थात् रजतार्थीकी प्रवृत्ति रजतत्वविशिष्ट पुरोवर्ती पदार्थमें होती है। यह प्रवृत्ति पूर्वोक्त नियमके अनुसार एक विशिष्टज्ञानसे ही हो सकती है—एक-एक ज्ञानसे नहीं हो सकती, यह तात्पर्य है अतः विशिष्ट प्रवृत्तिके लिए संसर्गयुक्त विशिष्टज्ञानको ही अभीष्टका साधक मानना होगा। इस पूर्वोक्त पूर्वपक्षका मींमांसक उत्तर देता है—यह पूर्व पक्ष ठीक नहीं है, क्योंकि ग्रहण और स्मरणकी अव्यवधानसे उत्पत्ति ही प्रवृत्तिके प्रति हेतु होगी। 'इदं रजतम्' (यह रजत है) ऐसा प्रतीत हुआ, इस प्रतीतिसे संसर्गयुक्त विशिष्ट ज्ञानकी प्रत्यभिज्ञा होती है; यह भी कहना उचित नहीं है; क्योंकि ऐसा व्यवहारमात्र है (अर्थात् जैसे दूरस्थ दो वृक्षोंमें उत्पन्न न हुआ भी एकत्व दूरत्वदोषसे भासित होता है, वैसे ही सर्वत्र भ्रममें संसर्गयुक्त विशिष्ट ज्ञानके उत्पन्न न होते हुए भी दोषवशात् संसर्गज्ञानकी प्रत्यभिज्ञाका व्यवहार होता है।) [इससे संसृष्टज्ञान उत्पन्न ही होता है, ऐसा नहीं कहा जा सकता, यह भाव है]। सद्योजात बालकके थूकनेसे अनुमान किये गये मधुर रसमें कड़ुवापनका ज्ञान भी जन्मान्तरमें अनुभूत तिक्त रसका स्मरण ही है, भ्रमरूप संसर्गज्ञान नहीं है। माधुर्यविशेप और तत्ता ये दोनों अंश तो ग्रहण और स्मरण

तु ग्रहणस्मरणयोः पित्तदोषान्नोल्लिख्येते। जन्मान्तरानुभूतं च न स्मर्यत इति च भाष्यकारवचनं प्रायिकाभिप्रायम्। अन्यथा स्तनपानादावपीष्टसाधनतास्मृत्यभावेन प्रवृत्तिर्न स्यात्। भ्रान्तिपक्षेऽपि जन्मान्तरानुभवः कारणत्वेनैष्टव्यः। अन्यथाऽननुभूतत्वाविशेषेण सप्तमरसोऽपि भ्रान्तौ भासेत। अतत्त्वे तत्त्वज्ञानमिति वदता शास्त्रकारेणैव दर्शितः संसर्गावभासो भ्रमत्वेनेति चेद्, न; तस्य व्यवहाराभिप्रायत्वात्। सम्यक्प्रदेशेषु संसर्गज्ञानस्य प्रवर्त्तकत्वं व्याप्तं तत्कुतोऽत्र त्यज्यत इति चेद्, गौरवादिति ब्रूमः। भ्रान्ति-

---

दोनों ज्ञानोंमें पित्त दोषसे ही विषय नहीं होते हैं। [ग्रहणमें माधुर्यविशेषकी प्रतीति और तिक्तमें तत्ताकी प्रतीति दोषसे छिप जाती है, यह भाव है।] 'जन्मान्तरमें अनुभूतका स्मरण नहीं होता है' यह भाष्यकारका वचन तो प्रायिक है [अतः आप्तवचनसे कोई विरोध नहीं है]। यदि ऐसा न माना जाय, तो स्तनपानादिमें भी इष्टसाधनताका स्मरणात्मक ज्ञान न होनेसे प्रवृत्ति न होगी। [क्योंकि प्रवृत्तिमात्रमें इष्टसाधनत्वका ज्ञान अर्थात् यह कार्य मेरा इष्टका साधक है, ऐसा ज्ञान कारण है, अतः भाष्यवचनको प्रायिक ही मानना चाहिए।] बालकके उस तिक्तावभासको यदि भ्रान्ति मानें, तो भी जन्मान्तरका अनुभव कारण बनानेके लिए आश्रयणीय होगा ही। [क्योंकि भ्रममें पूर्वानुभवको कारण वेदान्ती मानते ही हैं। पहले ही कह आये हैं कि जिसको रजतका अनुभव नहीं है उसको रजतभ्रम नहीं होता, यह गूढ़ाभिप्राय है।] नहीं तो, अननुभूतत्वमें कोई विशेष न होनेसे मधुरादि छः रसोंसे अतिरिक्त सातवां रस भी भ्रममें भासित होना चाहिए। [जैसे इस जन्ममें अनुभवमें न आया हुआ मधुर रस बालकके भ्रमका विषय होता है, वैसे ही अनुभवमें न आया हुआ सप्तम रस भी भ्रमका विषय होना चाहिए, यह तात्पर्य हुआ।] 'जो वस्तु तात्त्विक नहीं है, उसमें तत्त्वज्ञान होना भ्रम है, इस प्रकार कहनेसे सांख्यशास्त्रकारोंने भी भ्रममें संसर्गज्ञान दिखलाया है, यह कहना भी उचित नहीं है, क्योंकि शास्त्रोंका यह वचन भी व्यवहारके अभिप्रायसे ही है (अर्थात् अयथार्थ ज्ञानके अभावमें भी अयथार्थ व्यवहार होता है; एतदभिप्रायक सांख्यसिद्धान्त है।) यदि शङ्का करो कि यथार्थ ज्ञानस्थलमें संसर्गज्ञान प्रवर्तक माना गया है, उसका प्रकृतमें त्याग करना उचित नहीं है? तो इसका समाधान यही करते हैं कि प्रकृतमें ऐसा मानना गौरवग्रस्त है।

वादिनाऽपि तत्कारणत्वेनाऽवश्यं ग्रहणस्मरणयोरविवेक एष्टव्यः। तथा च तेनैवोभयसिद्धेन प्रवृत्तिसिद्धौ किमतिरिक्तसंसर्गज्ञानेन? तस्मादख्यातिरेव युक्तेति।

अत्रोच्यते—केयमख्यातिर्नाम। किं ख्यात्यभावमात्रमुतान्यार्थिनोऽन्यत्र प्रवृत्तिहेतुविज्ञानम्? अथाविविक्तानेकपदार्थज्ञानम्? आद्ये, सुषुप्तौ भ्रमः स्यान्न जाग्रत्स्वप्नयोः। द्वितीये, झटिति बाधादालस्याद्वा यत्र न प्रवृत्तिस्तत्र

भ्रमवादीको—एकविशिष्टसंसर्गज्ञानरूप भ्रम माननेवालेको—भी भ्रमके प्रति कारणरूप ग्रहण और स्मरणका अविवेक मानना तो आवश्यक ही है। इस अवस्थामें उभयवादिसिद्ध पूर्वोक्त ग्रहण और स्मरणके अविवेकसे ही विशिष्टव्यवहारकी यदि उपपत्ति हो जाती है, तो अतिरिक्त भ्रमात्मक संसर्गज्ञानकी कल्पना क्यों की जाय? [ग्रहण और स्मरणसे अतिरिक्त तृतीय ज्ञानकी कल्पना करनेमें स्पष्ट ही गौरव है और मेरे—ग्रहणस्मरणवादीके मतमें गौरव नहीं है, क्योंकि 'इदम्' पदार्थका ग्रहण भ्रमवादी मानता ही है, अन्यथा अधिष्ठानका स्फुरण ही नहीं होगा। एवं पूर्वानुभूत रजतका स्मरण भी अनिवार्य है, अन्यथा जिसने रजतका अनुभव नहीं किया है, उसको भी रजतभ्रम होना चाहिए। इससे ग्रहण और स्मरणके उभयमतसिद्ध होनेसे हमारा यह पक्ष गौरवग्रस्त नहीं है, यह वादीका तात्पर्य है। इससे यह सिद्ध हुआ कि अख्याति ही युक्त है।

वेदान्ती अख्यातिवादका खण्डन करता है—इस मतके विषयमें कहा जाता है कि आपकी अख्याति क्या वस्तु है? [इसका विवेचन कीजिए, ऐसा मीमांसकके प्रति पर्यनुयोग हुआ] विकल्प करते हैं—क्या ख्यातिका न होना ही अख्याति है? अथवा अन्य वस्तुको चाहनेवाले पुरुषकी अन्य वस्तुमें प्रवृत्तिकारणत्वका विज्ञान ख्याति है? या अविविक्त अनेक वस्तुओंका विज्ञान ख्याति है। पहला पक्ष तो नहीं हो सकता, क्योंकि इसके माननेमें केवल सुषुप्ति (गाढ़निद्रा)* ही में भ्रम हो सकेगा जागर-स्वप्नमें नहीं होगा। जागर या स्वप्नमें कुछ-न-कुछ ख्याति रहती ही है, अतः ख्यातिका सामान्याऽभाव नहीं हो सकता। द्वितीय पक्ष भी दोषपूर्ण है, 'इदं रजतम्' इस भ्रमके अव्यवहित उत्तर क्षणमें ही शीघ्र 'नेदं रजतम्' बाध हो गया,

* वस्तुतः वेदान्तमतमें सुषुप्तिमें भी अज्ञानकी ख्याति रहती ही है, अतः अभ्युपगमवादसे यह ग्रन्थ है या 'परीत्या परो बोधनीयः' इस न्यायसे प्रवृत्त है।

भ्रान्तिर्न स्यात् । तृतीयेऽपि अविविक्तत्वप्रतियोगिविविक्तत्वं नाम किं भेदग्रहः ? उताभेदाग्रहः ? अहोस्वित् इतरेतराभावभेदद्वित्वादिसंख्याविशिष्ट-ज्ञानम् ? नाद्यः, इदमिति रजतमिति चाऽपुनरुक्तशब्दद्वयस्मृतिहेतुत्वेन सामान्यविशेषयोर्भेदग्रहे सत्यविवेकासंभवात्। न द्वितीयः, उक्तरीत्या भेदस्य गृहीतत्वादेव तद्विरुद्धस्याभेदस्याऽऽग्रहे सति तदग्रहनिषेधस्याऽविविक्तत्वस्य दुःसंपादत्वात्। तृतीयेऽपि किमाहत्यैव द्वित्वादिज्ञानमपेक्षितम् ? उताऽऽनुषङ्गि-कमपि पर्याप्तम् । आद्ये, 'गामानय दण्डेन'इत्यत्र गोदण्डयोरपि साक्षाद् द्वि-

अथवा 'इदं रजतम्' इस भ्रमके रहते भी आलस्यके कारण जहाँ प्रवृत्ति न हुई वहाँपर द्वितीय विकल्पात्मक अख्याति (भ्रम) नहीं होनी चाहिए । तीसरा विकल्प भी युक्तियुक्त नहीं है; क्योंकि इस तीसरे विकल्पमें भी विविक्तत्वके अभावका प्रतियोगिभूत विविक्तत्व क्या भेदका ज्ञान है ? अथवा अभेदका अज्ञान विविक्तत्व है, या इतरेतराभाव-भेद-द्वित्वादिसंख्याविशिष्ट ज्ञान विविक्तत्व है ? [जैसे घट और पटका विवेक इतरेतराभावविशिष्टज्ञान है और दोनोंका भेदविशिष्ट ज्ञान भी है एवम् दोनोंमें विद्यमान द्वित्व संख्याविशिष्टज्ञान भी है, अतः इन दोनोंका विवेकग्रह बनता है । अन्यथा अविवेक होगा वैसे ही यहाँ भी समझना चाहिए यह इन विकल्पोंका भाव है] इनमें प्रथम पक्ष—भेदज्ञान युक्त नहीं है, क्योंकि 'इदम्' और 'रजतम्' इन दोनों अपुनरुक्त शब्दोंके स्मृतिके कारण होनेसे 'इदम्' सामान्य और 'रजतम्' विशेष इन दोनोंका भी भेदग्रह स्पष्ट होनेपर 'इदम्' और रजतका अविवेक असम्भव होगा । द्वितीय पक्ष भी उचित नहीं है, क्योंकि जब प्रथम विकल्पके खण्डनके अवसरमें प्रदर्शित रीतिसे भेदग्रह हो ही गया, तब भेदके विरोधी अभेदके अग्रह रहते हुए इस अभेदाऽग्रहके निषेधस्वरूप अविविक्तत्वका सम्पादन दुःसाध्य हो जायगा । तृतीय पक्ष भी ठीक नहीं है, क्योंकि इसमें विकल्प होगा कि निरुक्त द्वित्वादिका ज्ञान साक्षात् रहना चाहिए या उसका आनुषङ्गिकरूपसे रहना भी विवेकग्रहके लिए उपयुक्त है, यदि साक्षात् द्वित्वादिज्ञान विवेकका उपयोगी माना जाय, तो 'दण्डसे गौ ले आओ' इस वाक्यमें गौ और दण्डमें भी साक्षात् * द्वित्वादिकी प्रतीति न होनेसे अविवेककी (भ्रमकी) प्रसक्ति हो जायगी ।

* गौ और दण्ड इनमें साक्षात् एकत्व ही है, अन्यथा इनमें द्विवचन हो जाना चाहिए । यदि गोमें कर्मभाव और दण्डमें करणभावका भेदका साक्षात् होनेसे विवेक है ही, ऐसा

त्वाद्यप्रतीतेरविवेकः प्रसज्येत। द्वितीये, पुरोवर्त्तिरजतयोरप्यानुषङ्गिकद्वित्वादिज्ञानसद्भावादविवेको न स्यात्।

ननु प्रतियोगिनमुपजीव्याविवेकानिरूपणेऽपि धर्मिद्वारा निरूप्यतामिति चेत्? तदप्यसत्; न तावत् प्रतीयमानयोर्धर्मिणोरविवेकः संभवति, अपुनरुक्तत्वेन स्पष्टं प्रतिभासात्। अप्रतीयमानयोरविवेकश्चेत्? सुषुप्तावपि भ्रमः प्रसज्येत।

नन्वविवेको नामाऽसंसर्गाग्रहः। स च प्रतीयमानयोरिदंरजतयोः संभवति, 'इदंरजते असंसृष्टे' इति प्रत्ययादर्शनादिति चेत्, तदाऽपि किं ग्रहण-

---

दूसरे * पक्षमें तो पूरोवर्ती 'इदम्' पदार्थ और 'रजत' इन दोनोंमें भी आनुषङ्गिक द्वित्वादिज्ञानका सद्भाव है ही, अतः इनका (इदम् और रजतका) अविवेक (संसर्गभ्रम) नहीं हो सकेगा।

यदि शङ्का हो कि प्रतियोगी (विवेक) के निरूपण द्वारा अविवेकका प्रतिपादन नहीं बन सकता है, तो मत बने; परन्तु धर्मियोंके द्वारा ही यदि निरूपण कर लिया जाय, तो क्या हानि है ? तो यह भी युक्त नहीं है, क्योंकि प्रतीतिमें आनेवाले "इदम् और रजत" दोनों धर्मियोंका अविवेक सम्भव नहीं है। वहां तो अपुनरुक्त भिन्न-भिन्न इदम् और रजत इस प्रकार प्रतीतिमें आनेसे भेदकी स्पष्ट ही प्रतीति हो रही है। यदि प्रतीतिमें न आनेवाले धर्मियोंके अविवेकका भ्रम मानो, तो सुषुप्तिमें भी भ्रमका प्रसङ्ग हो जायगा। [सुषुप्तिमें किसी भी आकारका ज्ञान नहीं रहता है, यह भाव है।]

पुनः मीमांसक अविवेकका विवरण करता है—असंसर्ग (सम्बन्धाभाव) का अग्रह (ज्ञान न होना) ही अविवेक कहलाता है। और वह असंसर्गका अग्रह प्रतीतिमें भासनेवाले इदम्—पुरोवर्ती और रजतका हो सकता है, क्योंकि इदं और रजत असंसृष्ट (संसर्गाभावविशिष्ट) हैं, ऐसा ज्ञान नहीं होता है। वेदान्ती खण्डन करता है—"यह भी सङ्गत नही है" क्योंकि अविवेकका अर्थ असंसर्गका अग्रह माननेपर भी हम विकल्प करेंगे कि क्या ग्रहण (अनुभव) और

कहा जाय, तो गोगत कर्मकारकत्व और दण्डगत करणकारकत्वका भेद कैसे बनेगा, क्योंकि कारकत्व दोनोंमें समानरूपसे विद्यामान है। तब इन कर्मकारक और करणकारकका भेदप्रयोजक आप कर्मबोधिका और करणबोधिका भिन्न २ दो विभक्तियोंके आनेसे अपुनरुक्त शब्द द्वारा ही भेद कहेंगे, तो आनुषङ्गिक भेदादि द्वारा द्वित्वादिविशिष्टज्ञान हुआ, इस आशयसे माने हुए आनुषङ्गिक द्वित्वादिविशिष्टज्ञान पक्षका खण्डन इस ग्रन्थसे करते हैं—

स्मरणयोरेवाऽसंसर्गाग्रहो विवक्षितः, उत ययोः कयोश्चिद्? आहोस्वित् संसर्गज्ञानरहितयोः। आद्ये 'अहं मनुष्यः' इति भ्रमो न स्यात्; उभयोरपि ग्रहणत्वात्। द्वितीये 'खण्डो गौः, शुक्लः पटः' इत्यपि भ्रमः स्यात्; असंसर्गप्रतीत्यभावात्। तृतीयेऽपि स एव दोषः; नहि तत्र संसर्गज्ञानं संभवति। तद्विषयस्यैक्यस्याऽभावात्। ऐक्यस्य च तद्विषयत्वं प्रत्यभिज्ञायामवगतम्।

यदि गुणगुण्यादिसंबन्ध एव तद्विषयो नैक्यमित्युच्यते तर्हीदं रजतमित्यत्राऽपि सादृश्यसंबन्धस्तद्विषय इति वक्तुं शक्यत्वेन संसर्गप्रत्ययो

स्मरण इन दोनों ज्ञानोंके असंसर्गके अग्रहको ही अविवेक कहते हैं? अथवा किसी भी दो ज्ञानोंके असंसर्गके अग्रहको अविवेक कहते हैं? अथवा संसर्गरहित ज्ञानोंके ही असंसर्गाऽग्रहको अविवेक कहते हैं? यदि प्रथम पक्ष माना जाय, तो 'अहं मनुष्यः' (मैं मनुष्य हूँ) इस प्रतीतिको भ्रम नहीं कहना चाहिए, क्योंकि इस प्रतीतिमें मैं और मनुष्य ये दोनों ज्ञान अनुभवात्मक ही हैं; इसलिए 'अहं मनुष्यः' इस ज्ञानमें ग्रहण और स्मरणके अविवेकरूप भ्रमके लक्षणकी अव्याप्ति हो जायगी। द्वितीय पक्ष माननेसे 'खण्डो गौः' (एक प्रकारका विशेष गौ) इस ज्ञानमें और 'शुक्ल पटः' (सफेद कपड़ा) इस ज्ञानमें भ्रमत्व हो जायगा। इससे लक्षणमें अतिव्याप्ति दोष आवेगा; क्योंकि प्रदर्शित दोनों ज्ञानोंमें असंसर्गकी प्रतीति नहीं है। तृतीय विकल्पमें भी प्रथम विकल्पमें उक्त दोषका ही सद्भाव है, अतः वह भी नहीं माना जा सकता; क्योंकि 'खण्डो गौः' इत्यादि ज्ञानमें संसर्गज्ञानका सम्भव ही नहीं है। संसर्गज्ञानका प्रयोजक ऐक्यज्ञान उक्त ज्ञानमें है ही नहीं। संसर्गज्ञानका ऐक्य आलम्बन है, यह 'सोऽयम्' इत्याकारक प्रत्यभिज्ञामें सिद्ध है।

यदि मीमांसक गुणगुण्यादिसम्बन्ध ही संसर्गज्ञानका आलम्बन है, ऐक्य नहीं, ऐसा समाधान करे, तो 'इदं रजतम्' (यह रजत है) इस ज्ञानमें सादृश्यसम्बन्ध भी संसर्गज्ञानका विषय है, ऐसा भी मान सकते हैं, इससे 'इदं रजतम्' इस भ्रममें भी संसर्गज्ञानका निवारण नहीं हो सकता। [इससे लक्षणमें अव्याप्ति दोष रह जायगा। खण्डनकर्ताका आशय यह है कि गुणगुण्यादि सम्बन्ध सब संसर्गज्ञानके प्रयोजक हैं, यह तो असम्भव होनेसे आप नहीं मान सकते, अतः प्रत्येकको ही उसका प्रयोजक मानना होगा;

दुर्वारः। अथ तत्र नेदं रजतमिति असंसर्गप्रत्ययेन बाधान्न संसर्गतत्प्रत्ययौ संभवतः; तर्हि त्वन्मते गुणगुण्यादावपि इतरेतराभावज्ञानाख्योऽसंसर्गप्रत्ययोऽस्त्येवेति संसर्गतत्प्रत्यययोरसंभवाद् भ्रमत्वापत्तिस्तदवस्था। तस्माद् नाऽसंसर्गाग्रहोऽप्यविवेकः।

नन्वविवेकं दूषयताऽत्र विवेचकं किंचिन्निरूपणीयम्। न तावत् ग्रहणं स्मर्यमाणात् स्वार्थं विविनक्ति; विशेषावभासकत्वस्य दोषैः प्रतिबद्धत्वात्। नाऽपि स्मरणं गृह्यमाणात् स्वार्थं विवेक्तुमलम्, स्मरणाभिमानस्य प्रमुषितत्वादिति चेद्? मैवम्; उभयोरपि विवेचकत्वस्य सुसंपादत्वात्। तथा हि—

इस अवस्थामें हम सादृश्यसम्बन्धको भी संसृष्टभानका प्रयोजक मान सकते हैं, क्योंकि कोई राजनियम तो है नहीं कि केवल पांच ही सम्बन्ध संसर्गज्ञानके प्रयोजक हैं, छठा या सातवाँ नहीं है]। यदि कहो कि 'नेदं रजतम्' (यह रजत नहीं है) इस असंसर्गज्ञानसे बाधित हो जानेके कारण 'इदं रजतम्' इसमें संसर्ग और संसर्गज्ञान नहीं हो सकते, तब तो तुम्हारे (मीमांसकके) मतमें गुणगुण्यादिस्थलमें भी इतरेतराऽभावज्ञानरूप (एकमें दूसरेका परस्पर अभावज्ञानरूप) असंसर्गज्ञान विद्यमान ही है, इससे— संसर्ग और उसके ज्ञानके असम्भव होनेसे गुणगुण्यादिभावविशिष्ट 'शुक्लः पटः' इत्यादि ज्ञानमें भ्रमत्वकी आपत्ति तदवस्थ ही (वैसी ही बनी) है। इससे अव्याप्ति—अतिव्याप्तिदोषपूर्ण होनेसे असंसर्गाऽग्रह—संसर्गके अभावके अग्रहरूप—अविवेकका (भ्रमका) निर्वचन नहीं हो सकता।

शङ्का—अविवेकको अर्थात् ग्रहण और स्मरणके विवेकाग्रहको माननेमें दूषण देनेवाले वेदान्तीको 'ग्रहणस्मरणका अविवेक भ्रम नहीं है, किन्तु ग्रहण-स्मरणसे भ्रममें विवेक (भेद) है' इसको सिद्ध करनेके लिए किसी विवेचकका निरूपण करना चाहिए। ग्रहण तो अपने विषयको स्मरणके विषयसे विभक्त नहीं कर सकता, क्योंकि विशेषको सूचित करनेवाले शुक्तित्वादि दोषोंसे प्रतिबद्ध है। एवं स्मरण भी अपने विषयको अनुभूयमानसे विभक्त करनेमें समर्थ नहीं है, क्योंकि उसका स्मरणाभिमान दोषोंसे ही प्रमुषित हो गया है; [अतः किसी विवेचकके न होनेसे ग्रहण और स्मरणके अविवेकको ही भ्रम मानना चाहिए; उससे अतिरिक्तको भ्रम नहीं मानना चाहिए, यह भाव है।]

किमिदमाकाररजताकारयोस्तत्तज्जातिव्यक्तिविशिष्टयोरेव त्वया भेदोऽभ्युपेयते किं वा केवलयोरपि ? नाऽद्यः, प्रकृतयोरिदमाकाररजताकारयोर्जात्याद्य-विशिष्टयोर्भेदाभावेनैक्ये सति तद्गोचरसंसर्गज्ञानप्रसङ्गात् । द्वितीयेऽपि किं प्रथमज्ञानेन वस्तु गृहीत्वा द्वितीयज्ञानेन धर्मिप्रतियोगिभावमवगत्य पश्चात् तृतीयज्ञानेन भेदो गृह्यते ? उत वस्तुना सहैव भेदग्रहणम् ? आद्ये सर्व-

---

समाधान—नहीं, उक्त शङ्का नहीं करनी चाहिए, क्योंकि ग्रहण और स्मरण दोनों ही विवेचक हो सकते हैं; इसे कहते हैं—* क्या तत्तज्जातिव्यक्तिविशिष्ट इदमाकार और रजताकारके भेदका आप स्वीकार करते हैं ? या केवल इदमाकार और रजतके भेदका ही ? यदि प्रथम पक्ष माना जाय, तो 'इदं रजतम्' इस प्रकृत भ्रममें भासित होनेवाले इदमाकार और रजताकार दोनोंके तत्तज्जातिव्यक्तिविशिष्ट न होनेसे उनका भेद है नहीं, अतः ऐक्य होनेसे ऐक्यालम्बनक संसर्ग-ज्ञानका प्रसङ्ग हो जायगा। [अर्थात् परस्पर विरोधी दो पदार्थोंमें एकका निषेध करनेसे दूसरेका विधान स्वतः सिद्ध हो जाता है, इस प्रसिद्ध नियमसे प्रकृतमें भेदका निषेध करनेसे ऐक्य होगा, और ऐक्यसे संसर्गज्ञानके प्रसङ्गसे भ्रमलक्षणकी आपके मतमें अव्याप्ति होगी, यह भाव है]। यदि द्वितीय पक्ष अभीष्ट है, तो भेदग्रहकी प्रक्रिया बतलाइए । क्या 'इदं रजतम्' इस प्रथम ज्ञानसे वस्तुओंका (इदम् और रजत का) ज्ञान हुआ, अनन्तर दूसरे ज्ञानसे गृहीत वस्तुओंमें धर्मिप्रतियोगिभावका ज्ञान (एक वस्तुमें धर्मिज्ञान दूसरी वस्तुमें प्रतियोगिबुद्धि अर्थात् अमुक वस्तुका भेद अमुक वस्तुमें हैं, इस प्रकारका ज्ञान) करके तदनन्तर तृतीय ज्ञानसे भेदका ग्रह होता है ? अथवा वस्तुग्रहके साथ-साथ प्रथम ज्ञानसे ही भेदका भी ज्ञान हो जाता है ? अर्थात् भेदविशिष्ट ही वस्तुका भान होता है ? ये दोनों ही प्रक्रियाएँ सङ्गत नहीं हैं, क्योंकि यदि प्रथम पक्ष मानो, तो सम्पूर्ण वस्तुओंके ज्ञानको, भेदके ज्ञानसे पूर्व अविविक्तविषयक होनेसे, भ्रमज्ञान कहना पड़ेगा, परन्तु यह किसीको भी इष्ट नहीं है। यदि द्वितीय पक्ष मानो, तो 'इदं रजतम्' इस ज्ञानमें प्रथमतः इदमाकारके ज्ञात होते ही भेदका भी ग्रह हो जानेके कारण

---

* ग्रहणसे स्मरणका और उसके विषयका स्मरणके विषयसे विवेक हो सकता है। इसका समर्थन करते हुए पूर्वोक्त दोषोंका निराकरण करते हैं—'तथाहि' इत्यादिसे ।

पदार्थज्ञानानां भेदग्रहणात् प्राग् अविविक्तविषयतया भ्रमत्वप्रसङ्गः। द्वितीये च इदन्ताग्रहणादेव भेदस्यापि गृहीतत्वेन भेदापेक्षितो विशेषोऽप्यवभासित एवेति ग्रहणस्य विवेचकत्वमङ्गीकार्यम्।

तथा स्मरणमपि विवेचकमेव। नहि स्मरणाभिमानो निरूपयितुं शक्यः, यत्प्रमोषात् स्मृतेरविवेचकत्वम्। तथा हि किं स्मृतिरेव स्मरणाभिमानः स्मृतेरन्यो वा स्मृतिगतधर्मो वा पूर्वानुभवविशिष्टत्वेनाऽर्थग्रहणं वा स्वगत एव कश्चित्स्मृतिविशेषो वा पूर्वानुभवगोचराद्विशिष्टज्ञेयनिमित्तो विशेषो वा फलभेदकजनकत्वं वा स्मरामीत्यनुभवो वा। नाऽद्यः, स्मृतेः

भेदसे अपेक्षित विशेषाकारका भी अवभास हो ही गया, अतः ग्रहणको विवेचक मानना चाहिए अर्थात् जब ग्रहण विवेचक हो गया, तब अविवेक कैसे रह सकता है, यह भाव है।

उसी प्रकार स्मरण भी विवेचक हो ही सकता है, जिसके प्रमोषसे स्मरण विवेचक नहीं बन सकता, ऐसे आपके अभिमत स्मरणाभिमानका निरूपण नहीं किया जा सकता, क्योंकि क्या स्मृति ही स्मरणाभिमान है ? या स्मृतिसे भिन्न ? अथवा स्मृतिमें रहनेवाला धर्म ? अथवा पूर्वानुभवविशिष्टत्वरूपसे (पहिले इसका अनुभव हुआ है, इस प्रकारकी प्रतीतिसे) अनुविद्ध वस्तुका ज्ञान ? अथवा स्वगत कोई स्मृतिविशेष ? (अर्थात् स्मृतिज्ञानमें एक प्रकारकी विलक्षण स्मृति) या पूर्व अनुभवके विषयसे विशिष्ट ज्ञेयका निमित्तरूप विशेष ? अथवा फलभेदका जनक ? (पूर्व अनुभवके फलसे अतिरिक्त विशेष फलका जनक) अथवा 'स्मरामि' (स्मरण करता हूँ) इस प्रकारका अनुभव स्मरणाऽभिमान है ? [इस प्रकार आठ विकल्प दिखाकर खण्डन करते हैं]— प्रथम पक्ष (स्मृति ही को स्मरणाभिमान मानना) तो उचित नहीं है, क्योंकि स्मृतिका प्रमोष होनेसे रजतज्ञानका अभाव ही प्रसक्त होगा अर्थात् रजतकी स्मृति ही तो आपके मतमें भ्रम है, उसका आप प्रमोष मानते हैं, तो अवशिष्ट कौन-सा ज्ञान रह गया, जिसको कि आप भ्रम कहेंगे, यह भाव है। दूसरा पक्ष भी नहीं मान सकते, क्योंकि अतिरिक्तका प्रमोष होनेसे स्मृतिको अविवेचकत्व होगा, इस प्रकार वैयधिकरण्यका प्रसङ्ग आ जाता है। [अर्थात् स्मृतिसे स्मरणाभिमान अतिरिक्त है और उसका ही आप प्रमोष मानते हैं। अतः

प्रमोपे रजतज्ञानस्यैवाऽभावप्रसङ्गात् । न द्वितीयः, अन्यस्य प्रमोपे स्मृतेरविवेचकत्वमिति वैयधिकरण्यापातात् । न तृतीयः, तादृशधर्मानुपलम्भात् । न चतुर्थः, पूर्वदृष्टः स एवाऽयं देवदत्त इति प्रत्यभिज्ञाभ्रमे पूर्वानुभवसंभेदग्रहे सत्येव विना तत्प्रमोपमविवेकदर्शनात् । अथ केवलस्मृतिमभिलक्ष्योक्तम् प्रत्यभिज्ञा तु न तथेति चेत्, तथापि नाऽयं पक्ष एव संभवति । तथा हि— किं पूर्वानुभवः स्वात्मानमपि विषयीकरोति उतार्थमात्रम् ? नाद्यः, वृत्तिविरोधात् । द्वितीये त्वर्थ एव स्मृत्याऽवभास्यो न तु पूर्वज्ञानं तस्याननुभूतत्वात् । ननु ज्ञातो घट इत्यत्र ज्ञानविशिष्टार्थस्मृतिर्दृश्यत इति चेत्, न;

स्मृति पूर्णरूपसे ही रही, उसका तो कोई अंश कम नहीं हुआ, तब स्मृति अपने विषयको अनुभवके विषयसे क्यों न विविक्त कर सकेगी, यह भाव है] । तीसरा पक्ष भी उचित नहीं है, क्योंकि वैसा स्मृतिमें कोई धर्म दीखता ही नहीं है । चौथा पक्ष भी संगत नहीं है, 'पहले देखा गया ही यह देवदत्त है' इस प्रत्यभिज्ञा-भ्रममें पूर्वानुभवके सम्भेदका ग्रह होनेपर ही उस सम्भेदके प्रमोपके बिना अविवेक देखा जाता है । यदि यह समाधान दिया जाय कि उस स्मरणाभिमानका प्रमोप (भ्रमात्मक) स्मृति स्थलमें ही मानते हैं; प्रतिज्ञा वैसी नहीं है; तो भी यह सम्भव नहीं हो सकता है, क्योंकि क्या पूर्व अनुभव अपनेको भी विषय करता है ? या केवल विषयमात्रको विषय करता है ? पहला पक्ष नहीं हो सकता, क्योंकि उसके माननेमें वृत्तिका विरोध हो जायगा । [अनुभव या स्मरण कोई भी ज्ञान हो, सभी अन्तःकरणके वृत्तिविशेष हैं, इनसे दूसरे पदार्थका अवभास होता है, अपना अवभास नहीं, अन्यथा कर्तृकर्मविरोध होगा, इस विरोधसे प्रकृतमें पूर्वज्ञान केवल अर्थमात्रको विषय करता है, अपनेको जो कि अर्थके स्मरणके कारण संस्कारका जनक है, विषय नहीं करता । अतः उसका स्मरणमें विषय होना असम्भव है, क्योंकि पूर्वानुभवमें विषय न होनेसे उसका संस्कार ही नहीं हुआ, तब बिना संस्कारके स्मृति कैसे हो सकती है, संस्कार अनुभूतका ही होता है, अतः यह पक्ष विरुद्ध हुआ, यह तात्पर्य है] । दूसरे पक्षमें तो केवल अर्थ ही स्मृतिका विषय होगा, पूर्वज्ञान विषय नहीं होगा ? क्योंकि वह पूर्व अनुभवका विषय ही नहीं हुआ है । 'ज्ञातो घटः' 'यह

स्मृत्यन्तरत्वात् । अनुव्यवसायेन ज्ञानागोचरानुमानेन वा जन्येयं स्मृतिर्व्यवसायजन्याया घटमात्रगोचरायाः स्मृतेरन्या। न चाऽनयाऽपि स्वजनको [ऽनु] व्यवसायाख्यः पूर्वानुभवो विषयीक्रियते किं तर्ह्यनुव्यवसायेनानुभूतो व्यवसाय [विशिष्टो] घट एव। अत एतत्सिद्धम्—विमता स्मृतिर्न स्वमूलज्ञानविशिष्टमर्थं गृह्णाति, स्मृतित्वात्, पदार्थस्मृतिवत्, इति। पदानि हि स्वसंबद्धेष्वर्थेषु स्मृतिं जनयन्ति।

घट अनुभवका विषय हुआ है' इस प्रकार ज्ञानविशिष्ट अर्थका स्मरण देखा गया है, इससे पूर्व ज्ञान भी स्मृतिका विषय होता है, ऐसा मीमांसकका प्रतिपक्ष भी उचित नहीं है, क्योंकि अनुभवमें ज्ञानविशिष्ट-घटविषयक 'ज्ञातो घटः' इस स्मरणसे यह भिन्न स्मरण है, क्योंकि अनुव्यवसायसे अथवा ज्ञानविषयक अनुमानसे उत्पन्न हुई स्मृति व्यवसाय (प्रथम ज्ञान) से उत्पन्न केवल घटको विषय करने वाली स्मृतिसे भिन्न ही होती है। यह स्मृति भी अपने जनक अनुव्यवसाय-नामक पूर्व अनुभवको विषय नहीं करती, किन्तु 'घटको मैं जानता हूँ' इस अनुव्यवसायसे जाने गये व्यवसायविशिष्ट घटको ही विषय करती है। [शङ्का और समाधानका तात्पर्य यह है कि मीमांसकके मतमें 'ज्ञातो घटः' इस प्रतीतिमें ज्ञानविशिष्ट घटके विषय होनेसे ज्ञान भी स्मरणका विषय कहलाता है। और वेदान्तीके मतमें स्मृति दो प्रकारकी होती है। एक प्रथम ज्ञानसे अनुभूत घट-पटादि विषयकी होती है। इस स्मृतिमें केवल घट-पटादि ही विषय होते हैं, पूर्वानुभवजनित संस्कार द्वारा ही स्मृति होती है। और संस्कार पूर्व अनुभवके विषयका ही हो सकता है, प्रकृतमें केवल घट-पटादि ही पूर्व अनुभवके विषय हैं। अतः अनुभव स्वयं पूर्व अनुभवका विषय न होनेसे संस्कारके विना स्मरणका विषय नहीं हो सकता। दूसरी—अनुव्यवसायसे अथवा घटपटादि विषयमें प्रकटतास्वरूप कार्यसे किये गये कारणभूत ज्ञानके अनुमानसे अनुमित अपनेमें विद्यमान ज्ञान द्वारा उत्पन्न—स्मृति है। इस स्मृतिमें अवश्य पूर्वानुभवका संभेद होता है, क्योंकि इस स्मृतिके जनक अनुव्यवसाय तथा अनुमिति दोनोंमें पूर्वानुभव विषय है]। इससे यह (अनुमान) सिद्ध हुआ कि—विमत स्मृति अपने मूलज्ञानविशिष्ट अर्थका ग्रहण नहीं करती, स्मृति होनेसे, पदार्थस्मृतिके समान; क्योंकि पद अपनेसे सम्बद्ध अर्थोंमें ही

नन्वेतद् बौद्धो न सहते। तथा हि—पदानामर्थैः संयोगादिसंबन्धानामसंभवात् सम्बद्धार्थस्मारकत्वमित्येतदयुक्तम्। बोधजननशक्तिः सम्बन्ध इति चेत्, किमनुभवजननशक्तिः? किं वा स्मृतिजननशक्तिः? नाऽद्यः, पदानां वाक्यरूपेण वाक्यार्थानुभवजनकत्वेऽपि स्वार्थेषु तदसंभवात्। व्युत्पत्तिकाले पदार्थानां मानान्तरगृहीतत्वेनाऽपूर्वार्थत्वाभावात्। तदुक्तम्—'पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते' इति।

द्वितीयेऽपि सा शक्तिर्न तावदज्ञाता स्मृतिमुत्पादयति; ज्ञातकारण-

---

स्मृति उत्पन्न करते हैं। [इससे तात्पर्य यह निकला कि केवल घट-पटादिज्ञानसे उत्पन्न संस्कारोंके द्वारा हुई स्मृति शुद्ध विषयको ही ग्रहण करती है और अनुमान अथवा अनुव्यवसायजन्य संस्कार द्वारा उत्पन्न हुई पूर्व ज्ञानको भी विषय करने वाली स्मृतिसे भिन्न है।]

शङ्का—'पदोंसे अपनेसे सम्बद्ध अर्थकी स्मृति होती है' इस मतको बौद्ध नहीं सहता है, क्योंकि पदोंका अर्थोंके साथ संयोग आदि सम्बन्धोंके असम्भव होनेसे 'पद सम्बद्ध अर्थका स्मरण कराते हैं, यह मत युक्त नहीं है। यदि पदोंकी अर्थबोधोत्पादिका शक्तिको सम्बन्ध माना जाय, तो यह भी नहीं बनता, क्योंकि इस बोधजननशक्तिको क्या अनुभवात्मकबोध-जनन शक्तिरूप मानते हो? या स्मरणात्मक बोधजननशक्तिरूप मानते हो? प्रथम पक्ष तो नहीं माना जा सकता, क्योंकि पदोंमें वाक्यरूपसे वाक्यार्थानुभव-जनकता होनेपर भी उनमें अपने अर्थविषयक अनुभवके प्रति जनकता नहीं है। व्युत्पत्तिकालमें पदार्थोंका दूसरे प्रमाणोंके द्वारा ग्रहण होता है; अतः पदोंका वह अपूर्व अर्थ नहीं कहा जा सकता। [मीमांसकका तात्पर्य यह है कि यद्यपि वाक्यरूपसे पद वाक्यार्थोंके अनुभावक हैं, तथापि प्रत्येक पदकी व्युत्पत्तिके ग्रहके समयमें तो वह अपने-अपने अर्थके ही अनुभावक हैं; इससे पदोंमें अर्थानुभवजनकत्व सिद्ध हो गया। बौद्ध कहता है कि व्युत्पत्तिग्रह तो वृद्ध व्यवहारादिसे ही होता है, और वह अर्थ, जिसको कि आप पदका अर्थ कह रहे हैं; व्यवहार दर्शनादिरूप प्रत्यक्षादि प्रमाणोंके द्वारा ही गृहीत हुआ; पदने कोई अपूर्व अर्थका ग्रहण नहीं कराया, पदार्थ वही माना जा सकता है, जो केवल पदके द्वारा बोधित हो]। ऐसा कहा भी गया है कि यह अधिक अर्थका बोधक न होनेसे (अर्थात् नूतन अर्थका नहीं? प्रत्युत पूर्वसिद्ध अर्थका ही बोधक)

त्वात्। नाऽपि ज्ञाता; शक्तेः कार्यैकसमधिगम्यत्वेन स्मृत्युत्पत्तिशक्तिज्ञानयोः परस्पराश्रयत्वात्। अथोच्यते—मध्यमवृद्धप्रवृत्त्या प्रवृत्तिहेतुज्ञानमनुमाय शब्दानन्तर्यात्तज्जनकत्वं शब्दस्य निश्चित्यावापोद्वाराभ्यां व्युत्पत्तिकाल एव शक्तिनिश्चयान्नान्योऽन्याश्रयतेति। तदापि किं शब्दमात्रे शक्तिनिश्चयः अर्थविशेषसंबद्धे वा? नाद्यः, अस्य

होनेसे स्मारकसे भिन्न नहीं है अर्थात् स्मारक ही है।

यदि स्मरणको जननशक्तिरूप सम्बन्ध मानो, तो वह भी सङ्गत नहीं है; क्योंकि इस पक्षमें अज्ञात होती हुई उक्त शक्ति स्मरणको उत्पन्न नहीं कर सकती, कारण कि ज्ञात ही शक्तिरूप कारणमें कार्यजननसामर्थ्य होती है। [ऐसा न मानने पर जिनको शक्तिग्रहण नहीं है; उनको भी पदश्रवणसे अर्थका बोध हो जायगा]। यदि ज्ञात शक्तिको स्मरणकी उत्पादिका मानो, तो यह भी उचित नहीं है, क्योंकि शक्तिका कार्यके द्वारा ही परिज्ञान होनेसे स्मृतिकी उत्पत्ति और शक्ति इन दोनोंमें परस्पर अन्योन्याऽऽश्रय दोष हो जायगा। [आशय यह है कि जब स्मृतिका उदय हो, तब स्मृतिरूप कार्य 'कार्यमात्रं सकारणकम्' इस व्याप्तिके द्वारा अपनी कारणशक्तिका ग्रह करा सकेगा, और उक्त शक्तिका ज्ञान होनेपर ही स्मृतिकी उत्पत्ति हो सकती है, अतः अन्योऽन्याश्रय है।] उक्त दोषके वारणके लिए यदि कहा जाय कि [उत्तम वृद्धको 'गामानय' इस वाक्यके श्रवणके अनन्तर] मध्यम वृद्धकी (जिससे वह वाक्य काम करानेके अभिप्रायसे कहा गया है) प्रवृत्तिको देखकर प्रवृत्तिके कारण ज्ञानका [मध्यम वृद्ध उक्त वाक्यका अर्थ समझ गया और इस वाक्यका ऐसा ही अर्थ है अन्यथा ज्ञानके विना प्रवृत्ति ही नहीं हो सकती इत्यादि तर्क द्वारा] अनुमान कर शब्दके आनन्तर्यसे (शब्दके श्रवणके अनन्तर तादृश अर्थज्ञानका उदय होनेसे) 'शब्द ही इस अर्थका जनक है' इस प्रकार शब्दकी अर्थजनकत्वरूप सामर्थ्यका निश्चय करके अवाप और उद्धारसे*

* जब प्रथम "गामानय" वाक्य सुना और मध्यमवृद्धके व्यवहारको देखा तब व्युत्पित्सु बालकने उक्त वाक्यका यही अर्थ है ऐसा निश्चय किया। तदनन्तर 'गां बधान' 'अश्वमानय' ऐसे वाक्य सुने और मध्यम वृद्धकी प्रवृत्ति भिन्न भिन्न प्रकारकी देखी बालकने विचार किया गो पद और आश्रय भिन्न भिन्न वाक्योंमें होते हुए भी समान है और अर्थकी भी अनुवृत्ति दिख रही है। इससे गोपदका सास्नालाङ्गूलादिमान् अर्थ है और आनयका दूर देशसे समीप देशमें लाना अर्थ है—इस प्रकारके अन्वय और व्यतिरेकसे प्रत्येक पदके अर्थके बोधक आवापोद्वापको आवापोद्धार कहते हैं।

शब्दस्याऽयमर्थ इति नियमासिद्धिप्रसङ्गात्। द्वितीयेऽपि शक्तिसम्बन्धस्य व्यवस्थापकं संबन्धान्तरमेष्टव्यमित्यनवस्था स्यात्। शक्तिः स्वपरनिर्वाहिका इति चेत्, तथापि स्मृतिकाले किं शब्दमात्रदर्शनादर्थः स्मर्यते किं वाऽर्थगोचरशक्तिमच्छब्ददर्शनाद् उत शक्तिज्ञानजन्यसंस्काराच्छब्ददर्शनाच्च। नाद्यः, अनियमापत्तेः। न द्वितीयः, शब्ददर्शनसमय एवाऽर्थस्याऽपि दृष्टत्वेन शब्दजन्यस्मृतिवैयर्थ्यात्। न तृतीयः, तावता स्मृत्यसंभवात्। अन्यत्र

व्युत्पत्तिके समयमें ही शक्तिका निश्चय हो जायगा [स्मृतिरूप कार्यसे नहीं] अतः अन्योन्याश्रय दोष नहीं हो सकता। तब भी क्या शब्दमात्रमें शक्तिका निश्चय होता है? अथवा अर्थविशेषसे सम्बद्ध शब्दमें शक्तिका निश्चय होता है? यदि शब्दमात्रमें कहो, तो 'इस शब्दका यह अर्थ है' इस प्रकारके नियमकी सिद्धि नहीं बन सकेगी [क्योंकि आप तो अर्थविशेषसे असम्बद्ध शब्दमें ही शक्तिका निश्चय मानते हैं, तब नियम कैसे बनेगा]। अर्थविशेषसे सम्बद्ध शब्दमें ही शक्तिनिश्चय होता है, ऐसे द्वितीय पक्षमें भी तादृश शक्ति-सम्बन्धके व्यवस्थापक दूसरे सम्बन्धकी खोज करनी होगी, फिर उस सम्बन्धके व्यवस्थापक तीसरेका अन्वेषण करना होगा इत्यादि रीतिसे अनवस्था हो जायगी। यदि शक्ति अपनी और दूसरे सम्बन्धकी स्वयं व्यवस्थापिका है अर्थात् सम्बन्धान्तरकी आवश्यकता नहीं है, ऐसा कहो, तो भी यह विकल्प उपस्थित होगा कि जिस समय स्मृति हो रही है, उस समय क्या शब्दमात्रके दर्शन (श्रवण) से अर्थका स्मरण होता है? या अर्थको विषय करनेवाले शक्तिशाली शब्दसे? अथवा शक्तिज्ञानसे उत्पन्न संस्कार और शब्ददर्शन दोनोंसे? इनमें पहला पक्ष नहीं बन सकता, क्योंकि अनियमकी आपत्ति होगी। [यदि सामान्य शब्दश्रवणसे ही अर्थका स्मरण हो जाता है, तो प्रत्येक शब्दसे प्रत्येक अर्थका स्मरण हो जाना चाहिए। अमुक शब्दसे अमुक अर्थका ही स्मरण होता है, ऐसा नियम नहीं बनना चाहिए] दूसरा पक्ष भी युक्त नहीं है, क्योंकि शब्ददर्शनके समयमें ही अर्थका भी ज्ञान हो ही जायगा, ऐसी अवस्थामें अर्थज्ञानके लिए मानी गई शब्द द्वारा अर्थकी स्मृतिका वैयर्थ्य हो जायगा। तृतीय पक्ष भी ठीक नहीं है, क्योंकि इतना माननेपर भी स्मृतिका होना सम्भव नहीं है, कारण कि अन्य स्थलों (शुक्ति-रजत आदि)

स्मारकस्मार्ययोः सादृश्यविरोधिकार्यकारणभावादिसम्बन्धान्तरनियमात् शब्दार्थयोस्तदभावात्। तस्मात् पदानि स्मारकाणि, वाक्यं पुनः प्रमाणमित्येतद्वेदवादिनां प्रक्रियामात्रमिति।

अत्रोच्यते—शब्ददर्शनात् शक्तिसंस्काराच्चाऽर्थस्मृतौ न कश्चिद्दोषः। यदुक्तमन्यत्रेत्यादिना तदसत्। किमन्यत्रेव शब्देऽपि सादृश्यादिकमभ्युपेयमित्युच्यते किं वा शब्दवदन्यत्रापि शक्तिरेवाऽस्तु मा भूत्सादृश्यादिकमिति किं वा शब्दे सादृश्यादिकमूलसम्बन्धाभावात् सत्यामपि शक्तौ न स्मृतिजनकत्वमिति। नाद्यः, शब्दे सादृश्यादर्शनाद्, अदृष्टस्य च कल्पने गौरवात्। अन्यत्र तु दृष्टत्वेनाऽकल्पनीयत्वात्। न द्वितीयः, अनुभूयमानस्याऽ-

---

में स्मारक और स्मार्यमें सादृश्यके विरोधी कार्य-कारणभाव आदि सम्बन्धान्तरोंके रहनेका नियम है, अर्थात् उपरोक्त सम्बन्धोंमें से जब कोई भी एक सम्बन्ध रहेगा, तभी स्मार्यस्मारकभाव होगा [जैसे कि शुक्ति-रजतमें सादृश्य, रामार्जुनमें विरोध, और राम-दशरथमें जन्यजनकभावसे एक दूसरेका स्मरण होता है इत्यादि।] इस प्रकार शब्द और अर्थमें उपरोक्त कोई अन्य सम्बन्ध नहीं है; अतः शब्द और शब्दार्थमें स्मार्यस्मारकभाव न बन सकनेसे पद स्मारक होते हैं और वाक्य प्रमाण है, यह वेदवादी मीमांसकोंकी प्रक्रिया अपनी परिभाषामात्र ही है। इतना बौद्धकी ओरसे 'पद पदार्थका स्मारक है' इस मतमें पूर्वपक्ष हुआ।

इस पूर्वपक्षका उत्तर दिया जाता है। शब्दके साक्षात्कार और शक्तिसंस्कार—इन दोनोंसे अर्थकी स्मृति होनेमें कोई बाधा नहीं है। 'अन्य स्थलोंमें सादृश्य आदि सम्बन्ध ही स्मारक हैं' इत्यादि पूर्वोक्त नियम भी अयुक्त है, क्या अन्य स्थलोंकी भाँति शब्दस्थलमें भी सादृश्य आदि सम्बन्धोंका स्वीकार करना चाहिए? या शब्दस्थलकी भाँति अन्य स्थलोंमें भी शक्तिका ही स्वीकार करना चाहिए? सादृश्यादि सम्बन्धोंका स्वीकार नहीं करना चाहिए? अथवा शक्ति रहते हुए भी सादृश्य आदि मूल सम्बन्धोंके न रहनेसे शब्द स्मृतिका उत्पादक नहीं हो सकता? इसमें प्रथम पक्ष भी नहीं बन सकता, क्योंकि शब्दस्थलमें सादृश्य नहीं पाया जाता है और नूतन 'अदृष्ट' की कल्पना करनेमें गौरव है। अन्य स्थलोंमें तो सादृश्य आदि दृष्ट (अनुभूत) हैं, अतः नवीन कल्पना नहीं

पलापायोगात् । न तृतीयः, शक्तस्य कार्याजनकत्वे व्याघातापत्तेः । तस्माच्छक्तिमन्ति पदानि अर्थेषु स्मृतिं जनयन्त्येव । नहि तत्रार्थैः सह पूर्वानुभवाः स्मर्यन्ते । अन्यथा घटादिवदनुभवानामपि तत्तच्छब्दार्थत्वं प्रसज्येत ।

नाऽपि पञ्चमः, कारणविषयाद्युपाधिमन्तरेण ज्ञानानां स्वरूपेषु क्वापि विशेषानुपलम्भात् । नाऽपि षष्ठसप्तमौ, अनुभवगताभ्यां ज्ञेयफलाभ्यामतिरिक्तज्ञेयफलयोः स्मृतावभावात् । नाऽप्यष्टमः, स्मरामीत्यस्याऽनुभवस्याऽन्य-

---

होती है, (अतः कुछ गौरव नहीं है)। द्वितीय विकल्प भी सङ्गत नहीं है, क्योंकि जिस वस्तुका अनुभव हो रहा हो, उसका अपलाप नहीं किया जा सकता, अर्थात् अन्य स्थलोंमें अनुभवसिद्ध सादृश्य आदि सम्बन्धोंका शब्दद्दष्टान्तसे निषेध नहीं कर सकते । तीसरा विकल्प भी युक्त नहीं है, क्योंकि 'शक्तिके रहते यदि कार्य नहीं हो तो व्याघात दोष होता है। 'यदि शक्ति हो तो कार्य अवश्य होता है' ऐसा नियम है, शक्ति रहते कार्य नहीं होता, ऐसा कहना तो 'मुझमें बोलनेकी सामर्थ्य नहीं है' इस कथनके तुल्य विरुद्ध है। ('शब्दका अर्थके साथ अर्थबोधजननरूप शक्ति ही सम्बन्ध है, उसका ग्रह व्युत्पत्तिकालमें व्यवहार-दर्शनसे हो जानेपर अन्य समयमें भी शब्द साक्षात्कारसे निरुक्त शक्तिसंस्कारके उद्बुद्ध होते ही शब्दसम्बन्धी अर्थका स्मरण हो जाता है' यह उक्त समाधानका सरल तात्पर्यार्थ है)। इससे शक्तिशाली पद अर्थविषयक स्मृति उत्पन्न करते ही हैं, यह सिद्ध हुआ। पदार्थमात्रकी स्मृतिमें अर्थोंके साथ-साथ पूर्व अनुभव (व्यवसाय) भी विषय नहीं होते। यदि पूर्व अनुभव भी स्मृतिके विषय मान लिये जायँ, तो जैसे घट पदका अर्थ घट (कम्बुग्रीवादिमान् पदार्थ) है, वैसे ही ज्ञानको भी घटादि पदका अर्थ मानना होगा। [इससे 'स्मृति विवेचक नहीं हो सकती है' इसमें आपने जो (पूर्वानुभवविशिष्ट अर्थका ग्रहण स्मरणाभिमानरूप) चतुर्थ विकल्प किया है, वह उपपन्न नहीं हो सका] पांचवाँ विकल्प (अपनेमें कोई एक विशेष) भी नहीं हो सकता, क्योंकि ज्ञानोंके स्वतः निराकार होनेसे उनमें कारण या विषय आदि उपाधिके सम्पर्कके बिना स्वयं कोई विशेष उपलब्ध नहीं हो सकता। छठा और सातवां पक्ष भी ठीक नहीं है, क्योंकि अनुभवके ज्ञेय (विषय) तथा फल (प्रकटता आदि) से अतिरिक्त स्मरणका कोई ज्ञेय या फल नहीं है। आठवाँ पक्ष भी ठीक नहीं है, क्योंकि 'स्मरामि' (स्मरण करता

वेदान्तवाक्योंका अर्थनिर्णय करनेके लिए न्यायवाक्योंकी अपेक्षा होती

जिज्ञासा' इत्यादिसूत्रैः सूत्रितः । न च विधिवाक्यार्थस्य तत्र निर्णयः प्रवृत्त इति वाच्यम्, कृत्स्नवेदस्य विधिमात्रपरत्वात् । वेदान्ताः सिद्धपरा इति चेत्, न; तेषामप्यात्मा द्रष्टव्य इत्यादिज्ञानविधिपरत्वात् । तर्हि क्रियाविधिकलापः पूर्वमीमांसायां निरूपितः ज्ञानविधिनिरूपणायोत्तरमीमांसाऽऽरभ्यतामिति चेद्, न; उत्पत्तिविनियोगप्रयोगाधिकाराणां चतुर्णां विध्यपेक्षितरूपाणां क्रियायां निरूपितानां ज्ञानेऽपि न्यायसाम्येन बोद्धुं शक्यत्वात् ।

है। ऐसे न्यायवाक्योंका 'अथातो धर्मजिज्ञासा' इत्यादि सूत्रोंसे प्रतिपादन किया गया है। उनमें केवल विधिवाक्योंके (कर्मकाण्डोंके) अर्थका ही निर्णय किया जाता है, ऐसा नहीं कहना चाहिये, क्योंकि सम्पूर्ण वेदवाक्योंका तात्पर्य विधिमें—क्रियाकलापात्मक कर्मकाण्डमें— ही है [अर्थात् कोई भी ऐसा वेदवाक्य नहीं है, जिसका विचार विधिवाक्योंके विचारसे प्रवृत्त पूर्वमीमांसामें न किया गया हो]। वेदान्तवाक्योंका सिद्ध वस्तुके प्रतिपादनमें तात्पर्य है [साध्यस्वरूप कर्मकाण्डमें नहीं] यह कहना भी उचित नहीं है, कारण कि उनका (वेदान्तवाक्योंका) भी 'आत्मा द्रष्टव्यः' (आत्माका साक्षात्कार करना चाहिए) इत्यादि ज्ञानविधिमें तात्पर्य है। तब तो क्रियाकलापात्मक कर्मकाण्डविधिका निरूपण पूर्णमीमांसामें हो ही गया, सिद्ध वस्तुके विवेकात्मक ज्ञानविधिके निरूपणके लिए उत्तरमीमांसाशास्त्रका आरम्भ किया जाय ? ऐसा कहना भी उचित नहीं है, क्योंकि विधिवाक्योंसे अपेक्षित उत्पत्ति, विनियोग, प्रयोग तथा अधिकार इन चारोंका क्रिया—कर्मकाण्ड—में निरूपण किया गया है; इन्हें न्यायसाम्यसे ज्ञानमें भी जान सकते हैं, [क्योंकि वाक्यार्थ तो सर्वत्र समान रीतिसे ही होता है]।

[अर्थात् क्रियाकलापकी सिद्धि इन चारोंके बिना नहीं हो सकती, अतः इनके ही कारण विधिवाक्योंमें विधिवाक्यत्व बनता है, अन्यथा नहीं। इससे सिद्ध होता है कि जिसको इन चारोंकी अपेक्षा हो, वही विधिवाक्य है। एवं ज्ञानको भी इन चारोंकी अपेक्षा होती है, इससे सिद्ध हुआ कि ज्ञानविधि भी क्रियाकलापके तुल्य विधि ही है। इस तरह ज्ञान तथा क्रिया इन दोनों विधियोंमें कोई वैषम्य नहीं है, यह तात्पर्य है।]

तत्रोत्पत्तिविधिर्नाम कर्मस्वरूपमात्रबोधकः 'अग्निहोत्रं जुहोति' इत्यादिः। तथाऽङ्गाङ्गिसम्बन्धबोधकः 'दध्ना जुहोति' इत्यादिर्विनियोगविधिः। साङ्गप्रधानकर्मण्यनुष्ठानबोधकः प्रयोगविधिः। स च श्रौत इति भाट्टाः। विध्याक्षेपलक्षणोपादानप्रमाणेन कल्पनीय इति प्राभाकराः। फलकामिनो जीवनादिनिमित्तवतो वा कर्मण्यधिकारप्रतिपादकोऽधिकारविधिः। त एते विधयः क्रियायां निरूपिता ज्ञानेऽपि यथायोगमुत्प्रेक्षितुं शक्याः। अन्यथा क्रियामेकामुदाहृत्य निरूपिताः क्रियान्तरे पुनः प्रतिपादनीयाः स्युः।

नन्वभ्यधिकाशङ्काभिर्निराकरणायाध्यायान्तरवच्छास्त्रान्तरमारम्भणी-

---

[उत्पत्ति आदि चारों विधियोंका विवेक दिखलाते हैं—] उनमें कर्मके स्वरूपमात्रका बोध करानेवाली विधि उत्पत्तिविधि है, जैसे 'अग्निहोत्रं जुहोति' (अग्निहोत्र करना) इत्यादि। अङ्गाङ्गिभावरूप सम्बन्धका प्रतिपादन करनेवाली विधि विनियोगविधि है, जैसे 'दधि—दही—से हवन करना' इत्यादि। अङ्ग सहित प्रधान कर्ममें अनुष्ठानका बोध करानेवाली विधि प्रयोगविधि है। वह प्रयोगविधि श्रौत—साक्षात् श्रुतिके तात्पर्यकी विषय—है, ऐसा भट्टमतानुयायी कहते हैं। विधिके आक्षेपात्मक उपादानप्रमाणसे उस प्रयोगविधिकी कल्पना की जाती है, ऐसा प्रभाकरानुयायी मीमांसक कहते हैं। स्वर्गादि फलकी इच्छा रखनेवाले तथा यावज्जीवन शुचिकालकी रक्षाके निमित्त राहूपरागमें स्नान आदिके लिए उपस्थित होनेवाले पुरुषके अश्वमेध आदि यागात्मक स्नान, संध्या आदि क्रियाकलापमें अधिकारका प्रतिपादन करनेवाली विधि अधिकारविधि है। इस प्रकार उक्त चारों विधियाँ, जिनका क्रियामें निरूपण किया गया है, ज्ञानकाण्डमें भी यथायोग—जहांपर जिस प्रकार जिस विधिका समावेश हो सके—लगाई जा सकती हैं। अन्यथा इन चारों विधियोंका जिस एक क्रियाका उदाहरण देकर निरूपण किया गया हो उसी क्रियामें समझी जायँगी, दूसरी क्रियामें पुनः इनका निरूपण करना होगा।

अधिक आशङ्काओंसे (एकके निरूपणके अनन्तर प्रसङ्गसे क्रमशः प्राप्त हुई शङ्काओंसे) [उत्पन्न हुए सन्देहको] दूर करनेके लिए दूसरे-दूसरे अध्यायोंके आरम्भके तुल्य एक शास्त्रके अनन्तर दूसरे शास्त्रका आरम्भ करना

यम् । तथा हि—वेदाप्रामाण्यशङ्कायां प्रथमेऽध्याये तत्प्रामाण्यं निरूपितम् । सर्वकर्मैक्यशङ्कायां द्वितीये 'यजति', 'जुहोति' इत्यादिशब्दान्तरादिहेतुभिरुत्पत्तिविधिभेदपूर्वकः कर्मभेदो निरूपितः । सर्वत्र समप्राधान्यशङ्कायां तृतीये श्रुतिलिङ्गादिप्रमाणैरङ्गाङ्गिभाव उक्तः । चतुर्थे क्रत्वर्थत्वेनैतावतामनुष्ठानं पुरुषार्थ-

---

चाहिए । जैसे—वेदोंमें प्रामाण्यकी आशङ्काका उदय होनेसे [बारह अध्यायवाली पूर्वमीमांसाके] प्रथम अध्यायमें उनके प्रामाण्यका निरूपण किया गया है । सब प्रकारके कर्मोंमें एक ही प्रकारकी विधि प्राप्त होनेकी आशङ्कासे द्वितीय अध्यायमें 'यजति' (याग करना), 'जुहोति' (हवन करना) इत्यादि दूसरे-दूसरे (भिन्न-भिन्न) शब्द आदि हेतुओंसे उत्पत्ति, विधि आदि भेदपूर्वक कर्मोंका भेद दिखलाया गया है । सभी विधिवाक्योंमें समानभावसे प्रधानता प्राप्त होनेकी शङ्कासे तृतीय अध्यायमें श्रुति[२], लिङ्ग[३] आदि प्रमाणोंसे अङ्गाङ्गिभावका—गुणगुणिभावका अर्थात् किसीमें प्रधानत्व और किसीमें उसके उपकारकत्वका निर्णय किया गया है । चौथे अध्यायमें

---

(१) उत्पत्ति, प्रयोग, विनियोग और अधिकार—इस प्रकार चार भेद पहले दिखलाये गये हैं । चारोंका स्वरूपवर्णन आगे चलकर मूलमें ही होगा ।

(२) श्रुत्यादि-न्याय इस प्रकार दिखलाया गया है—श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' यह जै० सूत्र है । इसका तात्पर्य यह है कि सूत्रमें पठित श्रुति आदि जहांपर सब प्राप्त हों वहांपर परको बाध कर पूर्व-पूर्वको मानना चाहिए । [इसमें सूत्रकार अर्थविप्रकर्ष हेतु देते हैं ।] अर्थात् श्रुत्यादिमें लिङ्ग आदि पूर्व-पूर्वकी अपेक्षा पर-पर विलम्बसे अर्थका बोध कराते हैं, अतः पूर्वकी अपेक्षा पर दुर्बल हैं ।

जैसे—'व्रीहीन् अवहन्ति' यह श्रुति दूसरे प्रमाणकी अपेक्षा न रखती हुई स्वतः प्रमाणभूत है । यहांपर अवघातक्रियासे उत्पन्न अतिशयका भागी होना रूप कर्मपदार्थको द्वितीया विभक्तिकी श्रुति ही अपनी प्रकृतिके अर्थभूत व्रीहिको क्रियाके प्रति शेषी—प्रधान—बतला रही है । इसमें दूसरे प्रमाणकी अपेक्षा नहीं है ।

(३) अर्थविशेषका प्रकाश करनेकी सामर्थ्य लिङ्गमें है, जैसे 'बर्हिर्देवसदनं दामि' इस मन्त्रमें उपलादिलवनमें भी अङ्गत्व प्राप्त हो सकता है, परन्तु शब्दसामर्थ्यसे पुरोडाशके सदनस्वरूप कुश, काश आदि स्वरूप मुख्य बर्हिका ही लवन लिया जाता है । कहा भी है—'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' अर्थात् शब्दसामर्थ्यका नाम लिङ्ग है ।

(४) परस्पर आकाङ्क्षादि द्वारा एक ही अर्थमें तात्पर्यका पर्यवसायक पदसमूह वाक्य

त्वेन चैतावतामिति निर्धारितम्। पञ्चमे 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यादौ क्रमो दर्शितः। षष्ठे कामिन इहाधिकारो जीवनादिनिमित्तवतश्चे-हेति विचारितम्। इति पूर्वषट्केन प्रकृतिविध्यपेक्षितो विचारः कृतः। समग्राङ्गसंयुक्तो विधिः प्रकृतिः। विकलाङ्गसंयुक्तो विधिर्विकृतिः। विकृति-विध्यपेक्षितो विचारः सप्तममारभ्योत्तरषट्केन कृतस्तत्रापि सप्तमेन प्रकृत्यु-पदिष्टानामङ्गानां सामान्येन विकृतावतिदेशो निर्णीतः। इत्थं कुर्यादित्यु-पदेशस्तद्वत्कुर्यादित्यतिदेशः। अष्टमे तु प्रकृतिभूतायां दर्शपूर्णमासाख्या-यामिष्टावाग्नेयोऽष्टाकपाल इत्यत्र पुरोडाशप्रकृतिद्रव्यभूतानां व्रीहीणां ये निर्वापावघातप्रोक्षणादयो धर्मा अभिहितास्ते विकृतिभूतसौर्यचरौ व्रीहि-

---

इतनी विधियोंका अनुष्ठान यज्ञका और इतनी विधियोंका अनुष्ठान पुरुषका उपकार करते हैं, यह निर्णय किया गया है। [किसके अनन्तर किसका विधान हो, इस संशयकी निवृत्तिके लिए] पाँचवें अध्यायमें 'वाजपेयनामक यागके अनन्तर 'बृहस्पतियज्ञसे याग करे' इत्यादि वाक्योंमें विधियोंका क्रम दिखलाया गया है। [अधिकारीकी जिज्ञासासे] छठे अध्यायमें कामनावाले पुरुषके [काम्यविधिमें] तथा जीवन आदि निमित्तवाले पुरुषके [नित्य-नैमित्तिकविधिमें] अधिकारका प्रतिपादन किया गया है। इस प्रकार पूर्वमीमांसाशास्त्रके प्रथम छः अध्यायोंसे प्रकृतिविधिमें अपेक्षित विचार किया गया है। सम्पूर्ण अङ्गोंके सहित विधिको प्रकृति कहते हैं और अङ्गोंकी कमी रखनेवाली विधिको विकृति कहते हैं। इस विकृतिविधिका उपयोगी विचार, सातवें अध्यायमें आरम्भ कर, उत्तरार्द्धके छः अध्यायोंमें किया गया है। उनमें भी सातवें अध्यायसे प्रकृतिमें उपदेशरूपसे कहे गये अङ्गोंका विकृतिमें अतिदेश होता है, ऐसा सामान्य नियम बतलाया गया है। 'ऐसा करे' इस प्रकारके कथनको उपदेश कहते हैं। और 'वैसा करे' इसको अतिदेश कहते हैं। आठवें अध्यायमें प्रकृतिस्वरूप दर्शपूर्णमासनामक इष्टिमें—यागमें—'आग्ने-योऽष्टाकपालः, (अग्निदेवतासम्बन्धी पुरोडाश आठ कपालोंमें पकाया जाता है) इस विधिमें पुरोडाशकी प्रकृतिरूप [जिन द्रव्योंसे पुरोडाश बनाया जाता है]

कहलाता है। जैसे-'यस्य पर्णमयी जुहूः' (जिसकी पर्णमयी जुहू है।) इत्यादि वाक्यमें परस्पर समभिव्याहारसे पर्णता और जुहूमें अङ्गाङ्गिभाव प्राप्त होता है।

द्रव्यसारूप्यद्वारेण चरुप्रकृतिभूतव्रीहिष्वप्यतिदिश्यन्त इत्यादिविशेषातिदेशो निरूपितः । तदुक्तम्—

'सप्तमेनातिदेशेन धर्माः सन्तीति साधिते ।
ततोऽष्टमेन यो यस्य यतश्चेति निरूपणा ॥' इति ।

नवमे तु प्रकृत्युपदिष्टमन्त्रसामसंस्कारकर्मणां विकृतावतिदिष्टानां प्रकृति-

---

द्रव्य धानोंके निर्वाप, अवघात, प्रोक्षण आदि जो धर्म बतलाये गये हैं, उन धर्मोंका विकृतिभूत सूर्यदेवतासम्बन्धी चरु—हवनद्रव्य—में व्रीहिरूप द्रव्यके सादृश्यसे चरुके प्रकृतिभूत द्रव्यमें भी अतिदेश किया जाता है, इस रीतिसे विशेष अतिदेशका निरूपण किया गया है । ऐसा कहा भी है—

सप्तम अध्यायमें प्रतिपादित अतिदेशसामान्यसे धर्मोंकी सत्तामात्रका साधन किया गया है, और जिस धर्मका जिससे अतिदेश किया जाता है, इस प्रकारका विशेष अतिदेश आठवें अध्यायमें कहा गया है ।

नवें अध्यायमें तो प्रकृतिमें उपदिष्ट और विकृतिमें अतिदेशसे

---

(१) कार्यान्तरकी अपेक्षाके बलसे दो वाक्योंकी परस्पर आकाङ्क्षासे एकवाक्यताको प्रकरण कहते हैं । जैसे प्रयाजादिमें 'समिधो यजति' (समिधका याग) इत्यादि वाक्यमें फल-विशेषका निर्देश न होनेसे इतना ही बोध होता है कि समिद्यागसे भावना करे, परन्तु क्या भावना करे, ऐसी आकाङ्क्षा बनी ही रह गयी । एवं दर्शपूर्णमासवाक्यमें 'दर्शपूर्ण-माससे स्वर्गकी भावना करे ।' इतना ही बोध होता है । 'कैसे करे' इति कर्तव्यताकी आकाङ्क्षा बनी ही रहती है, इसलिए प्रयाजवाक्य और दर्शपूर्णमासवाक्योंमें, परस्पर साकाङ्क्ष होनेसे, अङ्गाङ्गिभाव उपपन्न होता है ।

(२) क्रम अर्थात् देशसामान्य, वह पाठसादेश्यसे हो अथवा अनुष्ठानसादेश्यसे हो, स्थान कहलाता है । जैसे 'इन्द्राग्निदेवताक एकादश कपालमें संस्कृत पुरोडाशका निर्वाप करे, और विश्वानरदेवताक द्वादश कपालमें संस्कृत पुरोडाशका, इस प्रकार क्रमसे विहित कर्मोंमें 'इन्द्राग्नी रोचनादिव' इत्यादि मन्त्रोंका यथासंख्य प्रथम मन्त्रका प्रथम कर्ममें, द्वितीयका द्वितीयमें क्रमात्मक स्थानबलसे विनियोग होता है ।

(३) योगशब्दोंका योगार्थ समाख्या कही जाती है । जैसे 'होतुरिदं हौत्रम्' यहांपर शैषिक अण्के बलसे हौत्रपदसे विधीयमान कर्म होतासे ही किये जानेवाले होते हैं, इसी समाख्याके बलसे 'औपनिषद' पदसे भी ब्रह्मज्ञानका साधन वेदान्तवाक्य माना गया है । इनके परस्पर विरोधका उदाहरण विस्तारभयसे नहीं दिया गया है ।

विकृत्योर्द्रव्यदेवताभेदे सति प्रकृतिगतद्रव्यादिशब्दं विहाय विकृतिस्थित-द्रव्यादिशब्दाध्याहारादिलक्षण ऊहो दर्शितः। तद्यथा 'अग्नये जुष्टम्' इति मन्त्रस्य विकृतौ सूर्याय जुष्टमिति पदप्रक्षेपः। दशमे तु विकृतावतिदिष्टा-नामङ्गानां प्रकृतौ सावकाशानां विकृतिगतविशेषाङ्गोपदेशादिना बाधो दर्शितः। तद्यथा विकृतावतिदेशप्राप्तानां प्रकृतिसम्बन्धिबर्हिषां शरमयं बर्हिरिति विकृतिगतविशेषोपदेशेन बाधः। तथा 'कृष्णलान् श्रपयेत्' इति विहिते विकृतिभूते कृष्णलपाके प्राकृता अवघातादयः प्राप्ताः, तत्र कृष्ण-लाख्येषु सुवर्णशकलेषु रूपविमोकासम्भवादवघातस्य बाधः। तथा 'तौ न पशौ करो' इति निषेधात् पशावाज्यभागयोर्बाधः। एकादशे त्वनेकशेषिविधि-

---

प्राप्त मन्त्र, साम, संस्कार और कर्मोंका प्रकृति और विकृतिमें द्रव्य-सम्बन्धी देवताओंका भेद होनेपर प्रकृतिमें आये हुए शब्दोंका त्याग कर विकृतिमें आये हुए द्रव्यादि शब्दोंका अध्याहार आदिरूप ऊह दर्शाया गया है। जैसे कि 'अग्नये जुष्टम्' इस मन्त्रका विकृतिमें 'सूर्याय जुष्टम्' ऐसा पदप्रक्षेप किया गया है। दसवें अध्यायमें तो विकृतिमें अतिदिष्ट (अतिदेश द्वारा प्राप्त किये गये) जिन्होंने प्रकृतिमें अवकाश प्राप्त किया है अर्थात् जो चरितार्थ हैं—ऐसे अङ्गोंका विकृतिमें दर्शाये गये विशेष अङ्गोंके उपदेश आदिसे बाध दिखलाया गया है। जैसे विकृतिमें सामान्य अतिदेशवाक्यसे प्राप्त हुए प्रकृतिसम्बन्धी (प्रकृतिमें चरितार्थ हुए) कुशोंका 'शरमयं बर्हिः' (शरकण्डा कुश होना चाहिए) विकृतिमें किये गये विशेष उपदेशसे बाध होता है। एवम् 'कृष्णलोंका पाक करे' इस वाक्यसे प्रतिपादित विकृतिरूप कृष्णलपाकमें प्रकृतिमें होनेवाले अवघात आदि प्राप्त होते हैं। परन्तु वहांपर कृष्णलनामसे कहे जानेवाले सुवर्णके टुकड़ोंमें रूपका विमोक असम्भव है, इसलिए अवघातका बाध होता है। [जैसे व्रीहि आदि द्रव्योंमें अवघात द्वारा उनके तुषादिको पृथक् कर देनेसे प्रथमरूपका परित्याग सम्भव है वैसे सुवर्णके खण्डोंमें सम्भव नहीं है]। तथा 'तौ पशौ न करोति' (उन दोनोंको पशुमें न करे) इस निषेधसे पशुमें आज्य भागोंका बाध होता है। ग्यारहवें अध्यायमें अनेक शेषी—प्रधान—विधिमें प्रयुक्त शेष—उपकारक—विधिका एक बार अनुष्ठान कर देनेसे ही सम्पूर्ण शेषी विधियोंकी उपकारसमानता तन्त्रनामसे कही

प्रयुक्तस्य शेषस्य सकृदनुष्ठानादेव सर्वशेषिणामुपकारसाम्यरूपं तन्त्रनामकमुक्तम् । तद्यथा—आग्नेयोऽष्टाकपालः, उपांशुयागमन्तरा यजति, अग्नीषोमीय एकादशकपाल इत्युक्तपौर्णमासकर्मप्रयुक्तस्य प्रयाजादेः सकृदनुष्ठानादेव शेषित्रयोपकार इति । द्वादशे त्वेकशेषिप्रयुक्तशेषानुष्ठानस्यप्रयोजकसामर्थ्यप्रयुक्तशेष्यन्तरेऽप्युपकारः प्रसङ्गाख्यो दर्शितः । तद्यथा पशुविधियुक्ताङ्गानां पशुपुरोडाशेऽप्युपकारः। तदेवं प्रत्यध्यायमाशङ्कान्तरनिराकरणेन विध्यसम्भेदो यथा निरूपितस्तथा प्रतिपत्तव्यस्य ब्रह्मणः प्रत्यक्षादिभिरसिद्धत्वात् प्रतिपत्तिविध्ययोगाशङ्कायां तन्निराकरणायोत्तरमीमांसाऽऽरभ्यत इति ।

तदेतदयुक्तम्, प्रत्यक्षाद्यसिद्धानामपि यूपाहवनीयादीनां यथा सिद्धिस्तथा ब्रह्मणोऽपि सिद्धौ पृथग् मीमांसानर्थक्यात् ।

गई है । जैसे 'अग्नि देवताके निमित्त आठ कपालोंमें संस्कृत पुरोडाश, उपांशुयाग, अग्नीषोमीय एकादश कपालमें संस्कृत पुरोडाश, इस प्रकार उक्त पौर्णमास कर्ममें प्रयुक्त प्रयाज आदि अङ्गका एक बार अनुष्ठान करनेसे ही शेषी तीनोंका उपकार हो जाता है । बारहवें अध्यायमें एक शेषीसे प्रयुक्त शेषके अनुष्ठानसे पुनः अनुष्ठान न करानेवाले और अनुष्ठान करानेकी सामर्थ्य रखनेवाले दूसरे शेषीकी उपकारसिद्धिका प्रसङ्गनामसे निरूपण किया गया है । जैसे—पशुविधिके अङ्गोंका पशुपरोडाशमें भी उपकार हो जाता है । इस प्रकार प्रत्येक अध्यायमें दूसरी दूसरी आशङ्काओंको दूर करनेसे जैसे विधिके अंशोंका भेद निरूपित है वैसे ही ज्ञेय ब्रह्मकी प्रत्यक्षादि शब्देतर प्रमाणोंसे सिद्धि न होनेसे प्रतिपत्ति—ज्ञानविधि—का सम्बन्ध प्राप्त न होनेकी * आशङ्काके उदय होनेसे उत्तरमीमांसा—वेदान्तविचारात्मक शास्त्र—का आरम्भ किया गया है ।

इस पूर्वोक्त प्रकारसे उत्तरमीमांसाके आरम्भकी आवश्यकताको सिद्ध करना युक्तिसङ्गत नहीं है, क्योंकि प्रत्यक्ष आदि प्रमाणोंसे सिद्ध न होनेवाले यूप—स्तम्भ—आहवनीय—अग्नि—आदि पदार्थविशेषोंकी जैसे सिद्धि होती है, वैसे ही ब्रह्मके भी सिद्ध हो सकनेसे अलग उत्तरमीमांसाशास्त्रका आरम्भ करना सार्थक नहीं हो सकता ।

---

* जब कोई प्रतिपत्तव्य सिद्ध हो तब उसकी प्रतिपत्तिके लिए विधि करना सम्भव है, परन्तु जब ज्ञेय ही नहीं है, तो उसके लिए विधि कैसे सम्भव है ?

अथ मतम्—'यूपं तक्षति' इत्यादौ न यूपमुद्दिश्य तक्षणादि विधीयते, येन यूपाकारस्य लोकप्रसिद्धिरुपेक्ष्येत, किं तर्हि 'खादिरो यूपो भवति' इत्यादिनाऽवगतं खदिरादिप्रकृतिद्रव्यं तक्षति यूपं कर्तुमित्यलौकिकयूपाकारस्य साध्यत्वं प्रतीयते। स चाऽऽकारो 'यूपे पशुं बध्नाति' इति विनियोगदर्शनाद्विशेषतोऽवगम्यते—तक्षणादिपरिनिष्पन्नः पशुबन्धाधारः काष्ठविशेषो यूप इति। एवमाहवनीयादयोऽपि। न त्वत्र तथा ब्रह्मणः किञ्चित्साधकमस्ति। तत आरब्धव्या

['यूपं तक्षति' इस वाक्यसे लोकसिद्ध यूपका विधान नहीं है। जिसका विधान है वह यूप केवल शास्त्रीय है, एवम् आहवनीय अग्निसे महानस आदिमें स्थित साधारण लौकिक अग्नि नहीं ली जाती, किन्तु मन्त्रादि द्वारा विधिपूर्वक संस्कृत अलौकिक अग्नि ली जाती है। जैसे यूप और तादृश अग्नि प्रत्यक्षादिसिद्ध नहीं है। तथापि 'यूपमष्टास्री करोति', 'अग्नीनादधीत' इत्यादि वाक्योंसे इनके विधानकी सिद्धि होती है। इसके लिए पृथक् मीमांसा नहीं की गई है। वैसे ही ब्रह्मके प्रत्यक्षादि सिद्ध न होनेपर भी उसकी 'आत्मा वा अरे द्रष्टव्यः' इत्यादि दर्शन—ज्ञान—विधि उपपन्न हो सकती है, यह तात्पर्य है।]

यदि कहो कि 'यूपं तक्षति' (यूपको छीलता है) इत्यादि वाक्यमें यूपको उद्देश्य करके तक्षण—छीलने—का विधान नहीं है, जिससे कि यूपके स्वरूपकी लोकप्रसिद्धि न मानी जाय, किन्तु 'खादिरो यूपो भवति' (खैरका बना यूप होता है) इत्यादि वाक्यसे प्रतीत हुआ खदिर—खैरका पेड़—आदि यूपकी प्रकृतिभूत द्रव्य यूप बनानेके लिए छीला जाता है, इस प्रकार अलौकिक (प्रत्यक्षादिसे असिद्ध) यूपके आकारका [अष्टास्रीकृत] साध्यत्व प्रतीत होता है। और वह आकार 'यूपमें पशु बाँधा जाता है' इत्यादि विनियोगके दिखाई देनेसे विशेषरूपसे प्रतीत हो जाता है—छिल कर बनाया गया, पशुके बन्धन—रस्सी, शृङ्खला आदि—का आधार एकविशेषप्रकारका काष्ठ यूप—स्तंभ—कहलाता है। यही रीति आहवनीय आदि अग्निस्थलमें भी है। इस प्रकार प्रकृतमें ब्रह्मका साधक कोई नहीं है। अर्थात् अन्यत्र उसका विनियोग नहीं देखा गया है, इसलिए ब्रह्मविषयक प्रतिपत्तिविधिमें सम्भावित उक्त आशङ्काओंके निराकरणके लिए उत्तरमीमांसाशास्त्रके आरम्भकी आवश्यकता आ जाती है। तो यह कहना

उत्तरमीमांसेति । नैतदप्युपपन्नम्, ब्रह्मसिद्धिमन्तरेणापि 'योषा वा व गौतमाग्निः' इत्यादावविवाऽऽरोपितरूपेणोपासने प्रतिपत्तिविध्युपपत्तेः । ततोऽभ्यधिकाशङ्काया अभावान्नोत्तरमीमांसाऽऽरब्धव्या ।

अत्र केचित् सिद्धान्तैकदेशिनोऽभ्यधिकाशङ्कामेवमाहुः—'चोदनालक्षणोऽर्थो धर्मः' इति ब्रुवता विधेः प्रामाण्यं दर्शितम् । न च 'सदेव सोम्य' इत्यादिवेदानां विधिरहितानां तत्सम्भवति । न च तेषां 'सोऽन्वेष्टव्यः' इत्यादिविधिभिरेकवाक्यतेति वाच्यम्, भावकर्मार्थवाचिनस्तव्यप्रत्ययस्य तत्र विधायकत्वाभावात् । विधावपि तव्यप्रत्यययोऽस्तीति चेत्, तथापि नेह विधिः सम्भवति, तव्यप्रत्ययस्य कर्माभिधायित्वात् । 'गन्तव्यम्' इत्यादौ

या मानना भी युक्त नहीं है, कारण कि ब्रह्मकी सिद्धिके बिना भी अर्थात् ब्रह्म असिद्ध भी हो, तो भी आरोपितरूपसे भी उपासनामें प्रतिपत्तिविधिका सम्भव है। जैसे—'हे गौतम, योषा—स्त्री—ही अग्निरूप है' इस वाक्यमें आरोपसे योषा अग्नि मानी जाती है। इसलिए किसी भी अधिक—अतिरिक्त—आशंकाके न होनेसे उत्तरमीमांसा—वेदान्तविचारशास्त्र—के पृथक् आरम्भ करनेकी आवश्यकता नहीं है। [यह शङ्का स्थिर होती है।]

समाधान—इस लम्बे प्रघट्टकसे की गई शङ्काका समाधान कोई सिद्धान्तैकदेशी अतिरिक्त शङ्काको ही इस प्रकार कहते हैं—[अतिरिक्त शङ्का यहांपर हो सकती है जिसके निराकरणके लिए पृथक् मीमांसा आवश्यक है।] 'प्रेरणात्मक अर्थ ही धर्म है' इस पू० मी० प्रथमसूत्रसे ही जैमिनिमुनिने विधिका प्रामाण्य दर्शाया है। 'हे सौम्य, सद्रूप ब्रह्म ही सत्य है' इत्यादि वेद [वेदान्त] वाक्योंका विधिरहित होनेसे प्रामाण्य सम्भव नहीं है, ऐसा भी नहीं कह सकते, और 'उस ब्रह्मकी खोज करनी चाहिए' इत्यादि विधिवाक्योंके साथ उनकी एकवाक्यता होगी, ऐसा भी नहीं कह सकते, कारण कि भाव या कर्म*रूप अर्थका वाचक होनेवाला तव्यप्रत्यय विधिरूप अर्थका बोधक नहीं हो सकता। यदि कहो कि विधिरूप† अर्थमें भी तव्यका विधान है, तो भी प्रकृतमें विधि नहीं हो सकती है, क्योंकि प्रकृतमें तव्यप्रत्यय

---

* 'तयोरेव कृत्यक्तखलर्थाः' पा० सूत्र ही तव्य आदि कृत्यप्रत्ययका भावकर्म अर्थ बोधन करता है।

† 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इस पाणिनिसूत्रसे प्रैष-विधि-में भी कृत्यप्रत्ययोंका विधान होता है।

तु तव्यप्रत्ययस्य भावार्थस्य प्राधान्येन स्वतन्त्रफलाय विधानं युक्तम् । 'स्वाध्यायोऽध्येतव्यः' इत्यत्र कर्माभिधायितव्यप्रत्ययादपि धात्वर्थविषयो विधिर्दृष्ट इति चेद्, अस्त्वप्राप्तस्वाध्यायगतप्राप्तिफलाय तत्र विधिः। प्रकृते तु किं स्वतन्त्रफलाय कर्मीभूतब्रह्मणो दृष्टिर्विधीयते किं वा कर्मकारकगतफलाय । नाऽऽद्यः, अवघातादिवत् कर्मकारकद्रव्ये गुणभूताया दर्शनक्रियायाः स्वतन्त्रफलाय विधातुमशक्यत्वात् । न द्वितीयः, चतुर्विधं हि कर्मकारके क्रियाजन्यफलम्--उत्पत्तिराप्तिर्विकारः संस्कारश्च । तत्राऽऽद्यौ नित्यप्राप्ते निर्विकारे ब्रह्मणि न त्रिविधं फलं सम्भवति । नाऽप्यज्ञानाधर्मादिमलापकर्षणलक्षणः संस्कारः शङ्कनीयः, अवेक्षिताज्यस्येव संस्कृतस्य ब्रह्मणोऽन्यत्र विनियोगाभावात् ।

कर्मरूप अर्थका बोधक है । 'गन्तव्यम्' इत्यादि पदस्थलमें तो भावार्थक तव्यप्रत्ययका प्रधानतया स्वतन्त्र फलके लिए विधान उचित है । [अर्थात् 'गन्तव्यम्' यहांपर किसी कर्मके न होनेसे क्रियाका प्राधान्य प्रतीत होता है । अतः भावार्थक तव्यप्रत्ययके बलसे गमनक्रियामें विधानकी प्रतीति संगत है, लेकिन 'सोऽन्वेष्टव्यः' इत्यादि स्थलमें तत्पदार्थरूप कर्मके रहते क्रिया प्रधान नहीं हो सकती, जिससे कि कर्मार्थक तव्यप्रत्यय भी विधिका बोध करा सके ।] 'स्वाध्यायोऽध्येतव्यः' (स्वाध्याय--वेद--पढ़ना चाहिए) इस वाक्यमें कर्मार्थक तव्यप्रत्ययसे भी धातुके पठनरूप अर्थमें विधि देखी गई है, यदि ऐसा कहो, तो वहांपर अन्य प्रमाणसे प्राप्त न होनेवाले स्वाध्याय प्राप्तिरूप फलके लिए विधि मानी जा सकती है । प्रकृतमें तो क्या स्वतन्त्र फलके लिए कर्मकारक ब्रह्मदर्शनका विधान है अथवा कर्मकारकमें होनेवाले फलके लिए ? इनमें पहला कल्प नहीं हो सकता, क्योंकि अवघात आदिके तुल्य कर्मकारकरूप द्रव्यमें विशेषणीभूत दर्शनक्रियाका स्वतन्त्र फलके लिए विधान नहीं बन सकता । दूसरा पक्ष भी नहीं माना जा सकता, क्योंकि कर्मकारकमें क्रियाके द्वारा चार प्रकारका ही फल हो सकता है—उत्पत्ति, प्राप्ति, विकार और संस्कार । इनमें से प्रथम तीन फल तो उत्पत्तिरहित एवं नित्यप्राप्त तथा विकारशून्य ब्रह्ममें नहीं हो सकते । अज्ञान तथा अधर्मादि रूप मलको दूर करनेसे संस्कारात्मक फलकी भी आशङ्का नहीं हो सकती, क्योंकि अवेक्षण संस्कारसे संस्कृत घृतके तुल्य संस्कृत ब्रह्मका कहीं दूसरी विधिमें विनियोग नहीं है ।

अथाऽऽत्मनि सक्तुन्यायेन विधिः सम्भविष्यति । तथा हि—'सक्तून् जुहोति' इति क्रतुप्रकरणे श्रवणात् क्रत्वङ्गता सक्तुहोमस्याऽवगता। तत्राऽङ्गानि द्विविधानि—अर्थकर्माणि संस्कारकर्माणि च। तत्र कारकाण्यनाश्रित्य स्वातन्त्र्येण गृहीतानि प्रयाजादीन्यर्थकर्माणि । व्रीह्यादिकारकगुणभूतानि संस्कारकर्माणि। तत्र न तावत् सक्तुहोमस्याऽर्थकर्मता, व्रीहिगुणप्रोक्षणवत् सक्तुद्रव्यगुणभूतत्वात् । नाऽपि संस्कारकर्मता । द्विविधो हि संस्कारः—विनियुक्तसंस्कारो विनियोक्ष्यमाणसंस्कारश्च । तद्यथा 'व्रीहिभिर्यजेत' इति विनियुक्तान् व्रीहीनुद्दिश्य विहितः प्रोक्षणादिर्विनियुक्तसंस्कारः। 'आहवनीये जुहोति' इति विनियोक्तुमग्नेराहवनीयत्वसिद्धये विहित आधानादिर्विनियोक्ष्यमाणसंस्कारः । तत्र होमेन भस्मीकृतानां सक्तूनां क्रतुं प्रत्यनुपकारिणां क्रतौ

सक्तुन्यायसे आत्मविषयक विधिका होना सम्भव होगा। सक्तुन्यायका दिग्दर्शन कराते हैं—'सक्तून् जुहोति' (सत्तुओंका हवन करता है) इस वाक्यका यज्ञप्रकरणमें श्रवण होनेसे सक्तुहोमकी यज्ञार्थता—यज्ञका उपकारक होना—प्रतीत होती है। ऐसे स्थलमें अङ्ग—उपकारक—दो प्रकारके होते हैं—एक अर्थकर्म और दूसरे संस्कारकर्म। उन दोनोंमें क्रतुके उपकारकोंका आश्रयण न करके स्वतन्त्ररूपसे उपात्त प्रयाज आदि अर्थकर्म कहलाते हैं और व्रीहि आदि कारकोंके विशेषण हुए संस्कारकर्म कहलाते हैं। इनमें सक्तुहोमको अर्थकर्म—स्वतन्त्रकर्म—नहीं मान सकते, कारण कि व्रीहिका विशेषण जैसे प्रोक्षण होता है वैसे प्रकृतमें होम भी सक्तुरूप द्रव्यका विशेषण है [जैसे 'व्रीहीन् प्रोक्षति' यहांपर प्रोक्षण स्वतन्त्र अर्थकर्म नहीं है वैसे ही 'सक्तून् जुहोति' इस वाक्यमें उपात्त होम भी स्वतन्त्र अर्थकर्म नहीं है, किन्तु सक्तुरूप द्रव्यका विशेषण है]। सक्तुहोम संस्कारकर्म भी नहीं हो सकता। संस्कार दो प्रकारका होता है—एक विनियुक्तका संस्कार और दूसरा विनियोक्ष्यमाणका संस्कार, जैसे 'व्रीहिसे याग करे' इस वाक्यसे यागमें विनियुक्त व्रीहिको उद्देश्य करके कहा गया [व्रीहीन् प्रोक्षति] प्रोक्षण आदि संस्कार विनियुक्तका संस्कार कहा जाता है। 'आहवनीये जुहोति' (आहवनीय—अग्नि—में हवन होता है) इस विनियोगकी सिद्धिके लिए अग्निको आहवनीय बनानेके निमित्त ['अग्नीनादधीत' इत्यादि] विहित आधानादि संस्कार विनियोक्ष्यमाणके संस्कार कहलाते हैं। इन दोनोंमें से सक्तुहोम कोई भी संस्कार

विनियोगासम्भवान्नोभयविधसंस्कारोऽप्यत्र घटते। न च सक्तुहोमवाक्यस्य वैयर्थ्यं युक्तम्, अध्ययनविधिपरिगृहीतत्वात्। तस्मात् 'सक्तून्' इति द्वितीयया ऽवगतं प्राधान्यं विहाय सक्तुभिरिति तृतीयया परिणामेन सक्तूनां गुणभावं होमक्रियायाः प्राधान्यं चोपादायाऽर्थकर्मता निरूपिता। तद्वत् 'आत्मानमुपासीत' इत्यत्राऽप्यात्मनो विभक्तिविपरिणामेनाऽऽत्मगुणकमुपासनाकर्मैव स्वतन्त्रफलाय प्राधान्येन विधीयते।

विषम उपन्यासः। दृष्टान्ते हि शब्दतः करणभूता अपि सक्तवोऽर्थतः कर्मभूताः, होमक्रियाकृतातिशयस्य भस्मीभावलक्षणस्य विकारस्य सक्तुषु सद्भावात्। ततो 'जुहोति' इति सकर्मकधातुप्रयोगो युक्तः। दार्ष्टान्तिके तु यद्यात्मनोऽर्थतः कर्मत्वं तदोत्पत्त्यादीनां चतुर्णां क्रियाफलानामेकं वक्तव्यम्, तच्च निराकृतम्। अकर्मकत्वे चोपासीतेति

नहीं हो सकता, क्योंकि हवनसे भस्म किए गए सक्तुओंका क्रतुके प्रति कोई भी उपकार न होनेसे क्रतुमें विनियोग नहीं हो सकता। सक्तुहोमप्रापक वाक्यको व्यर्थ कहना उचित नहीं है; क्योंकि अध्ययनविधिसे उसका परिग्रह होता है। [अन्यथा स्थालीपुलाकन्यायसे अध्ययनविधिसे परिगृहीत स्वाध्यायमात्रके वैयर्थ्यका प्रसङ्ग हो जायगा।] इसलिए—सक्तुहोमकी सार्थकताके लिए—'सक्तून्' इस द्वितीयासे प्राप्त हुए प्राधान्यका त्यागकर उस पदको 'सक्तुभिः' इस प्रकार तृतीयाविभक्तिमें बदल देनेसे सक्तुओंके विशेषण होने और होमक्रियाके प्रधान होनेसे सक्तुहोममें अर्थकर्मताका निरूपण किया गया है। इस सक्तुहोमके तुल्य 'आत्माकी उपासना करे' इस वाक्यमें भी 'आत्मानम्' इस द्वितीयान्तपदको 'आत्मना' तृतीयान्त परिणाम करके आत्माको विशेषण मानकर प्रधानतया उपासनारूप कर्मका ही स्वतन्त्र फलके निमित्त विधान किया जायगा।

विषम उपन्यास है (अर्थात् दृष्टान्त सक्तुहोम तथा दार्ष्टान्तिक आत्मोपासनामें समानता नहीं है)। कारण कि दृष्टान्तमें 'सक्तुभिः' इस तृतीयान्तपद द्वारा शब्दतः करण होते हुए भी सक्तु अर्थतः कर्म ही हैं, कारण कि होमक्रियासे उत्पन्न किया गया अतिशयरूप भस्म हो जाना विकार सक्तुओंमें विद्यमान ही है। इसीलिए 'जुहोति' यह सकर्मक धातुका प्रयोग किया जाना उचित ही है। दार्ष्टान्तिक ब्रह्ममें यदि अर्थतः—वस्तुतः—कर्मकारक होना माना जाय, तो [क्रियाकृत अतिशय] उत्पत्ति आदि क्रियाके चार फलोंमें कोई एक ब्रह्ममें अवश्य

सकर्मकधातुप्रयोगोऽनुपपन्नः। नन्वात्मन्याप्तिः क्रियाफलं भविष्यति, स्वरूपतो नित्यप्राप्तस्याऽप्युपासनायाः पूर्वं प्रतीतितोऽप्राप्तत्वात्।

नैतद्युक्तम्, स्वप्रकाशचैतन्यरूपत्वेन प्रतीतितोऽपि नित्यप्राप्तत्वात्। अतो विध्यभावादविवक्षितार्था वेदान्ता इति धर्मजिज्ञासानन्तरं स्नानं प्राप्तमिति तामेतामभ्यधिकाशङ्कां निराकर्तुं ब्रह्मजिज्ञासां त एव सिद्धान्तैकदेशिन एवमवतारयन्ति—अथातो ब्रह्मजिज्ञासेति।

अयमभिप्रायः—धर्मजिज्ञासानन्तरं ब्रह्म जिज्ञासितव्यं न स्नातव्यमिति। न च वेदान्तेषु विध्यभावः, 'कटः कर्त्तव्यः' इत्यादिवत् 'आत्मा द्रष्टव्यः' इत्यादौ

रहना चाहिए, इसका हम पहले ही खण्डन कर आए हैं [अर्थात् इन चारोंमें एक भी फल नहीं हो सकता।] और यदि ब्रह्म कर्मकारक नहीं है, तो 'उपासीत' ऐसा सकर्मक धातुका प्रयोग सङ्गत नहीं होगा। आत्मामें प्राप्तिरूप क्रियाफल सम्भव होगा, क्योंकि यद्यपि ब्रह्म—आत्मा—नित्य प्राप्त है तथापि उपासनासे पहले प्रतीतिसे अप्राप्त ही है [जैसे वर्तमान भी सूक्ष्म दृश्य पदार्थ अणुवीक्षण यन्त्रसे देखनेके पूर्व अदृष्ट रहते हैं और यन्त्रव्यापारानन्तर दर्शनमें आते हैं, वैसे ही नित्य प्राप्त भी ब्रह्म उपासनाके विना प्रतीतिमें नहीं आता और उपासनाके माहात्म्यसे आ जाता है। एतावता ब्रह्म प्राप्य कर्म हो सकता है]।

यह कथन भी युक्तिपूर्ण नहीं है, क्योंकि आत्माके स्वप्रकाश चैतन्यरूप होने से प्रतीतिसे भी नित्यप्राप्त है। इसलिए 'द्रष्टव्य' दर्शनको विधि कहना संगत न हो सकनेसे वेदान्तवाक्य [ब्रह्म नित्य सिद्ध वस्तु है ऐसे] विवक्षित अर्थका बोध नहीं करा सकते, इसलिए धर्मजिज्ञासा—कर्मकाण्डप्रतिपादक पूर्वमीमांसा—के अनन्तर स्नान—गार्हस्थ्यदीक्षाके निमित्त स्नान—प्राप्त होता है, इस प्रकार इस बढ़ी हुई आशङ्काको दूर करनेके लिए ब्रह्मजिज्ञासा—वेदान्तवाक्योंका विचारात्मक उत्तरमीमांसा—आवश्यक है। वे ही सिद्धान्तके एकदेशी इस प्रकार अवतरण देते हैं—अब ब्रह्मजिज्ञासाका आरम्भ होता है।

तात्पर्य यह है—धर्मजिज्ञासाके अनन्तर ब्रह्मजिज्ञासा करनी चाहिए, स्नान नहीं। [ब्रह्मजिज्ञासाके अनन्तर ही स्नान—समावर्तन—होना चाहिए] वेदान्तोंमें विधिका अभाव है, ऐसा नहीं कह सकते, क्योंकि 'चटाई बनानी चाहिए' इस विधिके

कर्मकारकगतफलाय विध्युपपत्तेः। सम्भवति ह्यात्मन्यज्ञानादिमलापकर्षणलक्षणः संस्कारः। न च संस्कृतस्याऽऽत्मन आज्यादिवदन्यत्र विनियोगोऽपेक्ष्यते, स्वयमेव पुरुषार्थत्वात्। अपुरुषार्थसंस्कारस्यैव विनियोगापेक्षत्वात्। तदेवं वेदान्तेषु विध्यभावलक्षणामभ्यधिकाशङ्कां निराकृत्य प्रतिपत्तिविधिं च समर्थयितुमुत्तरमीमांसारम्भ इति। तदेतत् सिद्धान्तैकदेशिमतं पूर्वपक्षिणो नाभिमतम्। तथाहि—सिद्धान्तैकदेशिना विध्यभावलक्षणाभ्यधिकाशङ्काकाले परमा युक्तिरन्तेऽभिहिता—स्वप्रकाशचैतन्यरूपत्वेन प्रतीतितोऽपि प्राप्तत्वान्नोपासनाविधिरिति। सा न युक्ता, यथा 'हिरण्यं भार्यम्' इत्यत्र भूषणार्थत्वेन प्राप्तं हिरण्यधारणमभ्युदयार्थत्वेन नियम्यते तद्वत् प्राप्तस्याऽप्यात्मज्ञानस्य कर्तृसमवायिमोक्षफलाय नियमविधिसम्भवात्।

सदृश 'आत्मदर्शन करना चाहिए' इत्यादि वाक्यमें आत्मरूप कर्मकारकमें फलकी उपपत्तिके लिए दर्शनविधि उपपन्न है। और आत्मामें अज्ञानादि मलका हटाना आदि संस्काररूप क्रियाफलका सम्भव है। दर्शनविधिसे सहमत ब्रह्मका [अवेक्षणसे संस्कृत घृतकी तरह] 'आज्याहुतीर्जुहोति' इत्यादिके समान दूसरी विधिमें कहीं भी विनियोग अपेक्षित नहीं है, क्योंकि ब्रह्मदर्शन स्वयं पुरुषार्थ है। जो संस्कार पुरुषार्थ नहीं हैं, उनके ही अन्यत्र विधिमें विनियोगकी अपेक्षा होती है। [अन्यथा संस्कार व्यर्थ होगा, पुरुषार्थ संस्कार तो स्वयं सफल है।] इस प्रकार वेदान्तोंमें विधिके प्राप्त न होने की बढ़ी हुई आशङ्काका खण्डन करके प्रतिपत्तिविधिका समर्थन करनेके लिए उत्तरमीमांसाका आरम्भ करना आवश्यक है। इस प्रकारके सिद्धान्तके एकदेशियोंका मत पूर्वपक्षीको सम्मत नहीं है। पूर्वपक्षीकी असम्मतिका वर्णन करते हैं—उक्त सिद्धान्तैकदेशीने वेदान्तोंमें विधिके प्राप्त न होने की बढ़ी हुई आशङ्का दिखानेके अवसरपर अन्तमें सबसे बढ़ी-चढ़ी यही युक्ति दिखलाई है कि स्वप्रकाश चैतन्यरूप होनेसे ब्रह्म प्रतीतिसे भी प्राप्त ही है, इसलिए उसे पानेके लिए उपासनाका विधान नहीं बन सकता, वह युक्त नहीं है, क्योंकि जैसे 'सुवर्णका धारण करना चाहिए' इस विधानमें भूषणके निमित्त प्राप्त हुआ सुवर्णका धारण करना अभ्युदय फलके लिए है ऐसा नियम माना जाता है वैसे ही नित्य प्राप्त भी आत्मज्ञान उपासनाकर्ताके मोक्षरूपी फलको देनेवाला है, ऐसा नियमविधान सम्भव हो सकता है।

हिरण्यधारणस्याऽप्राप्तिरपि पक्षेऽस्तीति नियमविधिस्तत्राऽस्तु। इह तु स्वरूपचैतन्यत्वेनाऽऽत्मप्रतीतेर्नित्यप्राप्तत्वान्न नियमविधिरिति चेत्, तर्ह्यनात्मप्रतिभासनिवृत्तये परिसंख्याविधिरदृष्टार्थः स्यात्। अतो नाऽभ्यधिकाशङ्का सम्भवति।

यच्चाभ्यधिकाशङ्कानिराकरणे तेनैव सिद्धान्तैकदेशिना फलमविद्यादिमलापनयनमुक्तम्। तदप्यसत्, किं लौकिकात्मज्ञानमविद्यामपनयति उताऽलौकिकात्मज्ञानम्। आद्येऽपि न तावत् स्वरूपमेव तामपनयति, अहमिति सर्वदाऽऽत्मप्रतीतावप्यविद्यानिवृत्त्यदर्शनात्। नाऽपि विधिबलात्। तर्ह्यसम्भावितपाकेषु कृष्णलेषु विधिबलादपि मुख्यः पाको

पक्षमें हिरण्यधारण करनेकी अप्राप्ति भी है [ऐसी कोई राजाज्ञा या स्वभाव नहीं है कि सब ही सुवर्णधारण करें। अतः सुवर्णधारण पाक्षिक प्राप्त है], इससे वहांपर नियमविधि हो सकती है। लेकिन ['नियमः पाक्षिके सति'] प्रकृतमें स्वरूपचैतन्य होनेसे आत्मप्रतीति नित्य प्राप्त है, [क्योंकि उसका सबको ही और सर्वत्र प्रकाश होना स्वरूपप्राप्ति सार्वदेशिक है, पाक्षिक नहीं है।] इससे नियमविधिका होना सम्भव नहीं है। यदि ऐसी शङ्का करो, तो वह ठीक नहीं है, क्योंकि अनात्माकी निवृत्तिके लिए परिसंख्याविधि ही अदृष्टफल मान ली जायगी। इसलिए आपकी बढ़ी हुई [वेदान्तोंमें विधिका अभावरूप] आशङ्का सम्भव नहीं है।

और जो उक्त अभ्यधिक शङ्काका निवारण करते हुए उस सिद्धान्तैकदेशीने ही अविद्यादि मलका दूर करना फल कहा है वह भी असंगत है, क्या लौकिक आत्मज्ञान अज्ञानको दूर करता है? अथवा अलौकिक आत्मज्ञान? प्रथम पक्ष माननेमें [लौकिक आत्मज्ञानका] स्वरूप ही अविद्याकी निवृत्ति नहीं करा सकता, कारण कि 'अहम्' (मैं) इस प्रकार सदैव आत्माकी प्रतीति होनेपर भी अविद्याकी निवृत्ति नहीं देखी जाती। 'विधान किया गया' इस विधानकी सामर्थ्यसे निवृत्ति मानी जाय, ऐसा भी नहीं है, क्योंकि जिनका पाक होना सम्भव नहीं है [अर्थात् जिनमें पाकसे कोई विलक्षण आकार, रूप, रस आदि नहीं हो सकते] ऐसे कृष्णल सुवर्णके टुकड़ोंमें पाकका विधान करनेकी सामर्थ्यसे

दर्शयितुं शक्यः । द्वितीयेऽपि किं तादृशात्मज्ञानमत्यन्तमप्रसिद्धमुत सामान्यतः प्रसिद्धम् अथवा विशेषतः ? नाऽऽद्यः, अत्यन्ताप्रसिद्धस्य विध्ययोगात् । यागादावपि हि कश्चिद्यागं दृष्टवतः पुरुषस्य यागत्व-सामान्योपाधिना प्रसिद्धौ सत्यां दृष्टयागव्यक्तिसदृशं यागव्यक्त्यन्तरं प्रति-पत्तृबुद्धिस्थमेव विधीयते । अन्यथा 'ममेदं कर्त्तव्यम्' इति प्रति-पत्त्यसम्भवात् । न द्वितीयः, अलौकिकात्मज्ञानत्वसामान्याक्रान्तस्य व्यक्ति-विशेषस्य कस्यचिदपि पूर्वमननुभूतत्वात् । तृतीयेऽपि किं तादृगात्मज्ञानं पुरुषान्तरे विशेषतः प्रसिद्धम् उत विधेः प्रतिपत्तर्यधिकारिण्येव ? नाऽऽद्यः, पुरुषान्तरप्रसिद्धेरधिकारिणं प्रत्यनुपयोगात् । न द्वितीयः, अधिकारिणि विशेषतः प्रसिद्धस्यांऽर्थस्य विधिवैयर्थ्यात् । तदेवं सिद्धान्तैकदेशिनाऽभिहि-तयोरभ्यधिकाशङ्कातन्निराकरणप्रकारयोरसंगतत्वान्न तेनोत्तरमीमांसाया अगतार्थत्वं प्रतिपादयितुं शक्यम् ।

भी मुख्य पाक दिखलाया जा सकता है। [कृष्णलोंमें मुख्य पाक माना नहीं गया है] दूसरा—अलौकिक आत्मज्ञानसे निवृत्ति—पक्ष माननेमें क्या वैसा—अलौकिक—आत्मज्ञान अत्यन्त अप्रसिद्ध है ? अथवा सामान्यतः प्रसिद्ध है ? या विशेष रूपसे प्रसिद्ध है ? प्रथम पक्ष नहीं बनता, क्योंकि अत्यन्त अप्रसिद्धका विधान नहीं हो सकता। यागादिस्थलमें भी किसी यागको देख चुके पुरुषका यागत्वसामान्यरूपसे प्रसिद्धिके सिद्ध होनेपर दृष्ट यागविशेषके सदृश ज्ञाताकी बुद्धिमें स्थित ही दूसरे यागका विधान किया जाता है। अन्यथा 'मेरा यह कर्तव्य है' ऐसा ज्ञान सम्भव न होगा। दूसरा पक्ष भी नहीं बनता, क्योंकि अलौकिक आत्मज्ञानत्वसामान्यसे अवच्छिन्न किसी भी ज्ञानव्यक्तिविशेषका पहले अनुभव ही नहीं हुआ है। तृतीय पक्ष माननेमें भी क्या वैसा आत्म-ज्ञान दूसरे पुरुषमें विशेषरूपसे प्रसिद्ध है ? अथवा विधिके जाननेवाले अधिकारीमें ही विशेषरूपसे प्रसिद्ध है ? इनमें प्रथम पक्ष ठीक नहीं है, क्योंकि दूसरे पुरुषकी प्रसिद्धिका अधिकारीके प्रति कोई उपयोग नहीं है। दूसरा पक्ष भी कोई कार्यसाधक नहीं है कारण कि अधिकारीमें विशेषरूपसे प्रसिद्ध अर्थका विधान करना व्यर्थ है। तब तो इस प्रकार सिद्धान्तके एकदेशीसे प्रतिपादित अधिक आशङ्का और उसका निराकरणप्रकार दोनों संगत नहीं हैं, इससे उत्तरमीमांसा गतार्थ नहीं है, ऐसा प्रतिपादन नहीं किया जा सकता है।

अपरे पुनः सिद्धान्तैकदेशिन एवमगतार्थत्वमाहुः—न वयं तद्वद् वेदान्तेषु विध्यभावलक्षणामभ्यधिकाशङ्कां ब्रूमः, येनोक्तदोषः स्यात्, किन्तु विधिमभ्युपेत्यैव ब्रह्मासिद्धिलक्षणाम् । तथा हि—प्रतिपत्तिविध्यपेक्षितानामुत्पत्त्यादीनां चतुर्णां रूपाणां क्रियाविध्युक्तन्यायेन यद्यपि निर्णयः सिद्धः तथापि प्रतिपत्तव्यस्य ब्रह्मणः सिद्धवस्तुप्रतिबोधनसमर्थैरपि प्रत्यक्षादिभिरदर्शनाद् वेदस्य च कार्यमात्रपरस्य सिद्धब्रह्मतत्त्वाप्रतिपादकत्वादारोपितरूपस्य च ब्रह्मण उपासनायां मोक्षलक्षणात्यन्तिकफलासम्भवादनुपास्यमेव ब्रह्मेत्येतामभ्यधिकाशङ्कां निराकर्तुमुत्तरमीमांसाऽऽरब्धव्या ।

तत्र चैवं निर्णीयते—न कार्यमात्रपरो वेदः, उपासनाविधिपरैर्वेदान्तैर्ब्रह्मणोऽप्यवगम्यमानत्वात् । यथा रूपप्रत्यायनाय प्रवृत्तं चक्षुर्द्रव्यमपि प्रख्यापयति तद्वत् ।

दूसरे सिद्धान्तके एकदेशी उत्तरमीमांसाकी इस प्रकार अगतार्थता कहते हैं—हम (दूसरे सिद्धान्तैकदेशी) उन सिद्धान्तैकदेशियोंके समान वेदान्तोंमें विधिके अभावरूप अभ्यधिक आशङ्काको नहीं कहते हैं, जिससे कि पूर्वपक्षीका दिया हुआ दोष आ सके । किन्तु विधिको मानकर ही ब्रह्मकी असिद्धिको कहते हैं । कथित ब्रह्मासिद्धिका प्रतिपादन करते हैं,—क्योंकि प्रतिपत्तिविधिसे अपेक्षित उत्पत्ति आदि चारों प्रकारोंका क्रियाविधिस्थलमें कहे गये न्यायसे यद्यपि निर्णय सिद्ध है तथापि प्रतिपत्तिके कर्म ब्रह्मका सिद्ध [घट पट आदिरूप] वस्तुके बोध करानेमें समर्थ प्रत्यक्ष आदि प्रमाणोंसे दर्शन नहीं हो सकता, तथा वेदका कार्यमात्रमें तात्पर्य है, अतः वह सिद्ध—अकार्य—ब्रह्मतत्त्वका प्रतिपादक नहीं हो सकता । और ब्रह्मकी आरोपितरूपसे उपासना करनेसे मोक्षस्वरूप अव्यभिचरित फलका सम्भव न होनेसे ब्रह्म उपासनायोग्य नहीं होगा, इन दोनों बढ़ी हुई आशङ्काओंके निवारणके लिए उत्तरमीमांसाका आरम्भ करना आवश्यक है ।

इस एकदेशीके मतमें सिद्धान्तका निम्न प्रकारसे निर्णय किया जाता है—वेदोंका तात्पर्य केवल कार्य—विधि—में ही नहीं है क्योंकि उपासनाविधिमें तात्पर्यवाले वेदान्तवाक्योंसे [कार्यसे भिन्न सिद्ध] ब्रह्मकी भी प्रतीति कराई जाती है । जैसे रूपका ज्ञान करानेके लिए प्रवृत्त हुआ चक्षु द्रव्यका भी बोध कराता है वैसे ही उपासनापरक वेदान्तवाक्य भी सिद्ध ब्रह्मकी प्रतीति कराते हैं ।

ननु कथं वेदानामुपासनाविधिपरत्वम्? न तावदुपासनं नाम ब्रह्मापरोक्षज्ञानम्, तस्य परमानन्दसाक्षात्काररूपत्वेन फलभूतस्य स्वर्गवदविधेयत्वात्। नाऽपि दृष्टिज्ञानं, तत्र विधेरश्रवणात्। नहि शाब्दज्ञानं कर्तव्यमित्येतादृशो विधिः क्वचिच्छ्रूयते। मैवम्, 'इदं सर्वं यदयमात्मेत्मा' इत्यादिवाक्यानां विधिपराणां शाब्दज्ञानविधौ पर्यवसानात्। न च वाच्यं यदयमात्मेत्यात्मस्वरूपमुद्दिश्य तदिदं सर्वमिति प्रपञ्चरूपत्वविधाने सति आत्मनोऽचेतनत्वप्रसङ्गेन विधेर्बोद्धुरभावादात्मनः प्रपञ्चरूपत्वस्याऽपुरुषार्थत्वात् कथमेतद्वाक्यं विधिपरमिति? यदिदं सर्वमिति प्रतिपन्नं प्रपञ्चमुद्दिश्य

शङ्का—वेदोंका उपासनाविधिमें तात्पर्य ही कैसे हो सकता है? [उपासना विधिकी अनुपपत्ति दिखानेकेलिए विकल्प करते हैं] ब्रह्मके अपरोक्ष ज्ञानको—साक्षात्कारको—उपासना नहीं कह सकते, कारण कि यह तो परम आनन्द साक्षात्काररूप होनेसे उपासनाका फलस्वरूप माना गया है। अतएव स्वर्गके सदृश विधेय नहीं हो सकता।

[यहांपर वैधर्म्यसे दृष्टान्त है जैसे—स्वर्ग आदि फल याग द्वारा उत्पाद्य होनेसे विधेय हो सकते हैं अतः ऐसे फलोंकी उत्पादक विधिका अनुशासन सम्भव है, परन्तु सुख आदिका साक्षात्कारात्मक अनुभव-ऐसे, जो फल उत्पाद्य नहीं हो सकते, उनका विधेय होना या इनके लिए विधिका प्रतिपादन करना संगत नहीं है।] और दृष्टिज्ञानको—शब्दोंके द्वारा दर्शनको—भी उपासना नहीं कह सकते, कारण कि इस शाब्द ज्ञानके विधानका श्रवण नहीं है। 'शाब्द ज्ञान करना चाहिए' ऐसे विधिवाक्यका कहीं श्रवण नहीं है।

समाधान—ऐसी शङ्का नहीं हो सकती, क्योंकि 'यह सब जो कुछ है वह सब आत्मा ही है' इत्यादि विधिपरक वाक्योंका शाब्द ज्ञानके विधानमें ही पर्यवसान है।

ऐसी शङ्का भी नहीं करनी चाहिए कि 'जो यह आत्मा' इत्यादि प्रकारसे आत्माके स्वरूपको उद्देश्य करके उसमें 'वह यह सब' इस प्रकार प्रपञ्चरूपत्वका विधान होनेपर आत्माके अचेतन होनेका प्रसङ्ग होनेसे विधिका ज्ञाता कोई (चेतन) रहेगा ही नहीं। इसलिए आत्माका प्रपञ्चरूप होना पुरुषार्थ नहीं माना जा सकता। इस अवस्थामें 'इदं सर्वं यदयमात्मा' इत्यादि वाक्यका

तदयमात्मेत्यप्रतिपन्नात्मरूपस्यैव विधानात्। 'नेति नेति' इत्यादिवाक्यपर्यालोचनया प्रपञ्चं प्रविलाप्याऽऽत्मैव विधेय इति विशेषनिश्चयात्। यद्यपि 'इदं सर्वं यदयमात्मा' इत्यत्र विधिर्न श्रूयते तथापि 'पूषा प्रपिष्टभागः' इत्यादाविव विधिः कल्प्यतामिति।

तमेतमप्येकदेशिशास्त्रारम्भप्रकारं पूर्वपक्षी नाऽङ्गीकुरुते। तथा हि—'पूषा प्रपिष्टभागः' इत्यत्र प्रपिष्टो भागो यस्येति समासे यथा प्रमीयमाणो द्रव्यदेवतासम्बन्धः स्वाविनाभूतं यागं गमयति। यागश्च स्वाविनाभूतं

[शाब्द ज्ञानरूप] विधिमें कैसे तात्पर्य हो सकता है? कारण कि 'यदिदं सर्वम्' जो यह सब माना हुआ (दृश्यमान संसार) है, उसको उद्देश्य करके 'तदयमात्मा' (वह यह आत्मा ही है) इस प्रकार अप्रतिपन्न (जो सर्ववादियोंका सम्मत नहीं है) आत्माके स्वरूपका ही विधान है। [दृश्यमान जगत्को नैयायिक 'यथार्थ', वेदान्ती 'प्रातिभासिक' इत्यादि जिस किसी रूपसे सभी वादी मानते ही हैं। परन्तु उस प्रपञ्चको वेदान्तीसे अतिरिक्त कोई भी वादी ब्रह्मरूप नहीं मानता। इससे अप्रतिपन्नका विधान सङ्गत है] क्योंकि 'नेति नेति' (ऐसा नहीं, ऐसा नहीं) इत्यादि वाक्यका विचार करनेसे 'अध्यारोपापवादन्यायसे' प्रपञ्चका—दृश्य जगत्का—निराकरण [यहाँपर अपने-अपने कारणमें लयरूप निराकरण है] करके आत्मा ही विधेय है, ऐसा विशेष निश्चय होता है। यद्यपि 'इदं सर्वं यदयमात्मा' इस वाक्यमें विधिका श्रवण [विधिके बोधक तव्य या लिङादि प्रत्यय] नहीं है, तथापि 'सूर्य प्रपिष्टभागवाला है' * इत्यादिके समान विधिकी कल्पना करनी चाहिए।

इस प्रकार एकदेशी द्वारा प्रतिपादित शास्त्रारम्भप्रकारका भी पूर्वपक्षी स्वीकार नहीं करता। खण्डनप्रकार कहते हैं—'पूषा प्रपिष्टभागः' यहांपर प्रपिष्ट है भाग जिसका, इस समासमें जैसे निश्चितरूपसे ज्ञात होनेवाले द्रव्यका देवताके साथ सम्बन्ध अपने अविनाभूत † यागका बोध कराता है।

* जैसे 'प्रपिष्टभाग' इस पदमें 'प्रपिष्टरूपो भागो यस्य' इस प्रकार षष्ठ्यर्थमें बहुव्रीहि समास है, जिसके द्वारा देवताके साथ प्रपिष्टरूप द्रव्यके सम्बन्धका बोध होता है और वह सम्बन्ध अन्य किसी भी प्रमाणसे सिद्ध नहीं है, अतः अपूर्व होनेसे पूषा—सूर्यरूप देवता—के उद्देश्यसे प्रपिष्टरूप द्रव्यका वैध त्याग करना प्राप्त होता है, इसलिए वहांपर विधिबोधक पदकी कल्पना करनी पड़ती है वैसे ही ब्रह्ममें भी समझना चाहिए।

† द्रव्य—पिष्टादि—इस भूलोकमें हैं और पूषा आदि देवता तत्तत् लोकमें अथवा मन्त्रात्मक

विध्यर्थं नियोगमिति । श्रुतसामर्थ्याद्विध्यर्थे प्रतिपन्ने व्यवहारमात्राय पूषोद्देशेन पिष्टपरित्यागः कर्त्तव्य इत्युपसंह्रियते । तद्वदत्र न द्रव्यदेवतासम्बन्धः प्रमीयते, यद्बलाद् विधिः कल्प्येत ।

अथ मन्येत—यथा 'विश्वजिता यजेत' इत्यादिषु प्रमीयमाणौ यागनियोगावन्यथानुपपत्त्या चेतनं स्वर्गकामं नियोज्यं कल्पयतः, तथेहापि श्रूयमाणश्चेतन आत्मा यागनियोगौ कल्पयतीति । तदसत्, अनुपपत्तेर-

और याग अपने अविनाभूत † विध्यर्थ नियोगका बोधन कराता है । इस प्रकार 'पूषा प्रपिष्टभागः' इत्यादि श्रवणकी सामर्थ्यसे विध्यर्थ नियोगकी सिद्धि होनेपर केवल व्यवहारके लिए 'सूर्यके उद्देश्यसे पिष्टका परित्याग करना चाहिए' ऐसा उपसंहार किया जाता है । [अर्थात् 'पूषा प्रपिष्टभागः' यहांपर उक्त रीतिसे प्रपिष्टभागपदके श्रवणसामर्थ्यसे ही विधिकी प्रतीति हो जाती है केवल स्पष्ट प्रतीतिके लिए विध्यर्थक 'कर्तव्य' आदि पदकी कल्पना करनी पड़ती है । कर्तव्य आदि पदोंकी कल्पनाके अनन्तर विधिकी प्रतीति होती है, ऐसा नहीं है ।] वैसे ही 'सर्वं यदयं मात्मा' इस प्रकृत वेदान्तवाक्यमें किसी देवता और द्रव्यके सम्बन्धकी प्रतीति नहीं होती, जिसकी सामर्थ्यसे विधिकी कल्पना की जाय ।

शङ्का—जैसे 'विश्वजित् यागके द्वारा इष्टकी भावना करनी चाहिए' इत्यादि स्थलोंमें प्रतीत होनेवाले याग और विध्यर्थ (नियोग) अपनी अन्यथा अनुपपत्तिसे स्वर्गकी इच्छा रखनेवाले चेतन नियोज्य (अधिकारी) की कल्पना करते हैं, वैसे ही प्रकृतमें भी श्रुतिसे प्रतीयमान चेतन आत्मा भी याग और नियोगकी कल्पना कर लेगा ।

समाधान—ऐसा कहना युक्त नहीं है, क्योंकि इसमें कोई अनुपपत्ति नहीं है । [जैसा याग या नियोग—प्रेरणा—चेतन अधिकारीके बिना उपपन्न नहीं है वैसा

हैं, उनके साथ द्रव्यका साक्षात् सम्बन्ध अनुपपन्न है । विधिविहित आधारमें त्यागका प्रतिपादक शब्दप्रमाणगम्य याग ही तादृश सम्बन्धका उपपादक होगा अर्थात् तत्-तद् देवताके उद्देश्यसे विशेषमन्त्रोंसे किये गये द्रव्यका त्याग ही द्रव्य और देवताके सम्बन्धका उपपादक है । ऐसे सम्बन्धके बिना यागकी उपपत्ति ही नहीं होती, अतः याग देवताद्रव्यसम्बन्धसे अविनाभूत है ।

† 'यजेत' इत्यादि लिङादि प्रत्यय ही यागादिविधिके प्रतिपादनमें समर्थ हैं और लिङादि विधिकी यागादि क्रियाकलापके बिना सम्भव ही नहीं है, अतः विध्यर्थ यागके अविनाभावसे ग्रस्त है ।

भावात्। अन्तरेणाऽपि यागनियोगौ, लोकव्यवहारे चेतनस्य दृष्टत्वात्।

नियोगाभावे कृत्स्नवेदस्य कार्यपरत्वनियमोऽनुपपन्न इति चेद्, एवमपि न नियोगः कल्पयितुं शक्यः, तत्साधनस्य धात्वर्थस्य कस्यचिदप्यभावात्। सोऽपि कल्प्यत इति चेत्, तत्र किं पाकं गमनं करोतीत्येकपाकगमनादिसर्वधात्वर्थानुगतः कृत्यर्थः कल्प्यते, उत ज्ञप्त्यर्थः कल्प्यते, अथ वोभयम्? आद्ये 'यदिदं सर्वं तदयमात्मा कर्त्तव्यः' इति वचनव्यक्तिः स्यात्। तथा च सति अशक्यविधानमापद्येत। नहि निपुणतरेणाऽपि घटः पटीकर्तुं शक्यते। अथाऽमी पिष्टपिण्डाः सिंहाः क्रियन्तामित्यत्राऽन्यदन्याकारेण क्रियमाणं दृष्टमिति चेद्, एवमप्यत्रेतिकर्त्तव्यताया अभावादसंपूर्णो विधिः।

प्रकृतमें नहीं कह सकते।] कारण कि याग और नियोगके बिना भी लोकव्यवहारमें चेतनकी उपपत्ति देखी गई है। [यदि लोकमें चेतनकी उपपत्ति याग और नियोगसे ही होती, तो चेतनसे अपने उपपादक याग और और नियोगकी कल्पना की जा सकती, परन्तु चेतन यागादिके बिना भी देखा गया है, अतः उक्त कल्पना नहीं मानी जा सकती।]

यदि 'इदं सर्वं यदयमात्मा' इत्यादि वेदवाक्योंमें नियोगकी प्रतीति नहीं होती, तो सम्पूर्ण वेदोंका कार्यमें ही तात्पर्य है, यह नियम नहीं बन सकेगा। ऐसा माननेपर भी प्रकृत नियोगकी कल्पना नहीं की जा सकती, कारण कि उस नियोगका उपपादक कोई भी धात्वर्थ—क्रिया—नहीं है। यदि कहो कि धात्वर्थकी भी कल्पना की जाती है, तो यह भी सम्भव नहीं है, क्योंकि 'इदं सर्वम्' इत्यादि वाक्योंमें क्या 'पाक गमन करता है' इस प्रकार एक पाक गमनादिसे सम्पूर्ण धात्वर्थके साथ अन्वित होनेवाले कृति—करना—रूप धात्वर्थकी कल्पना की जाती है? अथवा 'पाक गमनको जानता है' इस प्रकार सकल धात्वर्थानुगत ज्ञप्ति—जानना—रूप धात्वर्थकी कल्पना की जाती है या दोनोंकी? प्रथम कृतिरूप धात्वर्थकी कल्पना माननेमें 'जो यह सम्पूर्ण है उसे आत्मा करना चाहिए' इस प्रकारका वाक्य होगा। ऐसा वाक्यार्थ माननेमें विधान करना सम्भव नहीं होगा, कारण कि चतुरसे चतुर भी कारीगर घटको कपड़ा नहीं बना सकता। 'पिष्टपिण्डों—सने हुए आटेके गोले—का सिंह बनाना चाहिए' इन वाक्योंसे भिन्न वस्तुका भिन्न आकारसे बनाना देखा गया है, ऐसा यदि कहा जाय, तो भी इतिकर्तव्यता—बनानेका

नहि शमादयः प्रपञ्चविलयनेतिकर्त्तव्यता रूपाः, तेषां ज्ञानेतिकर्तव्यतारूपत्वात्। न द्वितीयः, प्रपञ्चे सर्वस्मिन् विधिबलादात्माकारेण ज्ञायमानेऽपि प्रपञ्चभावस्याऽनिवृत्तेः। नहि योषिदादिष्वग्न्यादिरूपेण ज्ञायमानेषु योषिदादिभावोऽपि निवृत्तः। न तृतीयः, पक्षद्वयदोषप्रसङ्गात्।

ननु योषिदग्न्यादिषु मानसी क्रिया, न ज्ञानम्। इह त्वात्मतत्त्वज्ञानेन विधीयमानेन प्रपञ्चः प्रविलीनः स्यात्, स्थाणुतत्त्वज्ञानेन पुरुषभावप्रविलयदर्शनादिति चेत्, तर्हि स्थाणुतत्त्वज्ञानस्येवाऽऽत्मतत्त्वज्ञानस्याऽपि विधिव्यतिरिक्तं किञ्चित्प्रापकं वक्तव्यम्, तत्त्वज्ञानस्य वस्तुतन्त्रस्याऽविधेयत्वात्।

प्रकार—न होनेसे विधानकी पूर्णता नहीं होगी। प्रपञ्चके विलयन–निराकरण—स्वरूप शमादि ही इतिकर्तव्यता—विधिके सम्पादन प्रकार—होंगे, यह भी नहीं मान सकते, कारण कि शम, दम आदि ज्ञानकी इतिकर्तव्यतारूप हैं। द्वितीय—ज्ञानक्रियारूप मानना—पक्ष भी नहीं बन सकता, कारण कि सम्पूर्ण प्रपञ्च विधानके बलसे आत्माका स्वरूप माना जाय, तो भी प्रपञ्चकी सत्ता नहीं मिट सकती। स्त्री आदिको अग्निरूप माननेसे उनका स्त्रीत्व नहीं चला जाता। दोनों—ज्ञप्ति और कृति—का मानना तीसरा विकल्प भी नहीं बन सकता, कारण कि इसमें ऊपर कहे गए दोनों पक्षोंके दोष प्राप्त होते हैं।

शङ्का—स्त्रीको अग्नि समझनेमें मानसव्यापार है, ज्ञान नहीं। [प्रकृतमें ज्ञानपद जिससे अर्थका ज्ञान हो 'ज्ञायतेऽनेन' ऐसा करणल्युडन्त है। जहांपर दूसरी वस्तु दूसरे रूपमें जानी जाय वहांपर उसका सम्भव नहीं है, अतः योषिदग्नि स्थलोंमें ज्ञान न मानकर मानसव्यापार–आहार्यारोप–मानना चाहिए जो कि पुरुष व्यापाराधीन है।] प्रकृतमें विहित आत्मतत्त्वज्ञानसे प्रपञ्चका विलय होगा, जैसे कि स्थाणु–सूखे शाखाहीन काष्ठ—के तत्त्वज्ञानसे पुरुषभावका विलीन—नष्ट—हो जाना देखा गया है।

समाधान—तब तो जैसे स्थाणुतत्त्वके ज्ञानका प्रापक विधिसे भिन्न ही वस्तु है, वैसे ही विधिसे अतिरिक्त ही किसी दूसरी ज्ञानसामग्रीको ही ब्रह्मतत्त्वज्ञानका भी प्रापक मानना चाहिए। तत्त्वका ज्ञान वस्तु—पदार्थ—के अधीन है उसका विधान नहीं हो सकता। [विधान उसका ही हो सकता है जिसमें

विधायकशब्दव्यतिरिक्ता वेदान्तगताः शब्दास्तत्प्रापका इति चेत्, तर्हि तेभ्य एव ज्ञानसिद्धेः कृतं विधिना ? ननु उत्पन्नेऽपि ज्ञाने पुनस्तादृशं ज्ञानव्यक्त्यन्तरं विधीयते। न च विधिवैयर्थ्यम्, मन्त्रेष्विव प्राप्तस्यापि पुनर्विध्युपपत्तेः। तथा हि—'स्वाध्यायोऽध्येतव्यः' इत्यत्र स्वशाखा स्वाध्यायशब्देनोच्यते। अतस्तन्मध्यपातिनो मन्त्रा अपि स्वाध्यायविधिना पठितव्यतया स्वीकृतास्ते च गृहीतपदपदार्थसम्बन्धस्य स्वार्थे प्रत्ययमुत्पाद्य प्रयोजनशून्या व्यवतिष्ठन्ते। न च स्वार्थानुष्ठापकत्वं प्रयोजनम्, स्वार्थस्य द्रव्यदेवतास्वरूपस्याऽननुष्ठेयत्वात्। नाऽपि तत्प्रमापकत्वम्, ब्राह्मणवाक्यैरेव मन्त्रार्थस्य द्रव्यादेः प्रमितत्वात्। ततो निष्प्रयोजनत्वे प्राप्ते

पुरुष—कर्ता—के व्यापारकी सामर्थ्य करने न करने या अन्यथा करनेमें हो। ज्ञान तो अपनी सामग्रीके बलसे अवश्य ही हो जायगा। वह पुरुष प्रमाताके व्यापारकी अपेक्षा नहीं रखता। अतः ज्ञानका विधान करना संगत और सम्भव नहीं है।] वेदान्तशास्त्रमें आए हुए विधिप्रतिपादक शब्दोंसे भिन्न—तव्य आदि प्रत्ययरहित—शब्द ही ब्रह्मतत्त्वज्ञानके प्रापक हैं यदि ऐसा कहो, तो उन शब्दोंके द्वारा ही ज्ञानकी सिद्धि हो जायगी, फिर विधि माननेकी आवश्यकता ही क्या है ? ज्ञानके उन शब्दोंसे उत्पन्न हो जानेपर भी पुनः उसी प्रकारके दूसरे ज्ञानका विधान किया जाता है, इस प्रकार सिद्धका विधान करना व्यर्थ नहीं माना जा सकता, क्योंकि मन्त्रोंमें जैसे प्राप्तका भी पुनर्विधान हो सकता है। [मन्त्रोंमें पुनर्विधानका साफल्यप्रकार दिखलाते हैं—] 'स्वाध्यायोऽध्येतव्यः' इस वाक्यमें स्वाध्यायपदसे अपनी शाखाके वेदका ग्रहण किया जाता है। इससे उस शाखामें पढ़े हुए मन्त्र भी स्वाध्यायविधिके द्वारा पाठ्यरूपसे लिए जाते हैं, ऐसे ही मन्त्र अध्ययन * से ज्ञात पद तथा पदार्थके सम्बन्धका अपने स्वार्थमें बोध कराकर प्रयोजनसे रहित हो जाते हैं। स्वार्थका ही अनुष्ठान करना प्रयोजन नहीं माना जाता, कारण कि द्रव्य-देवतारूप स्वार्थका अनुष्ठान नहीं किया जा सकता। स्वार्थभूत द्रव्यदेवताकी प्रमिति करना प्रयोजन भी नहीं हो सकता, क्योंकि मन्त्रोंके अर्थ द्रव्यदेवताकी प्रमिति तो ब्राह्मणवाक्योंसे ही हो जाती है। इससे मन्त्रोंमें निष्प्रयोजनत्व

---

* अर्थज्ञानपर्यन्त ही अध्ययन कहलाता है, केवल पाठमात्रको अध्ययन नहीं कहते हैं।

श्रुतिलिङ्गादिभिर्व्रीह्यादिवन्मन्त्राः सप्रयोजनस्य कर्मणोऽङ्गभावेऽपि न विनियुज्यन्ते। तत्र 'ऐन्द्या गार्हपत्यमुपतिष्ठते' इत्यस्मिन् ब्राह्मणे 'गार्हपत्यम्' इति द्वितीयाश्रुतिः 'कदाचन स्तरीरसि' इत्येतन्मन्त्रस्येन्द्रप्रकाशनसमर्थस्याऽपि गार्हपत्योपस्थाने विनियोगं बोधयति, श्रुतसामर्थ्यलक्षणाल्लिङ्गाच्छ्रुतेर्बलीयस्त्वात्। 'बर्हिर्देवसदनं दामि' इत्ययं मन्त्रस्तु मन्त्रलिङ्गाद् बर्हिर्लवने विनियुज्यते। एवं वाक्यप्रकरणस्थानसमाख्याभिरपि तत्र तत्र मन्त्रा विनियुक्ताः। ते च मन्त्राः केनोपकारेण प्रधानापूर्वसिद्धेरुपकुर्वन्तीति वीक्षायामनुष्ठानापेक्षितद्रव्यदेवतादिस्मारणेनेति कल्पनीयम्; दृष्टोपकारे सत्यदृष्टकल्पनानुपपत्तेः। सम्भवति हि हुंफडादिव्यतिरिक्तमन्त्रैरर्थस्मृतिः। तदध्ययनस्याऽर्थाऽवबोधपर्यन्तत्वात्। यद्यपि ब्राह्मणवाक्यैर्द्रव्यदेवतादिस्मृतिः सम्भवति तथापि मन्त्रैरेव

प्राप्त होनेपर उनके सार्थक्यके लिए व्रीहि आदिके तुल्य श्रुति, लिङ्ग आदि प्रमाणोंसे मन्त्रोंका प्रयोजनविशिष्ट (यज्ञ-यागादि) कर्मोंके—अङ्ग—उपकारक होनेमें भी विनियोग नहीं किया जाता है। इनमें 'ऐन्द्री ऋचासे गार्हपत्य अग्निका उपस्थान करना चाहिए' इस ब्राह्मणवाक्यमें 'गार्हपत्यम्' इस प्रकार द्वितीयान्त पदकी श्रुति 'कदाचन स्तरीरसि' इस मन्त्रकी इन्द्रदेवताके प्रकाशनमें सामर्थ्य होते हुए भी इसका गार्हपत्यके उपस्थानमें विनियोग बोधन करती है, क्योंकि श्रुतसामर्थ्यरूप लिङ्गकी अपेक्षा श्रुति बलवान् मानी गई है। 'बर्हिर्देवसदनं दामि' इस मन्त्रका तो मन्त्रलिङ्गसे बर्हि—कुशा—के लवन—छेदन—में विनियोग होता है। इस प्रकार वाक्य, प्रकरण, स्थान और समाख्याओंसे मन्त्रोंका तत्-तत् विधियोंमें विनियोग किया गया है। ऐसे विनियोगमें लाये गए मन्त्र किसका उपकार करनेसे प्रधान अपूर्वकी सिद्धिका उपकार करते हैं, इस जिज्ञासाके होनेपर उत्तरमें यही कल्पना की जानी चाहिए कि द्रव्य देवताका स्मरण—उपस्थान—करानेसे प्रधानकी सिद्धिमें उपकार करते हैं, क्योंकि दृष्ट—प्रत्यक्ष—उपकारका सम्भव रहते अदृष्ट—अप्रत्यक्ष—की कल्पना उपयुक्त नहीं है। हुं, फट् आदिसे भिन्न मन्त्रोंके द्वारा अर्थस्मरण हो सकता है। [इससे हुं, फट् आदिके दृष्टान्तसे मन्त्रोंका अर्थबोध करानेमें सामर्थ्य नहीं है, इस कथनका खण्डन हुआ।] [स्वाध्यायके अध्ययनविधिमात्रसे अर्थस्मरण नहीं होगा, इस शङ्काका निराकरण करते हैं—]स्वाध्याय—मन्त्रोंके पढ़ने—का अर्थज्ञानपर्यन्तमें तात्पर्य है। यद्यपि ब्राह्मणवाक्योंसे द्रव्य, देवता आदिका स्मरण हो सकता है,

स्मृतावदृष्टविशेषः कल्पनीयः । अन्यथा मन्त्राणामानर्थक्यप्रसङ्गात् । अध्ययनविध्युपात्तानां तदयोगात् । एवं च सति प्रयोगविधिः सर्वैरङ्गैर-पूर्वोपकारं कारयन् मन्त्रैरर्थज्ञानलक्षणमुपकारं कारयति । तत्र यथा प्रयोगवचनो मन्त्रैरध्ययनकालोत्पन्नज्ञानातिरिक्तमपूर्वोपकारिज्ञानान्तरमनुष्ठापयति तथाऽत्रापि मोक्षोपकारिब्रह्मज्ञानव्यत्तयन्तरमनुष्ठापयतु । न चाऽत्र दार्ष्टान्तिके तद्वत् प्रयोगविधिर्नास्तीति शङ्कनीयम्, तस्य सम्पादयितुं शक्यत्वात् ।

ननु सर्वत्रोत्पन्ने कर्मणि विनियोगोत्तरकालमधिकारसम्बन्धे सति पश्चात् प्रयोगविधिरन्विष्यते । इह तूत्पत्त्यादिविधित्रयाभावे कथं प्रथमत एव प्रयोगविधिसम्पादनमिति चेद्, न; उत्पत्त्यादिविधित्रयस्याऽप्यत्र सुसम्पाद-

---

तथापि मन्त्रोंसे ही स्मरण होनेमें अदृष्टविशेष—पुण्य—की कल्पना मानी जाती है । अन्यथा मन्त्र अनर्थक हो जायँगे। [मन्त्रोंको अनर्थक मानना इष्ट नहीं है] कारण कि अध्ययनविधिसे प्राप्त हुए मन्त्रोंका आनर्थक्य नहीं बन सकता । इस सिद्धान्तके अनुसार प्रयोगोंका विधान सम्पूर्ण अङ्गोंके द्वारा प्रधान, अपूर्वका उपकार कराता हुआ मन्त्रोंसे [द्रव्यदेवतारूप] अर्थज्ञान-लक्षण उपकार कराता है । [निष्कर्ष कहते हैं—] जैसे प्रयोगविधानका कथन मन्त्रस्थलमें मन्त्रोंके द्वारा अध्ययनकालमें उत्पन्न हुए अर्थज्ञानके अतिरिक्त अपूर्वके उपकारी दूसरे ज्ञानका अनुष्ठान कराता है, वैसे ही प्रकृतमें भी मोक्षके उपकारी ब्रह्मज्ञानसे भिन्न दूसरे ज्ञानका अनुष्ठान कराना सम्भव होगा । प्रकृत दार्ष्टान्तिकमें—ब्रह्मज्ञानमें—दृष्टान्त मन्त्रोंमें जैसी प्रयोगविधि है वैसी प्रयोग-विधि नहीं है, ऐसी शङ्का नहीं करनी चाहिए, क्योंकि प्रकृतमें भी प्रयोगविधिका सम्पादन हो सकता है ।

शङ्का—कर्मके उत्पन्न—उत्पत्तिविधिसे सिद्ध—होनेपर विनियोग होता है अनन्तर अधिकारीका सम्बन्ध होनेपर प्रयोगविधिकी अपेक्षा होती है । अर्थात् प्रयोगविधिके पूर्व उत्पत्तिविधि, विनियोगविधि तथा अधिकारविधिका होना आव-श्यक है । प्रकृत ब्रह्मज्ञानमें उत्पत्ति आदि तीनों विधियोंके न होनेसे सर्वप्रथम ही प्रयोगविधिका सम्पादन कैसे हो सकेगा ?

समाधान—उत्पत्ति आदि तीनों विधियोंका भी सम्पादन किया जा सकता

त्वात्। तथाहि—'वेदान्तवाक्येनाऽऽत्मज्ञानं कुर्यात्' इत्येवं वेदान्तशब्दलक्षणकरणेन विशिष्टस्याऽऽत्मज्ञानस्य स्वरूपबोध उत्पत्तिविधिस्तावदध्याह्रियते। न च वाच्यं विशिष्टप्रतीतौ नोत्पत्तिविधित्वं सम्भवति, स्वरूपमात्रबोधकत्वादुत्पत्तिविधेरिति, 'सोमेन यजेत' इत्यत्र विशिष्टोत्पत्तिविधेरङ्गीकृतत्वात्। तत्र हि सोमशब्दो यागविशेषनामधेयं गुणवाची वेति विचार्य वल्लीविशेषे रूढस्य यागनामत्वासम्भवाद्गुणवाचित्वं निर्धारितम्। तत्र यद्यपि 'दध्ना जुहोति' इतिवत् 'सोमेन यजेत' इत्युक्ते गुणसम्बन्धः प्रतीयते, तथापि 'अग्निहोत्रं जुहोति' इतिवत् पृथगुत्पत्त्यश्रवणात् सोमगुणविशिष्टयागोत्पत्तिविधिरिति अङ्गीकर्त्तव्यम्। तद्वत् प्रकृतेऽपि विशिष्टोत्पत्तिविधिः किं न स्यात्?

भावित्वे चाचार्यकरणविधिप्रयुक्तोऽधीष्वेति साध्याहारयोजना प्रसज्येत । तस्मादधिकारिकल्पनासाम्यादितरेतरप्रयुक्तिसाम्याच्च काम्यविधिप्रयुक्तिसम्भवेऽध्ययनस्य कथमध्यापनविधिप्रयुक्तिरिति । अत्रोच्यते—नाऽध्यापनविधेरधिकारी कल्पनीयः, श्रुतिस्मृत्योः प्रतीयमानत्वात् । तथाहि—'अष्टवर्षं ब्राह्मणमुपनयीत' इति श्रुतावात्मनेपदेनाऽऽचार्यकरणसाध्यता प्रतीयते, संमाननोत्सञ्जनाचार्यकरणेत्यादिना व्याकरसूत्रेणाऽऽचार्यकरणे साध्ये तद्विधानात् । न चाऽऽचार्यत्वम्, किञ्चिल्लोके प्रसिद्धमस्ति ततो यथाऽऽहवनीये जुहोतीत्यत्राऽऽहवनीये होमाधारत्वेन विनियुक्ते सत्यसंस्कृतस्य होमाधारत्वायोगात् संस्कृतस्य सम्भवाच्चाऽऽधानसंस्कृतोऽग्निराहवनीयत्वेन निश्चितः तथा

इस वाक्यमें अध्याहार करके 'आचार्याधीन' 'आचार्यकरणविधिप्रयुक्तोऽधीष्व' ऐसा करना होगा। इसकी अपेक्षा 'ओदनं पचति'—या 'गृहस्थः सदृशीं भार्यामुपेयात्' इत्यादि वाक्योंमें जैसे पाचक या गृहस्थ शब्दोंका प्रयोग भावी संज्ञाके आश्रयणसे होता है, वैसे ही आचार्यशब्दके प्रयोगको भावी संज्ञाके आश्रयणसे उपपन्न कर अध्यापनसे अध्ययनकी प्रयुक्ति मानना ही उचित है, इस आशयसे सिद्धान्ती प्राभाकरमतके दूषक प्रघट्टकका निर्णय करते हैं—इसलिए पूर्वोक्त युक्तियोंके बलसे अधिकारीकी कल्पना तथा एक दूसरेकी प्रयुक्ति करनेमें समानता होनेसे काम्यविधिकी प्रयुक्तिका सम्भव होनेमें अध्यापनविधिसे अध्ययनकी प्रयुक्ति कैसे होगी? प्रभाकरानुयायी द्वारा सिद्धान्तीकी उक्त शङ्कामें कहा जाता है। अध्यापनविधिके अधिकारीकी कल्पना नहीं करना है, कारण कि श्रुति तथा स्मृतिमें ही उसकी प्रतीति सिद्ध है। जैसे कि श्रुति है—'आठ वर्षके ब्राह्मणका उपनयन संस्कार करना चाहिए' इस श्रुतिमें आत्मनेपदसे आचार्यकरणमें भाव्यता—साध्य होना—प्रतीत होती है, कारण कि 'संमाननोत्सञ्जनाचार्यकरण—' इत्यादि व्याकरणसूत्रसे आचार्यकरणके साध्य होनेमें आत्मनेपदका विधान किया जाता है। घट, पट आदिके तुल्य आचार्यपदार्थ लोकमें कोई प्रसिद्ध है ही नहीं, इसलिए जैसे—'आहवनीयमें हवन किया जाता है' यहांपर आहवनीयका होमाधारके रूपमें विनियोग किये जानेपर संस्काररहित अग्निमें होमाधारताका सम्भव नहीं है, अतएव आधाननामक संस्कारसे संस्कृत अग्नि ही आहवनीय

'आचार्याय गां दद्यात्' इत्यत्राऽऽचार्ये दक्षिणां प्रति सम्प्रदानत्वेनाऽवगते सत्यनुपकारिणः सम्प्रदानत्वायोगादुपकारिणोऽत्र सम्भवाच्चोपनयननिष्पादनाख्येनोपकारेण माणवकं प्रत्युपकुर्वत आचार्यत्वं निश्चीयते। नन्वेवमप्युपनयनसाध्यमाचार्यत्वं भवेन्नाऽध्यापनसाध्यमिति चेद्, न; उपनयनस्याऽध्यापनाङ्गत्वात्। 'उपनयीत तमध्यापयीत' इत्येकप्रयोगतावगमात्, न च निरपेक्षविधिभेदान्न प्रयोगैक्यमिति वाच्यम्, उपनीयाऽध्यापयेदित्येवंप्रयोगैक्यकल्पनात्। तमिति प्रकृतपरामर्शिना तच्छब्देन कर्मैक्यप्रतीतेः। न चोपनयनस्याऽध्यापनाङ्गत्वेऽप्यध्ययनस्य न तत्प्रयुक्तिरिति वाच्यम्, माणवकविषयाध्यापनेनाऽऽचार्यत्वं भावयेदिति वाक्यार्थस्वीकरणेनाऽऽध्यापनक्रियानिर्वर्तकतया माणवकस्य क्रियां प्रति गुणभूतत्वाद् उपकारकत्वे वक्तव्ये दृष्टे सत्यदृष्टकल्पनाया अन्याय्यत्वाद् उपगमनाध्ययनाभ्यामुपकरोतीति कल्प्यत्वात्।

रूपसे निश्चित माना गया, ऐसे ही आचार्यके लिए दक्षिणामें गाय देनी चाहिए 'यहांपर आचार्यको दक्षिणाके प्रति सम्प्रदानत्व—उद्देश्यत्व—प्रतीत हुआ, परन्तु अनुपकारी सम्प्रदान—उद्देश्य नहीं हो सकता, और यहांपर उपकारीका होना सम्भव है, इसलिए उपनयनसंस्कारके सम्पादनरूप उपकारके द्वारा माणवकका उपकार करनेवालेमें ही आचार्यत्व निश्चित होता है, ऐसा माननेपर भी उपनयनके द्वारा आचार्यत्वकी सिद्धि होगी, अध्यापन द्वारा नहीं; ऐसा भी नहीं कह सकते, कारण कि उपनयन अध्यापनका ही अङ्ग है। 'उपनयन करे' और 'उस उपनीतको पढ़ावे' इन दोनों विधियोंमें एकप्रयोगत्व प्रतीत होता है। निरपेक्ष विधिके भेदसे एकप्रयोग होनेका निषेध नहीं कर सकते, कारण कि 'उपनयन संस्कार कराके अध्यापन करावे' इस प्रकार एक ही प्रयोगकी कल्पना होती है, क्योंकि तत्शब्दके प्रकृत परामर्शी होनेसे तत्शब्दसे दोनोंमें एककर्मत्वकी प्रतीति होती है। 'माणवकके अध्यापनसे आचार्यत्वकी भावना करे' इस प्रकार वाक्यार्थका स्वीकार करनेसे अध्यापनक्रियाके सम्पादक होनेसे गुणभूत माणवकमें अध्यापनक्रियाके प्रति उपकारकत्व कहना होगा, कारण कि दृष्ट फलके रहते अदृष्ट फलकी कल्पना करना अन्याययुक्त होता है। [माणवकका उपकारकत्व दिखलाते हैं—] माणवक उपगमन—गुरुके समीपमें नियमपूर्वक बैठने और अध्ययनसे [अध्यापन] क्रियामें उपकार करता है, ऐसी ही कल्पना करनी चाहिए।

ननूपनयनाध्ययनाभ्यां निष्पाद्यस्याऽध्यापनस्य यद्यप्याचार्यत्वं फलं तथापि श्रुतावधिकारी कल्पनीयः, एतत्काम इत्यश्रवणादिति चेद्, न; कामोपबन्धमात्रस्य कल्प्यत्वात्। ततश्च श्रुतावुपनीयाऽध्यापयेदाचार्यकरणकाम इत्येवमध्यापनविधिः साधिकारः सम्पद्यते, तथा स्मृतावपि।

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥'

इत्युपनयनाध्यापनयोः प्रयोगैक्यादध्यापने विधिश्रवणादाचार्यत्वफलश्रवणाच्चाऽऽचार्यत्वकामो माणवकमुपनीयाध्यापयेदिति निष्पाद्यते। अध्ययने तु नाऽधिकारनिमित्तम्, किञ्चिच्छ्रुतमस्तीति विशेषः। न चाऽध्ययनस्य स्वतन्त्रविध्यन्तरविहितस्य कथं स्वतन्त्रविध्यन्तरप्रयुक्तानुष्ठानमिति शङ्कनीयम्, आधानदृष्टान्तेन प्रयुक्तत्वात्। आधाने हि ब्राह्मणोऽग्निमादधीतेति

शङ्का—उपनयन और अध्ययनसे सिद्ध होनेवाले अध्यापनका यद्यपि आचार्यपद पाना फल है, तथापि श्रुतिमें अधिकारीकी कल्पना करनी ही होगी, क्योंकि अमुक कामनावाला पुरुष [अध्यापन करे] ऐसा अधिकारीका श्रवण नहीं है।

समाधान—ऐसा नहीं, कारण कि केवल कामनाके सम्बन्धमात्रकी कल्पना होती है। इससे ही श्रुतिमें आचार्यकरणकी इच्छावाला शिष्यका उपनयन करके अध्यापन करे, इस प्रकार अध्यापनविधि साधिकार हो जाती है, ऐसा स्मृतिमें भी कहा है। जो ब्राह्मण शिष्यका उपनयनसंस्कार करके रहस्य तथा कल्पके सहित वेदका अध्यापन करे, उसको आचार्य कहते हैं। इस तरह श्रुति तथा स्मृतिसे उपनयन तथा अध्यापन दोनोंका एकप्रयोगत्व होता है। तथा अध्यापनमें श्रौतविधि है और आचार्यत्वरूप फल भी श्रुतिसिद्ध है, इसलिए आचार्यत्वकी इच्छासे 'माणवकका उपनयनसंस्कार करके अध्यापन करावे' इस प्रकार अधिकारकी निष्पत्ति की जाती है। अध्ययनमें तो अधिकारका निमित्त कोई सुननेमें नहीं आया है, इतना विशेष है। स्वतन्त्र दूसरी विधिसे विहित अध्ययनके अनुष्ठानकी प्रयुक्ति स्वतन्त्र दूसरी विधिके द्वारा न हो सकनेकी शङ्का नहीं करनी चाहिए, कारण कि आधानके दृष्टान्तसे ऐसी प्रयुक्ति देखी गई है। क्योंकि आधान—अग्न्याधान—

श्रूयते। तत्र किमाधानं स्वातन्त्र्येणाऽनुष्ठेयम् उताऽन्यप्रयुक्त्या। आद्येऽपि न तावत् पुरुषमुद्दिश्य नित्यतया स्वतन्त्रमाधानं विधातुं शक्यम्, प्रोक्षणादिवत्कर्मकारकसंस्काररूपस्याऽऽधानस्य द्रव्यपरतयाऽग्नेरुद्देश्यत्वात्। नाऽपि स्वतन्त्रकाम्यतया तद्विधेयं फलाश्रवणात्। न च सक्तुन्यायेन गुणप्रधानवैपरीत्यकल्पनया नित्याधिकारता कामाधिकारता वा शङ्कनीया। भस्मीभूतसक्तुना उपयोगासम्भवेन तत्र वैपरीत्यकल्पनेऽपि प्रकृते संस्कृताग्नेः क्रत्वन्तरे विनियोगयोग्यतया तदसम्भवात्। द्वितीयेऽपि किमाधानस्योत्तरनित्यक्रतुविधिप्रयुक्तिरुतोत्तरकाम्यक्रतुविधिप्रयुक्तिः? नाऽऽद्यः, उद्देश्यस्याऽनुपादेयस्याऽऽहवनीयस्य क्रतुविधिप्रयुक्तानुष्ठेयत्वायोगात्। उपादेयमेव हि

संस्कारमें 'ब्राह्मण अग्निका आधान करे' यही श्रुतिका अर्थ है। उसमें विकल्प होता है कि क्या आधानका स्वतन्त्र अनुष्ठान होता है? अथवा दूसरे विधानकी प्रयुक्तिके बलसे होता है? प्रथम पक्ष माननेपर भी पुरुषको उद्देश्य करके नित्यत्वरूपसे आधानका स्वतन्त्र अनुष्ठान नहीं हो सकता, कारण कि प्रोक्षण आदि संस्कारके सदृश कर्मकारकके संस्काररूप आधानका कर्मभूत द्रव्यके संस्कारमें तात्पर्य होनेसे अग्नि ही उद्देश्य है, काम्यरूपसे भी उसका विधान नहीं हो सकता, क्योंकि फलका श्रवण नहीं है। सक्तुन्यायसे गुण-प्रधानभावकी विपरीत कल्पना करके नित्य अधिकारका काम्य अधिकारमें परिवर्तन करनेकी आशङ्का नहीं की जा सकती, कारण कि भस्म किये गये सक्तुसे किसी कार्यका होना सम्भव नहीं है, इसलिए 'सक्तून् जुहोति' इस स्थलमें गुण-प्रधानभावमें विपरीत कल्पना करनेपर भी प्रकृतमें संस्कारसे युक्त अग्निकी दूसरे यज्ञमें उपयोगयोग्यता होती है, इसलिए सक्तुन्यायसे विपरीत कल्पनाका सम्भव नहीं है। दूसरे पक्षमें—दूसरे द्वारा प्रयुक्तिसे अनुष्ठेय माननेमें—भी क्या आधानकी अग्रिम नित्य यज्ञके विधान द्वारा प्रयुक्ति होती है? अथवा-अग्रिम-काम्यविधि द्वारा? इनमें प्रथम पक्ष ठीक नहीं है, कारण कि उपादेयसे भिन्न उद्देश्यभूत आहवनीयका—होमाधारभूत अग्निका—नित्य अथवा काम्य दोमें से किसीके भी विधान द्वारा प्राप्त हुई प्रयुक्तिसे अनुष्ठान करनेका विषय होना सम्भव है नहीं, [उपादेय ही अनुष्ठेय होता है, और वह क्रियासे पूर्व असिद्ध होता है। अग्नि आधानसे पूर्व सिद्ध है और आधान उद्देश्य है, इसलिए वह अनुष्ठेय नहीं हो सकता।] इस तात्पर्यको स्पष्ट करते

विधिरनुष्ठापयति । अन्यथा स्वर्गकामादीनामप्यनुष्ठेयत्वप्रसङ्गात् । तस्मादु-त्तरकाम्यक्रतुविधिप्रयुक्तिः परिशिष्यते । नहि विधिरिव कामोऽप्युपादेय-मेवाऽनुष्ठापयति येनोक्तदोषः स्यात् । किन्तु यद्यदुद्देश्यमुपादेयं वा विना काम्यमानस्य न सिद्धिस्तत्सर्वं विधिसहकारितयाऽनुष्ठापयति । दृश्यते हि लोके विधिरागयोर्वैषम्यम् । 'सौवर्णपीठे समुपविशेत्' इति विधिस्तथाविध-पीठाभावे पुरुषं न तत्रोपवेशयति रागस्तु तथाविधं पीठमुत्पाद्याऽपि तत्र निवेशयति । एवं च सति प्रकृतेऽप्याचार्यकरणकामनैवाऽऽचार्यप्रेरणद्वारेणाऽ-ध्यापनसिद्ध्यर्थं माणवकेनाऽऽध्ययनं निर्वर्तयतीति स्थितम् ।

तदेतत्प्राभाकरमतं वेदान्तिनो न बहु मन्यन्ते । तथा हि—किं 'तमध्य-ध्यापयीत' इत्यत्राऽऽचार्यत्वं विधेयम् उत विधिरूपमथवा नैयोगिकं फलम् ?

हैं—विधि उपादेयका ही अनुष्ठान कराती है । इसके विपरीत—यदि उद्देश्य भी अनुष्ठेय माना जाय, तो स्वर्गार्थी आदि अधिकारी भी अनुष्ठेय होने लगेंगे। इससे अगले काम्य क्रतुओंके कारण प्राप्त हुई प्रयुक्तिसे अनुष्ठेय मानना, यह दूसरा पक्ष ही अवशिष्ट रहता है । विधिवाक्यके सदृश कामना भी उपादेयका ही अनुष्ठान कराती है, ऐसा कोई नियम नहीं है, जिससे कि अनुपादेयका अनुष्ठेय होनेका असम्भवरूप उक्त दोषका प्रसङ्ग हो, किन्तु नियम यह है कि जिस-जिस उद्देश्य अथवा उपादेय—साध्य—के विना कामनाविषयकी सिद्धि नहीं हो सकती है, उन सबका ही कामना प्रधानविधिके सहकारीरूपसे अनुष्ठान कराती है। लोकमें विधि और कामनामें वैषम्य—भेद—देखा गया है । जैसे विधि है 'सोनेके पीठ—आसन—पर बैठे' । परन्तु उक्त विधान सुवर्णनिर्मित आसनके न होनेपर पुरुषको ऐसे पीठपर नहीं बैठा सकता—[इसके विपरीत, राग—कामना—तो ऐसे सुवर्णपीठको बनवाकर भी उसमें पुरुषको बैठा सकता है, इस प्रकार दोनोंमें वैषम्य हो जानेसे आचार्यकरणकी कामना ही आचार्यकी प्रेरणा करके अध्यापनकी सिद्धिके लिए माणवक द्वारा अध्ययनका अनुष्ठान कराती है, ऐसा सिद्धान्त स्थिर हुआ अर्थात् अध्यापन द्वारा उत्पन्न हुई प्रयुक्ति अध्ययनका अनुष्ठान करा देगी, इसमें अधिकारके श्रवणकी आवश्यकता नहीं है ।

इस पूर्वोक्त प्रभाकरके अनुयायियोंके मतको वेदान्ती अच्छा नहीं मानते हैं, क्योंकि 'उसको अध्ययन करावें' इस वाक्यमें क्या आचार्यत्व विधेय है ? अथवा विधिका स्वरूप है ? या लिङर्थ-नियोगका फल है ? इनमें प्रथम विकल्प नहीं

नाऽऽद्यः, उपनयनाऽध्यपनभावार्थविषयत्वाद्विधेः। न द्वितीयः, आत्मनेपदमात्रमिधेयस्याऽऽचार्यत्वस्य विधिपदानभिधेयतया विधिरूपत्वायोगात्। न तृतीयः, 'अचारान् ग्राहयति' इति व्युत्पत्त्या हेतुकर्तृत्वनिबन्धनस्याऽऽचार्यत्वस्य लौकिकत्वात्, अलौकिकस्यैव नैयोगिकत्वात्। न चोपनयनसाध्यत्वादलौकिकमाचार्यत्वं स्यादिति वाच्यम्, द्वितीयं जन्म तद्यस्मात् स आचार्य इति स्मृतावुपनयनं प्रति हेतुकर्तृत्वस्यैव लौकिकस्याऽऽचार्यशब्दनिमित्तत्वावगमात्। यद्याचार्यत्वमलौकिकं स्यात् तदा व्याकरणसूत्रे संमाननादिभिर्लौकिकार्थैः सह कथं पठ्येत? ननु विधायकप्रत्ययश्रवणाद् नियोगः प्रतीयते, तस्य नियोज्यविशेषणाकाङ्क्षायां स्वर्गवन्नियोगसाध्यत्वेनैव नियोज्यविशेषणत्वमाचार्यस्याऽभ्युपेतव्यम्, कारकफलस्य तदनुपपत्तेः। न चाऽऽचार-

---

माना जा सकता, कारण कि विधिका उपनयन तथा अध्यापनरूप अर्थ विषय है, [आचार्यत्व विषय नहीं है] दूसरा पक्ष नहीं हो सकता, क्योंकि केवल आत्मनेपदका ही अर्थ आचार्यत्व है, इसलिए आचार्यत्व विधिपद (लिङादि) का अर्थ न होनेसे विधिका स्वरूप नहीं हो सकता। तीसरा पक्ष भी नहीं कह सकते, क्योंकि आचार्यपदकी 'आचारोंका ग्रहण करानेवाला' ऐसी व्युत्पत्ति होनेसे हेतु और कर्ता होनेके कारण उत्पन्न हुआ आचार्यत्व लोकसिद्ध पदार्थ है। [अतः उसे नियोगफल नहीं मान सकते, कारण कि अलौकिक पदार्थ ही नियोगका फल माना गया है। उपनयनविधिका साध्य—विषय—होनेसे आचार्यत्व अलौकिक होगा, ऐसा नहीं कह सकते, कारण कि जिसके कारण द्वितीय जन्म होता है अर्थात् जो द्विजन्मा-व्यपदेशका हेतु है, वह आचार्य कहलाता है, इस स्मृतिमें लोकसिद्ध हेतुकर्तृत्वरूप ही आचार्यशब्दका प्रवृत्तिनिमित्त प्रतीत होता है। यदि आचार्यत्व अलौकिक होता, तो व्याकरणसूत्रमें संमानन आदि लौकिक अर्थोंके साथ आचार्यकरणका पाठ कैसे होता है?

शङ्का—'अध्यापयीत' इत्यादि विधिबोधक प्रत्ययके श्रवणसे नियोगकी प्रतीति होती है। उस नियोगको नियोज्य-विशेषणकी आकाङ्क्षा होनेपर स्वर्गके तुल्य नियोगसाध्य होनेसे आचार्यको ही नियोज्यविशेषण मानना चाहिए, कारण कि फल नियोज्यका विशेषण नहीं हो सकता। उपनयनविधिमें आचारग्राहकत्वरूप हेतुकर्तृत्व आचार्यशब्दका प्रवृत्तिनिमित्त नहीं

ग्राहकत्वमुपनयने हेतुकर्तृत्वं चाऽऽचार्यशब्दप्रवृत्तिनिमित्तम्, विकल्पापत्तेः। अतो मन्त्राद्यलौकिकसाधनान्तरविधानादलौकिकमाचार्यत्वम्। सम्माननादीनां तु तदभावाद्भवतु लौकिकत्वम्। अतस्तैः सह पाठेऽप्यलौकिकमेवाऽऽचार्यत्वमिति चेद्, एवमप्युपनयननियोगफलं भविष्यति, तेनाऽध्यापनविधेः कुतः साधिकारता?

अथ मतमुपनयने श्रुतमप्याचार्यत्वमध्यापनफलं भविष्यति, उपनयनस्य तदङ्गत्वादिति; तन्न, तथा सत्यङ्गेषु फलश्रुतिरर्थवाद इति न्यायेनाऽऽचार्यत्वस्य नियोज्यविशेषणत्वासंभवप्रसङ्गात्। नन्वेवं सत्यनधिकारमध्ययनं सर्वथा नाऽनुष्ठीयेतेति चेद्, न; उपनीतस्याऽध्ययनाधिकार-

---

हो सकता, कारण कि ऐसा माननेमें विकल्पकी आपत्ति होगी। इसलिए मन्त्रादि अलौकिक साधनोंसे भिन्न साधनों द्वारा सिद्ध किया गया आचार्यत्व लौकिक ही है। [यद्यपि आचारग्राहकत्वरूप आचार्यत्व लौकिक है, तथापि उपनयन संस्कार तथा साङ्गोपाङ्ग अध्यापनविशिष्ट आचारग्राहकत्वरूप आचार्यत्वके लोकसिद्ध न होनेसे उसे अलौकिक ही मानना चाहिए] सम्मानन आदि अलौकिक मन्त्रादि साधनोंसे सम्पन्न नहीं है, इसलिए वे लौकिक कहे जाते हैं, इस कारण उन लौकिक सम्मानन आदिके साथ पाठ होनेपर भी आचार्यत्व अलौकिक ही है।

समाधान—यद्यपि ऐसा मान भी लिया जाय अर्थात् उक्त प्रकारका विशिष्ट आचार्यत्व अलौकिक मान भी लिया जाय, तो भी वह उपनयनरूप नियोगका ही फल होगा, इससे अध्यापनविधिका अधिकारयुक्त होना कैसे हो सकता है?

शङ्का—यद्यपि उपनयनविधिमें आचार्यत्वका श्रवण है, तथापि वह अध्यापनका फल माना जायगा, कारण कि उपनयन अध्यापनका अङ्ग—उपकारक—है।

समाधान—ऐसा नहीं है, कारण कि अध्यापनके अङ्गभूत उपनयनके फलरूपसे आचार्यत्वको अध्यापनका फल माननेमें 'अङ्गोंमें फलका श्रवण अर्थवाद है' इस न्यायसे आचार्यत्व नियोज्यका विशेषण नहीं हो सकेगा।

शङ्का—इस प्रकार तो अधिकाररहित अध्ययनका किसी भी दशामें अनुष्ठान प्राप्त नहीं होगा।

त्वात्; वाजसनेयिशाखायामुपनयनं प्रक्रम्याऽध्ययनस्य विहितत्वात्। सर्व-स्मृतिषु चोपनीतोऽधीयीतेत्यवगमात्। अतोऽध्ययनस्य स्वविधिप्रयुक्तानुष्ठानोपपत्तौ तदनुष्ठानसिद्धयेऽध्यापनेऽधिकारिणं परिकल्प्य न मनः खेदनीयम्। ननु न तं कल्पयामि किन्त्वतस्त्येव सः, श्रुतौ दुःसंपादत्वेऽपि 'उपनीय तु यः शिष्यम्' इत्यादिमनुवाक्येन तदवगमादिति चेद्, न; तद्वाक्यस्योपनयनाध्यापनानुवादेन कर्तुराचार्यसंज्ञाविधायकत्वाद्, वाक्यगतयत्तच्छब्दाभ्यामनुवादविध्योर्निश्चयात्। आचार्यसंज्ञायाश्च नमस्कारादिविधानेषूपयोगात्। नन्वेवमप्यप्रबुद्धस्य माणवकस्योपनीतस्य स्वाधिकारं प्रतिपद्याऽनुष्ठातुमशक्यत्वादध्यापनविधिरेव कथञ्चित्साधिकारोऽध्ययनमपि

समाधान—उपनयनसंस्कारसे संस्कृतका ही अधिकार प्राप्त है, कारण कि वाजसनेयिशाखामें उपनयनका उपक्रम करके अध्ययनका विधान किया गया है, तथा सब स्मृतियोंमें 'उपनीतको ही पढ़ाना चाहिये' ऐसा ही मिलता है। इस कारण अध्ययनके अनुष्ठानकी अपने ही विधानसे उपपत्ति हो जानेसे उसके अनुष्ठानकी सिद्धिके लिए अध्यापनविधिमें अधिकारीकी कल्पना करके मनको परिश्रम नहीं देना चाहिए।

शङ्का—हम अध्यापनविधिमें अधिकारीकी कल्पना नहीं करते हैं, किन्तु वह तो है ही। यद्यपि श्रुतिमें सुगमतासे अधिकारीका सम्पादन नहीं हो सकता, तथापि 'जो शिष्यका उपनयन संस्कार करके' इत्यादि मनुवचनसे उसकी प्रतीति होती है, [इसलिए उसकी कल्पना करनेकी आवश्यकता नहीं है।]

समाधान—ऐसा नहीं कह सकते, मनु आदिका वह वचन उपनयन और अध्यापनका अनुवाद करके कर्ताकी आचार्यसंज्ञाका विधायक है, क्योंकि वाक्यमें आये हुए 'यत्' और 'तत्' शब्दसे अनुवाद और विधिका निश्चय होता है। नमस्कार आदिके विधानमें आचार्यसंज्ञाका उपयोग होता है [इससे आचार्यसंज्ञाको व्यर्थ होनेका प्रसङ्ग नहीं आता।]

शङ्का—अप्रबुद्ध तथा उपनीत शिष्य अपना अधिकार प्राप्त कर अध्ययनका अनुष्ठान नहीं कर सकता, इसलिए अध्यापनका विधान ही कथंञ्चित् अधिकारयुक्त हो अध्ययनकी भी प्रयुक्ति करा ही देता है।

प्रयुङ्क्त एवेति वाच्यमिति चेत्, तत्र किमध्यापनविधिरविहितमध्ययनं प्रयुङ्क्ते उत विहितम् ? नाऽऽद्यः, अध्ययनविध्यप्रेरितानां तत्र प्रयोजनशून्यानां पुरुषाणामाचार्यं प्रति गुणभावेन प्रवृत्त्ययोगात् । द्वितीये विधिस्वरूपसिद्ध्येऽध्ययनेऽधिकार्यपि स्वीकार्यः । विषय एव विधिस्वरूपसाधको नाऽधिकारीति चेत्, तर्हि विहितस्याऽध्ययनस्याऽधिकारिविशेषाभावाद्यं कंचिदध्यापयेदिति प्राप्नुयात् । तस्मात् प्रकरणसमर्पितेनोपनीतेनाऽधिकारिणा साधिकारोऽध्ययनविधिः स्वयमेव स्वविषये पुरुषं प्रवर्त्तयति । अन्यथा स्वाधिकारविधिनैवाऽप्रवर्तितस्य प्रवृत्त्यसम्भवात् । न च बालकस्य स्वाधिकारप्रतिपत्त्य-

---

समाधान—ऐसी शङ्का नहीं करते, कारण कि ऐसा माननेमें विकल्प हो सकते हैं कि क्या अध्यापन अविहित अध्ययनकी प्रयुक्ति करता है अथवा विहितकी ? प्रथम पक्ष नहीं माना जा सकता, कारण कि अध्ययन विधिसे अप्रेरित और उसमें प्रयोजन शून्य पुरुषोंकी आचार्यके प्रति गुणभावसे प्रवृत्ति नहीं हो सकती है । [जिनका वेदके अध्ययनमें अधिकार नहीं है, ऐसे द्विजेतर वर्णी और अनुपनीतके लिए 'अध्येतव्यः' इस पदमें आये तव्यप्रत्ययके लिए नियोग प्रेरणा ही नहीं करता, अतएव उनको आचार्यका कोई प्रयोजन नहीं रह जाता, इससे सिद्ध हुआ कि आचार्यकरणका विधान अविहित लौकिक अध्ययनकी प्रयुक्ति नहीं कर सकता ।] विहित अध्ययनका अध्यापन प्रयोजक है, इस दूसरे विकल्पमें विधिके स्वरूपकी सिद्धिके लिए अध्ययनमें अधिकारी भी मानना ही होगा [अधिकारीके बिना विधिका स्वरूप ही नहीं बन सकता ।] विषय ही विधिके स्वरूपका प्रतिपादक होता है, अधिकारी नहीं, ऐसा यदि कहो, तो विहित अध्ययनका अधिकारीविशेष निर्दिष्ट न होनेसे 'जिस किसी [अनधिकारी] को भी पढ़ावे, ऐसा 'अतिसङ्ग' प्राप्त हो जायगा । इसलिए प्रकरणप्राप्त उपनीत अधिकारीके द्वारा अधिकारयुक्त अध्ययनका विधान स्वयं अपनेमें पुरुषकी प्रवृत्ति करा लेगा [अध्ययनके अनुष्ठानकी प्रयुक्ति अध्ययन द्वारा माननेकी आवश्यकता नहीं है, अन्यथा स्वाधिकारविधिके द्वारा प्रवृत्त न किये गये पुरुषकी प्रवृत्तिका सम्भव नहीं है । [जिस विधानमें पुरुष अपना अधिकार नहीं समझता, उसे करनेके लिए उसकी प्रवृत्ति नहीं देखी गई है, इसलिए अपने अधिकारकी विधिसे प्रेरित होकर ही पुरुष प्रवृत्त होता है] बोधरहित बालकको

सम्भवः, विध्यर्थापरिज्ञानेऽपि संध्योपासनसमिदाहरणादिकर्त्तव्यताप्रतिपत्तिव-त्पित्राद्युपदेशसामर्थ्याद्ध्ययनकर्त्तव्यताप्रतिपत्तेः । नन्वध्ययनस्याऽध्यापन-विधिप्रयुक्तौ नाऽयं क्लेशः, आचार्यस्य प्रबुद्धस्य स्वाधिकारं प्रतिपत्तुंशक्यत्वात् । यद्यपि कश्चित् प्रेक्षावान् माणवको न स्वाधिकारमबुद्ध्वा प्रवर्त्तेत तथाप्यन्योऽप्र-बुद्ध आचार्यप्रेरितः प्रवर्त्तिष्यत एव । ततः प्रवाहरूपेणाऽध्यापनं न विच्छि-द्यत इति चेद्, एवमप्याचार्यः किमन्येनोपनीतान्माणवकानध्यापयेद् उत स्वेनैवोपनीतान्, नाऽऽद्यः, उपनयनस्याऽपि त्वन्मतेऽध्यापनाङ्गतया तद्वैकल्ये नियोगानिष्पत्तावाचार्यत्वफलासिद्धेः । तर्ह्यस्तु द्वितीयः, उक्तदोषाभावादिति

अपने अधिकारका ज्ञान होना सम्भव नहीं है, यह कहना भी उचित नहीं है, कारण कि विधिका अर्थपरिज्ञान न होनेपर भी 'सन्ध्योपासन', 'समिधाओंका लाना' इत्यादि ब्रह्मचारीके कर्तव्योंका जैसे पिता आदिके उपदेशके बलसे ज्ञान हो जाता है, वैसे ही उपदेशकी सामर्थ्यसे अध्ययनमें कर्तव्यताका ज्ञान होगा ।

शङ्का—अध्ययनकी अध्यापन द्वारा प्रयुक्ति माननेमें यह क्लेश (उपदेश-सामर्थ्यका आश्रयण) नहीं करना होता, क्योंकि प्रबुद्ध—विद्वान्—आचार्यको अपने अधिकारका परिज्ञान होना सरल है । यद्यपि कभी-कभी चतुर बालक अपने अधिकारको जाने बिना अध्ययन आदि कार्यमें प्रवृत्त नहीं होते, तथापि दूसरा मन्दबुद्धि बालक आचार्यकी प्रेरणासे प्रवृत्त होगा ही । इस कारण प्रवाह-रूपसे प्राप्त अध्ययनका लोप नहीं होने पाता । अध्ययनविधिको स्वयं अधिकारशून्य माननेमें उसका अनुष्ठान सम्भव न होनेसे अध्यापनका उच्छेद होना सम्भव हो जाता है, इस आशङ्काका समाधान करते हैं कि यद्यपि चतुर बालक अधिकारके परिज्ञानके बिना अध्ययन नहीं करेंगे, तथापि भोले बालक गुरुकी प्रेरणा मानकर अधिकारकी जिज्ञासाके बिना प्रवृत्त हो ही जायँगे, और आचार्य तो प्रबुद्ध ही है, उसको अपने आचार्यत्वकी रक्षाके लिए बालकोंकी अध्य-यनमें प्रेरणा करना अभीष्ट ही है, अतः अध्यापनका लोप नहीं हो सकता ।]

समाधान—ऐसी आशङ्का करनेपर भी विकल्प होंगे कि क्या आचार्य दूसरेके द्वारा उपनयनसंस्कृत बालकोंको पढ़ावे ? अथवा अपने ही द्वारा उपनीत बालकोंको ? प्रथम कल्प माननेमें तुम्हारे मतमें उपनयन भी अध्यापनका अङ्ग होगा, अतः उसके अभावमें नियोगकी पूर्ति नहीं होगी इसलिए आचार्यत्वरूप फल भी सिद्ध नहीं हो सकेगा । अच्छा तो—स्वयं

चेद्, न; एवमपि नित्यानित्यसंयोगविरोधस्य दुरपवादत्वात्। तथा हि—अध्यापनं तावदनित्यम्, द्रव्यार्जनार्थत्वात्। नह्याचार्यत्वमध्यापनफलं भवितुमर्हति, सुखप्राप्तिदुःखपरिहारसाधनरूपत्वाभावेनाऽपुमर्थत्वात्। न चाऽदृष्टं तत्फलत्वेन कल्प्यम्, दृष्टे सति तदयोगात्। अस्ति दृष्टम्—

'षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥'

इत्यध्यापनस्य द्रव्यार्जनोपायत्वेन स्मरणात्। ननु याजनस्य जीविकार्थत्वं युक्त ऋत्विग्भ्यो दक्षिणादिविधौ सति सर्वाङ्गानुष्ठापकस्य दक्षिणाद्यनुष्ठापकतया द्रव्यार्जनं निश्चित्य तदर्थिना याजने प्रवृत्तिसम्भवात्। अत्र

उपनयन कराकर अध्यापन करे—यह दूसरा पक्ष मानिये, क्योंकि इसमें प्रथम कल्पमें दिया गया दोष नहीं आता, ऐसा भी नहीं है, कारण कि ऐसा माननेपर भी नित्य तथा अनित्य पदार्थके संयोगका विरोध नहीं हटाया जा सकता। (विरोध दिखलाते हैं—) अध्यापन तो अनित्य है, कारण कि उसका प्रयोजन द्रव्य कामना है। [काम्यविधि सब अनित्य हैं, कामनारहितको उनका विधान प्राप्त नहीं होता है] अध्यापनका फल (प्रयोजन) आचार्यत्व नहीं हो सकता है, कारण कि (आचार्यत्व) सुख पाने एवं दुःखनिवारण करनेका उपाय न होनेसे पुरुषार्थ नहीं माना जा सकता। अध्यापनकी अदृष्ट फलकी कल्पना भी नहीं की जा सकती, कारण कि दृष्ट फलके रहते अदृष्टकी कल्पना नहीं की जाती। अध्यापनका दृष्ट फल है—ब्राह्मणके छः कर्मोंमेंसे तीन कर्म उसकी जीविका है (अर्थात् धन कमानेके साधन हैं)। इन तीन कर्मोंको दिखलाते हैं—पहला यज्ञ करना, दूसरा अध्यापन—पढ़ाना—और तीसरा शुद्ध परिग्रह—दान—लेना। इस प्रकार स्मृतियोंमें पढ़ाना द्रव्यु कमानेका उपाय कहा गया है।

शङ्का—यज्ञ कराना तो जीविकाके लिए ही मानना उचित है, कारण कि याजकोंके लिए दक्षिणादानका विधान है, अतः सर्वाङ्गपूर्ण यज्ञका अनुष्ठान करानेवाला ही दक्षिणा आदिका भाजन होता है, इसलिए द्रव्यार्जनका निश्चय करके द्रव्यकी इच्छासे यज्ञ करानेमें प्रवृत्तिका होना सम्भव है।

तु भृतकाध्यापननिषेधात् । प्रकारान्तरेण द्रव्यार्जनाभावाद् न तादर्थ्यम-ध्यापनस्येति चेद्, मैवम्; माणवकस्याऽध्ययनाङ्गत्वेन गुरुदक्षिणादिविधाना-दङ्गिन्यध्ययनेऽनुष्ठापकस्याऽध्यापनविधेर्दक्षिणाशुश्रूषाद्यङ्गेष्वनुष्ठापकत्वात् । तस्माद् द्रव्यार्जनकामेनाऽनुष्ठेयत्वादध्यापनमनित्यम् । उपनयनाख्यस्तु संस्कारो नित्यः, अकरणे दोषश्रवणात् ।

'आषोडशात्तु द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ।'

इति त्रैवर्णिकानामुपनयनस्याऽमुख्यं कालमभ्यनुज्ञाय पश्चात्स्मर्यते ।

'अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥'
'नैतैरपूतैर्विधिवदापद्यपि च कर्हिचित् ।
ब्राह्मान्यौनांश्च सम्बन्धानाचरेद् ब्राह्मणः क्वचित् ॥' इति ।

अध्यापनमें तो भृतकाध्यापनका (वेतन आदि लेकर अध्यापन करनेका) निषेध है और अध्यापनमें वेतन लेनेके अतिरिक्त दूसरे प्रकारसे द्रव्यार्जन होता नहीं, इसलिए अध्यापनको द्रव्यार्जनका निमित्त नहीं माना जाता ।

समाधान—माणवक शिष्यके लिए अध्ययनके अङ्गभूत (उपकारक) दक्षिणा-दानका विधान होनेसे अङ्गी—प्रधानभूत—अध्ययनमें प्रवर्तक—अनुष्ठान करानेवाली—अध्यापनविधि ही दक्षिणा और शुश्रूषा—सेवा—आदि अङ्गोंमें भी अनुष्ठापक होती है । इस निष्कर्षसे द्रव्यार्जनकी इच्छासे किया जानेवाला अध्यापन अनित्य है । और उपनयनरूप संस्कार नित्य है, क्योंकि उपनयनसंस्कार न करनेसे दोषका श्रवण है—

ब्राह्मण, क्षत्रिय और वैश्योंका यथाक्रम सोलह, बाईस तथा चौबीस वर्ष तक उपनयनका गौण काल है । इस प्रकार तीन वर्णोंके लिए उपनयनके गौण कालकी प्रतिज्ञा करनेके अन्तर स्मृतिमें कहा गया है कि इस निर्दिष्ट अवधिके अनन्तर इन तीनों वर्णोंका यदि उचित समयपर संस्कार नहीं किया गया, तो ये सावित्री—गायत्री—व्रतसे पतित होते हुए व्रात्य दोषसे दूषित होते हैं और इनकी आर्य-जन निन्दा करते हैं । तथा ब्राह्मणको इन अपवित्र पतित ब्राह्मणोंके साथ आपत्ति आ पड़नेपर भी ब्राह्म या यौन सम्बन्ध—विवाह आदि सम्बन्ध—नहीं करना चाहिए ।

नन्वकरणे दोषश्रवणमात्रेणोपनयनस्य नित्यतायां प्रायश्चित्तस्याऽपि नित्यता प्रसज्येत ।

'अतीते चिरकाले तु द्विगुणं व्रतमर्हति ।'

इति प्रायश्चित्ताकरणनिमित्तदोषस्य निरासाय प्रायश्चित्तान्तरविधानात् । नहि प्रायश्चित्तं नित्यं दोषापनयकामिनाऽनुष्ठेयत्वात् । उच्यते, न प्रायश्चित्ताकरणनिमित्तदोषनिरासाय द्विगुणं व्रतमुच्यते किन्तु प्रायश्चित्तेन निराकर्त्तव्यस्य पूर्वदोषस्यैवाऽतीते चिरकाले द्विगुणव्रतापेक्षयैव निरास इत्युच्यते। अन्यथा प्रायश्चित्तानवस्थाप्रसङ्गात् । ततो नोपनयनस्य नित्यतायामतिप्रसङ्गः । तच्चोपनयनं नित्यभूतमध्ययनाङ्गत्वादङ्गिनोऽध्ययनस्याऽपि नित्यतां कल्पयति ।

ननूपनयनस्याऽध्ययनाङ्गत्वमयुक्तम् , अध्ययनमनारभ्याऽधीतत्वात् ।

शङ्का—उपनयनके न करनेमें दोषका श्रवण होनेसे ही उपनयन संस्कार यदि नित्य माना जाय, तो इसके प्रायश्चित्तको भी नित्य मानना होगा । 'अधिक समय बीतनेपर द्विगुण व्रत करना चाहिए ।' इस प्रकार प्रायश्चित्त न करनेसे उत्पन्न हुए दोषका निवारण करनेके लिए 'द्विगुण व्रतरूप' दूसरे प्रायश्चित्तका विधान किया गया है । इससे प्रायश्चित्त नित्य नहीं हो सकता, कारण कि दोष दूर करनेकी इच्छासे उसका अनुष्ठान किया जाता है । [इससे काम्य-विधान नित्य नहीं हो सकता] ।

समाधान—प्रायश्चित्त न करनेसे उत्पन्न हुए दोषको दूर करनेके लिए द्विगुण व्रतका अनुष्ठान नहीं है; किन्तु प्रायश्चित्तसे हटाये जानेवाले पूर्व दोषका अधिक समय बीतनेपर द्विगुणित व्रतकी अपेक्षासे निरास स्मृतिमें कहा गया है, प्रायश्चित्त न करनेसे उत्पन्न हुए नवीन दोषके निराकरणके लिए नहीं है । अन्यथा प्रायश्चित्तकी अनवस्थाका प्रसङ्ग हो जायगा । इससे उपनयन संस्कारको नित्य माननेपर भी अतिप्रसङ्ग नहीं हो सकता । और वह उपनयन नित्यविधिभूत अध्ययनका अङ्ग होनेसे अङ्गीभूत अध्ययनमें भी नित्यताकी कल्पना करता है ।

शङ्का—उपनयनको अध्ययनका अङ्ग मानना उचित नहीं है, कारण कि अध्ययनका आरम्भ—उपक्रम—न करके ही उपनयनका विधान किया गया है ।

यद्यनङ्गत्वे संस्कारकर्मत्वं नोपपद्यते, तर्हि हिरण्यधारणवद् गत्यन्तरं कल्पनीयम्। 'हिरण्यं भार्यम्' इत्यत्र हि न तावद्धिरण्यधारणस्य प्रयाजादिवदर्थकर्मता घटते, कर्मकारकप्राधान्येन विधानात्। यदि संस्कारकर्मत्वं तदाऽपि संस्कार्यहिरण्यद्वारा क्रतुविशेषेण संबध्येत उत क्रतुमात्रेण। नाऽऽद्यः, विशेषसंबन्धबोधकश्रुत्यादीनामभावात्। न द्वितीयः, एकस्य संस्कारस्य सर्वक्रतूपकारित्वानुपपत्तेः। अतः संस्कारकर्मत्वं परित्यज्याऽभ्युदयफलः स्वतन्त्रो विधिरभ्युपगतः। एवमुपनयनविधिरपि स्वतन्त्र एवाऽभ्युदयफलः स्यात्। अत्रोच्यते, अनारभ्याऽधीतस्योपनयनस्याऽध्ययनाङ्गत्वबोधकानां पूर्वतन्त्रतृतीयाध्यायोक्तश्रुत्यादिप्रमाणानामभावेऽपि तत्रस्थचतुर्थाध्यायोक्तविध्याक्षेपरूपोपादानप्रमाणेनोपनयनस्याऽध्ययनाङ्गत्वं सिध्यति। अनुपपन्नं

यदि अङ्ग न माननेमें उपनयन संस्कारकर्म नहीं बन सकता, तो हिरण्यधारणके दृष्टान्तसे दूसरी गतिकी कल्पना करनी चाहिए। [हिरण्यधारणदृष्टान्तमें गतिकल्पना दिखलाते हैं]—'हिरण्य–सुवर्ण–धारण करना चाहिए' इस विधानमें सुवर्णका धारण प्रयाज आदिके समान अर्थकर्म नहीं बन सकता, कारण कि कर्मकारककी प्रधानतासे उसका विधान किया गया है। ('भार्यम्' इस पदमें प्रत्ययार्थ कर्मरूप अर्थ प्रधान है) यदि वह संस्कारकर्म माना जाय, तो प्रश्न यह होगा कि क्या संस्कार्य हिरण्य द्वारा यज्ञविशेषसे वह सम्बद्ध होगा ? या यज्ञसामान्यसे ? प्रथम कल्प नहीं बन सकता; क्योंकि विशेष क्रतुके साथ सम्बन्धका बोध करनेवाले श्रुति आदि कोई प्रमाण नहीं हैं। दूसरा पक्ष भी युक्त नहीं है, क्योंकि एक संस्कार सब क्रतुओंका उपकारक नहीं बन सकता। इसलिए संस्कारकर्म माननेका परित्याग करके उसे अभ्युदय देनेवाला स्वतन्त्र ही विधान माना गया है। इसी प्रकार उपनयनको भी अभ्युदय देनेवाली स्वतन्त्र विधि ही मानना चाहिए, अध्ययनका अङ्ग नहीं मानना चाहिए।

समाधान—इस आशङ्कामें कहा जाता है—किसीका उपक्रम न करके पढ़े गये उपनयनविधानमें अध्ययनकी अङ्गताके बोधक पूर्वमीमांसाके तीसरे अध्यायमें कहे गये श्रुति आदि प्रमाण न होते हुए भी उसी शास्त्रके चौथे अध्यायमें कहे गये विधिके आक्षेपरूप उपादान प्रमाणसे उपनयन अध्ययनका अङ्ग सिद्ध होता है और आचार्यके समीप गये विना अध्ययन बन नहीं

स्वाचार्योपसत्तिमन्तरेणाऽध्ययनम्, लिखितपाठादिप्रतिषेधेनाऽऽचार्याधीनश्चेदमधीष्वेत्युपसत्तौ नियमविधानात्। ततोऽध्ययनविधिरुपसत्तिं स्वाङ्गत्वेनाऽऽक्षिपति। तथोपनयनाख्यसंस्कारविधिश्च प्रयोजनमपेक्षमाण उपसत्तिसमवेतमेवाऽदृष्टं कल्पयति, दृष्टसमवाय्यदृष्टसंभवे स्वतन्त्रादृष्टायोगात्। ततश्चोपनयनाध्ययनविधिद्वयोपादानसामर्थ्यादध्ययनाङ्गत्वमुपनयनस्याऽवगम्यते। न च वाच्यमङ्गत्वेऽपि न प्रोक्षणादिवत्संस्कारकर्मतयाऽङ्गता प्रयाजादिवत्फलोपकार्यङ्गतैव किं न स्यादिति। अङ्गिस्वरूपनिष्पादकतया संनिपत्योपकारिणः संस्कारस्याऽभ्यर्हितत्वात्। फलोपकार्यङ्गन्तु नाभ्यर्हितम्, अपूर्वद्वारेणाऽऽरादुपकारकत्वात्। अतो माणवकसंस्कारकर्मतयैवोपनयनमध्ययनस्वरूपोपकार्यङ्गम्। किंचोपादानप्रमाणवच्छ्रुतिप्रकरणे अप्यध्ययनाङ्गत्वमुपनयनस्य गमयतः, अष्टवर्षो

सकता और लिखे हुये वेदको स्वयं पढ़ लेनेका निषेध होनेसे आचार्यके अधीन ही अध्ययन है, कारण कि आचार्यके पास जाकर 'यह पढ़ो' ऐसा पढ़नेके नियमका विधान है। इससे अध्ययनविधान उपसत्तिका (अर्थात् नियमपूर्वक आचार्यके पास जाकर आचार्यके उपदेशानन्तर पढ़नेका) अपने अङ्गत्वरूपसे आक्षेप करता है। इस प्रकार उपनयननामक संस्कारविधान प्रयोजनकी अपेक्षा करता हुआ उपसत्तिगत ही अदृष्ट फलकी कल्पना करता है, कारण कि दृष्टगत अदृष्ट फलकी सम्भावना रहनेपर स्वतन्त्र अदृष्टकी कल्पना नहीं होती, इस कारण उपनयन और अध्ययन दोनों विधियोंके उपादानके बलसे उपनयन ही अध्ययनका अङ्ग प्रतीत होता है।

शङ्का—अध्ययनका अङ्ग होनेपर भी उपनयनको प्रोक्षण आदिके समान संस्कारकर्मके रूपमें अङ्ग क्यों मानते हैं, अध्ययनका फलोपकारी ही अङ्ग क्यों न माना जाय?

समाधान—अङ्गी—प्रधानभूत—अध्ययनके स्वरूपका निष्पादक होनेसे उपनयन संनिपत्य उपकारी संस्कार ही अभ्यर्हित—उचित—है, फलका उपकारी अङ्ग तो अभ्यर्हित नहीं है, कारण कि अपूर्वके द्वारा आरात् उपकारक है, इसलिए माणवक—बालक—का संस्कार कर्म होनेसे ही उपनयन अध्ययनका स्वरूपोपकारी ही अङ्ग है। और भी हेतु है कि उपादान प्रमाणके तुल्य श्रुति तथा प्रकरण ये दो प्रमाण भी उपनयन अध्ययनका अङ्ग है, ऐसा बोधन करते हैं।

ब्राह्मण उपगच्छेत्सोऽधीयीतेति वाक्यविपरिणामस्य विवक्षितत्वात्। तच्छ्रुतिरेवोपनयनसंस्कृतं माणवकमादायाऽध्ययने विनियुङ्क्ते। न च तच्छब्देनैव माणवकस्यैव परामर्शो न संस्कारस्येति वक्तुं युक्तम्, संस्कारस्याऽनन्तरप्रकृतत्वात्। न च श्रुतेरनाकाङ्क्षितस्य समर्पणप्रसङ्गः, उपनयनाध्ययनयोरुपसत्तिद्वारा परस्परसाकाङ्क्षत्वस्य दर्शितत्वात्। ननु सोऽधीयीतेत्यत्र संस्कृतो माणवकः प्रातिपदकार्थ एव न तु विभक्त्यर्थः। न च प्रातिपदिकमात्रमङ्गाङ्गिभावसंबन्धं बोधयितुमलम्, द्वितीयाश्रुत्यादेरेव तद्बोधकत्वादिति चेद्, मैवम्; प्रातिपदिकस्याऽप्यन्विताभिधायितया संबन्धप्रतिपादकत्वात्। अन्वि-

---

'आठ वर्षके ब्राह्मणका उपनयन होना चाहिए' इस श्रुतिवाक्यका आठ वर्षका ब्राह्मण आचार्यके समीप जाय और वह पढ़े, इस प्रकारका वाक्यके विपरिणाममें—परिवर्तनमें—तात्पर्य है। इसलिए श्रुति ही उपनयनसंस्कारसे संस्कृत बालकको लेकर अध्ययनमें प्रेरित करती है। 'सोऽधीयीत' इस वाक्यमें 'तद्' शब्दसे केवल बालकका ही परामर्श—बोध—होता है, संस्कारका परामर्श नहीं होता। [यदि संस्कारका भी परामर्श होता तो संस्कृत बालक लिया जाता और उससे उपनयनरूप संस्कार अध्ययनके स्वरूपका उपपादक हो सकता, परन्तु ऐसा है नहीं, क्योंकि तत् शब्द केवल माणवकका परामर्श करता है] ऐसा कहना भी युक्तियुक्त नहीं है, कारण कि संस्कार ही समीपमें प्रकरणप्राप्त है (और 'तत्' शब्द स्वभावतः समीपवर्तीका परामर्श करता है)। श्रुतिमें अनपेक्षित अर्थका बोध कराना दोष इससे नहीं आता, कारण कि उपनयन और अध्ययनकी उपसत्तिके—नियमपूर्वक आचार्यके पास बैठनेके—द्वारा परस्पर अपेक्षा पूर्वमें ही दिखला चुके हैं।

शङ्का—'सोऽधीयीत—वह पढ़े' इस वाक्यमें संस्कारयुक्त बालक तो प्रातिपदिकका ही अर्थ है, विभक्तिका अर्थ नहीं है (विभक्त्यर्थ होनेसे ही उपनयन और अध्ययनमें अङ्गाङ्गिभावका बोध हो सकता है) केवल प्रातिपदिक अङ्गाङ्गिभावका बोध करनेमें समर्थ नहीं है, कारण कि द्वितीया विभक्तिका श्रवण आदि ही उक्त सम्बन्धका बोधक है।

समाधान—अन्वित—सम्बद्ध—अर्थका वाचक होनेसे प्रातिपदिक भी सम्बन्धका बोधक हो सकता है। यदि अन्वित अर्थका वाचक न

ताभिधायित्वाभावे तत्प्रयोग एव न स्यात्। तस्मात्तच्छब्दश्रुतिरङ्गत्वं गमयति। तथा प्रकरणमपि तद्गमकं वाजसनेयिशाखायां सर्वस्मृत्यनुमितश्रुतिषु चोपनयनं प्रकृत्याऽध्ययनविधानात्। न चैवमुपनयनप्रकरणे पठितमध्ययनमेवाऽङ्गं प्रसज्येतेति वाच्यम्, अध्ययनस्य फलत्वात्। फलवत्संनिधावफलं तदङ्गमिति न्यायेनोपनयनस्यैवाऽङ्गत्वप्राप्तेः। अत उपादानश्रुतिप्रकरणैरुपनयनस्याऽङ्गत्वं सिद्धम्। तच्चोपनयनं स्वयं नित्यभूतमङ्गिनोऽध्ययनस्य कथं न नित्यतामापादयेत्। नह्यङ्ग्यभावे कदाचित्कुत्रचिदङ्गं संभवति। अस्ति ह्यध्ययनस्याऽप्युपनयनवदकरणे प्रत्यवायः।

'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥'

माना जाय, तो उसका प्रयोग ही न होगा। ('सोऽधीयीत' यहांपर प्रधानविधिभूत अध्ययनसे अन्वित ही तच्छब्दका अर्थ है, अन्यथा उक्त प्रयोग न होगा) इस कारण 'तत्' शब्दका श्रवण ही उपनयनकी अङ्गता कहता है। एवं प्रकरण भी उसकी (अङ्गाङ्गिभाव सम्बन्धकी) प्रतीति कराता है, कारण कि वाजसनेयिशाखामें और सम्पूर्ण स्मृतियोंमें एवं अनुमित श्रुतियोंमें भी उपनयनका प्रक्रम (उपक्रम) करके अध्ययनका विधान किया गया है। इस दशामें तो उपनयनके प्रकरणमें पढ़े गये अध्ययनके अङ्गत्वके प्रसङ्गकी आशङ्का भी नहीं करनी चाहिए, कारण कि अध्ययन फल है। फल अङ्ग नहीं हो सकता, [वह तो (प्रधान) अङ्गी होगा] और 'फलवान्‌के सन्निधानमें उसका अङ्ग फलशून्य होता है' इस न्यायसे उपनयनको ही अङ्ग होनेका अवसर है। इसलिए उपादान, श्रुति तथा प्रकरण—इन तीनों प्रमाणोंसे उपनयन अङ्ग ही सिद्ध होता है, और वह अङ्गस्वरूप उपनयन नित्य होता हुआ अपने अङ्गी अध्ययनकी नित्यताका प्रतिपादन कैसे नहीं करेगा ? (अर्थात् नित्यभूत अङ्ग अपने अङ्गीकी नित्यताको भी सिद्ध करेगा)। यह निश्चित है कि अङ्गीके अभावमें अङ्गका रहना सम्भव नहीं हो सकता और उपनयनके न करनेमें जैसे प्रायश्चित्तका श्रवण है, वैसे ही अध्ययनके न करनेपर भी प्रायश्चित्तका श्रवण है—'जो ब्राह्मण वेदको न पढ़कर दूसरे शास्त्रोंमें परिश्रम करता है, वह इसी जीवनमें अपने वंशके सहित शूद्रतुल्य हो जाता है।' जो श्रोत्रिय नहीं तथा

अश्रोत्रिया अननुवाक्या अनग्नयः शूद्रसधर्माणो भवन्तीति स्मरणात् । तथा च नित्यमध्ययनं द्रव्यकामानुष्ठेयेनाऽनित्येनाऽध्यापनेन कथं प्रयुज्येत । न च वाच्यं काम्यमप्यध्यापनं नित्यसमीहितजीवनफलहेतुत्वान्नित्यमिति । तावताऽध्यापनस्य नित्यवदनुष्ठानासिद्धेः । शब्दप्रमाणाद्धि नित्यकर्त्तव्यताप्रमितौ संध्यावन्दनादाविवाऽकरणे प्रत्यवायभयान्नियमेन पुरुषः प्रवर्त्तते । अध्यापनस्य तु न शब्दान्नित्यकर्त्तव्यता प्रमीयते, किन्तु नित्यसमीहितस्य जीवनाख्यफलस्य हेतुत्वेन कल्प्यते । नहि तथा कल्पयितुं शक्यम्, अध्यापनमन्तरेण याजनप्रतिग्रहादिनाऽपि जीवननिष्पत्तेः ।

अथ मन्यसे उपनयनाध्यापनयोर्नित्यपुत्रोत्पादनविधिशेषतया नित्यत्वं भविष्यति । नित्यश्च पुत्रोत्पादनविधिः, नाऽपुत्रस्य लोकोऽस्तीत्य-

---

अनुवाक नहीं जानते एवं अग्निधारण नहीं करते वे ब्राह्मण शूद्र जैसे होते हैं, ऐसा स्मृतिकारोंने कहा है । इसलिए द्रव्यकी कामनासे किये जानेवाले अनित्य (काम्य) अध्यापनसे नित्य अध्ययनकी प्रयुक्ति कैसे हो सकती है ? । अध्यापन काम्य होता हुआ भी नित्य हो सकता है, कारण कि अध्यापन नित्य तथा अभीष्ट जीवनरूप फलका कारण है, [जीवनकालको सुखमय बनानेवाला द्रव्योपार्जन सर्वदा अभीष्ट होनेसे जीविका नित्य है और उसका कारण अध्यापन है, अतः वह भी नित्य हो सकता है] ऐसा भी कहना नहीं बन सकता, कारण कि ऐसा माननेपर भी अध्यापनके, नित्य विधिके तुल्य, अनुष्ठानकी सिद्धि नहीं हो सकती, क्योंकि शब्द प्रमाणसे नित्यविधिका निश्चय होनेपर सन्ध्यावन्दन आदिमें जैसे न करनेसे प्रायश्चित्तके डरसे नियमपूर्वक पुरुष प्रवृत्त होता है, इसलिए नित्य सन्ध्यावन्दन आदि विधिका अनुष्ठान शब्दतः नित्य प्राप्त होता है । अध्यापनकी नित्यता तो शब्द द्वारा निश्चित नहीं होती, किन्तु नित्य तथा अभीष्ट जीवन—जीविकारूप—फलका कारण होनेसे उसकी नित्यताकी कल्पना की जाती है, परन्तु ऐसी कल्पना करना सम्भव नहीं है, क्योंकि अध्यापनके विना भी यज्ञ करने तथा शुद्ध परिग्रहसे भी जीवनकी सिद्धि हो सकती है ।

शङ्का—वादी मानता है कि उपनयन और अध्यापन दोनोंकी नित्यता नित्यभूत पुत्रोत्पादन विधिके अङ्ग होनेसे सिद्ध होगी और पुत्रोत्पादन विधि नित्य

करणे प्रत्यवायश्रवणात् । तथा 'त्रिभिऋणैर्वा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति ऋणत्रयमुपन्यस्य पश्चात् 'एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी चाऽस्ति' इति पुत्रिणः पितॄन्प्रत्यानृण्यं दर्शयति। तच्चाऽऽनृण्यं पुत्रस्य पिण्डपितृयज्ञाद्यनुष्ठानद्वारेण पितृतृप्तिहेतुत्वादुपपद्यते। तदनुष्ठानं चाऽनुपनीतस्याऽनधीतस्य वेदार्थमजानतो न संभवति। अतो नित्यस्य पुत्रोत्पादनविधेः फलपर्यन्ततापेक्षितमनुशासनं तच्छेषतया विधीयते। तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः तस्मादेनमनुशासतीति । ततश्च पितुरेव नित्यपुत्रोत्पादनविधिसामर्थ्यादुपनयनाध्यापनविधीनां नित्यत्वं प्राप्तमिति।

है, कारण कि 'पुत्रहीनको कोई लोक (सद्गति) प्राप्त नहीं होता' इस प्रकार पुत्रोत्पादन न करनेमें प्रायश्चित्तका श्रवण है, और 'तीनों ऋणोंके साथ पुरुष उत्पन्न होता है' ऋषियोंके लिए ब्रह्मचर्य, देवताओंके लिए यज्ञ एवं पितरोंके लिए पुत्र-सन्तान, इस प्रकार तीन ऋणोंका उल्लेख करनेके अनन्तर—यह ऋण मुक्त हो जाता है, जो पुत्रवान् हो जाय और जो यज्ञ करे तथा जो ब्रह्मचारी हो, इस प्रकार पुत्रवान् पुरुष पितरोंके प्रति ऋणसे मुक्त होता है, यह दिखलाया गया है। वह ऋणमुक्तता पितरोंकी तृप्तिके कारणभूत पिण्डपितृयज्ञ आदिके अनुष्ठान द्वारा उपपन्न होती है। और उन पिण्डपितृ आदि यज्ञोंका अनुष्ठान ऐसे पुत्रसे नहीं हो सकता—जिसका उपनयन संस्कार न हुआ हो तथा जिसने वेद न पढ़ा हो एवं जो वेदके अर्थको न जानता हो। इसलिए नित्यभूत पुत्रकी उत्पादनविधिकी सफलताके लिए अपेक्षित अनुशासनका पुत्रोत्पादनविधिके अङ्गके रूपमें ही विधान किया जाता है, इस कारण 'शिक्षित पुत्र ही लोकोंकी प्राप्तिका साधन कहा गया है, इसलिए ही उसको आचार्य वेदादिका उपदेश देते हैं' (अर्थात् पुत्रके बिना पुण्यलोक नहीं मिल सकते और पुत्र होनेपर भी उसके उपनयन संस्कार और वेदाध्ययन कराये बिना फलकी प्राप्तिका सम्भव नहीं है, इसलिए उत्तम लोककी प्राप्तिरूप फलकी सिद्धिके लिए उपनयन तथा अध्यापन आवश्यक है एवं पुत्रोत्पादन विधिको सफल करनेवाले दोनों उसके अङ्ग हैं। इस निष्कर्षसे पिताको ही नित्य पुत्रोत्पादन विधिकी सामर्थ्यसे उपनयन तथा अध्यापनविधिका नित्य होना प्राप्त होता है। (इस प्रघट्टकसे वादीका आशय यह है कि दिया गया

नैतत्सारम् , संप्रतिपत्तिकर्मविधिशेषार्थवादरूपस्य 'तस्मात्पुत्रम्' इति वाक्यस्याऽनुशासनविधायकत्वायोगात् । यदा हि पिताऽरिष्टादिना स्वस्य मरणं निश्चिनुते तदा स्वानुष्ठेयानि वेदतदर्थतत्फलानि पुत्रे समर्पयेत् स च पुत्रस्तान्यनुष्ठेयतया स्वीकुर्यात् तदेतत्संप्रतिपत्तिकर्म । तथा च श्रूयते 'अथातः संप्रतिपत्तिर्यदा प्रैष्यन्मन्यते तदा पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति । स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति ।' तत्र च संप्रतिपत्तिकर्मणि पूर्वानुशासनमन्तरेणाऽकस्मादेव सकलकर्तव्यसंग्रहानुपपत्तेः फलपर्यन्तपुत्रोत्पादनविधिनाऽऽक्षिप्तमनुशासनं पूर्वनिर्वृत्तमेवाऽर्थवादतयाऽनेन वाक्येनाऽनूद्यते । ननु मा भूदेतद्वाक्येऽनुशासनविधानं तथाऽपि नित्य-

---

नित्यानित्यसंयोगविरोधरूप दोष अध्यापनके नित्य माननेपर भी नहीं आ सकता है) ।

समाधान—अध्यापनमें उक्त प्रकारसे नित्यत्वका साधन करना सारभूत नहीं है, कारण कि अपना ही अनुष्ठेय समझकर पिताके द्वारा समर्पित कर्मोंका स्वीकार करना संप्रतिपत्तिकर्म कहलाता है । कर्मविधिका अङ्ग तथा अर्थवादस्वरूप 'तस्मात्पुत्रम्—' यह पूर्वकथित वाक्य उपदेशका विधायक हो नहीं सकता है । जब कि पिता अरिष्ट आदिसे अपना (आसन्न ही) मरण निश्चित कर ले तब अपने किये हुए वेदके अध्ययन तथा अर्थविचार एवं उसके फल सबको ही पुत्रके अधीन कर दे और वह पुत्र उन सबका अनुष्ठान अपना कर्तव्य समझ कर उन्हें स्वीकार करे' इसको संप्रतिपत्तिकर्म कहते हैं, ऐसा ही श्रुतिमें कहा गया है—जब पिता अपनेको मरणासन्न समझता है तब पुत्रसे कहता है कि तुम ब्रह्म हो, तुम यज्ञ हो, तुम लोक हो, तब वह पुत्र कहता है—मैं ब्रह्म, मैं यज्ञ, मैं लोक हूँ । उस सम्प्रतिपत्ति कर्ममें पहले दिये हुए उपदेशके बिना अकस्मात् ही सम्पूर्ण कर्तव्योंका सङ्ग्रह—स्वीकार कर अनुष्ठान करना—उपपन्न नहीं हो सकता, इसलिए पहले ही (मरणासन्न अवस्थाके उपदेशसे पूर्व ही) किये गये अनुशासनका (कर्तव्यके उपदेशका) ही फलपर्यन्त पुत्रकी उत्पादनविधिसे आक्षेप होता है, जिसका कि अर्थवादके रूपमें इस वाक्यसे अनुवाद किया जाता है, अतः 'तस्मात्पुत्रम्—' इत्यादि वाक्य विधायक नहीं है ।

पुत्रोत्पादनविधिसामर्थ्यादेव पितुरुपनयनाद्यनुशासनविधिर्नित्य एव प्राप्त इति चेद्, मैवम्; पितुः पुत्रं प्रत्यननुष्ठापकत्वात्। अन्यथा स्तनन्धयस्येतरस्य वा मृतपितृकस्योपनयनाद्यभावप्रसङ्गात्। अनुशासनं तु कर्त्तव्यार्थोपदेशनमात्रमिति श्रौतलिङ्गादवगम्यते। तथा च श्रुतिः 'श्वेतकेतुर्हारुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति'। न च वाच्यं पितरि कथञ्चिन्मृते माणवक एवाऽऽचार्यान्तरमाहूय नित्यमुपनयनादिकं सम्पादयिष्यति ततोऽनुष्ठापनमेवाऽ-

---

शङ्का—यद्यपि 'तस्मात् पुत्रम्'—इस वाक्यमें अनुशासनका विधान मान भी लिया जाय, तथापि नित्यभूत पुत्रोत्पादनविधिकी ही सामर्थ्यसे पिताके लिए उपनयन आदि अनुशासनका विधान नित्य ही प्राप्त होता है। [तात्पर्य यह है कि जबतक उपनयन आदि अनुशासन पिता न करे तबतक उस पुत्रका पिण्डपितृयज्ञादिमें अधिकार न होनेसे नित्यभूत पुत्रोत्पादनका विधान सफल न होगा, अतः पिताको अनुशासनविधान भी नित्य ही प्राप्त होता है।]

समाधान—नहीं, ऐसा नहीं कह सकते, कारण कि पुत्रके प्रति अनुष्ठानका प्रयोजक पिता नहीं है। नहीं तो (यदि पिताके ही कारण अनुशासनका सम्भव होता तो) जिस दुधमुँहे या कुछ वयस्क (उपनयनयोग्य) बालकका पिता मर गया होगा उसके उपनयन आदि अनुशासनका अभाव हो जायगा, [क्योंकि अनुष्ठानके कारण पिता तो उसके रहे ही नहीं] किन्तु अनुशासन तो कर्तव्यके पालनके लिए उपदेशमात्र है, इस प्रकार श्रुतिसिद्ध लिङ्गसे प्रतीत होता है। जैसे कि श्रुति है—'अरुणिके पुत्र श्वेतकेतुसे उसका पिता उपदेश करता है'—आरुणेय श्वेतकेतु कोई एक (ब्राह्मण) था, उससे उसके पिता कहते हैं कि 'हे श्वेतकेतु! ब्रह्मचर्य (वेदाध्ययनव्रत) धारण करो, हे सौम्य! अर्थात् हे सुशील उत्तम मतिवाले पुत्र! हमारे कुलका बालक कोई भी वेदका अध्ययन तथा मनन किये बिना ब्राह्मण जैसा नहीं हुआ है'। (अर्थात् संस्कार तथा वेदाध्ययनादि कर्महीन जातिमात्रसे ब्राह्मणब्रुव नहीं हुआ है)।

शङ्का—दुरदृष्टवश पिताके मर जानेपर भी बालक (माणवक) ही किसी अन्य आचार्यको बुलाकर उपनयन आदि संस्कारोंका सम्पादन कर लेगा, इससे उसके लिए अनुष्ठान ही अनुशासन होगा 'अर्थात् अनुशासनका विधान तो नित्य ही हुआ'।

नुशासनमस्त्विति । तत्र किं माणवकः स्वाधिकारसिद्ध्यर्थमाचार्यान्तरं करोति किं वाऽऽचार्यनियोगसिद्ध्यर्थम् ? नाऽऽद्यः, अध्यापनप्रयुक्तिमध्ययनस्य वदता भवता माणवकस्य पृथगधिकारानङ्गीकारात् । न द्वितीयः, नह्यन्यनियोगोऽन्यस्य कर्त्तव्यबुद्धिमुत्पादयति । न चाऽकर्त्तव्यानुष्ठानाय साधनसम्पादनं युक्तम् । अथ साधनान्तरप्रतिनिध्युपादानवदधिकारिणोऽपि प्रतिनिध्युपादानेन कर्त्तव्यं माणवकः संपादयेत् , तन्न, वैषम्यात् । सर्वत्र ह्यधिकारिणः कर्त्तव्यमनुष्ठातुं साधनान्तरप्रतिनिधिरादीयते । अधिकारिप्रतिनिधिस्तु कर्त्तव्यमनुष्ठातुमादीयेत । न तावन्मृतस्याऽऽचार्यस्य कर्त्तव्यं

समाधान—उक्त शङ्कामें प्रष्टव्य यह होता है कि क्या 'स्वाध्यायोऽध्येतव्यः' इस विधिसे प्राप्त अपने अधिकारकी सिद्धिके लिए माणवक मृत पितासे अतिरिक्तको आचार्य बनाता है ? अथवा 'तमध्यापयीत' इस विधिसे प्राप्त आचार्यके नियोगकी सिद्धिके लिए ? इनमें प्रथम कल्प नहीं कह सकते, कारण कि 'अध्ययनकी प्रयुक्ति—अनुष्ठान—अध्यापनके द्वारा होती है, इस प्रकारके आपके मतमें माणवकका—बालकका—अलग कोई अधिकार ही नहीं माना गया है । दूसरा कल्प भी नहीं हो सकता, क्योंकि दूसरेका नियोग—अधिकार—दूसरेकी कर्तव्य बुद्धिको उत्पन्न नहीं कर सकता और जो कर्तव्य नहीं है उसके अनुष्ठानके लिए (आचार्यकरण आदि) उपायोंका सम्पादन करना युक्तिसङ्गत नहीं होता, इससे कर्तव्य समझे बिना ही आचार्यकरणका सम्पादन करेगा, इस शङ्काका अवकाश नहीं रह जाता ।

शङ्का—जैसे साधनान्तर प्रतिनिधिरूपसे लिये जाते हैं, वैसे ही अधिकारीके—आचार्यके—कर्तव्यका भी प्रतिनिधिके उपादानसे माणवक सम्पादन करेगा ।

समाधान—ऐसा नहीं हो सकता, कारण कि दृष्टान्तमें यहांपर विषमता है । [दृष्टान्तका स्वरूप दिखलाते हैं]—सर्वत्र ही अधिकारीके कर्तव्यका अनुष्ठान करनेके लिए दूसरे साधनभूत प्रतिनिधिका उपादान होता है । और अधिकारीका प्रतिनिधि तो कर्तव्यके अनुष्ठानके लिए लिया जाता है । [अधिकारीको अपना कर्तव्य करना है; परन्तु निरुक्त साधन नहीं मिलता है, ऐसी दशामें दूसरा साधन प्रतिनिधि लिया जाता है, एवं कर्तव्य करना आवश्यक है, परन्तु कारणवशात् अधिकारी समर्थ नहीं हुआ तब वह अन्य प्रतिनिधि करेगा, क्योंकि कर्तव्य करना आवश्यक है, अतः अधिकारि-

संभवति, विधिसंबन्धनिमित्तस्य निवृत्तत्वात् । नाऽपि प्रतिनिधित्वेनोपादेय-स्याऽऽचार्यस्य तत्संभवः । तस्याऽऽचार्यस्य कर्त्तव्यत्वसिद्ध्युत्तरकालीनत्वात् । अतो न माणवक आचार्यान्तरमादायाऽध्येतुमर्हति । अथ मृताचार्यशिक्षितं माणवकमन्य आचार्यः स्वीकृत्य स्वाधिकारं निर्वर्तयितुमध्यापयेत् , तदप्य-युक्तम् ; पूर्वोपनीतस्य माणवकस्याऽऽचार्यान्तरेण पुनरुपनयनासंभवे सत्यु-पनेतृत्वलक्षणस्याऽङ्गस्य वैकल्येऽङ्गिनोऽध्यापनस्य निष्पत्त्ययोगात् । न

वैकल्य या साधनवैकल्यमें प्रतिनिधिका ग्रहण होता है; परन्तु जहांपर कर्तव्य प्राप्त ही नहीं है, ऐसे स्थलमें प्रतिनिधिका ग्रहण प्राप्त नहीं होता, इस आशयसे दार्ष्टान्तिक–आचार्यकरण–में वैषम्य दिखलाकर प्रतिनिधिग्रहणका असम्भव दिखलाते हैं] मरे हुए आचार्यके कर्तव्यका तो सम्भव नहीं है, क्योंकि विधिके सम्बन्धका निमित्त तो वहांपर निवृत्त हो गया है, ['अध्यापयीत' इस विधिके अधिकारी आचार्यके मर जानेपर उक्त विधि किस नियोगका बोधन करेगी' इसलिए मरनेपर 'अहरहः सन्ध्यामुपासीत' इसके अधिकारके तुल्य किसी भी विधिका अधिकार नहीं रह जाता, अतः मृतका कुछ कर्तव्य ही नहीं है] और 'मृत पिताके' प्रतिनिधिस्वरूपसे लिये गये उस दूसरे आचार्यका ही वह कर्तव्य हो सकता है, कारण कि वह (प्रतिनिधिभूत) आचार्य तो कर्तव्यकी सिद्धिके अनन्तर कालमें ही किया गया है । [तात्पर्य यह है कि उपनयन, अध्यापन आदिको माणवकने कर्तव्य समझकर निर्द्धारित कर लिया, अब पिताके अभावमें उस कर्तव्यका पालन कैसे हो, तब उसने आचार्यकरण किया जिससे प्रतिनिधिभूत आचार्य उपनयन आदिको अपना कर्तव्य समझे ।] इस कारण माणवक (जिसका पिता मर गया हो) दूसरेको आचार्य बनाकर अध्ययन नहीं कर सकता ।

शङ्का—आचार्य–पिता–ने माणवकको शिक्षा अर्थात् उपनयन संस्कार आदि उपदेश दे दिये, परन्तु पढ़ाये बिना मर गया, ऐसे मरे हुए आचार्य द्वारा शिक्षित माणवकको दूसरा आचार्य शिष्य बनाकर अपने अधिकारकी सिद्धिके लिए पढ़ा लेगा ।

समाधान—यह भी कथन युक्त नहीं है, कारण कि पहले (मृत) आचार्य द्वारा उपनीत शिष्यका दूसरे आचार्य द्वारा दुवारे उपनयन संस्कारका सम्भव न होनेसे उपनयनरूप अङ्गके अभावमें अङ्गीभूत अध्यापनकी

चाऽनेनाऽऽचार्येणाऽङ्गभूतमुपनयनं माणवकान्तरेऽनुष्ठितमिति वाच्यम्, तथा सत्यङ्गिनोऽध्यापनस्याऽपि तत्राऽनुष्ठितत्वेन पुनरनुष्ठानायोगात्। अन्यथा स्वोपनीतस्याऽध्यापनात् प्रागेव मृतावङ्गिमात्रानुष्ठानाय माणवकान्तरस्वीकारः तर्ह्यनुपनीतमप्यध्यापयेत्। यदि स्वोपनीतानध्याप्य द्रव्यबाहुल्यायाऽन्यानप्यध्यापयतीत्युच्येत, तदा दरिद्रं नाऽध्यापयेत्। शुश्रूषायै दरिद्रमप्यध्यापयिष्यतीति चेद्, एवमपि त्वन्मते लौकिकवैदिकव्यवहारो दुर्वारः। लोके हि माणवककर्त्तव्यनिष्पत्तये एवाऽऽचार्योऽन्विष्यते नाऽऽचार्यकर्त्तव्यनिष्पत्तये माणवकः। वेदेऽपि सत्यकामो ह जाबालो ब्रह्मचर्यायाचार्यं स्वयमेवाऽन्विष्योपसन्नवानिति गम्यते। तथा च श्रुतिः 'स ह हारिद्रुमन्तं गौतममेत्योवाच ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति' तदेवमध्यापनस्य नित्यत्वे बहुदोषसद्भावादनित्येन च तेन नित्यस्याऽध्ययनस्य प्रयुक्तौ

सिद्धि नहीं हो सकती। इससे विपरीत [अङ्गवैकल्यसे भी अङ्गीकी सिद्धि हो सकती है तो] अपने द्वारा उपनीत शिष्यके पढ़ानेसे पूर्व ही मरण हो जानेपर केवल अङ्गीभूत अध्यापनकी (पढ़ानेकी) सिद्धिके लिए दूसरे माणवकका लेना स्वीकार हो तो, जिसका उपनयन न किया गया हो, उसको भी पढ़ा दिया जा सकता है। यदि अपने द्वारा उपनीत शिष्योंको पढ़ाकर अधिक द्रव्यकी अभिलाषासे दूसरोंको भी पढ़ा लिया जायगा, ऐसा कहो तो धनहीन बालकको पढ़ाना प्राप्त न होगा। यदि शुश्रूषा—सेवा—के लिए धनहीनका भी पढ़ाना प्राप्त होगा, तो ऐसा माननेपर लौकिक वैदिकव्यवहार तुम्हारे मतमें दुर्वार हो जायगा।

लोकमें बालकके कर्तव्यकी निष्पत्तिके लिए ही आचार्यकी अन्वेषणा होती है, आचार्यके कर्तव्यकी सिद्धिके लिए माणवककी खोज नहीं की जाती। एवं वेदमें भी सत्यकाम जाबाल ब्रह्मचर्य (वेदाध्ययन) के लिए स्वयं आचार्यकी खोजके लिए गुरुकुलमें पहुँचा था। जैसे कि श्रुति है—'स ह' इत्यादि। अर्थात् वह गौतमके पास जाकर कहने लगा भगवन्! मैं नियमपूर्वक वेद पढ़ना चाहता हूँ, इसलिए आपका शिष्य बनूं। इस प्रकार अध्यापनविधिको नित्य माननेमें बहुत दोषोंके आ जानेसे उसे अनित्य ही मानना चाहिए, तब उस अनित्य अध्यापनसे

नित्यानित्यसंयोगविरोधात् स्वविधिप्रयुक्तमेवाऽध्ययनमङ्गीकार्यम् ।

ननूपनयनाध्ययनयोः स्वविधिप्रयुक्तत्वे सति तत्प्रयुक्ततयैवोपनयनाध्यापनसिद्धेरुपनयीत तमध्यापयीतेति तद्विधानमनर्थकमिति चेद्, मैवम्, नाऽत्राऽऽचार्यव्यापारयोरुपनयनाध्यापनयोर्विधिः, किन्तु माणवकव्यापारयोरुपगमनाध्ययनयोः । ननु वाक्ये प्रयोजककर्तुराचार्यस्य व्यापारौ प्रतीयेते, तत्र साक्षात्कर्तुर्माणवकस्य व्यापारयोः स्वीकारे विरोधाज्जीवनार्थतया प्राप्तावाचार्यव्यापारावनूद्याऽप्राप्तयोर्माणवकव्यापारयोर्विधानस्य न्याय्यत्वात् । नाऽपि शब्दविरोधः, 'एतया ग्रामकामं याजयेत्' इत्यत्र प्रयोजकव्यापारमन्तरेण स्वार्थेऽपि णिच्प्रत्ययप्रयोगदर्शनात् । याजनस्य वृत्त्यर्थतया प्राप्तस्याऽनुवादेनाऽप्राप्तं यजनमेव विधीयते । एवम् 'अध्यापयीत' इत्यत्र किं न स्यात् ।

नित्यभूत अध्ययनकी प्रयुक्ति माननेमें नित्यानित्यसंयोगका विरोध होनेसे अध्ययनको अपनी विधि द्वारा ही प्रयुक्त हुआ मानना चाहिए ।

शङ्का—यदि उपनयन और अध्ययन स्वविधिप्रयुक्त माने जायँ, तो उसीसे उपनयन और अध्यापनकी सिद्धि हो जायगी, फिर 'उपनयीत' 'अध्यापयीत' इन वाक्योंसे उनका विधान करना व्यर्थ ही है ।

समाधान—नहीं, वैसा नहीं कह सकते, क्योंकि यहाँ आचार्यके व्यापारभूत उपनयन और अध्यापनकी विधि नहीं है, किन्तु माणवकके व्यापारभूत उपगमन और अध्ययनकी विधि है । यदि शङ्का हो कि वाक्यमें प्रयोजकभूत कर्ता आचार्यके उक्त दो व्यापार प्रतीत होते हैं, माणवकके नहीं होते, तो यह शङ्का भी युक्त नहीं है, कारण कि वहाँ प्रयोजक कर्ताको छोड़कर साक्षात् कर्ताके व्यापारका अङ्गीकार करने पर विरोध होता है, इससे जीवनके लिए प्राप्त आचार्यके व्यापारोंका अनुवाद करके अप्राप्त माणवकके व्यापारका विधान करना ही उचित प्रतीत होता है । शब्दके साथ भी विरोध नहीं है, क्योंकि 'एतया' इस वाक्यमें प्रयोजक व्यापारके विना स्वार्थमें भी 'णिच्' प्रत्ययका प्रयोग देखा जाता है । वृत्तिके लिए प्राप्त याजनके अनुवादसे जैसे अप्राप्त यजनका विधान किया जाता है, वैसे ही 'अध्यापयीत' इत्यादि स्थलमें भी क्यों नहीं होगा ?

ननु याजयेदध्यापयेदित्यत्र कर्तृव्यापारस्य णिच्प्रत्ययार्थतयाऽवगमादेकतरस्य प्रसिद्धस्याऽनुवादेनेतरस्य विधिरस्तु । 'उपनयीत' इत्यत्र तु धात्वर्थस्यैव प्रयोजकव्यापारत्वादनभिधीयमानः कर्तृव्यापारः कथं विधीयते । न च वाच्यमुपनयने मा भून्माणवकव्यापारविधिः, अध्यापने तु भविष्यतीति, वाक्ययोः सारूप्यात्, उच्यते; प्रयोजकव्यापाराभिधायिनाऽपि नयतिधातुना माणवकव्यापारस्याऽनभिधीयमानस्याऽपि गम्यमानतया वक्ष्यमाणत्वात् स एव धातुना लक्षणयोपादाय विधीयते, न प्रयोजकव्यापारः । तस्य स्वयमेव प्राप्तत्वात् । ननु तत्प्राप्तिर्दुःसंपादा, इतरेतराश्रयत्वप्रसङ्गात् । दक्षिणाशुश्रूषाद्यङ्गसहिते ह्यध्ययने माणवकस्य विहिते तस्य च स्वविधिप्रयुक्तौ सत्यां वृत्त्यर्थतयाऽऽचार्यप्रवृत्तिः प्राप्नोति ।

शङ्का—'यज्ञ करावे' 'अध्ययन करावे' इन वाक्योंमें प्रेरकरूप कर्ताके व्यापारकी 'णिच्' प्रत्ययके अर्थके रूपमें प्रतीति होती है (वह धात्वर्थ याजन, तथा अध्ययनकी प्रयुक्ति करा सकता है) इनमेंसे एक अर्थ जो प्रसिद्ध है उसका अनुवाद करके दूसरेका विधान मानना चाहिए । 'उपनयीत' (उपनयन संस्कार करावे) इस वाक्यमें धातुका अर्थ ही प्रेरणारूप प्रयोजक—प्रेरक—व्यापार है, इसलिए अभिधा द्वारा प्रतीत न होनेवाले कर्ताके व्यापारका विधान कैसे किया जा सकता है ? ऐसा भी नहीं कह सकते कि उपनयनमें माणवकके व्यापारका विधान न हो, परन्तु अध्यापनमें तो होगा, कारण कि दोनों वाक्योंमें समानता है ।

समाधान—उत्तर कहा जाता है, प्रयोजक व्यापारका बोधन करनेवाले 'नी' धातुसे भी अभिधावृत्ति द्वारा बोधित न होनेवाला माणवकका व्यापार प्रतीत हो जाता है, ऐसा हमको आगे प्रतिपादन करना है । और उसी 'नी' धातुसे लक्षणा वृत्ति द्वारा प्राप्त हुए उस माणवकके व्यापारका ही विधान किया जाता है 'प्रयोजक व्यापारका विधान नहीं किया जाता, कारण कि प्रयोजक व्यापार तो स्वयं प्राप्त है ।

शङ्का—उस माणवकके व्यापारके विधानकी प्राप्ति नहीं सिद्ध की जा सकती, कारण कि इसमें इतरेतराश्रय दोषका प्रसङ्ग आ जाता है । [इतरेतराश्रय दोष दिखलाते हैं]—दक्षिणा या सेवा आदि अङ्ग सहित अध्ययनका माणवकके लिए विधान करनेपर उस साङ्ग अध्ययनकी अपनी ही विधिसे प्रयुक्ति

वृत्त्यर्थप्रवृत्तौ प्राप्तायां तदनुवादेन माणवकव्यापारोऽध्ययनादिर्विधातुं शक्यत इति, मैवम् ; ग्रामकामं याजयेदित्यत्र याजनप्राप्तेरपि दुःसंपादत्वप्रसङ्गात् । दक्षिणाद्यङ्गसहिते कर्तृव्यापारे विहिते सति वृत्त्यर्थत्वेन प्रयोजकव्यापारप्राप्तिस्तत्प्राप्तौ च तदनुवादेन कर्तृव्यापारविधिरिति परस्पराश्रयत्वात् । अथ स्वविधिप्रयुक्तेषु यागान्तरेषु सामान्येन वृत्त्यर्थतया प्राप्तं प्रयोजकव्यापारमनूद्य ग्रामकामस्य यागविशेषो विधीयेत तर्हीहाऽपि विध्यन्तरेषु सामान्यप्राप्तप्रयोजकव्यापारानुवादेनोपगमनाध्ययनादिमाणवकव्यापारो विधीयताम् । ननु याजनात्मक एव प्रयोजकव्यापारो यागान्तरेषु प्राप्तोऽस्ति । उपनयनाध्यापनात्मकस्तु तथा न विध्यन्तरेषु प्राप्त इति चेत्, तर्हि भाविनी प्राप्तिरस्तु । माणवकव्यापारविधिसामर्थ्यादेव

होनेपर जीविकाके निमित्त आचार्यकी प्रवृत्ति प्राप्त होती है, और आचार्यकी आजीविकाके लिए प्रवृत्ति प्राप्त होनेपर उसका अनुवाद करके माणवकके अध्ययन आदि व्यापारका विधान किया जा सकता है, [इसलिए प्रयोजक-व्यापारको प्राप्त नहीं कह सकते] ।

समाधान—ऐसा नहीं है, कारण कि उक्त प्रकारसे प्राप्तिके दोष देनेसे तो 'ग्रामकी इच्छावालेको यज्ञ कराना चाहिए' इस वाक्यमें यज्ञ करानेकी प्राप्तिका भी सम्पादन नहीं कर सकते । दक्षिणा आदि अङ्गके सहित कर्त्ताके व्यापारका विधान होनेपर आजीविकाके लिए प्रयोजक व्यापारकी प्राप्ति होती है, और प्रयोजक व्यापारकी प्राप्ति होनेपर उसका अनुवाद करके कर्ताके व्यापारका विधान होगा, इस रीतिसे इतरेतराश्रय हो जाता है । यदि कहो कि अपने ही विधानसे प्रयुक्त दूसरे दूसरे यागोंमें सामान्यरूपसे प्राप्त हुए प्रयोजक व्यापारका अनुवाद करके ग्रामकी कामनावालेके लिए यागविशेषका विधान किया जाता है । (इससे अन्योन्याश्रय दोष नहीं आता), तो प्रकृतमें भी दूसरे दूसरे विधानोंके स्थलमें सामान्यतः प्राप्त प्रयोजक व्यापारके अनुवादसे समीपगमन तथा अध्ययन आदि माणवक व्यापारका विधान किया जाना चाहिए ।

शङ्का—यज्ञ कराना, ऐसा प्रयोजक व्यापार अन्य यागोंमें प्राप्त है । उपनयन, (समीपप्रापण) तथा अध्यापनरूप व्यापार, तो वैसा दूसरे विधानोंमें प्राप्त नहीं है ।

प्रयोजकव्यापारः प्राप्स्यते, तत्पूर्वकत्वात् माणवकव्यापारस्य । न च वैपरीत्येन प्राप्तिः शङ्क्या; नह्यनित्येन नित्यप्राप्तिः संभवतीत्युक्तत्वात् । ननु प्राप्तस्योत्पत्तिविध्यसंभवेऽपि तदनुवादेनाऽधिकारविधिः स्यादिति चेद्, न; वाक्ये जीवनादिनित्यकाम्याधिकारयोरश्रवणात् ।

तर्ह्यरुणया पिङ्गाक्ष्या क्रीणातीतिवद् गुणविशेषविधिरस्तु, स च गुणोऽष्टवर्षब्राह्मणाख्य इति चेद्, न; ब्राह्मणत्वाष्टवर्षत्वाख्ययोर्गुणयोरुभयोरपि विशेषतया परस्परसम्बन्धरहितयोर्विशिष्टविध्ययोगात्, पृथग् विधाने वाक्यभेदप्रसङ्गात् । अरुणवाक्ये तु विशेष्यस्य यागसाधनक्रयणस्याऽप्य-

---

समाधान—तो भाविनी—होने वाली—प्राप्तिको ले लीजिये । माणवकके (उपगमन या अध्ययनरूप) व्यापारके विधानकी सामर्थ्यसे ही प्रेरणारूप प्रयोजक व्यापार प्राप्त हो जायगा, कारण कि प्रयोजकव्यापारपूर्वक ही माणवकका व्यापार होता है अर्थात् आचार्यकी प्रेरणाके अनन्तर ही माणवकका उपगमन या अध्ययन होता है । इससे विपरीत अन्य किसी प्रकारसे प्राप्तिकी आशङ्का नहीं करनी चाहिए अर्थात् अध्यापनरूप प्रयोजकव्यापारसे अध्ययनकी प्राप्ति नहीं कहनी चाहिए, कारण कि अनित्य अध्यापनसे नित्य अध्ययनकी प्राप्ति नहीं हो सकती, यह पूर्वमें ही कह आये हैं ।

शङ्का—यद्यपि प्राप्तकी उत्पत्तिविधि नहीं हो सकती है, तथापि उसके 'प्राप्तके' अनुवादसे अधिकार विधि तो हो सकती है ?

समाधान—नहीं, नहीं हो सकती, कारण कि वाक्यमें जीवन आदि नित्य और काम्य अधिकारोंका श्रवण नहीं है । वाक्य तो 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' केवल इतना ही है । [इसमें 'जीविकाकामः' इत्यादि नित्य या काम्य किसी प्रकारके अधिकारका श्रवण नहीं है ।]

शङ्का—अच्छा तो 'लाल पिङ्गाक्षीसे क्रयण करता है' इस वाक्यके समान गुणविशेषका विधान मानो ? वह विधीयमान गुण अष्टवर्षात्मक ब्राह्मणरूप होगा ।

समाधान—नहीं, गुणविधान भी नहीं हो सकता है, कारण कि ब्राह्मणत्व और अष्टवर्षत्व दोनों गुण, विशेष होनेसे, परस्पर सम्बन्धरहित हैं, इससे विशिष्ट विधिका सम्बन्ध नहीं हो सकता, अलग अलग विधान करनेमें वाक्यभेदका

न्यतोऽप्राप्तस्य विधेयतयाऽरुणादीनामनेकेषामपि विशेषणानां तदन्वये सति विशिष्टविधानं युक्तम्, न तथेह प्रयोजकव्यापारो विधेयः; प्राप्तत्वात्। अतो नाऽनेकेषु गुणविधिः, तदुक्तम्—

'प्राप्ते कर्मणि नाऽनेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः॥' इति।

ननु प्रयोजकव्यापारस्य प्राप्तत्वाद्यथा विधिर्निराक्रियते तथा माणवकव्यापारस्याऽपि स निराकर्तुं शक्यः, 'माणवकमुपनयीत' इत्यत्र कर्मभूतस्य माणवकस्य व्यापाराप्रतीतेः। नहि 'ग्रामं गच्छेत्' इत्यत्र ग्रामस्य व्यापारः प्रतीयते, मैवम्; शब्दतो न्यायतश्चाऽत्र माणवकस्य गमनव्यापारप्रतीतेः।

प्रसङ्ग होगा। उक्त अरुण वाक्यमें तो विशेष्यभूत यागके साधनभूत क्रयणकी अन्य प्रकारसे प्राप्ति न होनेसे वह विधेय है, इसलिए अनेक विशेषणोंका भी उसके साथ अन्वय होनेसे विशिष्टका विधान युक्तिसङ्गत है। प्रकृतमें वैसा प्रयोजक व्यापार विधेय नहीं है, क्योंकि वह तो प्राप्त ही है, (इससे विशेष्यभूत प्रेरणात्मक व्यापारके विधेय न होनेसे अष्टवर्षत्व तथा ब्राह्मणत्व आदि विशेषणविशिष्टका विधान भी सम्भव नहीं हो सकता] इसलिए अनेक विशेषणोंमें गुणविधि नहीं हो सकती। कहा भी है—

अन्य प्रमाणसे प्राप्त कर्ममें अनेक गुणका विधान नहीं किया जा सकता। अप्राप्त कर्ममें तो एक ही यत्नसे बहुत गुणोंका भी विधान हो सकता है। अर्थात् अनेक गुणोंका भी विधेयविशेषणरूप एक यत्नसे विधान हो सकता है।

शङ्का—प्रयोजक व्यापारके प्राप्त होनेसे उसके विधानका जैसे निषेध किया जाता है, वैसे ही माणवकव्यापारके विधानका भी निषेध किया जा सकता है, कारण कि 'माणवकका उपनयन करे' इस वाक्यमें कर्मकारक माणवकके व्यापारकी प्रतीति नहीं होती है, जैसे 'ग्रामको जाना चाहिए' इस वाक्यमें ग्रामके व्यापारकी प्रतीति नहीं होती। [अर्थात् इससे जिस व्यापारकी प्रतीति ही नहीं होती उसका विधान कैसे हो सकता है, यह भाव है ?]

समाधान—ऐसा नहीं, कारण कि शब्द द्वारा और न्यायसे भी मावणकका गमनरूप व्यापार प्रतीत होता है। [शब्द द्वारा गमनकी प्रतीति दिखलाते हैं—]

लोके हि नयत्यर्थवाचिशब्दप्रयोगेषु नीयमानस्य गमनं दृष्टमिति शब्दतस्तत्प्रतीतिः तथा बालानामक्षरशिक्षायै शिक्षकगृहं प्रति गमनं दृष्टं ततो न्यायोऽपि माणवकव्यापारं प्रत्याययति। नहि प्रेक्षावान् माणवको विधिमन्तरेणाऽध्ययनादौ प्रवर्त्तते। अर्थावबोधादिदृष्टफलार्थत्वनिराकरणे रागतः प्रवृत्त्ययोगात्। ततो वाक्यविपरिणामेन माणवकव्यापारोऽत्र विधातव्यः। यथा 'ग्रामकामं याजयेत्' इत्यत्र 'ग्रामकामो यजेत्' इति विपरिणामस्तथा 'अष्टवर्षं ब्राह्मणमुपनयीत' इत्यत्रापि 'अष्टवर्षो ब्राह्मण उपगच्छेत् सोऽधीयीत' इति विपरिणामः स्यात्।

नन्वेवमपि नाऽत्र विधिः सङ्गच्छते, निरधिकारत्वात्। न तावदत्राऽष्टवर्षत्वमात्रमधिकारनिमित्तम्, शूद्रस्याऽप्युपनयनादिप्रसङ्गात्। नाऽपि ब्राह्मण्यमात्रम्, जातमात्रस्य तत्प्रसङ्गात्। नाऽप्युभयम्, तयोः परस्परान्वयाभावात्,

---

क्योंकि लोकमें नीधातुके अर्थके वाचक शब्दोंके प्रयोगोंमें नीयमानका गमन देखा गया है, इसलिए शब्दसे उसकी प्रतीति सिद्ध ही है। [न्यायसे भी उसकी प्रतीति दिखलाते हैं]—अक्षर सीखनेके लिए अध्यापकके घर बालकोंका जाना देखा गया है, इससे न्याय भी माणवकके व्यापारकी प्रतीति कराता है। विधानके बिना कोई भी बुद्धिमान् माणवक अध्ययनादिमें प्रवृत्त नहीं होता। अध्ययनका अर्थावबोध—अर्थनिश्चय—आदि दृष्ट फल न माननेपर रागसे अध्ययनमें प्रवृत्ति नहीं हो सकती। [कार्यमें दृष्ट फलके लिए ही राग द्वारा प्रवृत्ति देखी जाती है] इसलिए वाक्यका विपरिणाम करके माणवकके अध्ययन आदि व्यापारको ही प्रकृतमें विधेय मानना चाहिए जैसे 'ग्रामकी कामनावाले याजक यज्ञ करावें' इस वाक्यमें 'ग्रामकी इच्छावाला यज्ञ करे' ऐसा वाक्य बदला जाता है, वैसे ही 'आठ वर्षके ब्राह्मणबालकका उपनयन करे' इस प्रकृत वाक्यमें भी 'आठ वर्षका ब्राह्मण बालक गुरुके समीपमें जावे और वह पढ़े' इस प्रकार वाक्य बदलना होगा।

शङ्का—इस प्रकार माननेपर भी प्रकृतमें विधिका मानना सङ्गत नहीं है, कारण कि अधिकारकी सम्पत्ति ही नहीं है, क्योंकि केवल आठ वर्षकी अवस्था अधिकारकी हेतु नहीं मानी जा सकती, क्योंकि ऐसी अवस्थामें आठ वर्षके शूद्रको भी उपनयन संस्कारका प्रसङ्ग हो जायगा, एवं ब्राह्मण जाति ही अधिकारकी कारण

गुणानां च परार्थत्वादिति न्यायात् । अथ मन्यसे तयोरपि पार्ष्णिकः परस्परान्वयो भविष्यति । यथाऽरुणावाक्ये 'अरुणया क्रीणाति' इति प्रत्येकं शाब्दे क्रियान्वये पश्चादेकप्रयोजनत्वसामर्थ्यात् परस्परान्वयस्तद्वदिति, तन्न; तथा सत्यधिकारहेतोरशाब्दत्वप्रसङ्गात् । अतो निरधिकारो विधिरयुक्तः; नैष दोषः; शाब्दमेव सर्वत्राऽधिकारनिमित्तमिति नियमाभावात् । साङ्गकर्मानुष्ठानसामर्थ्यस्याऽशाब्दस्याऽप्यधिकारहेतुत्वात् कथंचिच्छाब्दत्वनियमेऽपि क्रियासंबन्धाभिधानमुखेन विशिष्टसमर्पणे शब्दद्वयस्य तात्पर्यकल्पनात् तत्सिद्धिः ।

नन्वेवमपि विशिष्टस्य नाऽधिकारनिमित्तत्वमुपादेयविशेषणत्वात् । तथा

नहीं हो सकती, क्योंकि ब्राह्मण बालकके उत्पन्न होते ही उसका उपनयन प्राप्त होगा। दोनोंको भी नहीं मान सकते, क्योंकि दोनोंका परस्पर अन्वय ही नहीं है, कारण कि 'गुणपदार्थ दूसरेके उपकारक होते हैं' (परस्पर अन्वित नहीं होते) ऐसा न्याय है। यदि मानो कि उनका भी पीछे (दोनोंका पृथक् पृथक् विधिके साथ अन्वय होनेके अनन्तर) परस्पर अन्वय हो जायगा। जैसे अरुणाशब्दघटित वाक्यमें 'अरुणा—लाल—वर्णवाली—से क्रयण करता है' इस प्रकार प्रत्येकके साथ शाब्द क्रियान्वय करनेके अनन्तर सबका एक प्रयोजन होनेके कारण परस्पर अन्वय होता है, वैसे ही प्रकृतमें भी होगा, तो ऐसा भी नहीं मान सकते, कारण कि ऐसा माननेसे अधिकारके कारणमें शाब्दप्रतीतिविषयताका अभाव हो जायगा। अधिकार-कारण तो विशिष्ट है, परन्तु दोनोंका परस्पर शाब्द अन्वय हुआ ही नहीं है, वह तो एकप्रयोजनगम्य होनेसे पार्ष्णिक है, इसलिए अधिकारशून्य विधि युक्त नहीं है।

समाधान—उक्त दोष नहीं आता, कारण कि सर्वत्र अधिकारका कारण शाब्द—शब्द द्वारा अभिधासे प्रतीयमान—ही होना चाहिये, ऐसा नियम नहीं है। प्रकृतमें अङ्गविशिष्ट कर्मका अनुष्ठानसामर्थ्य शाब्द न होता हुआ भी अधिकारका हेतु होता है, इसलिए यदि आग्रहसे कथंचित् यही मानो कि अधिकारका निमित्त शाब्द ही होना चाहिए, तो क्रियासम्बन्धके बोधन द्वारा विशिष्टकी प्रतीति करानेमें दोनोंका 'अष्टवर्ष और ब्राह्मण' शब्दोंका—तात्पर्य कल्पन करनेसे विशिष्टको शाब्द मानना सिद्ध हो सकता है।

शङ्का—विशिष्टके शाब्द होनेपर भी वह अधिकारका निमित्त

हि—'तमध्यापयीत' इत्यत्र प्रयोजकव्यापारं प्रति माणवकस्य कर्मताभिधायिनी द्वितीयाविभक्तिः स्वव्यापारं प्रति माणवकस्य कर्तृत्वं गमयति, 'कुर्वन्तं प्रयुङ्क्ते' इति न्यायेन प्रयोजकव्यापारस्य कर्तृविषयत्वात्। न च वाच्यम् 'अध्यापयीत' इति वाक्ये विपरिणामस्योक्तत्वान्माणवकस्याऽधिकारित्वम्, न तु कर्तृत्वमिति। तत्र हि प्राप्तप्रयोजकव्यापारानुवादेन कर्तृव्यापारे विधिसम्बन्धमात्रं परिणम्यते, न तु शब्दप्राप्तं माणवकस्य कर्तृत्वं पराक्रियते। अत उपादेयो माणवकः, तल्लक्षणवत्त्वात्। साक्षाद्वा परम्परया वा विधिविषयतयाऽनुष्ठेयमिति तल्लक्षणम्, कर्त्रादयश्चाऽनुष्ठेयं प्रति कारकत्वात् परम्परयाऽनुष्ठेयाः। अतः कर्तुरुपादेयस्य माणवकस्य यद्विशेषणं जातिविशिष्टं वयः न तदधिकारनिमित्तम्। 'लोहितोष्णीषा ऋत्विजः

नहीं हो सकता, क्योंकि वह उपादेयका (कर्मकारकभूत माणवकका) विशेषण है, क्योंकि 'उसको अध्यापन करे' इस वाक्यमें प्रयोजकके—आचार्यके—व्यापारके—प्रेरणाके—प्रति माणवकको कर्म कहनेवाली द्वितीया विभक्ति अपने व्यापारके प्रति माणवकके कर्तृत्वकी प्रतीति कराती है, कारण कि 'करते हुये पुरुषको प्रेरित करता है' इस न्यायसे प्रयोजकका व्यापार (प्रेरणा) कर्ताको ही विषय करता है। यह कहना उचित नहीं कि 'अध्यापन करे' इस वाक्यमें पूर्व कहे हुए 'माणवक पढ़े' ऐसे वाक्यपरिणामसे माणवकका अधिकारी होना प्रतीत होता है, प्रेरणाविषयीभूत कर्ता होना प्रतीत नहीं होता।' कारण कि उस पूर्वकथित वाक्यविपरिणाममें (णिच् प्रत्ययसे) प्राप्त हुए प्रयोजकव्यापारके अनुवादसे कर्ताके व्यापारमें विधिका संबन्धमात्र परिणत किया जाता है, शब्दप्राप्त माणवकके कर्तृत्वका निषेध नहीं किया जाता है। इस कारण माणवक उपादेय है, क्योंकि उसमें उपादेयका लक्षण विद्यमान है। [उपादेयका लक्षण दिखलाते हैं]—'साक्षात् अथवा परम्परासे विधिका विषय होकर अनुष्ठानके योग्य होना उपादेयका लक्षण है और कर्ता आदि अनुष्ठेयविधिके प्रति कारक होनेसे परम्परासे अनुष्ठेय होते हैं, इसलिए कर्तृभूत उपादेय माणवकका जो जातिविशिष्ट अवस्थारूप विशेषण है, वह

प्रचरन्ति' इत्यादौ कर्तृविशेषणस्य लोहितोष्णीषत्वादेरधिकारनिमित्तत्वादर्शनात्। न च कर्त्तैवाऽधिकारी, कर्त्तुरनुष्ठेयकारकतया विधिं प्रति गुणभूतत्वाद् अधिकारिणश्च विधिं प्रति स्वामितया प्राधान्येनाऽन्वयात्। न चैवमधिकारहेतोरेवाऽसम्भवः, अनुपादेयविशेषणस्य तद्धेतुत्वात्। विधिप्रयुक्तानुष्ठेयतद्विशेषणव्यतिरेकेण विधिसंबन्ध्यनुपादेयं तादृशविशेषणं च जीवनगृहदाहस्वर्गकामनादि। अत्र त्वष्टवर्षत्वाद्युपादेयविशेषणं तत्कथमधिकारहेतुः स्यात्। अत्रोच्यते; किं भावनाया वाक्यार्थत्वमाश्रित्येदं ब्रवीषि उत नियोगस्य अथवा इष्टसाधनस्य? नाऽऽद्यः; तत्राऽधिकारान्वयस्य कर्त्रन्वयपूर्वकतया कर्तृविशेषणस्यैवाऽधिकारहेतुत्वात्। पुरुषप्रवृत्तिर्हि भावना, सा च क्रियात्मिका सती स्वरूपनिष्पादकानि कारकाणि प्रथममपेक्षते।

अधिकारका निमित्त नहीं हो सकता। [उपादेयविशेषण अधिकारका निमित्त नहीं हो सकता, उसका दृष्टान्त द्वारा समर्थन करते हैं—'लाल पगड़ी बांधे याज्ञिक लोग प्रचरण करते हैं' इस वाक्यमें कर्ताके विशेषणीभूत लाल पगड़ी अधिकारकी निमित्त नहीं देखी गयी है। कर्ताको ही अधिकारी नहीं मान सकते, कारण कि कर्ता अनुष्ठेय—विधि—का कारक होनेसे विधिके प्रति गौण (अप्रधान) हो जाता है। और विधिके प्रति अधिकारीका तो प्रमुत्व होनेसे प्रधानरूपसे अन्वय होना चाहिए। इस युक्तिसे अधिकार हेतुके अभावकी शङ्का नहीं हो सकती, कारण कि अनुपादेयके विशेषणोंमें अधिकारकी हेतुताका होना सम्भव है। जैसे विधिप्रयुक्त अनुष्ठेय तथा उसके विशेषणसे अतिरिक्त विधिका सम्बन्धी अनुपादेय था वैसे जीवनगृहदाह स्वर्गकामना आदि विशेषण हैं। प्रकृतमें तो 'आठ वर्षका होना' इत्यादि उपादेयके विशेषण अधिकारके कारण कैसे हो सकते हैं?

समाधान—इस आशङ्काके उत्तरमें कहा जाता है—क्या भावनाको वाक्यका अर्थ मान कर उक्त आशङ्का करते हो? अथवा नियोगको? या इष्टसाधनको? इनमें प्रथम कल्प नहीं बन सकता, कारण कि उसमें (भावनामें) अधिकारका अन्वय कर्ताके साथ अन्वय होकर ही होता है, इसलिए कर्ताका विशेषण ही अधिकारका कारण हो सकता है, कारण कि पुरुषकी प्रवृत्ति ही तो भावना कहलाती है। वह भावना क्रियाकलापरूप होती हुई अपने सारूप्यको

तत्र पुरुषार्थधात्वर्थयोर्भाव्यत्वेन तत्करणत्वेन चाऽन्वये सति परिशेषात् स्वर्गकामादयः कर्तृत्वेनाऽन्वीयन्ते । तस्य च कर्तुर्व्यावर्त्तकानि जीवनगृहदाहकामनादीनि । ततः कर्तुरेव फलनियमात् स एव कर्त्ता फलभोक्तृत्वोपाधिना स्वामित्वादधिकारं प्रतिपद्यते । अतश्चोपादेयकर्तृविशेषणान्येवाऽधिकारिणोऽपि व्यावर्त्तकानि सम्पद्यन्ते ।

नन्वस्तु तर्हि द्वितीयः, नियोगो हि स्वरूपोपाधित्वेनैव नियोज्यविषयावपेक्षते, विना ताभ्यां कस्य कस्मिन्नियोग इत्याकाङ्क्षाया अनिवृत्तेः । ततो वाक्यगतस्वर्गकामादिर्नियोज्यत्वेन धात्वर्थश्च विषयत्वेनाऽन्वेति । न चाऽत्राऽधिकारान्वयः पृथगपेक्ष्यते । 'ममाऽयं नियोगः' इति प्रतिपत्तुर्नियोज्यस्यैव तत्स्वामितयाऽधिकारित्वात् । स चाऽधिकारी विषयानुष्ठानमन्तरेण

बनानेवाले कारकोंकी सर्व प्रथम अपेक्षा करती है, कर्तृ, कर्म आदि कारकोंके बिना क्रियास्वरूपकी सिद्धि नहीं हो सकती, उसमें से पुरुषार्थका भाव्य—साध्य—रूपसे और धात्वर्थका उस पुरुषार्थके कारणरूपसे अन्वय होनेपर स्वर्ग कामादि पद परिशेषन्याय द्वारा कर्तारूपसे अन्वित होते हैं। और जीवन, गृहदाह (स्वर्ग) कामना आदि उक्त कर्ताके विशेषण हैं । इस कारणसे कर्तामें फलसम्बन्धका नियम होनेसे वही कर्ता, फलका भोग पानेवाला होनेसे, स्वामी है, अतः वह अधिकार प्राप्त करता है, इससे उपादेयभूत कर्ताके विशेषण ही अधिकारीके भी विशेषण हो जाते हैं ।

[इस प्रकारसे भावनाको वाक्यार्थ माननेवाले भाट्ट सिद्धान्तसे भी उक्त आशङ्काका निराकरण किया गया । अब नियोगको वाक्यार्थ माननेवाले प्रभाकरके मतसे भी उक्त आशङ्काका निराकरण करनेके लिए प्राभाकर मतका अनुवाद करते हैं]—अच्छा तो द्वितीय पक्ष (नियोगको वाक्यार्थ मानना) ही रहे, कारण कि नियोग अपनी स्वरूपभूत उपाधिसे ही नियोज्य और विषयकी अपेक्षा करता है, क्योंकि नियोज्य तथा विषयके बिना 'किसका और किस कार्यमें नियोग है ?' इस आशङ्काकी निवृत्ति नहीं होती, इसलिए (स्वर्गकामो यजेत) इत्यादि वाक्यमें पढ़े गये स्वर्गकाम आदिका नियोज्यरूपसे और धात्वर्थका विषयरूपसे अन्वय होता है। यहाँपर अधिकारका अन्वय पृथक् अपेक्षित नहीं है, कारण कि 'यह मेरा नियोग है' इस प्रकारकी धारणावाला नियोज्य ही, स्वामी होनेसे, अधिकारी है, और वह अधिकारी विषयके

नियोगनिष्पत्तिमपश्यंस्तदनुष्ठाने कर्तृतयाऽन्वयं गच्छति। तथा चाऽस्मिन्पक्षेऽधिकारान्वयदशायां स्वर्गादीनामनुपादेयविशेषणत्वं व्यवस्थितमिति, तदेतदसारम्; प्रकृताप्रतिपक्षत्वात्। नियोगवादिनो ह्यनुपादेयविशेषणमेवाऽधिकारहेतुरिति वदन्तोऽपि क्वचित्कर्तृविशेषणेनाऽधिकारिणं व्यावर्त्तयन्ति। 'राजा स्वाराज्यकामो राजसूयेन यजेत' इत्यत्र कर्तृविशेषणेन राजत्वेन स्वाराज्यकामस्याऽधिकारिणो विशेषणीयत्वात्। अन्यथा स्वाराज्यकामस्य वैश्यादेरपि तदधिकारप्रसङ्गात्। न चैवमनुपादेयमेवाऽधिकारहेतुरिति नियमस्य भङ्गः, राजत्वस्य वैश्यादिभिरनुष्ठानेनाऽनिष्पाद्यस्याऽनुपादेयत्वात्। एवं च प्रकृतेऽप्यन्येनाऽनुष्ठानादसम्पाद्यस्याऽष्टवर्षोपेतब्राह्मणस्य कर्तृविशेषणत्वेऽप्यधिकारहेतुता किं न स्यात्?

(यज्ञ आदिके) अनुष्ठानके बिना नियोगकी सिद्धिको न देखकर उसका अनुष्ठान करनेमें कर्तारूपसे अन्वित होता है, इसलिए इस पक्षमें अधिकारके अन्वयके अवसरमें स्वर्ग आदिमें अनुपादेयविशेषणत्व व्यवस्थित ही होता है। इससे उपादेय विशेषण अधिकार हेतु नहीं हो सकता, इत्यादि आपत्ति नहीं हो सकती।]

इस प्रकार द्वितीय पक्ष सारभूत नहीं है, अर्थात् तुच्छ है। कारण कि उक्त समर्थन प्रकृतके—कर्ताके विशेषणको अधिकारनिमित्त होनेके—प्रतिकूल नहीं है, क्योंकि अनुपादेय विशेषण ही अधिकारका कारण होता है, ऐसा माननेवाले नियोगवादी (प्राभाकर) भी किसी स्थलमें कर्ताके विशेषणसे भी अधिकारीकी व्यावृत्ति करते हैं। जैसे 'राजा स्वराज्यकी—स्वर्गके आधिपत्यकी—इच्छा करता हुआ राजसूय यज्ञ करे, इस वाक्यमें कर्ताके विशेषणीभूत राजत्वसे स्वराज्यकाम अधिकारीको विशिष्ट करना ही है, नहीं तो स्वराज्य चाहनेवाले वैश्य आदिका भी राजसूय यज्ञमें अधिकार प्रसक्त हो जायगा। 'इस प्रकार अनुपादेय ही अधिकारका हेतु है' इस नियमके भङ्ग होनेका भय भी नहीं है, कारण कि राजत्वकी वैश्य आदि क्षत्रियेतर वर्णोंसे अनुष्ठान द्वारा उत्पत्ति न होनेके कारण वह अनुपादेय है। इस प्रकार 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इस प्रकृत वाक्यमें भी ब्राह्मणेतरसे अनुष्ठानद्वारा निष्पादनके अयोग्य आठ वर्षकी अवस्थासे युक्त ब्राह्मणत्व, कर्ताका विशेषण होनेपर भी, अधिकारका हेतु क्यों नहीं होगा? अर्थात् अवश्य होगा।

नन्वेवं तर्हि तृतीयः पक्षोऽस्तु । तत्र श्रेयःसाधनरूपे वाक्यार्थे श्रेयसो भोक्तृव्यरूपस्य भोक्त्राकाङ्क्षायाः प्राथम्यात्तत्साधनस्याऽपि भोक्त्रन्वयः प्रथमभावी । न च साधनस्य कृतियोग्यतया कर्त्राकाङ्क्षस्य कर्त्रन्वय एव प्राथमिक इति शङ्कनीयम् ; कृतियोग्यताया अनियमात् । श्रेयःसाधनेऽपि चन्द्रोदयादौ तददर्शनात् । यत्राऽपि तद्योग्यताऽस्ति तत्राऽपि श्रेयसः प्रधानत्वात्तदनुसारेणाऽन्वयो वाच्यः । अथ साधनस्य वाक्यार्थत्वात् तत्प्राधान्यम्, तथापि तत्स्वरूपोपाधिभूतं हि श्रेयः कस्य साधनमित्येवं तन्निरूपकत्वात् । साधकापेक्षा तु विशिष्टसाधनप्रतीत्युत्तरकालीना । ततः प्रथमप्रतीतश्रेयोऽनुसारेण भोक्त्रन्वये सति पश्चादभिलषितसाधनत्वस्याऽत्र कृतियोग्येष्टसाधनत्वार्थनिष्ठतया विधिना चोदितत्वात् कृतेश्च कर्त्रपेक्षत्वात् स एव भोक्ताऽ-

---

[इस प्रकार गुरुमतमें उपादेय विशेषणको भी उनके मतके ही अनुसार अनुपादेय बनाकर अधिकारका निमित्त सिद्ध करके इष्टसाधनत्ववादी एकदेशीके मतसे भी उसे सिद्ध करनेके लिए उनके मतका अनुवाद करते हैं—] तब तो तीसरा (इष्टसाधनत्वको वाक्यका तात्पार्यार्थ मानना) पक्ष ही मानो, उस मतके अनुसार श्रेयःसाधनरूप वाक्यार्थमें भोक्तृव्यरूप इष्टको भोक्ताकी आकाङ्क्षा ही सर्व प्रथम होती है, इसलिए उसके साधन—उपायभूत—यज्ञादिका भी पहले ही भोक्ताके साथ अन्वय होगा । और यह भी शङ्का नहीं हो सकती कि साधनके कृतियोग्य होनेसे उसे कर्ताकी आकांक्षा है, इससे सर्व प्रथम उसका ही अन्वय कर्ताके साथ करना चाहिये, कारण कि साधनमें कृतियोग्यताका नियम नहीं है, क्योंकि अपने इष्टके साधन चन्द्रोदयादिमें कृतियोग्यता नहीं देखी जाती । जिस साधनमें क्रियायोग्यता है, उसमें भी इष्टके ही प्रधान होनेसे उसके ही अनुसार अन्वय करना उचित है । यद्यपि वाक्यार्थ होनेसे साधनमें प्राधान्य प्राप्त है तथापि साधनका स्वरूपोपाधि—(जिसके कारण उसमें साधनता है, ऐसी वस्तु) भूत इष्ट ही है, क्योंकि 'किसका साधन है', इस प्रकार इष्ट साधनका निरूपक है । क्योंकि साधककी अपेक्षा तो विशिष्ट साधनकी प्रतीति होनेके अनन्तर ही होती है । इसलिए प्रथम प्रतीत हुए इष्टके अनुसार भोक्ताके साथ अन्वय हो जाता है, पीछे इष्टसाधनत्वके साथ अन्वय होगा । प्रकृतमें कृतियोग्य इष्टसाधनत्व अर्थगत है, अतः विधिके द्वारा प्रेरणाका विषय होनेसे और कृतिको कर्ताकी

धिकारी कर्त्तृतां प्रतिपद्यते। ततोऽस्मिन् पक्षेऽनुपादेयस्यैवाऽधिकारिविशेषणतेति। एवमपि प्रकृते नाऽस्ति विरोधः; उपगमनरूपेऽभिलषितसाधने प्रथमं भोक्तृतयाऽधिकारान्वयं प्राप्तस्य माणवकस्य पश्चात् कर्त्रन्वयं प्राप्स्यतोऽपि यद्विशेषणं ब्राह्मण्यादि तस्याऽनुपादेयविशेषणत्वात्। अतोऽङ्गभूतस्योपगमनस्य साधिकारित्वे सति अङ्गिनोऽध्ययनस्याऽपि तत्सिध्यति। अङ्गाङ्गिनोः सर्वत्रैकाधिकारित्वात्।

नन्वेवं तर्हि ब्राह्मण्यवदष्टवर्षत्वस्याऽप्युगमनाधिकारहेतोरध्ययनेऽप्यन्वयान्नवमवर्षादर्वागेवाऽध्ययनसमाप्तिः प्राप्ता सा च दुःशकेति चेद्, न; अङ्गाङ्गिनोः कालैक्यानियमात्। अन्यथाऽङ्गमन्वाधानं पर्वण्यनुष्ठायाऽङ्गिभूताया इष्टेः प्रतिपद्यनुष्ठानं न सम्भवेत्। अतो नाऽङ्गाधिकारहेतुः कालोऽ-

---

अपेक्षा होनेसे वही भोक्ता अधिकारी कर्ता भी हो जाता है। इस प्रकार इस पक्षमें अनुपादेय ही अधिकारीका विशेषण होता है। [अर्थात् उपादेय माणवकका विशेषण अष्टवर्षत्वविशिष्ट ब्राह्मणत्व अधिकारका हेतु नहीं हो सकता। खण्डन करते हैं]—इस मतके अनुसार भी प्रकृतमें कोई विरोध नहीं आता, कारण कि उपगमनरूप इष्टसाधनमें पहले भोक्तारूपसे अधिकारके अन्वयको प्राप्त और पीछे कर्ताके साथ अन्वय पानेवाले माणवकका भी जो ब्राह्मणत्व आदि विशेषण है, वह अनुपादेय विशेषण ही है। इसलिए अङ्गभूत उपगमनकी साधिकारिता सिद्ध होनेसे अङ्गीभूत अध्ययनकी भी साधकारिता सिद्ध हो जाती है, क्योंकि यह नियम है कि अङ्ग तथा अङ्गीका सर्वत्र एक ही अधिकारी होता है।

शङ्का—वैसा माननेसे ब्राह्मणत्वके समान उपगमनाधिकारकी हेतु आठ वर्षकी अवस्थाका भी है अङ्गीभूत अध्ययनमें अन्वय होगा; इससे नवम वर्षके प्रारम्भके पूर्व ही अध्ययनकी समाप्ति होनी चाहिए परन्तु ऐसा होना अत्यन्त कठिन है।

समाधान—अङ्ग और अङ्गी दोनों एक ही कालमें होते हैं यह कोई नियम नहीं है। यदि यह नियम माना जाय, तो अङ्गभूत अन्वाधानके पर्व (पूर्णिमा या अमा) में अनुष्ठान करके अङ्गीभूत इष्टिका प्रतिपदूमें अनुष्ठान करना सम्भव न होगा, इससे अङ्गके अधिकारका कारणीभूत समय अङ्गीके अधिकारका कारण नहीं है, यह प्राप्त होता है, अतः पूर्वोक्त प्रतिपादनके

ह्यधिकारहेतुः । तदेवं नित्याधिकारसम्भवादध्ययनविधौ न काऽप्यनुपपत्तिः ।

ननु 'सकृत्कृते कृतः शास्त्रार्थः' इति न्यायेन सकृदध्ययनादेव नित्याध्ययनविधिसिद्धेरावृत्तिर्न लभ्येतेति चेद्, न; अक्षरावाप्तिलक्षणदृष्टफलानुपपत्त्या तल्लाभात्, त्वयाऽप्यर्थावबोधफलानुपपत्त्यैव तत्कल्पनात्। तर्ह्यक्षरावाप्तिपूर्वकार्थावबोध एवाऽऽवृत्तिहेतुरिति चेद्, न; शाखान्तरीयेभ्यः पौरुषेयेभ्यो वा वाक्येभ्योऽस्वीकृतेभ्योऽनावृत्तेभ्योऽप्यर्थावबोधदर्शनात्। न च तर्हि मा भूतामक्षरावाप्त्यावृत्ती इति वाच्यम्; जपस्वाध्यायविध्यध्ययनविध्योरसम्भवप्रसङ्गात्। नह्यनवाप्तेष्वक्षरेषु ब्रह्मयज्ञस्वाध्यायो जपितुं शक्यः। नाऽप्यावृत्तिमन्तरेणाऽध्ययनं घटते। अक्षरावाप्तिपर्यन्तव्यापारस्याऽध्ययनशब्दवाच्यत्वात्। तस्मादक्षरग्रहणान्तो अध्ययनविधिः। यदि विधेरदृष्टं फलम-

---

अनुसार अध्ययनविधिमें नित्याधिकारका सम्भव होनेके कारण किसी भी प्रकारकी-अनुपपत्ति नहीं हो सकती है।

शङ्का—एकवार विधिका अनुष्ठान कर देनेसे शास्त्रार्थ चरितार्थ हो जाता है, इस न्यायके अनुसार एकवार अध्ययनसे ही नित्य अध्ययनका विधान चरितार्थ हो जायगा, इस परिस्थितिमें उसकी आवृत्ति प्राप्त न होगी।

समाधान—अक्षरग्रहणरूप दृष्ट फलकी अनुपपत्तिसे अध्ययनकी आवृत्तिका लाभ हो जायगा। तुमको भी तो अर्थावबोधरूप फलकी अनुपपत्तिसे ही अध्ययनकी आवृत्तिकी कल्पना करनी पड़ती है। तब तो अक्षरग्रहणपूर्वक अर्थनिश्चयको ही आवृत्तिका कारण मानना होगा? नहीं, क्योंकि नियमपूर्वक स्वीकृत नहीं किये गये अथवा बार बार आवृत्ति कर अभ्यस्त नहीं किये गये दूसरी शाखाओंके तथा लौकिक वाक्योंसे भी अर्थका निश्चय देखा गया है। और यह भी नहीं कह सकते कि अक्षरग्रहण और आवृत्ति दोनों न हों तो मत हों, कारण कि जप-स्वाध्यायविधि और अध्ययनविधि दोनोंका सम्भव न होनेका प्रसङ्ग आ जायगा, कारण कि अक्षरग्रहण किये विना ब्रह्मरूप स्वाध्यायका जप करना नहीं बन सकता और आवृत्तिके बिना अध्ययन भी नहीं बन सकता, क्योंकि अक्षरग्रहणपर्यन्त व्यापार ही अध्ययन शब्दका अर्थ है, इसलिए अक्षरग्रहणपर्यन्त अध्ययनका विधान है। यदि विधिका अदृष्ट फल

पेक्षितम्, तर्ह्यक्षरप्राप्तिसमवेतमेव तत्कल्पनीयं दृष्टसमवेतादृष्टे सति स्वतन्त्रा-दृष्टायोगात् । एवं चाऽध्ययनविधेरक्षरग्रहणमात्रपर्यवसानाद्विचारः क्रतुविधि-प्रयुक्तो भविष्यति ।

यत्तु शाबरभाष्ये वेदस्याऽन्यनिरपेक्षतया विचारहेतुत्वं वदन् भाष्यकारोऽध्ययनविधेर्विचारहेतुतामङ्गीचकार, तत्र परम्परया हेतुत्वमव-गन्तव्यम् । विधीयमानाध्ययनप्राप्तो हि स्वाध्यायः क्रतुविधीनुपस्था-पयति । ते च विधयः स्वाध्यायादापातप्रतिपन्ना अनुष्ठेयनिर्णयज्ञानम-न्तरेणाऽनुष्ठापयितुमशक्नुवन्तस्तन्निर्णयाय विचारं प्रयोजयन्ति । न चाऽनुष्ठानमेव मा भूदिति वाच्यम्, नित्यविधिष्वकरणे प्रत्यवायस्याऽप्या-पाततः प्रतिपन्नत्वात् । काम्यविधिषु तु फलकामनैवाऽऽधानमिव विचारं प्रयुङ्क्ते । नन्वनेकविधिप्रयुक्तिकल्पनाद्वरमध्ययनविधिप्रयुक्तिकल्पनं विचा-

---

मानना ही जरूरी हो, तो अक्षरप्राप्तिमें नित्य रहनेवाला ही अदृष्ट मानना चाहिए, क्योंकि दृष्टगत अदृष्टका सम्भव होनेपर स्वतन्त्र (दृष्टनिरपेक्ष) अदृष्टकी कल्पना करना उचित नहीं है । इस प्रकार अध्ययनविधिका केवल अक्षरग्रहणमें तात्पर्य होनेसे यज्ञविधिके द्वारा ही विचार होगा ।

शाबरभाष्यमें विचारके प्रति वेदको स्वतन्त्र कारण कहते हुए भाष्यकारने अध्ययनविधिको भी जो विचारका कारण माना है, उसका परम्परया कारण माननेमें तात्पर्य समझना चाहिए । विहित अध्ययनसे प्राप्त स्वाध्याय-स्वशाखीय वेद यज्ञविधियोंकी उपस्थिति कराता है । और स्वाध्यायसे आपाततः ज्ञात वे उपस्थित विधियां साध्यके निर्णयात्मक ज्ञानके बिना अपने अनुष्ठानमें अधिकारीको प्रवृत्त करानेके लिए समर्थ न होकर अनुष्ठेयके निर्णयके लिए विचारकी प्रयुक्ति करती हैं । यदि कहा जाय कि अनुष्ठान ही मत हो, क्या हानि है ? नहीं, हानि है, क्योंकि नित्यविधिका अनुष्ठान न करनेसे प्रायश्चित्त होता है, यह आपाततः (विचारसे पूर्व ही) निश्चित हो जाता है । और काम्य-विधिस्थलोंमें तो फलकी अभिलाषा ही आधानके समान विचारकी भी प्रयुक्ति करा देती है ।

[उक्त प्रकारसे प्रत्येक क्रतुविधान विचारकी प्रयुक्ति करेंगे, इससे विचारके अनेक प्रयोजकोंकी कल्पनामें गौरव है, इस आशयसे आशङ्का करते हैं—] अनेक

रस्येति चेद्, न; विधिर्हि सर्वत्र स्वविधेयस्य वा तदुपकारिणो वा प्रयोजको नाऽन्यस्य। विचारस्तु नाऽध्ययनविधेयो नाऽपि तदुपकारी। न चैवमुत्तरक्रतुविधिप्रयुक्तिर्विचारस्य निराकर्तुं शक्या, तद्विधिविधेयं प्रत्युपकारित्वात्। न चैकस्य विचारस्याऽनेकविधिप्रयोज्यत्वानुपपत्तिः, प्रतिवाक्यं विचारसाध्यनिर्णयज्ञानभेदेन तदुपपत्तेः। आधानस्य चैकस्याऽप्यनेकविधिप्रयोज्यत्वदर्शनात्। यद्यनेकविधिप्रयोज्यत्वे गौरवाद्भीतोऽध्ययनविधिप्रयोज्यत्वमेव विचारस्य ब्रूपे, तदा यागाद्यनुष्ठानस्याऽपि तत्प्रयोज्यत्वं वक्तव्यं स्याद्, लाघवात्। त्वत्पक्षे चाऽध्ययनविधिफलस्य स्वर्गादिसिद्धिपर्यन्ततया यागानुष्ठानस्य विधेयोपकारित्वात्। ततः क्रतुविधिवैयर्थ्यमा-

---

विधियोंके कारण (विचारकी) प्रयुक्तिकल्पनाकी अपेक्षा एक अध्ययनविधिसे ही विचारकी प्रयुक्ति मानना औचित्यपूर्ण है।

खण्डन करते हैं—ऐसा नहीं, कारण कि विधि केवल अपने विधेय तथा उसके उपकारीकी ही प्रयोजक हो सकती है, दूसरेकी नहीं और विचार तो अध्ययनविधिका न साध्य है और न उसका 'विचारका' अध्ययन उपकारी ही है। इस रीतिसे उत्तर—अध्ययनविधिके अनन्तर विहित—यज्ञविधिके द्वारा विचारकी प्रयुक्तिका निषेध नहीं किया जा सकता; कारण कि उन यज्ञविधियोंके विधेयके प्रति विचार उपकारी है। [जैसे अभी कह आये हैं कि विधेयके निर्णयके विना अनुष्ठानमें प्रवृत्तिका सम्भव नहीं है, अतः निर्णायक होनेसे विधेयके प्रति विचार उपकारी है]। विचाररूप फलकी अनेक विधियोंसे प्रयुक्ति करना युक्तियुक्त नहीं है, यह भी नहीं कह सकते, कारण कि प्रत्येक वाक्यके विचारसे उत्पन्न होनेवाले निर्णयात्मक ज्ञानके भेदसे उसका होना युक्तियुक्त है। एक ही आधानकी अनेक विधि द्वारा प्रयुक्ति देखी गई है। यदि अनेकविधियोंकी प्रयुक्ति माननेमें गौरव दोषसे डर कर एक अध्ययनविधि द्वारा ही विचारकी प्रयुक्ति मानते हो, तो लाघवका स्वीकार करके यागादिके अनुष्ठानकी प्रयुक्ति भी अध्ययनविधिके द्वारा ही क्यों नहीं कहते? तुम्हारे मतमें अध्ययनविधिका फल स्वर्गादिकी सिद्धि तक है, अतः यागका अनुष्ठान [अध्ययनविधिसे तुम्हारे अभिमत स्वर्गादि] विधेयका ही उपकारी है, इससे पृथक् यज्ञका विधान

पद्येत । ननु सिद्धान्तेऽप्यतिप्रसङ्गः समानः, विमतमध्ययनं क्रतुविधिप्रयुक्तम्, क्रत्वनुष्ठापकत्वात्, अर्थविचारनिर्णयवत्, अध्ययनात् प्रागप्रतिपन्नानां क्रतुविधीनामध्ययनप्रयोजकत्वायोगात् । अध्ययनविधिरप्यध्ययनात् प्रागप्रतिपन्न इति चेत्, सत्यम्, तथापि संध्योपासनादिविधिवत् पित्रादिभ्यः श्रूयमाणोऽध्ययनविधिरध्ययनं प्रयोजयति। न च क्रतुविधयोऽध्ययनात्प्राक्पित्रादिभ्यः श्रोतुं शक्याः, येन तत्प्रयोज्यत्वमध्ययनस्याऽऽपाद्येत । अतोऽध्ययनविधिप्रयुक्तमध्ययनं क्रतुविधिप्रयुक्तश्च धर्मविचार इत्यङ्गीकर्त्तव्यम् ।

अस्तु तर्हि ब्रह्मविचारस्याऽपि धर्मविचारवत् सकलत्रैवर्णिकाधिकृतोत्तरनित्यविधिप्रयुक्तिरिति चेत्, तत्र किं श्रवणविधिप्रयुक्तिर्ब्रह्मविचारस्य किं वा क्रतुविधिप्रयुक्तिः? नाऽऽद्यः; सर्वत्रैवर्णिकानां श्रवणाद्यननुष्ठाने प्रत्यवायाभा-

---

करना व्यर्थ हो जायगा। उक्त अतिप्रसङ्ग दोष, तो तुम्हारे सिद्धान्तमें भी समानरूपसे बना है, क्योंकि अनुमान करेंगे—विमत विवादग्रस्त अध्ययनकी यज्ञविधिके द्वारा प्रयुक्ति होती है, कारण कि अध्ययन क्रतुका अनुष्ठान करानेवाला है, जैसे अर्थका विचार द्वारा निर्णय करना। [उक्त अनुमानमें अनुकूल तर्क दिखलाते हैं] अध्ययनसे पूर्व ज्ञात नहीं हुई क्रतुविधियां अध्ययनकी प्रयोजक नहीं हो सकतीं। यद्यपि अध्ययनविधि भी अध्ययनसे पूर्व ज्ञात नहीं है यह सच है तथापि सन्ध्योपासन आदि विधिके सदृश अपने पिता आदिके उपदेश द्वारा ज्ञात अध्ययनविधि अध्ययनकी प्रयुक्ति करा सकती है और उस प्रकारकी क्रतुविधियां तो अध्ययनसे पूर्व पिता आदिके उपदेश द्वारा ज्ञात नहीं हो सकती हैं। जिससे उन क्रतुविधियों द्वारा अध्ययनकी प्रयुक्तिकी आपत्ति दी जा सके; इसलिए ऐसा ही मानना उचित है कि अध्ययनविधिके द्वारा ही अध्ययन है और क्रतुविधि द्वारा धर्मविचारकी प्रयुक्ति है ।

शङ्का—जैसे धर्मविचारकी प्रयुक्ति तीनों वर्णोंके अधिकारसे प्राप्त अध्ययनके अनन्तर विहित यज्ञविधि द्वारा होती है, वैसे ही ब्रह्मविचारकी प्रयुक्ति भी उक्त नित्य विधियोंसे ही क्यों न मान ली जाय? [अतः ब्रह्मविचारके लिए पृथक् शास्त्रके आरम्भकी आवश्यकता नहीं है ।]

समाधान—इस आशङ्काका उत्तर देते हुए यह प्रश्न होता है कि 'श्रोतव्यः' क्या इस श्रवणविधिसे ब्रह्मविचारकी प्रयुक्ति प्राप्त है? अथवा 'सोमेन यजेत' इत्यादि क्रतुविधिसे? इनमें प्रथम कल्प नहीं बनता, कारण

चात् तान् प्रति नित्यविधित्वानुपपत्तेः। परमहंसस्यैव श्रवणाद्यकरणे प्रत्यवायात्। नाऽपि द्वितीयः, ब्रह्मविचारस्य क्रत्वनुपकारित्वात्। नन्वग्निहोत्रादिकमनुतिष्ठद्भिरनुष्ठेयमङ्गजातादिकं वेदान्तेषु नाऽस्तीत्येवं निश्चेतुं वेदान्ता विचारयितव्या इति चेद्, न; अध्ययनजन्यापातदर्शनेनैव तावन्मात्र-

कि श्रवणका अनुष्ठान न करनेसे सम्पूर्ण त्रैवर्णिक पापभागी होते हैं, श्रवण नहीं है, इसलिए सकल त्रैवर्णिकोंके प्रति श्रवण आदिको नित्यविधि नहीं कह सकते, क्योंकि परमहंसोंके लिए ही श्रवण आदिका अनुष्ठान न करनेसे प्रायश्चित्त शास्त्रसिद्ध है। दूसरा विकल्प भी नहीं टिकता, क्योंकि ब्रह्मविचार सोमादि यागका उपकारी नहीं है।

शङ्का—अग्निहोत्रका अनुष्ठान करनेवाले अधिकारी पुरुषोंको निश्चय करना है कि वेदान्तवाक्योंमें अनुष्ठेय अग्निहोत्र आदि तथा उसके अङ्ग नहीं हैं, इसलिए वेदान्तोंका विचार करना प्राप्त है।

समाधान—नहीं, उसके लिए पृथक् शास्त्रारम्भकी आवश्यकता नहीं है, कारण कि अध्ययनसे ही आपाततः ज्ञान हो जानेसे इतने ही प्रयोजनके लिए

(१) परमहंस यतिभेदोंमें—

'कुटीचको बहूदको हंसश्चैव तृतीयकः।
चतुर्थः परमो हंसो यो यः पश्चात् स उत्तमः।'

इस प्रकार चार तरहका संन्यास दिखलाया गया है। कुटी बनवा कर उसमें ही सांसारिक विषयोंसे विरक्त होकर काषाय वस्त्र एवं शिखा, उपवीत, त्रिदण्ड धारण करता हुआ ब्रह्मज्ञानका अभ्यास करनेवाला कुटीचक कहलाता है। और घर छोड़कर केवल सात घरोंमें भिक्षा करनेवाला बहूदक कहा जाता है। एवं वही बहूदक एक ही दण्ड धारण करता है, तो हंस कहलाता है। तथा सर्वपरिग्रहत्यागी परमहंस होता है, जैसे पुराणोंमें कहा है—

'कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम्।
अक्षमालां च गृह्णीयाद्वैणवं दण्डमव्रणम्।
माधूकरमथैकान्तं परमहंसः समाचरेत्।'

उक्त लक्षणोंसे युक्त यति यदि ब्रह्मचिन्तन या ब्रह्मज्ञानसे रहित हो जाय, तो

'काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः।
स याति नरकान् घोरान्महारौरवसञ्ज्ञितान्॥'

स्मृतिके अनुसार प्रायश्चित्त भागी होता है। तथा 'न दण्डं न शिखां नाच्छादनं चरति परमहंसः' इस प्रकार श्रुतिने परमहंसका लक्षण करके कहा कि 'ज्ञानमेवाऽस्य दण्डः'· ज्ञान ही उसका दण्ड है। यदि ज्ञान नहीं तो सुतरां प्रायश्चित्ती होगा।

निश्चयात् । तदेवं ब्रह्मविचारे धर्मविचारवदधीतस्वाध्यायस्य त्रैवर्णिकमात्रस्याऽनधिकाराच्छ्रवणादिविधिप्रकरणपठितसाधनचतुष्टयसम्पन्नत्वलक्षणमधिकारिविशेषणं न्यायतः प्रापयितुमानन्तर्यवाचकोऽथशब्दः सूत्रकारेण प्रयुक्तो नाऽऽरम्भार्थविवक्षयेति स्थितम् ।

ननु शास्त्रारम्भे शिष्टाचारपरिपालनाय विघ्नोपशान्तये च मङ्गलाचरणं कर्त्तव्यम्, ततोऽथशब्दो मङ्गलार्थोऽस्तु, सम्भवति हि तस्य मङ्गलार्थत्वम् ।

'ॐकारश्चाऽथशब्दश्च द्वावेतौ ब्रह्मणो मुखात् ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥'

इति स्मृतेरिति चेत्? तत्र किं माङ्गल्यं वैयधिकरण्येन ब्रह्मजिज्ञासां प्रति

उसकी आवश्यकता नहीं है । [जैसे घट, पट आदि शब्दोंके पढ़नेमात्रसे विचार करनेके पूर्व सामान्य घट, पटका बोध हो जाता, इसके लिए विशेष उपायका अवलम्बन नहीं किया जाता, वैसे ही वेदान्तवाक्योंके पढ़नेमें अग्निहोत्रादि शब्दोंके न आनेसे ही ज्ञात हो जायगा कि यहांपर अग्निहोत्र आदि नहीं हैं] ।

इस प्रकार मींमांसा करनेपर धर्मविचारमें जैसे वेद पढ़े हुए त्रैवर्णिकमात्रका अधिकार है, वैसे ब्रह्मविचारमें न होनेसे श्रवण आदिकी विधिके प्रकरणमें पढ़े गये शम, दम आदि साधनचतुष्टयसम्पन्नत्व अधिकारीका विशेषण है, इस सिद्धान्तका न्यायतः बोध करानेके लिए आनन्तर्यस्वरूप अर्थके वाचक 'अथ' शब्दका सूत्रकारने प्रयोग किया है । अधिकाररूप अर्थकी विवक्षासे नहीं किया, ऐसा निर्णय होता है ।

शङ्का—'शिष्टाचारकी रक्षा करने तथा विघ्नोंकी शान्तिके लिए मङ्गलाचरण करना चाहिए' इस नियमके अनुसार मङ्गलका वाचक 'अथ' शब्द यहांपर माना जाय, क्योंकि 'अथ' शब्दका मङ्गलरूप अर्थ होना सम्भव है, स्मृतिमें कहा भी है—

ॐकार और अथ शब्द दोनों ब्रह्माजीके मुखसे कण्ठको भेदन करके बाहर प्रकट हुए हैं, इसलिए दोनों मङ्गलके वाचक हैं ।

समाधान—'अथातो ब्रह्मजिज्ञासा' इस सूत्रमें पढ़े गये मङ्गलार्थक अथशब्दकी वाक्यार्थके साथ सङ्गति नहीं है, यह विकल्प द्वारा दिखाते हैं—क्या (अथ शब्दार्थ) मङ्गल ब्रह्मजिज्ञासाके प्रति वैयधिकरण्यसे (कर्ता या

कारकत्वमापद्याऽन्वेति किं वा सामानाधिकरण्येन विशेषणत्वमापद्य? नाऽऽद्यः, माङ्गल्यस्य कर्त्राद्यन्यतमकारकतायां प्रमाणाभावात्। न च जिज्ञासानुपपत्तिर्मानम्, कारकान्तरैरेव तदुपपत्तेः। जीवः कर्त्ता, चित्तैकाग्र्यसहकृतं वेदान्तवाक्यं करणम् इत्यादीनि कारकान्तराणि। नाऽपि द्वितीयः, 'जिज्ञासा मङ्गलम्' इत्युक्ते प्रशंसापरतयाऽर्थवादत्वप्रसङ्गात्। शिष्टाचाराद्यर्थं तु मङ्गलाचरणमानन्तर्यवाचिनाऽप्यथशब्देन सम्पादयितुं शक्यम्, अथकारपरोङ्कारादिध्वनेर्मृदङ्गादिध्वनिवत् मङ्गलात्मकत्वात्।

एवमपि 'अथैवं मन्यसे' इत्यादाविवाऽथशब्दः प्रकृतादर्थादर्थान्तरमभिद-

---

कर्म आदिरूप) कारकत्वका आपादन कर अन्वित होता है? [अर्थात् मङ्गलके द्वारा या मङ्गलकी ही तथा स्वयं मङ्गलभूत जिज्ञासा करनी चाहिए, ऐसा वाक्यार्थ होता है क्या?] अथवा सामानाधिकरण्यसे विशेषण होकर अन्वित होता है? [अर्थात् जिज्ञासा ही मङ्गल है, ऐसा वाक्यार्थ होता है]। प्रथम विकल्प नहीं माना जा सकता, कारण कि कर्ता आदिमें से मङ्गल कोई भी कारक है, ऐसा माननेमें प्रमाण नहीं है। कारकके बिना इस जिज्ञासाकी अनुपपत्ति भी प्रमाण नहीं मानी जा सकती, कारण कि मङ्गलसे अतिरिक्त दूसरे कारकोंसे भी उसकी उपपत्ति हो सकती है। [कारकान्तरोंको दिखलाते हैं]—जीव कर्ता है और चित्तकी एकाग्रतासे युक्त वेदान्तवाक्य करण हैं, इत्यादि दूसरे कारक विद्यमान हैं, [जिनसे कि जिज्ञासाकी उपपत्ति हो सकती है]। दूसरा विकल्प भी नहीं बनता, कारण कि जिज्ञासा मङ्गलरूप है, ऐसा सामानाधिकरण्य माननेसे 'अथ जिज्ञासा' इस वाक्यका स्तुतिमें ही तात्पर्य हो जानेके कारण अर्थवादका प्रसङ्ग हो जायगा [इसका स्वार्थमें तात्पर्य न होगा]। शिष्टाचारका पालन करनेके लिए मङ्गल करना तो आनन्तर्यवाची अथशब्दके प्रयोगसे भी हो सकता है। अथशब्द और ओंकार आदिकी ध्वनि मृदङ्ग आदि ध्वनिके समान मङ्गलस्वरूप ही है। [अथकार शब्दका प्रयोग एवकारके समान 'कार' शब्दके साथ समस्त समझना चाहिए, या अकार थकारपरक अथकारशब्दको समझना चाहिए अथवा 'ॐकारश्चाऽथशब्दश्च' इस श्लोकसे इन दोनोंको आदि शब्द माननेसे ॐकारके सहचार्य्यसे अथ शब्दमें भी वर्णसमष्टिव्यपदेश माना गया है]।

शङ्का—इस प्रकार अथशब्दको आनन्तर्यार्थक माननेपर भी 'अथैवम्' अर्थात् 'अब तुम ऐसा मानते हो' इस वाक्यमें जैसे अथशब्द प्रकृत अर्थसे

धात्विति चेद्, न; हेतुफलभावेनाऽऽनन्तर्याभिधाने प्रकृतादर्थादर्थान्तरत्वस्याऽन्तर्णीततया सिद्धेः। न च वैपरीत्येनाऽऽनन्तर्यमेवाऽन्तर्णीततया सिध्यत्विति वाच्यम्, तत्र किं नियमेन पूर्ववृत्ततया हेतुभूतो वस्तुविशेषो द्योत्यते किं वा यत्किञ्चिद्वस्तु पूर्ववृत्तमपेक्ष्यते ? नाऽऽद्यः; आनन्तर्याभिधानमन्तरेण हेतुतया पूर्ववृत्तवस्तुविशेषनियमासिद्धेः। न द्वितीयः, लोके सर्वव्यापारेष्वपि यत्किञ्चित्पूर्ववृत्तादर्थान्तरस्य सिद्धत्वादथशब्दप्रयोगस्याऽनुवादादृष्टार्थत्वयोरन्यतरत्वप्रसङ्गात्। अतो नियतपूर्ववृत्तपुष्कलकारणद्योतनायाऽऽनन्तर्यमेवाऽथशब्देनाऽभिधातव्यम्। यद्यप्यानन्तर्यमात्राभिधाने तन्न सिध्यति, तथापि मुख्यानन्तर्यस्वीकारे सिद्ध्येदेव पुष्कल-

---

अन्य अर्थका अभिधान करता है, वैसे ही जिज्ञासासूत्रमें प्रयुक्त अथशब्द भी उसी अर्थका वाचक माना जाय ? क्या हानि है ?

समाधान—नहीं, ऐसा नहीं माना जा सकता, क्योंकि हेतु और फल भावसे आनन्तर्यका अभिधान करनेसे ही अथशब्दार्थमें प्रकृत अर्थसे भिन्न अर्थके अन्तर्गत हो जानेसे वह सिद्ध ही हो जाता है [अर्थात् आनन्तर्य कहनेसे यह नियमतः प्रतीत होता है अब दूसरा विषय चलता है, इसलिए उक्त अर्थान्तरका पृथक् अभिधान करनेकी आवश्यकता नहीं है] यदि शङ्का हो कि वैपरीत्यसे याने अथशब्दका प्रकृत अर्थसे अर्थान्तर माननेसे ही आनन्तर्यका ही अन्तर्णीतरूपसे अभिधान हो जायगा ? तो यह भी युक्त नहीं है, कारण कि क्या उसमें नियमतः पूर्ववृत्त होनेसे कारणस्वरूप वस्तुविशेषका द्योतन—ज्ञापन—होता है ? या पूर्ववृत्त यत्किञ्चित् वस्तुकी अपेक्षा होती है ? इनमें प्रथम पक्ष ठीक नहीं है, क्योंकि आनन्तर्यके अभिधानके बिना कारणरूपसे पूर्वसम्पन्न वस्तुविशेषके रहनेका नियम सिद्ध नहीं हो सकता। दूसरा विकल्प भी नहीं हो सकता, क्योंकि लोकमें सभी व्यापारोंमें कुछ-न-कुछ पूर्व वस्तुसे अन्य अर्थ सिद्ध ही है, इससे अथशब्दका प्रयोग अनुवाद या अदृष्ट—इनमें से किसी एक प्रकारके ही अर्थका बोधक हो जायगा। इसलिए नियमतः (व्यभिचारके बिना) पहलेके पर्याप्त कारणोंका बोधन करनेके लिए आनन्तर्यरूप ही अथशब्दका अर्थ मानना चाहिए। यद्यपि आनन्तर्यमात्रके अभिधानसे उक्त अर्थकी सिद्धि नहीं हो सकती, तथापि मुख्य आनन्तर्य अर्थका स्वीकार करनेसे तो सिद्धि हो ही जाती है [मुख्य आनन्तर्य दिखलाते हैं]—पुष्कल—

कारणात् फलस्य यदानन्तर्यं तदेव मुख्यम्, अव्यवधानादव्यभिचाराच्च। यत्तु हेतुफलयोरानन्तर्यं तत्कदाचिद्व्यभिचरति कदाचिद्व्यवधीयते चेति गौणमेव स्यात्। न च वाच्यं कार्यं चेद्, दृश्यते किं पुष्कलकारणावगमेनेति? पुष्कलकारणस्याऽधिकारिविशेषणत्वेन फलपर्यन्तेच्छाविचारादिप्रवृत्तौ प्रतिपत्त्यपेक्षत्वात्।

ननूक्तमेवाऽधिकारिविशेषणम् 'अथाऽतो धर्मजिज्ञासा' इत्यत्रत्येनाऽथशब्देनेति चेद्, न; तत्र ह्यध्ययनानन्तर्यमथशब्देनोक्तम्' न च तस्याऽत्राऽधिकारिविशेषणत्वं सम्भवति, केवलव्यतिरेकाभावेनाऽहेतुत्वात्। नहि शमदमादिकारण-

---

पर्याप्त—कारणोंसे जो फलका आनन्तर्य है, वही मुख्य आनन्तर्य है; क्योंकि पुष्कल कारण और फलके बीचमें कोई व्यवधान या व्यभिचार होता नहीं है [अर्थात् पुष्कल कारणके अनन्तर ही फलकी उत्पत्ति अवश्य होती ही है] और साधारण कारण और फलका जो आनन्तर्य है, वह तो कदाचित् व्यभिचरित भी होता है और कदाचित् व्यवहित भी हो जाता है, इसलिए वह आनन्तर्य गौण ही होगा। यदि कहो कि कार्य ही जब दृष्टिगोचर हो रहा है, तब कारणज्ञान करनेकी आवश्यकता ही क्या है? तो ऐसा भी नहीं कहा जा सकता, कारण कि पुष्कल कारण अधिकारीका विशेषण है, अतः फलपर्यन्त इच्छासे विचारादिकी प्रवृत्तिमें ज्ञानकी अवश्य अपेक्षा है। [मोक्षकी इच्छासे विचार किया जाता है और विचारका अधिकारी शम, दम आदिसे सम्पन्न ही है, इसलिए विचारप्रवृत्ति शम, दम आदि पुष्कल कारणोंके ज्ञानकी अपेक्षा रखती है, यह भाव है]।

शङ्का—'अथातो धर्मजिज्ञासा' इस सूत्रमें कहे गये अथशब्दसे अधिकारीका विशेषण स्पष्ट कहा ही गया है [फिर उसकी प्रतीति करानेकी आवश्यकता क्या है?]

समाधान—उस सूत्रमें अथशब्दसे जो अध्ययनका आनन्तर्य कहा गया है, वह यहांपर (ब्रह्मजिज्ञासामें) अधिकारीका विशेषण नहीं हो सकता, क्योंकि केवलव्यतिरेकव्याप्तिका अभाव होनेसे वह हेतु ही नहीं है, [जिस तरह वेदाध्ययन धर्मजिज्ञासामें कारण है, उस तरह ब्रह्मजिज्ञासामें वह कारण नहीं है। ब्रह्मजिज्ञासामें तो शम, दम आदि साधनचतुष्टय सम्पत्ति ही पुष्कल कारण है, अतः वेदाध्ययनका होना न होना समान ही है, इसलिए वह पुष्कल

पौष्कल्ये अध्ययनाभावापराधे ब्रह्मजिज्ञासाया अप्रवृत्तिर्दृष्टा। यद्यपि वेदान्तानामनध्ययने तद्विचाराभावादध्ययनमपि पुष्कलकारणेऽन्तर्भवेत्, एवमपि धर्मब्रह्मविचारयोः साधारणहेतोरध्ययनस्य ब्रह्मविचारं प्रत्यपुष्कलकारणतया तद्विचाराविचारयोः साधारणत्वाद्यदनन्तरं नियमेन ब्रह्मविचारप्रवृत्तिस्तादृशं पुष्कलकारणमन्वेष्टव्यम्। धर्मब्रह्मविचारयोरन्योन्योपकार्योपकारकभावेनैकफलशेषत्वादुपकारकधर्मविचारानन्तर्यमुपकार्यब्रह्मविचारस्य पुष्कलकारणेऽन्तर्भवतीत्यथशब्दार्थः स्यादिति चेद्, न; तयोरुपकार्योपकारकभावासिद्धेः। उपकारकत्वे हि वेदान्ताध्ययनवद्धर्मविचारस्याऽपि व्यतिरेको वक्तव्यः, न च वक्तुं शक्यः, धर्मजिज्ञासाया अभावेऽप्यधीतवे-

---

कारण नहीं हो सकता, इस अभिप्रायसे कहते हैं]—शम, दम आदि पुष्कल कारणके रहते यदि वेदाध्ययन न किया हो, तो भी ब्रह्मजिज्ञासामें प्रवृत्तिका अभाव नहीं देखा जाता। यद्यपि वेदान्त वाक्योंके पढ़े बिना उनका विचार करना सम्भव नहीं हैं, इसलिए अध्ययन भी पुष्कल कारणोंके ही अन्तर्गत हो जाता है, तथापि इस प्रकार अध्ययन धर्म तथा ब्रह्म दोनोंके विचारके प्रति साधारण कारण है, इसलिए ब्रह्मविचारमें वह पुष्कल कारण (असाधारण कारण) नहीं हो सकता, कारण कि धर्मविचार अथवा ब्रह्मविचारके करने या न करनेमें अध्ययन साधारण है, [अध्ययनके अनन्तर विचारमें प्रवृत्ति अवश्य होती है, ऐसा नियम नहीं है] अतः जिसके अनन्तर नियमसे (व्यभिचारके बिना) ब्रह्मविचारमें प्रवृत्ति हो, ऐसे ही पुष्कल कारणका अन्वेषण करना चाहिये। धर्मविचार और ब्रह्मविचारका परस्पर उपकार्योपकारभाव है, अतः एक ही फलका अङ्ग होनेसे उपकारक धर्मविचारका आनन्तर्य ब्रह्मविचारके पुष्कल कारणमें आ जाता है; इसलिए अथशब्दका अर्थ मान लिया जायगा, ऐसा भी सम्भव नहीं है, कारण कि उनमें परस्पर उपकार्योपकारकभावकी सिद्धि ही नहीं है, यदि ब्रह्मविचारका धर्मविचार उपकारक होता, तो वेदान्तवाक्योंके अध्ययनके समान धर्मविचारका भी व्यतिरेक कहना होगा [जैसे अध्ययनके न होनेपर विचारका अभाव प्राप्त होता है, वैसे ही धर्मविचारके अभावमें ब्रह्मविचारका भी अभाव होगा, इस प्रकार व्यतिरेक व्याप्ति माननी होगी] परन्तु उक्त व्यतिरेक कहना सम्भव नहीं है, क्योंकि धर्मविचारके अभावमें भी वेदान्त-

दान्तस्य ब्रह्मजिज्ञासोपलम्भात् ।

अथ व्युत्पत्त्यादिसिद्ध्ये पूर्वतन्त्रापेक्षा, तदाऽपि वक्तव्यम्—किं तत्रत्यो न्यायोऽपेक्ष्यते किं वाक्यार्थनिर्णय उताऽग्निहोत्रादिकर्म ? आद्ये किं प्रथमपादोक्तवेदप्रामाण्यापेक्षितसाधकन्यायस्याऽपेक्षा उत न्यायान्तरस्य ? नाऽऽद्यः; उत्तरतन्त्रेऽपि 'शास्त्रयोनित्वात्', 'अत एव च नित्यत्वम्' इत्यादिसूत्रेषु वेदान्तापेक्षितन्यायस्योक्तत्वात् , अस्तु वा दार्ढ्याय प्रथमपादापेक्षा, नैतावता धर्मजिज्ञासानन्तर्यप्रसङ्गः । प्रथमपादस्य धर्मब्रह्म-

वाक्योंको पढ़े हुए पुरुषकी ब्रह्मविचारमें प्रवृत्ति होती है ।

शङ्का—व्युत्पत्ति आदिकी सिद्धिके लिए पूर्वमीमांसाकी—धर्मविचारशास्त्रकी—अपेक्षा रहती है [कारण कि व्युत्पत्तिमें पद-पदार्थ, वाक्य-वाक्यार्थ तथा शाब्दबोधके कारणभूत प्रकृतिप्रत्यार्थ-प्राधान्य आदि अनेकों न्याय अपेक्षित होते हैं, उनका विस्तृत विवेचन पूर्वमीमांसामें किया गया है, इसलिए उसकी अपेक्षा सर्वथा उचित है ।]

समाधान—नहीं, उसकी आवश्यकता नहीं है, कारण कि हम प्रश्न करते हैं कि व्युत्पत्ति आदिके लिए क्या पूर्वमीमांसामें वर्णित न्याय अपेक्षित हैं ? अथवा वाक्यार्थका निर्णय अपेक्षित है ? अथवा अग्निहोत्रादि कर्म अपेक्षित हैं ? प्रथम विकल्पमें प्रश्न होता है कि क्या प्रथम पादमें कहे गये वेदप्रामाण्यमें अपेक्षित साधक—प्रामाण्यके पोषक—न्यायकी अपेक्षा है ? अथवा उससे भिन्न अन्य न्यायोंकी ? इसमें साधक न्यायोंकी अपेक्षा नहीं है, कारण कि उत्तरमीमांसामें भी 'शास्त्रयोनित्वात्' (शास्त्रमूलक होनेसे अथवा शास्त्रका मूल होनेसे) तथा 'अत एव च नित्यत्वम् (इसीलिए तो नित्य है) इत्यादि सूत्रोंसे वेदान्तमें अपेक्षित वेदान्तके प्रामाण्यके साधक न्यायोंका विवेचन आया ही है । उन वाक्योंको दृढ़ करनेके लिए पूर्वमीमांसाके प्रथमपाद—तर्कपाद—मात्रकी अपेक्षा मानो, तो उतनेसे ही ब्रह्ममीमांसामें धर्ममीमांसाका

(१) वेद यदि मनुष्य द्वारा प्रणीत होता, तो उसमें मनुष्यकी अनवधानतासे अप्रामाण्य आता, किन्तु मनुष्य उसका प्रणेता नहीं है एवं वेदके ऋषि भी प्रणेता नहीं हैं, किन्तु द्रष्टा हैं, श्रुति भी कहती है—'यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम्' । महाभारतमें भी व्यासजी कहते हैं कि युगान्तमें छिपे हुए वेदोंको ही अपने तपोबलसे ऋषियोंने प्राप्त किया, जैसे—

'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥'

जिज्ञासयोः साधारणत्वात्। प्रथमपादगतवेदान्तप्रामाण्यविचारानन्तर्यमथ-शब्दार्थोऽस्त्विति चेद्, न; तस्याऽप्यध्ययनवदपुष्कलकारणत्वात्। द्वितीयेऽपि तन्न्यायान्तरं ब्रह्मप्रतिपादनेऽपेक्ष्यते उत गुणोपसंहारे [1]? नाऽऽद्यः; उत्पत्त्यादिविधिचतुष्टयनिर्णायकस्य न्यायान्तरस्याऽननुष्ठेयभूतवस्तु-प्रतिपादनेऽनुपयोगात्। 'आकाशस्तल्लिङ्गात्' इत्यादिसूत्रैः श्रुतिलिङ्गादय उप-

आनन्तर्य नहीं माना जा सकता, कारण कि तर्कपाद धर्म तथा ब्रह्म दोनोंकी जिज्ञासामें सामान्यरूपसे उपयोगी है। यदि कहो कि तर्क-पादमें प्रतिपादित वेदान्तप्रामाण्यका आनन्तर्य 'अथ' शब्दका अर्थ मान लिया जायगा, यह कहना भी संगत नहीं है, कारण कि इस आनन्तर्यको भी, अध्ययनके समान (उभयसाधारण होनेसे), पुष्कल कारण नहीं मान सकते। द्वितीय कल्पमें भी यह प्रश्न होता है कि क्या अतिरिक्त न्यायोंकी अपेक्षा ब्रह्मका प्रतिपादन करनेमें है? या गुणोपसंहारमें? प्रथम कल्प युक्त नहीं है, कारण कि उत्पत्ति आदि चार प्रकारकी विधियोंका निर्णय करनेमें समर्थ अन्य न्यायोंका अनुष्ठानके अविषय तथा सिद्धभूत पदार्थके प्रतिपादनमें कोई उपयोग नहीं हो सकता। यदि कहो कि 'आकाशस्तल्लिङ्गात्' इत्यादि सूत्रोंसे श्रुति,

(१) निर्गुणब्रह्ममें ही सगुण ब्रह्मके गुणोंका उपसंहार करना चाहिए, जैसा कि अभियुक्तोंका वचन है—

'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।
ये मन्दा तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥'

अर्थात् जो मन्द पुरुष निर्गुण ब्रह्मका साक्षात्कार नहीं कर सकते, उनके लिए दयालु महर्षियोंने सगुण ब्रह्मका निरूपण किया है। इससे महर्षियोंने बेचारे मन्दबुद्धियोंके साथ वञ्चना की, ऐसा भी आरोप नहीं हो सकता; क्योंकि कहा है—

'वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।
तदेवाऽविर्भवेत्साक्षादपेतोपाधिकल्पनम्॥'

सगुण ब्रह्मकी उपासनासे मनके निर्गुण ब्रह्मकी उपासनाके योग्य हो जानेपर पहले सगुणरूपसे उपासित ब्रह्मका निर्गुणरूपसे साक्षात्कार होता है।

(२) छान्दोग्यमें लोकगतिके प्रश्नके अवसरपर कहा गया है—'सर्वाणि ह वा इमानि भूता-न्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति' अर्थात् ये सब भूतजात आकाशसे ही उत्पन्न होते हैं और आकाशको ही प्राप्त होते हैं। और 'आकाशो ह्येवैतेभ्यो ज्यायानाकाशः परायणम्' सबसे उत्कृष्ट आकाश ही है और आकाश ही अन्तिम गति है। इस वाक्यमें आकाशपदसे भूताकाशका ग्रहण प्राप्त होनेके सन्देहमें 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते' इस श्रुतिमें आकाशके द्वारा सबकी उत्पत्ति दिखला कर आकाशपदसे परब्रह्मका बोध श्रुतिके बलसे दिखलाते हुए ज्यायस्त्वरूप

जीव्यन्त इति चेद्; न; तत्र लोकसिद्धश्रुत्यादीनामेवोपजीवनात् । न द्वितीयः; सगुणविद्यानां मानसक्रियारूपाणां धर्मान्तःपातितया गुणोपसंहारे तदपेक्षायामप्यविरोधात् । ब्रह्मजिज्ञासायां तूपासनानां प्रासङ्गिकी सङ्गतिः ।

लिङ्ग आदि (तर्कपादमें प्रतिपादित न्यायान्तरों) का आश्रयण किया ही गया है, तो यह मानना भी उचित नहीं है, कारण कि उक्त सूत्रोंमें लोकसिद्ध श्रुति आदि न्यायोंका आश्रयण है [अर्थात् पूर्वमीमांसामें जैसे अनादि वृद्धव्यवहारसे सिद्ध श्रुति, लिङ्ग आदिका ग्रहण है, वैसे ही उत्तरमीमांसामें उनका ही ग्रहण है, इसलिए तर्कपादकी अपेक्षा नहीं है, यह भाव है] । दूसरा कल्प गुणोपसंहारमें उपयोग मानना भी, नहीं बन सकता, कारण कि मानसिक क्रियाओंके—उपासनारूप—होनेसे धर्मके ही अन्तर्गत सगुण विद्याएँ मानी जाती हैं, इसलिए गुणोपसंहारमें—सगुणोपासनाबोधक वाक्योंमें—उन न्यायोंकी अपेक्षा रहनेपर भी (प्रथमतः निर्गुण ब्रह्मविचारमें) कोई विरोध नहीं आ सकता, कारण कि ब्रह्मविचारके प्रकरणमें उपासनाओंकी प्रासङ्गिक सङ्गति है । दूसरे विकल्पमें (वाक्यार्थनिर्णयकी

तथा परायणत्वरूप लिङ्गकी सिद्धि भी परब्रह्मका बोध करानेवाली श्रुति द्वारा दिखलाई गई है—'आकाशो ह्येवैतेभ्यो ज्यायान्, इत्यादि और 'ज्यायान् पृथिव्या—' इत्यादि, तथा 'विज्ञानमानन्दं ब्रह्म' रातेर्दातुः परायणम् ।' इत्यादि ।

(१) सगुण विद्या और निर्गुण विद्या—इन दोनोंमें यद्यपि विद्याके नाते कोई विशेष नहीं है, तथापि सगुणविद्या मानसिक क्रियारूप है, यह स्पष्ट ही है । गुलाबको गुलाब समझना मनके अधीन नहीं है, किन्तु इन्द्रियविकलता न हो, तो गुलाब वस्तु ही स्वयं अपना प्रकाश करायेगी, इसमें मनोव्यापारकी अपेक्षा नहीं है । यदि इन्द्रियवैकल्य है, तो मनके हजार व्यापार करनेपर भी गुलाबका अनुभव नहीं हो सकता; किन्तु सगुण उपासनारूप सगुण विद्या सर्वथा मनोव्यापाररूप है । भगवान् भी कहते हैं—'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' अर्थात् उपासनाके लिए मनकी स्थिरता, देशशुद्धि तथा आसन, ध्यान आदिकी आवश्यकता है एवम् मूलाधारसे कुण्डलिनी, सुषुम्ना आदि नाड़ियों द्वारा ब्रह्मरन्ध्र तक चढ़ना और वहाँपर स्थिर होकर अपने इष्टका निरन्तर एक-सा ध्यान करना चाहिए । भाष्यकार कहते हैं—'उपासनं नाम समानप्रत्ययकरणम्, न च तद्गच्छतो धावतो वा संभवति' । अथ च उद्गीथमें ब्रह्मदृष्टि इत्यादि सब मनोव्यापार ही हैं और शुद्ध ज्ञान उसके ही अधीन है, इसके विपरीत चलने फिरनेसे चित्तके विक्षिप्त हो जानेके कारण वह नहीं होता है ।

(२) किसके अनन्तर किसका अभिधान करना चाहिए, इस जिज्ञासाको उत्पन्न करनेवाली सङ्गति छः प्रकारकी होती है, जैसे कि कहा भी है—

द्वितीयेऽपि न तावत् पूर्वतन्त्रवाक्यार्थनिर्णयो ब्रह्मविचारप्रवृत्तावुपयुज्यते, क्वाऽप्यन्यविषयज्ञानस्याऽन्यत्र प्रवृत्तिहेतुत्वादर्शनात्। नाऽपि ब्रह्मप्रमितौ तदुपयोगः, धर्मज्ञानस्य ब्रह्मप्रमापकत्वायोगात्। यदि धर्मज्ञानस्य ब्रह्मकार्यत्वात् कार्येण कारणानुमानमित्युच्यते, तदा प्रपञ्चेनाऽपि कार्येण ब्रह्मणोऽनुमातुं शक्यत्वात् किं धर्मज्ञानेन। तृतीयपक्षेऽपि ब्रह्मविचारे कथमग्निहोत्रादिकर्म-

अपेक्षा मानने में) भी पूर्वमीमांसामें किये गये वाक्यार्थनिर्णयका ब्रह्मविचारकी प्रवृत्तिमें कोई उपयोग नहीं है, कारण कि ऐसा कहीं भी नहीं देखा गया है कि दूसरे विषयका ज्ञान दूसरे विषयमें प्रवृत्ति करानेका कारण हो (घटविषयक ज्ञान घटमें ही प्रवृत्ति करा सकता है, पटमें नहीं) और ब्रह्मकी प्रमितिमें याने अबाधित निश्चयात्मक ज्ञानमें भी उसका (धर्ममीमांसाशास्त्रके वाक्यार्थ निर्णयका) उपयोग नहीं है, कारण कि धर्मका निश्चयात्मक ज्ञान ब्रह्मका निश्चयात्मक ज्ञान नहीं करा सकता। यदि धर्मज्ञान ब्रह्मका कार्य होनेसे कार्यसे कारणका अनुमान करानेवाला होगा (इससे धर्मज्ञान ब्रह्मप्रमापक है) ऐसा मानो, तो प्रपञ्चरूप कार्यसे भी ब्रह्मका अनुमान किया जा सकता है, इसमें धर्मज्ञानकी क्या आवश्यकता है ? ['ऐतदात्म्यमिदं सर्वम्' इत्यादि श्रुतिकी सामर्थ्यसे ब्रह्ममें सबके प्रति कारणत्व सिद्ध ही है, इसलिए आपामरप्रसिद्ध घट, पटादि प्रपञ्चज्ञान ही प्रेक्षावान्के प्रति अपने कारणका अनुमानप्रमापक हो जायगा। इस साधारण बातके लिए इतने बड़े आडम्बरके साथ बारह अध्यायके पूर्व मीमांसाशास्त्रसे धर्मज्ञान करनेकी कुछ भी आवश्यकता नहीं है, इससे मुमुक्षुको पूर्वमीमांसाशास्त्र पढ़नेका आनन्तर्य सिद्ध नहीं हो सकता]। तृतीय

'सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा।
निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते॥'

अर्थात् प्रसङ्ग, उपोद्घात, हेतुता, अवसर, निर्वाहक और एककार्यता ये छः सङ्गतियाँ हैं। सादृश्यादिरूप अथवा कारणान्तरसे स्मरणमें आये हुए विषयकी उपेक्षा न करना प्रसङ्ग सङ्गति है। प्रकृत विषयके वर्णनकी चिन्ताके कालमें प्रकृतके अनुकूल विषयका उपस्थित करना उपोद्घात सङ्गति कहलाती है। प्रकृतके कारणका प्रतिपादन करना हेतुरूप सङ्गति होती है। प्रकृतके विपरीत शिष्यजिज्ञासाकी निवृत्तिके लिए कुछ कहनेकी आवश्यकता—अवसर सङ्गति है। प्रकृत एक ही कार्यका साक्षात् या परम्परया जनक (प्रयोजकमात्र) का कहना निर्वाहक कहलाता है। एककार्यत्व सङ्गति एक ही कार्य होना है। इस प्रकार प्रसङ्गसङ्गतिमें वर्णन किये हुए विषयका पूर्वापरके साथ सम्बन्ध ढूँढ़नेकी आवश्यकता नहीं होती।

णामुपयोगः । किं यथा सोपानपरम्परया प्रासादमारोहति तथा संध्योपासनमारभ्य पूर्वपूर्वाल्पतरकर्मप्रहाणेनोत्तरोत्तरमहत्तरकर्मोपादानात् सहस्रसंवत्सरे निरतिशये कर्मण्यवस्थितः परिशेषाद् ब्रह्मज्ञानेऽवतरतीत्युच्यते किं वा क्रमेण कृत्स्नकर्मफलावाप्तौ ब्रह्मलोकान्तगोचराणां सर्वेषां कामानामनुभवेन प्रविलये तत्र निवृत्तकामः परमानन्दकामनया ब्रह्मविचारेऽवतरतीति ? नाऽऽद्यः, प्रमाणाभावात् । द्वितीये ब्रह्मविचारो मनुष्याधिकारो न स्यात्, ब्रह्मलोकप्राप्त्यनन्तरभावित्वात् । अथापि सकामस्य ब्रह्मविचारानधिकारात् कामः प्रविलापनीय एव । तत्र यथा वह्निरुपस्थितं दाह्यमखिलं दग्ध्वा प्रशाम्यति तथा कामोऽपि सर्वभोगेन प्रविलीयत इति चेद्, न; हैरण्यगर्भा-

---

विकल्पके—अग्निहोत्र आदिकी अपेक्षाके—माननेमें भी यह प्रश्न होता है कि ब्रह्मविचारमें अग्निहोत्र आदि कर्मोंका उपयोग कैसे होगा ? क्या जैसे सीढ़ियोंसे महलकी छतपर चढ़ा जाता है, वैसे सन्ध्योपासनसे लेकर पूर्व-पूर्वके छोटे-छोटे कर्मोंके त्यागसे आगे-आगेके बड़े-बड़े कर्मोंके उपादानसे हजार वर्ष तक चलनेवाले निरतिशय कर्ममें अवस्थित पुरुष परिशेषसे ब्रह्मज्ञानमें पहुँचता है, इस प्रकार कर्मोंका उपयोग कहते हो ? अथवा सम्पूर्ण कर्मोंके क्रमशः फल पानेके अनन्तर ब्रह्मलोक तककी सब कामनाओंका उनके अनुभवसे नाश हो जायगा, फिर उन सब कामनाओंसे रहित पुरुष परम आनन्दकी कामनासे ब्रह्मविचारमें लगता है ? (इस प्रकार क्या कर्मोंका उपयोग है ?) । इनमें प्रथम पक्ष नहीं बन सकता, क्योंकि सोपानपरम्पराके समान ब्रह्मविचारमें पहुँचानेके लिए कर्म साधन है, ऐसा माननेमें कोई प्रमाण नहीं है । दूसरा विकल्प भी युक्त नहीं है, क्योंकि ब्रह्मका विचार करना मनुष्यके अधिकारसे बाहर हो जायगा, कारण कि वह तो ब्रह्मलोककी प्राप्तिके अनन्तर होनेवाला है । [और ब्रह्मलोककी प्राप्तिके समय वह मनुष्यव्यपदेशभागी रहता ही नहीं, क्योंकि मनुष्यव्यवहार तो भूलोकमें ही है, अन्य भिन्न भिन्न लोकोंमें तो देव आदि भिन्न संज्ञाएँ प्राप्त हो जाती हैं, यह भाव है ।]

शङ्का—कामनाविशिष्ट पुरुषका ब्रह्मविचारमें अधिकार न होनेसे कामनाका विलय करना ही चाहिए । जैसे अग्नि इन्धन आदि सम्पूर्ण दाह्य वस्तुओंको जलाकर स्वयं शान्त हो जाती है, वैसे ही सब भोगोंके भोगनेपर कामना भी स्वयं विलीन हो जाती है ।

दिभोगानां प्रतिक्षणं क्षीयमाणत्वादनागतभोगविषयकामनोपपत्तेः। अग्नेरपि दाह्यान्तरोपस्थाने पुनः प्रज्वलनदर्शनात्। अत एवोक्तम्—

'न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्धते॥' इति।

ननु कामावाप्त्या स्वच्छहृदयः पुमान् कार्यान्तरक्षमो दृष्ट इति चेत्, सत्यम्; तत्रौत्सुक्यनिवृत्तिर्हृदयस्वास्थ्ये हेतुर्न कामप्राप्तिः, अनुपभुक्तविषयस्यौत्सुक्यरहितस्य पुरुषस्य चित्तस्वास्थ्यदर्शनात्। औत्सुक्यं च न भोगादेकान्ततो निवर्त्तते, किन्तु विषयदोषदर्शनात्। न च भोगात् कामोपशम इत्येवंविध आगमोऽस्ति।

समाधान—हिरण्यगर्भ आदि अवस्थाओंमें प्राप्त होनेवाले भोगोंका प्रतिक्षण विनाश होनेसे आगे आनेवाले अर्थात् जो अबतक प्राप्त नहीं हुए हैं, ऐसे भोगोंकी कामना बनी ही रहती है, अतः कामनाका क्षय नहीं हो सकता। दूसरी जलने योग्य सामग्रीके आ जानेपर दृष्टान्तभूत अग्निका भी पुनः प्रज्वलन दिखलाई देता है, इसीलिए तो कहा गया है—

विषयोंका उपभोग करनेसे अभिलाषाएँ कभी शान्त नहीं होतीं, किन्तु घृत आदि हविस् पदार्थके छोड़नेसे जैसे अग्नि अधिक बढ़ती ही जाती है, वैसे ही विषयभोगसे अभिलाएँ बढ़ती ही जातीं हैं।

शङ्का—अभिलाषाओंकी पूर्ति हो जानेसे पुरुष प्रसन्नचित्त होकर दूसरे कार्यको करनेमें समर्थ देखा जाता है [यदि अभिलाषाओंके पूर्ण हो जानेपर भी अभिलाषा बनी ही रहती, तो पुरुषको प्रसन्नचित्त नहीं होना चाहिए, अतः इस प्रसन्नतासे मालूम पड़ता है कि अभिलाषाओंकी समाप्ति होती है, यह शङ्काका तात्पर्य है।]

समाधान—यद्यपि आपकी शङ्का ठीक है, तथापि उत्सुकताकी निवृत्ति ही हृदय-प्रसन्नताकी कारण है, अभिलाषाकी पूर्ति कारण नहीं है, कारण कि जिसने विषयोंका भोग नहीं किया है और विषयभोगकी इच्छा भी नहीं है, ऐसे पुरुषका चित्त प्रसन्न देखा जाता है। और विषयभोगसे तो उत्सुकताकी सर्वथा निवृत्ति नहीं होती, किन्तु विषयमें दोषके परिज्ञानसे होती है, क्योंकि 'भोगसे इच्छाकी शान्ति हो जाती है', इस प्रकार बतलानेवाला कोई आगम प्रमाण नहीं है।

यस्तु मन्यते वैदिकशब्दा सर्वे संहत्य प्रपञ्चविलयप्रमितिपराः, ज्योतिष्टोमादिवाक्यानामपि देहातिरिक्तात्मानमुपजीव्य प्रवृत्तानां देहात्मत्वप्रविलापकत्वादिति; तं प्रतीतिविरोध एव निराकरिष्यति। तस्मान्न केनापि प्रकारेण पूर्वतन्त्रापेक्षा सुलभा।

ननु कर्मद्वारा तदपेक्षा स्याद् ब्रह्मविचारस्य। तथा हि—नित्यकर्माण्यनुष्ठीयमानानि पुरुषे धर्माख्यं गुणमादधति, स च धर्मः पापाख्यं मलमपकर्षति ततो गुणाधानमलापकर्षणसंस्काराभ्यां संस्कृतः पुमान् ब्रह्मविचारेऽधिक्रियते। तदाह गौतमः—यस्यैतेऽष्टाचत्वारिंशत्संस्काराः स

सभी वेदवाक्य आपसमें मिलकर प्रपञ्चके विलयका निश्चय कराते हैं, क्योंकि ज्योतिष्टोमादिके प्रतिपादक वाक्य भी देहसे अतिरिक्त आत्माका आश्रयण करके ही प्रवृत्त होते हैं, इसलिए उन वाक्योंका तात्पर्य भी देहात्मवादका विलय करनेमें ही है, ऐसा जो वादी मानता है, उसका खण्डन तो प्रतीतिविरोध ही कर देगा। ['स्वर्गकी कामनासे याग करे' इत्यादि वाक्योंसे स्वर्ग और यागोंका साध्य-साधनभाव ही शब्दतः प्रतीत होता है, प्रपञ्चका विलय प्रतीत नहीं होता। अन्यथा स्वर्गादि प्रपञ्चके विलयका बोध करनेसे यागमें किसीकी प्रवृत्ति ही नहीं होगी, यह भाव है] इसलिए किसी भी कारणसे (ब्रह्मविचारमें) पूर्वमीमांसाकी अपेक्षा नहीं हो सकती।

ब्रह्मविचारको कर्म द्वारा पूर्वमीमांसाकी अपेक्षा होगी; क्योंकि अनुष्ठीयमान अग्निहोत्रादि नित्य कर्म पुरुषमें धर्मनामक गुणकी उत्पत्ति करते हैं, [जिससे कर्म करनेवाले धर्मात्मा कहलाते हैं] और वह धर्म पापरूपी मलका निराकरण करता है, उसके अनन्तर गुणाधान और मलापकर्षरूप दोनों संस्कारोंसे संस्कृत पुरुष ब्रह्मविचारमें अधिकार प्राप्त करता है, यही सिद्धान्त गौतम मुनिने भी कहा है—'जिस पुरुषके ये अड़तालीस संस्कार हो जाते हैं, वह

(१) अड़तालीस संस्कार इस प्रकार गिनाये गये हैं—गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, अन्नप्राशन, चूडा (मुण्डन), उपनयन, चार वेदव्रत, समावर्तन, विवाह, ब्रह्मयज्ञ, देवयज्ञ, पितृयज्ञ, भूतयज्ञ, मनुष्ययज्ञ, (इस प्रकार पांच महायज्ञ) अष्टका श्राद्ध, पार्वण श्राद्ध, श्रावणी, आग्रहायणी, प्रौष्ठपदी, चैत्री, आश्वयुजी (इस प्रकार सात पाकयज्ञ) अग्न्याधान, अग्निहोत्र, दर्शपूर्णमास, आग्रयण, चातुर्मास्य, निरूढपशुबन्ध,

ब्रह्मणः सायुज्यं सालोक्यं च गच्छतीति । अत्रैतच्छब्देन गर्भाधानादीनि सप्तसोमसंस्थान्तानि कर्माणि परामृश्यन्ते । न च वाच्यं कर्मणां संस्कारकत्वे स्वतन्त्रफलता न स्याद्, व्रीहिप्रोक्षणादौ स्वतन्त्रफलाभावात्; तत आश्रमकर्मानुष्ठायिनां स्वतन्त्रफलाभिधायिनी सर्वे एते पुण्यलोका भवन्तीति श्रुतिः पीड्येतेति । प्रोक्षणादिवत् कर्मणामन्याङ्गतानङ्गीकारेण स्वतन्त्रफलताऽविरोधात् । यथा द्रव्यार्जनस्य स्वतन्त्रपुरुषार्थतया निर्णीतस्य क्रत्वनङ्गस्याऽपि क्रतूपकारिता तथाऽनङ्गानामपि कर्मणां ब्रह्मविचारोपकारिता

ब्रह्मके सायुज्य और सालोक्य को प्राप्त होता है' इस गौतम मुनिके वचनमें 'एतत्' शब्दसे गर्भाधानादिसे लेकर सात सोमसंस्थानान्त कर्मोंका परामर्श होता है । यदि कहो कि कर्मोंको संस्कारजनक माननेमें उनका कोई स्वतन्त्र ही फल नहीं होगा, क्योंकि संस्कारजनक प्रोक्षणादि कर्मोंका कोई स्वतन्त्र फल नहीं देखा जाता है। इस परिस्थितिमें अपने-अपने आश्रमविहित कर्मोंके अनुष्ठापक पुरुषोंके लिए स्वतन्त्र फलका अभिधान करनेवाली 'आश्रम कर्मोंको करनेवाले पुरुष पुण्य लोकोंकी प्राप्ति करते हैं' इत्यादि अर्थवाली 'सर्वे एते' इत्यादि श्रुतिसे विरोध होगा, तो यह भी युक्त नहीं है, क्योंकि वे प्रोक्षणादिके समान अन्य किसी भी विधानके अङ्ग नहीं हैं, अतः उनका स्वतन्त्र फल होनेमें कोई विरोध नहीं है । [यदि कर्म किसीके अङ्ग नहीं हैं, तो ब्रह्मविचारके भी उपकारी कैसे होंगे ? इस आशङ्काका दृष्टान्त द्वारा समाधान करते हैं]—जैसे स्वतन्त्र पुरुषार्थस्वरूप द्रव्यार्जन स्वयं क्रतुका अङ्ग नहीं है, तो भी क्रतुका उपकारी होता है, वैसे ही अङ्ग न होते हुए भी कर्म ब्रह्मविचारके उपकारी हो सकते हैं, अन्यथा कर्मोंको संस्कारजनक कहनेवाली उक्त

और सौत्रामणी उक्त सात हविर्यज्ञ संस्कार अग्निष्टोम, अत्यग्निष्टोम, उक्थ, षोडशी, वाजपेय, अतिरात्र, आप्तोर्याम, (इस प्रकार सात सोमसाध्य यज्ञ) इन चालीस संस्कारोंके अतिरिक्त दया, तितिक्षा, अनसूया, शौच, अनायास, मङ्गल, कृपणताका अभाव एवम् लोलुपताका अभाव ये आत्माके आठ गुण । इनका विशद वर्णन ग्रन्थगौरवसे यहांपर नहीं किया गया है, धर्मशास्त्रोंसे जानना चाहिये ।

(२) सायुज्य—सयुजो भावः—अर्थात् विद्याके द्वारा अविद्याकी निवृत्ति होनेसे ब्रह्मके साथ एकताकी प्राप्ति ।

(३) सालोक्यम्—समानलोकस्य भावः प्राप्तिः—अर्थात् श्रवण, मनन आदिके बिना केवल उपासना द्वारा समान लोककी प्राप्ति ।

स्यात् । अन्यथा कर्मणां संस्कारत्वस्मृत्यनुपपत्तेः । एवं च कर्माणि केवलान्यभ्युदयफलानि, श्रवणमननादिसहकृतानि तु ब्रह्मज्ञानजनकानीति श्रुतिस्मृत्योरविरोधः । न च गौतमस्मृतौ सालोक्यलिङ्गाद्धिरण्यगर्भप्राप्तिरेव संस्कारकर्मणां फलमिति वाच्यम् , तत्र सायुज्यशब्देन मोक्षस्याऽभिहितत्वात् । 'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः' इत्यादिस्मृतिषु स्पष्टमेव पापक्षयलक्षणसंस्कारद्वारा ज्ञानोत्पत्तौ कर्मणां विनियोगात् । यथा प्रोक्षणा-

---

गौतमस्मृतिकी उपपत्ति नहीं होगी, केवल कर्म स्वर्गादि अभ्युदयको देनेवाले हैं और वे ही कर्म श्रवण, मननादिसे युक्त होकर ब्रह्मज्ञानके उत्पादक होते हैं, इस प्रकार निष्कर्ष करनेसे श्रुति तथा स्मृतिमें कोई विरोध नहीं रह जाता । 'सर्वे एते पुण्यलोका भवन्ति' यह श्रुति केवल कर्मोंके फलका बोधन करती है और 'यस्यैतेऽष्टाचत्वारिंशत् संस्काराः' इत्यादि गौतमस्मृति श्रवण, मननके सहकारसे कर्मोंका ब्रह्मज्ञानमें उपयोग कह रही है, इस प्रकार विषयका भेद होनेसे विरोध नहीं आता] । यदि शङ्का हो कि गौतमस्मृतिमें सालोक्यरूप हेतुसे संस्कार कर्मोंका हिरण्यगर्भप्राप्तिरूप फल मानना चाहिये, ब्रह्मज्ञान नहीं । तो यह भी युक्त नहीं है, कारण कि उसी स्मृतिमें सायुज्यशब्दसे मोक्षका अभिधान * है । 'पाप कर्मोंका नाश होनेसे पुरुषोंको ज्ञान होता है ।' इत्यादि स्मृतियोंमें पापक्षयरूप संस्कार द्वारा ज्ञानकी उत्पत्तिमें कर्मोंका † विनियोग स्पष्ट ही है जैसे प्रोक्षण आदि संस्कार

---

* ब्रह्मके साथ एक—अभेद—को ही सायुज्य कहते हैं, और ब्रह्मैक्य ही मोक्ष माना गया है ।

† कर्मोंका संस्कार द्वारा ज्ञानसिद्धिका अङ्ग होना भगवान्‌ने भी श्रीमुखसे श्रीमद्भगवद्गीतामें कहा है—"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" अपने अपने कर्मोंमें तत्पर पुरुष सिद्धि पाता है । यहाँपर स्वपदसे अड़तालीस संस्कारोंमें से नित्य कर्म लिए जाते हैं । और सिद्धिपदसे अन्तःकरणकी शुद्धि अभीष्ट है । आगे चलकर भगवान् कहते हैं—"सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे" सिद्धि—चित्तशुद्धि—को पाकर ब्रह्म पानेका प्रकार मुझसे सुनो" कहकर कहते हैं—

"बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥"

विशुद्ध बुद्धि—अन्तःकरण—से युक्त हो और धृतिसे अपना नियमन करके ध्यानयोगमें

दीनि संस्कारकर्माणि दर्शपूर्णमासस्वरूपोत्पत्तिहेतुतया स्वर्गे समुच्चीयन्ते तथा नित्यनैमित्तिककर्माणि ज्ञानोत्पत्तिहेतुतया मोक्षे समुच्चीयन्ते । ननु तर्हि प्रोक्षणादिवदेव गुणकर्मत्वं प्राप्तं ततो न कदाचिदपि स्वतन्त्रफलत्वसिद्धिरिति चेद् , न; व्रीहिवदत्र संस्क्रियमाणस्याऽऽत्मनो विधेयगुणत्वाभावेन तत्प्राप्तेः । नहि प्रमाणतन्त्रं ब्रह्मज्ञानं विधातुं शक्यम् , येनाऽऽत्मनो विधेयगुणता स्यात् । नन्वेवं सति संस्कारकर्मता नित्यनैमित्तिकयोर्न स्याद् , विहिताङ्गद्रव्यसंस्कारकर्मण्येव तत्प्रसिद्धेरिति चेद् , मैवम् ; अविहितभोजनाङ्गदधिसंस्कारेऽपि प्रसिद्धेः ।

कर्म दर्शपूर्णमास यागकी स्वरूपोत्पत्तिमें कारण होते हुए स्वर्गरूप साध्यकी कारणसामग्रीमें जुट जाते हैं, वैसे ही नित्य, नैमित्तिक—सन्ध्योपासना, राहुपरागादिमें (ग्रहणमें) स्नान, दानादि—कर्म ज्ञानोत्पत्तिके कारण होकर मोक्षरूप पुरुषार्थकी कारणसामग्रीमें भी सम्मिलित हो जाते हैं । यदि शङ्का हो कि तब तो प्रोक्षणादिके समान वे कर्म भी गुण कर्म ही हुए और गुणकर्मोंसे स्वतन्त्र फलकी सिद्धि कभी भी नहीं हो सकती, तो ऐसी शङ्का भी नहीं हो सकती, कारण कि व्रीहिके समान संस्कारको प्राप्त होनेवाला आत्मा विधेयका गुण नहीं है, अतः उसमें स्वतन्त्र फलकी प्राप्ति हो सकती है, कारण कि ब्रह्मज्ञान प्रमाणाधीन है, अतः उसका विधान नहीं किया जा सकता, जिससे कि आत्मा 'व्रीहिके समान' विधेयका गुण हो । यदि शङ्का हो कि ऐसा होनेपर नित्य नैमित्तिक कर्मोंका संस्कार कर्म होना सिद्ध नहीं होगा, कारण कि विहित—प्रधानभूत विधेय—के अङ्गभूत (व्रीह्यादि) द्रव्यके संस्कारक कर्ममें संस्कारकर्मता प्रसिद्ध है, तो वैसी शङ्का करना भी ठीक नहीं है, क्योंकि जिसका किसी 'भोक्तव्यम्' इत्यादि विधायक वाक्यसे विधान नहीं किया जाता, ऐसे अविधेयभूत भोजनके अङ्ग दधि आदि द्रव्यके संस्कारमें भी वैसा (संस्कारका कर्म होना) प्रसिद्ध है ।

तत्पर हो वैराग्यको प्राप्त "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्"—'यथार्थतः मुझको जानकर अनन्तर मेरे साथ ऐक्यको प्राप्त हो जाता है' इस प्रकार श्रीभगवान्की दिखलाई हुई प्रक्रियासे नित्य कर्मोंके द्वारा चित्तकी शुद्धिको पाकर ध्यान योग आदि सहकारीकी सम्पत्ति मिलनेसे तत्त्वज्ञानका उदय होनेसे मोक्षप्राप्तिमें कर्मोंका उपयोग स्पष्ट ही है ।

ननु यदि नित्यकर्मणां ब्रह्मज्ञानेतिकर्त्तव्यता, तथा सति विधिवाक्यनिर्दिष्टं करणत्वं न सिध्येत्, प्रधानोपसर्जनरूपयोः करणेतिकर्त्तव्यतयोरेकत्राऽसंभवात्। यदि च नेतिकर्त्तव्यता तदा दध्यादिसंस्कारवदन्यार्थद्रव्यसंस्काररूपता न सिध्येदिति चेद्, नैष दोषः; उभयथाऽप्यविरोधात्। न तावदेकस्य करणत्वमितिकर्त्तव्यत्वं च न संभवति, 'अग्निं चित्वा सौत्रामण्या यजेत', 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यत्र सौत्रामणीबृहस्पतिसवयोरन्यत्र करणतया स्वतन्त्रविध्यन्तरविहितयोरप्यग्निचयनवाजपेयेतिकर्त्तव्यतादर्शनात्। तत्र करणेतिकर्त्तव्यविधिवाक्यप्रमाणभेदाद्युक्तं सौत्रामण्यादेरुभयार्थत्वमिति चेत्, तर्ह्यत्राऽपि नित्यविधिसामर्थ्यात् संस्कारस्मृत्यनुमितश्रुतिसामर्थ्याच्चोभयार्थत्वं कल्प्यताम्। नाऽप्यनितिकर्त्तव्यस्य

यदि शङ्का हो कि नित्य कर्मोंमें ब्रह्मज्ञानकी इतिकर्तव्यता मानी जायगी, तो विधिवाक्यसे दिखलाई गई करणता सिद्ध न हो सकेगी, क्योंकि प्रधान और उपसर्जन स्वरूप करण और इतिकर्तव्यता इन दोनोंका एकमें रहना सम्भव नहीं है। यदि उनमें इतिकर्तव्यता न मानी जाय, तो दधि आदिके संस्कारकी भाँति अन्यार्थद्रव्य (भोजनादि निमित्त दध्यादि द्रव्य) की संस्काररूपता सिद्ध न होगी, तो यह भी युक्त नहीं है, क्योंकि उक्त दोष नहीं आता। दोनों प्रकारोंमें (इति कर्तव्यता मानने या न माननेमें) भी कोई विरोध नहीं है, कारण कि एकमें करणत्व और इतिकर्तव्यत्व दोनों सम्भव नहीं हैं, ऐसा तो है नहीं, [अर्थात् दोनोंका होना सम्भव है—इसमें दृष्टान्त देते हैं]—अत्यन्त स्वतन्त्र दूसरे विधिवाक्योंमें करणरूपसे विधान किये गये सौत्रामणी और बृहस्पतिसव यागोंमें भी 'अग्निचयन करके सौत्रामणी याग करे' और 'वाजपेय याग करके बृहस्पतिसव यज्ञसे याग करे' ऐसे स्थलोंमें अग्निचयन और वाजपेयके अङ्ग होनेसे इतिकर्तव्यता देखी जाती है। उक्त स्थलोंमें करण तथा इतिकर्तव्यविधिके वाक्यरूप प्रमाणके भेदसे सौत्रामणी आदिमें करण तथा इतिकर्तव्यतारूप यदि उभयार्थत्व सम्भव है, तो प्रकृतमें भी नित्यविधिकी सामर्थ्यसे और उक्त संस्कारबोधक स्मृति और अनुमित श्रुतिकी सामर्थ्यसे उभयार्थकी कल्पना कीजिये। [इससे इतिकर्तव्य माननेमें कोई दोष नहीं आ सकता]। इतिकर्तव्य न माननेसे भी संस्कार-

संस्काररूपत्वासिद्धिः । आधानस्याऽनितिकर्त्तव्यस्यैव संस्कारत्वात् ।

ननु कर्मणां ज्ञानसाधनत्वे यावज्ज्ञानोदयं तदनुष्ठानाद्विविदिषासंन्यासो न सिध्येदिति चेद् , नः चित्तस्य शुद्धिद्वारा प्रत्यक्प्रवणतायां सम्पन्नायां तदनुष्ठानोपरमाङ्गीकाराविरोधात् । तदुक्तम्—

'प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥' इति ।

तदेवं संस्कारपक्षे कर्मणां ब्रह्मज्ञानोपयोगः सिद्धः ।

अथ विविदिषापक्षेऽपि सोऽभिधीयते । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति श्रूयते । तत्राऽऽत्मतत्त्वापरोक्षा-

---

रूप होनेकी प्रसिद्धि नहीं हो सकती, क्योंकि इतिकर्तव्य न होता हुआ ही आधान संस्कार कर्म होता है ।

शङ्का—कर्मोंको ज्ञानके प्रति साधन माननेमें जबतक ज्ञानका उदय होगा, तब तक उनका अनुष्ठान करना पड़ेगा, इससे विवदिषासंन्यासकी सिद्धि नहीं होगी । [ज्ञानेच्छासे कर्मोंका त्याग नहीं बन सकता, कारण कि 'विविदिषन्ति यज्ञेन' इत्यादि श्रुति यज्ञ आदि कर्मोंको ज्ञानसाधन कहती है] ।

समाधान—ऐसा नहीं कह सकते, कारण कि चित्तकी विशुद्धिके द्वारा परमात्माकी ओर तत्परता सम्पन्न होनेके अन्तर कर्मोंके अनुष्ठानसे विराम माना जाता है, इससे कोई विरोध नहीं आता । कहा भी गया है—

वर्षाकालकी समाप्तिमें जैसे मेघ विलीन हो जाते हैं, वैसे ही यज्ञ आदि कर्म बुद्धिकी—अन्तःकरणकी—शुद्धि—विषयाभिलाषा निवृत्ति—के द्वारा परमात्माकी लगन उत्पन्न कराकर कृतार्थ होकर अस्त हो जाते हैं—इस प्रकार 'कर्मोंको' संस्कारक माननेके पक्षमें कर्मोंका ब्रह्मज्ञानमें उपयोग सिद्ध हुआ ।

कर्मोंको संस्कारार्थ माननेसे 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इत्यादि शास्त्र रागी पुरुषोंको उद्देश्य करके प्रवृत्त होते हैं । विविदिषासंन्यासादि विधि विरक्तके लिए है (इससे शास्त्रोंमें परस्पर विरोध नहीं आता) । 'तमेतं वेदानुवचनेन—' इत्यादि आगे प्रदर्शित किये जानेवाले श्रुतिवाक्योंसे नित्य कर्मोंका संस्कारार्थ होना सिद्ध नहीं होता, किन्तु विविदिषा—ब्रह्मतत्त्वज्ञानकी इच्छा—के लिए होना प्रतीत होता है, इस आशयसे पक्षान्तर कहते हैं—

नुभवस्तावदिष्यमाणतया स्वर्गादिवद्भावनासाध्योऽवगम्यते, पुरुषार्थत्वात्। न च शाब्दज्ञानस्येष्यमाणत्वं शङ्कनीयम्, संजाते शाब्दज्ञाने तत्र कामनानुदयात्। असंजाते तु विषयानवगमादेव तत्र सुतरां कामनाऽसम्भवात्। अपरोक्षानुभवे तु संभवत्येव कामना। शाब्दज्ञानोत्पत्तौ विषयस्य सामान्यतः प्रसिद्धत्वात्। यदा तु शब्द एवाऽपरोक्षज्ञानस्य जनकस्तदाऽपि तस्य चञ्चलत्वान्निश्चलं ज्ञानं कामयितव्यमेव। तत्र यज्ञादीनामाख्याताभिहितभावनाकरणतयाऽवगतानामिष्यमाणेन साध्येनैवाऽन्वयाद्यज्ञादीनि ब्रह्मानुभवसाधनतयाऽवगतानि। न चेच्छामात्रेणाऽन्वयः, तस्या असा-

---

अथवा (कर्मोंका फल) विविदिषा मानना चाहिए, क्योंकि 'हमें ब्रह्मतत्त्वका ज्ञान हो, ऐसी इच्छा होना भी उत्कृष्ट पुण्योंका फल है' वह विविदिषा पक्ष इस प्रकार कहा जा सकता है—उस परमात्माको ब्राह्मण वेदानुवचन, यज्ञ, दान, तप और हित, परिमित तथा पथ्य भोजनसे जानना चाहते हैं, इत्यादि अर्थवाली श्रुति है, उस श्रुतिमें आत्मतत्त्वका अपरोक्षानुभव ही इच्छाविषय (अभीष्ट) होता हुआ स्वर्गादिके तुल्य भावनासाध्य प्रतीत होता है, क्योंकि वह पुरुषार्थरूप है। शब्दज्ञान अभीष्ट है, ऐसी शङ्का नहीं की जा सकती, [अर्थात् उक्त श्रुतिमें शब्दज्ञानका भावनाके साध्यत्वरूपसे बोध नहीं किया गया है।] कारण कि शब्दज्ञानके उत्पन्न होनेपर उसकी कामना नहीं हो सकती, [अतः शब्दज्ञानको अभीष्ट नहीं माना जा सकता] और शाब्द ज्ञान यदि नहीं हो पाया तो विषयज्ञान न होनेसे उसमें कामनाका होना बिलकुल ही सम्भव नहीं है, इससे भी वही दोष आता है। अपरोक्षानुभव—साक्षात्कार—की कामनाका तो सम्भव है ही। [इसलिए तत्त्वसाक्षात्कार अभीष्ट पुरुषार्थ माना जा सकता है] कारण कि शब्दजनित ज्ञान होनेपर विषयकी सामान्यतः प्रसिद्धि—प्रतीति—हो जाती है [अतः ज्ञान पदार्थ इच्छाविषय हो सकता है] जिस पक्षमें शब्दको ही अपरोक्ष ज्ञान—साक्षात्कार—का कारण माना जाता है, उस पक्षमें भी उस—शब्दज्ञानके चञ्चल होनेसे निश्चल—स्थिर—ज्ञानको अभीष्ट—कामनाविषय—होना ही चाहिए। उस स्थलमें आख्यातार्थ भावनाके करणरूपसे प्रतीयमान यज्ञादिका इच्छाविषय—अभीष्ट—साध्य (ब्रह्मज्ञान) के ही साथ अन्वय होनेसे यज्ञादि ब्रह्मज्ञानके उपायस्वरूप प्रतीत होते हैं। केवल इच्छासे अन्वय

ध्यत्वात् । ततश्चाऽऽत्मानुभवकामो यज्ञादीन्यनुतिष्ठेदिति विधिः परिणम्यते । न च 'विविदषन्ति' इति वर्तमानताविरोधः, लेट्परिग्रहेण विध्यधिगमात् । न च नित्यस्य यज्ञादेर्ब्रह्मानुभवकामेन कथं संबन्ध इति वाच्यम् , स्वर्गकामसंबन्धादुपपत्तेः । ननु विमता ज्ञानहेतवो यज्ञादिभ्यो भिन्नाः, प्रकरणान्तरविहितत्वाद्, यथा कुण्डपायिनामयने मासमग्निहोत्रम् ; कुण्डपायिनामयनं नाम संवत्सरसत्रम् । तत्र हि 'मासमग्निहोत्रं जुहोति' इति विहितस्य प्रकरणान्तरविहितात् प्रसिद्धाग्निहोत्राद्भेदो निर्णीतस्तथाऽ-

नहीं किया जा सकता, कारण कि इच्छा साध्य नहीं है, [इच्छाविषय ब्रह्मज्ञान साध्य है, करणका अन्वय साध्यमें ही करना चाहिए, यह न्यायप्राप्त है] । इससे 'आत्मानुभव—ब्रह्मसाक्षात्कार—की इच्छा रखनेवालेको यज्ञादिका अनुष्ठान करना चाहिए' ऐसा विधिका परिणाम हो जाता है अर्थात् यज्ञादि स्वर्गादि-कामके अतिरिक्त ब्रह्मज्ञानके अधिकारसे परिणत हुए विधिवाक्यका विधेय माना जायगा । 'विविदिषन्ति' इस वर्तमानार्थक लट् लकारके प्रयोगका विरोध नहीं आता, कारण कि यहांपर (लिङर्थमें) लेट् लकार होनेसे विधिरूप अर्थ लिया जाता है । नित्यभूत यज्ञादिका ब्रह्मानुभवकाम अधिकारीसे सम्बन्ध कैसे होगा ? ऐसी शङ्का नहीं हो सकती, क्योंकि स्वर्गकाम अधिकारीसे सम्बन्ध होनेके कारण उपपत्ति हो सकती है । [जैसे नित्य अग्निहोत्र संयोगभेदसे काम्य भी हो सकता है, वैसे ही नित्य यज्ञ भी संयोगभेदसे काम्य हो सकता है अर्थात् एक कर्मका अनेकाधिकारविधिसे सम्बन्ध हो सकता है । [प्रकरणमें पठित अधिकारान्तर-विधिके साथ अधिकारान्तरविधिका संयोगभेदसे सम्बन्ध हो सकता है, परन्तु प्रकरणान्तरस्थसे सम्बन्ध होना सम्भव नहीं है, इस आशयसे शङ्का करते हैं—]

विमत ज्ञानके कारण ('यज्ञेन विविदिषन्ति' इत्यादि श्रुतिवाक्यमें प्रतिपादित यज्ञादि) 'प्रसिद्ध अग्निहोत्रादिरूप' यज्ञादिसे भिन्न—अतिरिक्त—हैं, कारण कि (ब्रह्मज्ञानसे) भिन्न प्रकरणमें पढ़े गये हैं । जैसे 'कुण्डपायियोंके अयनमें एक मास तक अग्निहोत्र' कुण्डपायियोंका अयन नाम संवत्सरसाध्य—एकवर्षसाध्य—यज्ञका है । उसमें 'मासभर अग्निहोत्र करें' इस वाक्यसे विहित अग्निहोत्रका दूसरे प्रकरणमें विहित प्रसिद्ध अग्निहोत्रसे भेदका निर्णय

त्रापि । नैतद्युक्तम्, वैषम्यात् । दृष्टान्ते हि न तावदग्निहोत्रशब्दः प्रसिद्धाग्निहोत्रपरामर्शसमर्थस्तस्याऽलौकिकाभिधानस्याऽऽख्यातपरतन्त्रतयाऽऽख्यातोक्तार्थाभिधायित्वात् । नाऽप्याख्यातशब्दस्तत्र समर्थः, स्वप्रकरणपठितोपसद्भिर्मासगुणेन च विशिष्टे कर्मविशेषे सति तं विहाय प्रकरणान्तरस्य परामर्शायोगात् । दार्ष्टान्तिके त्वध्ययनयज्ञदानतपोनाशकशब्दानां लौकिकाभिधानतया स्वातन्त्र्यात् प्रदेशान्तरविहिताग्निहोत्रादिपरामर्शोपपत्तौ तान्येव कर्माणि संयोगभेदेन विधीयन्त इत्युपपद्यते । नन्वेवमपि ब्रह्मज्ञानस्य दृष्टप्रमाणसामग्रीजन्यस्य नाऽदृष्टापेक्षा, सति प्रमाकरणे यज्ञादिजन्यादृष्टाभा-

---

किया गया है । इसी तरह प्रकृतमें भी भेद समझना उचित है ।

समाधान—दृष्टान्त दार्ष्टान्तिकमें वैषम्य होनेसे उक्त शङ्काके कहनेमें तत्त्व नहीं है, क्योंकि दृष्टान्त 'कुण्डपायिनामयने मासमग्निहोत्रम्' इस वाक्यमें आया हुआ अग्निहोत्रशब्द प्रसिद्ध अग्निहोत्रका परामर्श करनेमें समर्थ नहीं है, कारण कि वह अलौकिक अभिधान आख्यातपरतन्त्र है, अतः आख्यात ही उक्त अर्थका अभिधायी हो सकता है । [प्रमाणान्तरसे अग्निहोत्रकी सिद्धि नहीं है, इससे यह अग्निहोत्र-पदार्थ अलौकिक है और जुहोतिका अर्थ है इसलिए आख्यातपरतन्त्र कहा गया] आख्यातशब्द भी प्रसिद्ध अग्निहोत्रके कहनेमें समर्थ नहीं है, अपने प्रकरणमें पढ़े हुए उपसद्—कारक आदिसे तथा मासरूप गुणसे विशिष्ट कर्मविशेषकी प्रतीति होनेपर उसका त्यागकर दूसरे प्रकरणस्थके परामर्श करनेका योग नहीं हो सकता, दार्ष्टान्तिक ('तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति—' इत्यादि वाक्य) में तो अध्ययन, यज्ञ, दान, तप, तथा अनाशक शब्दोंका लौकिक अर्थ होनेसे स्वातन्त्र्य है, अतः उनसे प्रकरणान्तरमें भी विहित अग्निहोत्र आदि प्रसिद्ध यज्ञोंके परामर्शकी उपपत्ति हो सकती है, इसलिए उनका प्रसिद्ध ही अग्निहोत्र आदि कर्मोंका— संयोग भेदसे विधान किया जाता है । इस प्रकार नित्य अग्निहोत्र आदि काम्य कर्मोंका ब्रह्मज्ञानके साथ सम्बन्ध उपपन्न हो सकता है ।

शङ्का—ऐसा माननेपर भी दृष्ट प्रमाणसामग्रीसे उत्पन्न होनेवाले ब्रह्मज्ञानको अदृष्ट (प्रमाण) की आवश्यकता नहीं है । प्रमा—निश्चयात्मक ज्ञान—के करणके उपस्थित रहते यज्ञ आदिसे उत्पन्न अदृष्टके

वापराधेन ज्ञानानुदयादर्शनादिति चेद्, न; शास्त्रैकसमधिगम्येऽर्थे केवलव्यतिरेकाभावस्याऽदोषत्वात्।

यत्त्वात्र समुच्चयवादिनो मन्यन्ते—न कर्माणि ज्ञानसाधनानि, प्रमाणरूपत्वाभावात्, किन्तु मोक्षसाधनानीति, तदसत्; 'यज्ञेन विविदिषन्ति' इति श्रुतज्ञानकरणत्वविरोधात्। यदि साक्षात् करणत्वं न संभवेत्, तदाऽन्तःकरणशुद्धिद्वारा तत्कल्पनीयम्। लोके 'काष्ठैः पचति' इत्यादौ परम्परया साधनेऽपि

न होनेपर भी ज्ञानका उदय देखा जाता है। [विषयेन्द्रिय सन्निधान होते ही ज्ञान हो ही जाता है, इसमें पुण्य पापरूप अदृष्टकी अपेक्षा नहीं होती, इसलिए पुण्योत्पादक नित्य कर्मोंमें ज्ञानकारणता सिद्ध नहीं हो सकती]।

समाधान—केवल शास्त्र द्वारा ही ज्ञात होनेवाले विषयमें केवल व्यतिरेकका अभाव दोष नहीं होता। [जैसे कपालोंको अग्निमें तपानेके लिए मन्त्र पढ़े जाते हैं, यहांपर शङ्का हो सकती है कि अग्नि तो विना मन्त्र पढ़े भी तपा देगा, फिर मन्त्रपाठ क्यों? परन्तु मन्त्रपाठपूर्वक तपानेमें ही अभ्युदय होता है, इसलिए ताप देनेमें यद्यपि मन्त्रपाठके व्यतिरेकका अभाव होते हुए भी मन्त्रपाठ करना शास्त्र होनेसे छोड़ा नहीं जाता, एवं ज्ञानोदयमें भी यज्ञादिका केवलव्यतिरेकाभाव रहते भी 'तमेतम्—' इत्यादि श्रुतिके बलसे यज्ञ आदिको ज्ञानसाधन मानना दोषपूर्ण नहीं कहा जा सकता, क्योंकि शास्त्र कहता है और जो शास्त्र कहे वही अभ्युदयकारी होता है]।

[ज्ञानकर्मसमुच्चयसे मोक्षरूप पुरुषार्थकी सिद्धि माननेवाले वादीका खण्डन करते हैं—] जो कि इस विषयमें समुच्चयवादी मानते हैं कि कर्म ज्ञानके साधन नहीं हो सकते, कारण कि कर्म प्रमाणस्वरूप नहीं है। (ज्ञानके साधन इन्द्रिय आदि प्रमाण ही होते हैं)। किन्तु मोक्षरूप पुरुषार्थके साधन हैं, यह कहना उचित नहीं है, 'यज्ञेन विविदिषन्ति—' इत्यादि श्रुतिसिद्ध ज्ञानकरणत्वसे विरोध होगा। (अर्थात् यज्ञ आदिको करण कहनेवाली श्रुतिका विरोध उनके मतमें आ जायगा)। यदि कर्मोंमें (ज्ञानके प्रति) साक्षात्करण सम्भव न हो, तो अन्तःकरणकी शुद्धि द्वारा उसकी (करणत्व) की कल्पना करनी चाहिए (अर्थात् परम्परया करण मानिये), क्योंकि लोकमें

करणविभक्तिदर्शनात्। वेदेऽपि स्वर्गं प्रति करणत्वेन श्रुतस्य यागादेरपूर्वद्वारा करणत्वकल्पनात्। न त्वेवमत्र वाक्ये मोक्षसाधनता प्रतीयते, प्रत्युत 'न कर्मणा न प्रजया' इत्यादिवाक्यान्तरे कर्मणां मोक्षसाधनता प्रतिषिध्यते। अतस्तेषां ज्ञानहेतुतैव।

ननु विशुद्धिद्वारेण ज्ञानहेतुत्वे संस्कारविविदिषापक्षयोः को भेदः? उच्यते—श्रवणमनननिदिध्यासनाभ्यासादिसहकारिकारणसंपत्तावेव संस्कारो विज्ञानं साधयति, तदभावे सत्यभ्युदयमेव। विविदिषायां तु विज्ञानस्य कर्मफलत्वात् फलपर्यन्तसाधनानि संपाद्याऽपि विज्ञानं जनयतीति विशेषः।

'इन्धनसे पाक करता है' इस वाक्यमें परम्परासे कारणभूत इन्धनके आगे भी करणकारक विभक्तिका ('काष्ठैः' तृतीयाका) चिन्ह 'से' आता हुआ देखा गया है। वेदमें भी श्रुति द्वारा करणकारकरूपसे प्रतिपादित याग आदिमें अपूर्व द्वारा ही करणकारकत्वकी कल्पना की गई है। इस प्रकार प्रकृत वाक्यमें (यज्ञादिका परम्परया भी) मोक्षका साधन—करणकारक—होना प्रतीत नहीं होता, इसके विपरीत 'कर्मसे नहीं, सन्ततिसे नहीं—' इत्यादि दूसरे श्रुतिवाक्योंमें कर्मोंकी मोक्षसाधनताका निषेध किया गया है, इसलिए कर्मोंको ज्ञानका कारण ही मानना उचित है।

शङ्का—यदि विशुद्धि—चित्तकी विषयविमुखता—द्वारा कर्मोंको ज्ञानसाधन मानते हो, तो संस्कार और विविदिषा पक्षोंमें परस्पर क्या भेद होगा? [संस्कारपक्षमें भी 'प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः' इत्यादि प्रतिपादित रीतिके अनुसार चित्तविशुद्धि ही अपेक्षित है। और विविदिषापक्षमें भी इसीका प्रतिपादन किया गया है]।

समाधान—संस्कार पक्षमें—श्रवण, मनन, निदिध्यासन, अभ्यास, (पुनः पुनः परिशीलन) आदि सहकारी कारणोंके जुटनेपर ही संस्कार विज्ञानकी—ब्रह्मतत्त्व साक्षात्कारकी—सिद्धि कर सकता है और सहकारियोंके न जुटनेपर संस्कार केवल स्वर्गादि अभ्युदयकी ही सिद्धि करता है। और विविदिषापक्षमें तो विज्ञान कर्मफल है, अतः विविदिषा फलपर्यन्त साधनोंका सम्पादन करके भी विज्ञानको उत्पन्न करती है, इतना विशेष है। [संस्कारमें सामर्थ्य नहीं है कि श्रवणादि सहकारियोंकी सम्पत्ति कर सके, केवल सहकारीकी सम्पत्ति पानेपर ही वह ज्ञानोत्पादक

तदेवं पक्षद्वयेऽपि कर्मद्वारा पूर्वतन्त्रस्याऽपेक्षितत्वात्तदानन्तर्यमथशब्दार्थ इति, नैतत् सारम्, जन्मान्तरानुष्ठितैरपि कर्मभिरन्तःकरणशुद्धौ ज्ञानोदयसंभवात्।

अथ मतम्—ऋणापाकरणायेह जन्मनि कर्माऽनुष्ठातव्यम्।

'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥'

इति स्मृतेरिति, तदसत्; 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्' इति प्रत्यक्षश्रुत्या बाधितत्वात्। तदुक्तम्—

'प्रत्यक्षवेदवचनप्रामाण्यापाश्रयादतः।
आदौ संन्याससंसिद्धेर्ऋणानीति ह्यपस्मृतिः॥' इति।

होता है और विविदिषा सकल अपेक्षित श्रवणादि सहकारियोंको सम्पन्न करनेमें समर्थ होती हुई ज्ञानरूपी फलको भी उत्पन्न करती है, इस प्रकार दोनोंमें भेद है, यह भाव है। 'ननु कर्मद्वारा तदपेक्षा स्यात्'—इत्यादिसे लेकर यहांतकके प्रघट्टकसे वर्णित युक्तियोंके आधार पर) संस्कार या विविदिषा दोनों पक्षोंमें कर्म द्वारा पूर्वतन्त्रके अपेक्षित होनेसे पूर्वमीमांसाका या कर्मोंका आनन्तर्य 'अथ' शब्दका अर्थ मानना चाहिए, इस लम्बी शङ्काका समाधान करते हैं]—ऐसा कहना सारभूत नहीं है, क्योंकि दूसरे-दूसरे पूर्वजन्मोंमें किये गये कर्मोंके द्वारा चित्त शुद्ध होनेसे भी ज्ञानका उदय हो सकता है। [श्रीमद्भगवद्गीतामें भी कहा है कि 'अनेकजन्मसंसिद्धः' अनेक जन्मोंके सुकृतोंसे सिद्धि प्राप्त होती है।]

यदि माना जाय कि ऋणके शोधनके लिए इस जन्ममें कर्मोंका अनुष्ठान करना चाहिए, जैसा कि स्मृतियोंमें कहा गया है—'तीन ऋणोंका शोधन कर-मनको मोक्षमें लगाना चाहिए। ऋण चुकाए बिना मोक्षमें मन लगानेवाला अधोगामी अर्थात् नरकमें जाता है।' तो यह मानना भी अच्छा नहीं है, कारण कि 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्'—अथवा वैराग्यका उदय होनेपर ब्रह्मचर्याश्रमसे ही गृहस्थाश्रमधर्मका पालन किये बिना भी संन्यास ले ले (मोक्षसाधनमें लग जाय), इस प्रत्यक्ष श्रुतिसे विरोध आता है। कहा भी है—संन्याससिद्धिसे पूर्व ऋणोंके दूर करनेके लिए कही गई 'ऋणानि' इत्यादि स्मृति प्रत्यक्ष प्रमाणभूत वेदवचनोंके आधारसे अपस्मृति है अर्थात् सिद्धान्तभूत स्मृति नहीं है।

'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते' इति श्रुतिरप्यस्तीति चेद्, न; तस्या हृदयाद्यवदानशेषार्थवादत्वात्। न चाऽसौ भूतार्थवादः, न्यायविरोधात्। ऋणशब्देनाऽत्र किं पुत्रयज्ञब्रह्मचर्याण्येवोच्यन्ते किं वा तद्विधयः? तत्र न तावज्जायमानस्य पुत्रादिसंबन्धो युज्यते, योग्यानुपलब्धिविरोधात्। नाऽपि तद्विधिसंबन्धः, विधिप्रतिपत्तिसामर्थ्यविकलस्याऽधिकाराभावात्। सामर्थ्यस्य चाऽधिकारिविशेषणत्वात्। अथ 'गृहस्थो जायमानस्त्रिभिर्ऋणवान् जायते' इति व्याख्यायेत, एवमपि 'गृहात्प्रव्रजेत्' इति विधिविरोधः पूर्वोक्तन्यायविरोधश्च दुर्वारः। नहि विवाहदिने एव पुत्रसंबन्धस्तदुत्पादनसामर्थ्यं वोपलभ्यते। न च जन्मारभ्य पुत्राद्यधिकारसंपत्तेः प्राग्वि-

---

'उत्पन्न होनेवाला ब्राह्मण उक्त तीन ऋणोंके ही साथ उत्पन्न होता है' इस प्रकार प्रत्यक्ष श्रुति मिलती है, ऐसा कहना भी नहीं बनता, कारण कि वह श्रुति हृदयादि अवदानका अङ्गभूत अर्थवाद है। [हृदयावदानमें हृदय, जिह्वा और वक्षःस्थल इन तीनका अवदान कहा गया है; इन तीनोंके अवदानके विधानका शेष होनेसे अर्थवाद श्रुति उक्त प्रव्रजनविधायक श्रुतिकी अपेक्षा दुर्बल है] उस श्रुतिको भूतार्थवाद नहीं कह सकते; कारण कि इसमें न्यायविरोध आता है। क्या उक्त श्रुतिमें ऋणशब्दसे पुत्र, यज्ञ, या ब्रह्मचर्य ही लिये जाते हैं? या उनका विधान लिया जाता है? उत्पन्न होनेवालेका पुत्रादिके साथ सम्बन्ध होना युक्ति-सङ्गत नहीं है, क्योंकि योग्यानुपलब्धिसे विरोध आता है। [सम्बन्धयोग्य गृहस्थकी जन्मकालमें उपलब्धि ही नहीं है और न सम्बन्ध होनेवाले पुत्रकी ही उपलब्धि है] और उनका विधान भी ऋणशब्दसे नहीं लिया जाता, कारण कि ऋणविमोचन विधिसे प्राप्त नियोगके अनुष्ठानमें सामर्थ्यहीनका अधिकार नहीं है; कारण कि सामर्थ्य अधिकारीका विशेषण माना गया है। यदि गृहस्थ होता हुआ (अर्थात् सामर्थ्यसम्पन्न होता हुआ विवाहसमयमें ही) तीन ऋणोंसे युक्त होता है, ऐसा व्याख्यान किया जाय, तो ऐसा माननेपर भी 'गृहस्थाश्रमसे ही संन्यास ले ले' इस श्रुति-प्रतिपादित अर्थसे विरोध आता है और पूर्वोक्त न्यायविरोध, तो हटाया नहीं जा सकता। विवाहके ही दिन पुत्रके साथ सम्बन्ध नहीं हो सकता और न उसके उत्पादनका सामर्थ्य ही उपलब्ध होती है। ऐसा भी नहीं

रोधिविध्यन्तरसंबन्धपरिहारार्थमिदं वचनमिति वक्तुं शक्यम्, पूर्वोक्त-संन्यासविरोधात्। 'तस्मादेष वा अनृणो यः पुत्री यज्वा ब्रह्मचर्यवासी यदवदानैरेवावदयते तदवदानानामवदानत्वम्' इत्येतदन्तमिदं वचन-मभूतार्थवादमात्रम्।

ननु 'ब्रह्मचर्यं समाप्य गृही भवेत्' इति विधिना विरोधे कथं ब्रह्म-चर्यादेव संन्यासो विधीयते। मैवम्, संन्यासगार्हस्थ्ययोर्विरक्ताऽविरक्त-विषयभेदेन व्यवस्थितत्वात्।

यस्तु संन्यासस्य कर्मानधिकृतान्धपङ्ग्वादिविषयतया व्यवस्थां मन्यते, स वक्तव्यः किं विधिपर्यालोचनया इदमत्रगम्यते उत कल्प्यते? नाद्यः, 'ब्रह्मचर्यादेव प्रव्रजेत्' इति वचनस्य कर्माधिकृतानधिकृतसाधारण्येन

कहा जा सकता है कि जन्मसे लेकर पुत्रादि अधिकार-सम्पत्ति पानेके पूर्व (मध्य-कालिक जीवनमें) विरोधी दूसरी विधियोंके सम्बन्धका परिहार करनेके लिए उक्त वचन है; कारण कि पूर्वोक्त संन्यासविधिसे विरोध आता है, अथवा वह ऋण मुक्त हो जाता है—जो पुत्रवान्, यज्ञादिका अनुष्ठाता, नियमपूर्वक वेदाध्ययन करनेवाला और पूर्वोक्त तीन अवदानोंके द्वारा पुण्य कर्मशाली होता है, वही अवदानकी अवदानता—पुण्यकर्मता—है।' यहां तक उक्त वचन अभूत अर्थवादस्वरूप है, भूतार्थवाद नहीं, जिससे कि स्वतन्त्र प्रमाण हो और 'ब्रह्मचर्यादेव प्रव्रजेत्' संन्यासविधानका विरोध कर सके।

शङ्का—ब्रह्मचर्यव्रत समाप्त कर नियमपूर्वक वेदाध्ययनके अनन्तर गार्हस्थ्यव्रत धारण करे। इस विधिके साथ विरोध आनेसे ब्रह्मचर्यके अनन्तर ही संन्यासका विधान कैसे संगत हो सकता है?

समाधान—संन्यास और गार्हस्थ्यकी विरक्त रागीके लिए पृथक् पृथक् व्यवस्था की गई है। [रागीके लिए गार्हस्थ्य और विरक्तके लिए ब्रह्मचर्यान्तर ही संन्यास—इस व्यवस्थासे कोई विरोध नहीं रह जाता।]

संन्यास कर्माधिकारसे बहिष्कृत अन्धे, लंगड़े आदिके लिए है (और सम्पन्नेन्द्रियसमर्थके—लिए गार्हस्थ्य है) इस प्रकार जो व्यवस्था मानता है, उससे पूछना चाहिए कि विधिवाक्योंका विचार करनेसे ऐसा ज्ञान हुआ? या ऐसी कल्पना ही की जाती है? प्रथम पक्ष नहीं मान सकते, क्योंकि ब्रह्मचर्यके

प्रतीतेः । अधिकृतानां गार्हस्थ्यविधानादनधिकृतेष्वेव तद्वचनं पर्यवस्यतीति चेद् न, 'अथ पुनर्व्रती वाऽव्रती वा स्नातको वाऽस्नातको वा उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इत्युत्तरवाक्ये कर्मस्वधिकृतानामनधिकृतानां च मुखत एव संन्यासाधिकारित्वेनोपादानात् । न चैवं संन्यासस्य सर्वाधिकारप्रसङ्गः, विरक्तेर्नियामकत्वात् । अविरक्तस्य त्वन्धादेरपि संन्यासे पातित्यपर्यवसानात् । 'यस्तु प्रव्रजितो भूत्वा' इत्यादिना विषयसेवाया निषेधात् । नाऽपि द्वितीयः, कल्पकाभावात् ।

अथ मन्यसे--इन्द्रियाणि विद्यमानान्यपि संन्यासिना निरोद्धव्यानि, ततो वरमिन्द्रियविकलस्यैव तदधिकार इति, तत्र किमङ्गभूते संन्यासेऽनुपयोगादिन्द्रियाणां निरोधः किं वाऽङ्गिन्यात्मज्ञानेऽनुपयोगाद् उत

अनन्तर ही संन्यास ले लेना चाहिए, इस वचनकी प्रतीति कर्माधिकारी (समर्थ) और अनधिकारी (असमर्थ) दोनोंके लिए साधारणरूपसे होती है । अधिकारप्राप्त पुरुषोंके लिए गृहस्थ जीवनका विधान होनेसे 'परिशेषात्' अनधिकारियोंके ही लिए उक्त वचनोंका संन्यासके विधानमें तात्पर्य माना जाय' यह भी नहीं कहा जा सकता, कारण कि 'अथ—व्रती हो या व्रती न हो, स्नातक—विद्या समाप्तिके अनन्तर दीक्षाप्राप्त हो, अथवा अस्नातक, निरग्नि हो अथवा साग्निक, जैसा भी हो जिस दिन ही उसको वैराग्य प्राप्त हो जाय, उसी दिन संन्यास ग्रहण कर ले— इस अर्थवाले अगले वाक्यमें कर्मोंमें अधिकृत अथवा अधिकारशून्य दोनोंका ही संन्यासविधिमें अधिकारी होना मुखसे—साक्षात् वाचक शब्दोंसे— ही कहा गया है । इस प्रकार अधिकारी, अनधिकारी दोनोंका संन्यासमें अधिकार होनेसे सभीका संन्यासमें अधिकार प्राप्त हो जायगा, ऐसी शङ्का करना उचित नहीं, कारण कि वैराग्य इसका नियमन करेगा । वैराग्य न होनेसे तो अन्धादिका भी संन्यासग्रहण करनेमें पतित होना ही निश्चित रहता है । 'जो पुरुष संन्यासी होकर भी'—इत्यादि वचनोंसे विषयसेवाका निषेध किया गया है । 'अन्यार्थकी कल्पना करना' दूसरा पक्ष भी नहीं हो सकता; कारण कि उसका कोई कल्पक नहीं है ।

यदि कहो कि संन्यासीको विद्यमान इन्द्रियोंका निरोध भी करना होता है, इससे तो यही अच्छा है कि इन्द्रियसामर्थ्यहीनका ही संन्यासमें अधिकार माना जाय, तो यह भी युक्त नहीं है, क्योंकि वैसा माननेपर प्रश्न यह होता है कि क्या वहाँ अङ्गभूत संन्यासमें इन्द्रियोंका उपयोग न होनेसे उनका निरोध है? या प्रधानभूत

विपरीतप्रवृत्तीनामपि जनकत्वात् ? नाऽऽद्यः, 'दृष्टिपूतं न्यसेत्पादम्' 'पर्यटेत्कीट-वद् भूमौ' इत्यादिसंन्यासधर्मनिर्वाहायेन्द्रियाणामुपयुक्तत्वात् । न द्वितीयः; 'शरीरं मे विचर्षणं जिह्वा मे' इत्यादिनाऽऽत्मज्ञानाय शरीरेन्द्रियादिपाटवस्य प्रार्थ्यमानत्वात् । तृतीये तु विपरीतप्रवृत्तिमात्रं परित्याज्यम्, नेन्द्रियस्वरूपम् । का तर्ह्यविरक्तानामन्धपङ्ग्वादीनामाज्यावेक्षणविष्णुक्रमाद्युपेतकर्मस्वनधिकृ-तानां गतिरिति चेत्, पुत्रोत्पादनब्रह्मयज्ञादिकर्मान्तराधिकार इति ब्रूमः; अत आत्मज्ञानप्रकरणपठिते तदङ्गभूते संन्यासे शरीरादिपाटवेऽपि तस्य

आत्मज्ञानमें उपयोग न होनेसे ? या इन्द्रियां आत्मज्ञानके विपरीत—घातक—प्रवृत्तियोंको उत्पन्न करती हैं, इसलिए उनका निरोध करना है ? प्रथम विकल्पको नहीं मान सकते, कारण कि 'भूमिपर पैर खूब देख भाल कर रखना चाहिए, कीड़ोंकी भांति जमीन पर चले अर्थात् धीरे-धीरे रेंगता जाय' इत्यादि संन्यासधर्मोंका निर्वाह करनेके लिए इन्द्रियोंका उपयोग (अङ्गभूत संन्यासमें) है ही। दूसरा पक्ष मानना नहीं वनता, क्योंकि 'मेरा शरीर विचर्पण—समर्थ, एवं मेरी जिह्वा—इत्याद्यर्थक श्रुतिवाक्य * द्वारा आत्मज्ञानके उपयोगी शरीर तथा इन्द्रियोंकी पटुता पानेकी प्रार्थना करना संन्यासीको भी प्राप्त है। तीसरे पक्षमें, तो विपरीत प्रवृत्तिका त्याग ही प्राप्त होता है, इन्द्रियोंके स्वरूपका नहीं ।

[वेदान्तीका सिद्धान्त है कि वैराग्यहीन अन्ध, पङ्गु आदिका ब्रह्मज्ञानमें भी अधिकार नहीं है और कर्मोंकी उनमें योग्यता नहीं है, इसलिए, उनमें उनका अधिकार नहीं है, इससे ये बेचारे वैदिक मार्गसे—ज्ञानकाण्ड अथवा कर्मकाण्ड दोनोंसे—वञ्चित रह जायँगे, इस आशयसे शङ्का-समाधान करते हैं]—

शङ्का—तब तो घृतका अवलोकन तथा विष्णुकी परिक्रमा आदि कर्मोंसे युक्त यज्ञोंके अनधिकारी (वैराग्यरहित) अन्धों या लँगड़ोंकी क्या गति होगी ? 'अर्थात् वे कैसे वैदिक मार्गका अनुसरण कर सकेंगे ?

समाधान—पुत्रोत्पादन, वेदाध्ययन इत्यादि दूसरे, जिनमें अवेक्षण, परिक्रमण आदि नहीं करना होता है, कर्मोंमें उनका अधिकार है, ऐसा कहते हैं ।

इसलिए आत्मज्ञान प्रकरणमें पढ़े हुए उसके अङ्गभूत संन्यासमें शरीरादिके

* अर्थात् 'शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा कर्णाभ्यां भूरि विश्रुवम् अन्नं प्राणः चक्षुः श्रोत्रं मनो वाचम्' इत्यादि श्रुति द्वारा ।

विरक्तस्यैव मुख्याधिकारः ।

ननु पूर्वं संस्कारविविदिषापक्षावुक्तौ, तत्र नित्यकर्मणामात्मज्ञानाङ्गत्वमुक्तमिदानीं तत्त्यागस्याऽङ्गत्वमिति पूर्वापरविरोध इति चेद्, न; उभयोरप्यङ्गत्वात् । न चोभयोर्विरुद्धयोरेकेनाऽनुष्ठानासंभवः, कालभेदेन तदुपपत्तेः । आ चित्तशुद्धि कर्माण्यनुष्ठेयानि तत उपरि तानि संन्यसितव्यानि । एकफलत्वं च कर्मतत्संन्यासयोर्द्वारभेदादुपपद्यते । कर्माणि हि चित्तशुद्धिद्वाराऽऽत्मज्ञानं प्रत्यारादुपकारकाणि । संन्यासस्त्वनन्यव्यापारतया श्रवणादिनिष्पादनद्वारेण संनिपत्योपकरोति ।

यस्तु भास्करः संध्यावन्दनादिनित्यकर्मणस्तदङ्गभूतोपवीतस्य च त्यागं

पाटव—क्षमता—के होनेपर भी पाटवशाली विरक्तका—वैराग्य सम्पन्नका—ही मुख्य अधिकार है ।

शङ्का—इससे पूर्व कर्मोंके लिए संस्कार और विविदिषा—ब्रह्मज्ञानकामना—दो पक्ष कहे गये हैं, उनमें निर्णय किया गया है कि नित्यकर्म आत्मज्ञानके अङ्ग हैं । अब कहा जा रहा है कि वे त्यागके—संन्यासके—अङ्ग हैं, इस प्रकार अगले पिछले ग्रन्थोंमें परस्पर विरोध आता है ।

समाधान—संन्यास तथा कर्म दोनों भी (ब्रह्मज्ञानके) अङ्ग ही हैं । यदि शङ्का हो कि परस्पर विरुद्धका (कर्म करने तथा त्याग करनेका) एक ही पुरुषसे अनुष्ठान नहीं हो सकता है' तो यह शङ्का भी उचित नहीं है, कारण कि समयके भेद—हेर फेर—से दोनोंकी उपपत्ति हो सकती है। [समयका भेद दिखलाते हैं]—चित्तशुद्धि—वैराग्योदय—पर्यन्त नित्य कर्मोंका अनुष्ठान करना आवश्यक है, और वैराग्योदयके अनन्तर उनका त्याग—संन्यास लेना—उचित है । कर्म और उनका संन्यास दोनोंका एक ही (ब्रह्मज्ञानरूप फल) होना द्वारभेदसे सम्भव है । [द्वारभेद दिखलाते हैं]—नित्यकर्म तो चित्तशुद्धिके द्वारा ब्रह्मज्ञानके प्रति आरात् उपकारक (व्यवधानसे परम्परया उपकारक) हैं और उनका संन्यास (सकल विरोधिवृत्तियोंका नाश होनेके कारण) केवल आत्मचिन्तन व्यापारके अवशिष्ट रहनेसे श्रवण आदिकी सम्पत्तिके द्वारा—सन्निपत्य—साक्षात् (व्यवधानके बिना) उपकारक है ।

जो कि भास्कर सन्ध्यावन्दन आदि नित्य कर्मका तथा उसके अङ्गभूत यज्ञो-

नेच्छति, सोऽपरिचितशास्त्रवृत्तान्तत्वादुपेक्षणीयः। 'यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः' इति यज्ञोपवीतादित्यागस्य साक्षाद्विहितत्वात्। न च पूर्वोपवीतत्यागेऽप्यन्यस्वीकारः शङ्कनीयः; जाबालश्रुतावपि 'अयज्ञोपवीती कथं ब्राह्मणः' इति प्रश्नपूर्वकम् 'इदमेवाऽस्य तद्यज्ञोपवीतं य आत्मा' इत्येवकारेण बाह्ययज्ञोपवीतं व्यावर्त्याऽऽत्मन एव यज्ञोपवीतत्वसंपादनात्। तदेवमात्मज्ञानाधिकारिणः संन्यासस्य विहितत्वात्तद्विरोधिन्याः ऋणत्रयश्रुतेरभूतार्थवादत्वात् कर्मद्वाराऽपि पूर्वतन्त्रापेक्षाया असिद्धौ न धर्मविचारानन्तर्यमप्यथशब्दार्थतामर्हति।

पवीतका त्याग नहीं होना चाहिए, ऐसा मानता है, वह शास्त्रीय सिद्धान्तसे अभिज्ञ न होनेके कारण उपेक्षणीय है [अर्थात् उसके सिद्धान्तका आदर नहीं करना चाहिए] कारण कि स्मृतिकारोंने 'यज्ञका (नित्य, काम्य और नैमित्तिक सब प्रकारके कर्मका) और यज्ञोपवीतका त्यागकर निर्जनमें छिपकर (एकान्त वाससे) अपनी दिनचर्या बितावे' इत्यादि वचनोंसे यज्ञोपवीत आदिका त्याग साक्षात् कहा है। ऐसा भी नहीं कहा जा सकता कि पूर्वाश्रममें धारण किये गये यज्ञोपवीतका त्याग करके दूसरे नूतन यज्ञोपवीतका धारण करना चाहिए, कारण कि जाबाल श्रुतिमें भी 'यज्ञोपवीत धारण किये विना ब्राह्मण कैसे'? इस प्रकार प्रश्न उठानेके अनन्तर कहा कि 'यही उसका यज्ञोपवीत है, जो आत्मा है' इस वाक्यमें 'इदमेवास्य' यहाँ 'एव' पद दिया है [जो अन्यके सम्बन्धका अभावबोधन करता है] इस एवकारसे बाहरी सूत्रनिर्मित यज्ञोपवीतका निषेध करके आत्मा ही यज्ञोपवीत कहा गया है। इस प्रकार आत्मज्ञानके अधिकारीके लिए संन्यासका विधान किया गया है, इसलिए उसके विरोधमें उपस्थित तीन ऋणोंकी प्रतिपादिका श्रुति अभूतार्थवाद हो जाती है, जिसके कारण कर्म द्वारा भी पूर्वमीमांसाकी (ब्रह्मज्ञानमें) अपेक्षा सिद्ध नहीं होती, इसलिए धर्मविचारका आनन्तर्यरूप 'अथ' शब्दका अर्थ नहीं माना जा सकता। ['नैतत्सारम्' ग्रन्थसे धर्मविचारानन्तर्यका खण्डन कर सिद्ध किया कि ब्रह्मज्ञानके अधिकारीका विशेषण धर्मविचारानन्तर्य नहीं हो सकता, अर्थात् कोई नियम न रहा कि धर्मविचार करनेवाला ही ब्रह्मविचार कर सकता है।

अब धर्मविचार और ब्रह्मविचारमें कार्यकारणभाव न होनेपर भी

ननु यदि धर्मब्रह्मविचारयोर्हेतुहेतुमद्भावेनाऽऽनन्तर्यं न सम्भवति, तर्हि तयोरानन्तर्यमात्रोपलक्षितक्रममथशब्दः प्रतिपादयतु। 'हृदयस्याऽग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इत्यत्राऽथशब्दस्य क्रमप्रतिपादकत्वदर्शनादिति चेत्, तत्र वक्तव्यम्—किमथशब्दः स्वयमेव क्रमं प्रतिपादयति आहोस्वित् प्रमाणान्तरप्रतिपन्नक्रमापेक्षितन्यायं सूचयति ? नाऽऽद्यः; स्वयं न्यायसूत्रान्तःपातित्वात्। न द्वितीयः; क्रमबोधकप्रमाणासम्भवात्। क्रमो ह्येककर्तृकाणां बहूनां युगपदनुष्ठानासम्भवेऽपेक्ष्यते। एककर्तृकत्वं चाऽङ्गाङ्गिनोर्वा बहूनामङ्गानामेकाङ्गिसम्बन्धिनां वाऽधिकारान्तरप्रयुक्त्युपजीविनां वा भवति।

पौर्वापर्यरूप क्रमका बोध आनन्तर्यार्थक 'अथ'से करना चाहिए, इस प्रकार कहनेवाले वादीका खण्डन करनेके लिए शङ्का करते हैं]—यदि धर्म और ब्रह्मके विचारोंमें परस्पर कार्यकारणभावसे आनन्तर्यका सम्भव नहीं है, तो उन दोनोंके आनन्तर्यमात्रसे उपलक्षित क्रमका प्रतिपादन 'अथ' शब्दसे ही होगा। [हेतुहेतुमद्भावके अभावमें क्रमबोधक 'अथ' शब्दका प्रयोग दृष्टान्त द्वारा दिखलाते हैं], क्योंकि 'पहले हृदयका अवदान—खण्डन—करे, अनन्तर जिह्वाका, अनन्तर वक्षःस्थलका, इत्याद्यर्थक वाक्यमें 'अथ' शब्द क्रमका प्रतिपादन करता है, यह देखा गया है।

समाधान—क्या 'अथ' शब्द स्वतः ही क्रमका प्रतिपादन करता है ? अर्थात् क्या अथशब्द क्रमका वाचक है ? अथवा दूसरे प्रमाण द्वारा सिद्ध क्रमसे अपेक्षित न्यायका सूचन करता है ? इसमें प्रथम विकल्प नहीं हो सकता, कारण कि स्वयं 'अथ' शब्द न्यायसूत्रमें आया है। [यदि 'अथ' शब्द ही स्वयं क्रमका बोधक होता, तो न्यायसूत्रमें अपेक्षित क्रमनियमका अभिधान 'अथ' शब्दसे होना चाहिए, परन्तु वहांपर क्रमरूप अर्थ नहीं लिया गया है।] द्वितीय विकल्प नहीं हो सकता, कारण कि क्रमका बोधक कोई प्रमाण नहीं है। एक ही कर्ताको अनेक कार्य प्राप्त होनेपर एक साथ सबका अनुष्ठान सम्भव न होनेसे क्रमकी अपेक्षा होती है। या अङ्ग और अङ्गियोंमें तथा एक ही अङ्गीके साथ सम्बन्ध रखनेवाले अनेक अङ्गोंमें अथवा अधिकारान्तरसे प्राप्त हुई प्रयुक्ति द्वारा अनुभवको प्राप्त हुए

(१) जैसे प्रयाज और दर्शपूर्णमास एक ही कर्ताके कर्तव्य हैं।

(२) परम अपूर्वके साधक आग्नेयादि छः यागोंमें।

(३) दर्शपूर्णमासके अधिकार प्राप्त प्रयुक्तिका आश्रयण करनेवाले गोदोहन आदि।

न चाऽत्र तेषामन्यतमत्वे श्रुत्यादि प्रमाणमस्ति । यद्यपि ज्योतिष्टोमादावधिकृतस्यैवाऽङ्गावबद्धोपासनेष्वधिकारस्तथापि न नः काचिद्धानिः, उपासनानां धर्मविशेषाणामेवाऽस्मिन् शास्त्रे प्रासङ्गिकी सङ्गतिरित्युक्तत्वात् शास्त्रतात्पर्यविषयब्रह्मज्ञानस्याऽधिकारत्वाभावात् ।

ननु यथाऽऽग्नेयादीनां षण्णां यागानामङ्गाङ्गित्वादिपूर्वोक्तत्रैविध्याभावेऽपि फलैक्यात् कर्त्रैक्यं क्रमश्च तथा धर्मब्रह्मविचारयोः स्यादिति चेद्, न; तयोः फलैक्ये मानाभावात् । 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह' इति समुच्चयविधिरेव मानमिति चेद्, न; 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽ-

---

अङ्गोंमें ही एककर्तृकत्व प्राप्त होता है ।

प्रकृत (धर्म-ब्रह्मविचारका) क्रम माननेमें पूर्वोक्त अङ्गाङ्गिभाव आदिमें से एकके भी होनेमें श्रुति आदि प्रमाण नहीं हैं । यद्यपि ज्योतिष्टोमादिके अधिकारीका ही (उद्गीथ आदि) अङ्गभूत उपासनाओंमें अधिकार है; [श्रुति भी कहती है—'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' अर्थात् ज्ञान, श्रद्धा तथा उपासनासे किया हुआ कर्म ही सफल होता है, अतः इस श्रुतिके वाक्यसे कर्माधिकृतका ज्ञानमें भी अधिकार प्रतीत होता है,] तथापि इसमें हमारी कोई हानि नहीं है, कारण कि उपासनास्वरूप धर्मविशेषोंकी ही [ज्योतिष्टोमादिका नहीं] इस वेदान्तशास्त्रमें प्रासङ्गिकी सङ्गति है, ऐसा पहले ही कह आये हैं; इससे शास्त्रके तात्पर्यविषयीभूत ब्रह्मज्ञानमें कर्ममें अधिकृतका अधिकार नहीं है, अतः एक विधिके द्वारा अनुष्ठान होनेसे क्रमापेक्षित न्यायका अनुसन्धान नहीं किया जा सकता ।

शङ्का—जैसे आग्नेय आदि छः यागोंमें पूर्वोक्त अङ्गाङ्गिभावादि प्रकारोंके न होनेपर भी सबका एक ही फल होनेसे एककर्तृकत्व (एक ही कर्ताका होना) तथा क्रम माना गया है, वैसे ही धर्म तथा ब्रह्म के विचारमें भी क्रम माना जायगा ।

समाधान—ऐसा नहीं मान सकते; कारण कि इन दोनोंका (धर्म और ब्रह्मविचारका) एक ही फल होता है, इसमें प्रमाण नहीं है। 'विद्या और अविद्या—इन दोनोंको जो साथ-साथ जानता है' इत्याद्यर्थक श्रुतिसे समुच्चयविधानको भी प्रमाण नहीं माना जा सकता, क्योंकि 'अविद्यासे मृत्युको पारकर विद्यासे अमृत प्राप्त करता है।'

मृतमश्नुते' इत्यविद्याख्यस्य कर्मणो विद्यायाश्च वाक्यशेषे फलभेदावगमात् । 'तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च' इति वचनं समुच्चयविधायकमिति चेत् , नैवम् ; नाऽत्र ज्ञानकर्मणोरेकस्मिन् पुरुषे समुच्चयविधिः, किन्तु ब्रह्मवित्पुण्यकृतोरुभयोः पुरुषयोर्योगे (मार्गे) समुच्चयविधिः । अन्वाचयार्थेन चकारेण प्रत्येकं निरपेक्षमार्गान्वयोपपत्तेः । ब्रह्मविच्छब्देनाऽत्र सगुण-

---

इत्याद्यर्थक श्रुतिसे अविद्यारूप कर्मोंका और विद्याका वाक्यशेषमें फलभेद प्रतीत होता है। 'इसी (देवयान) मार्गसे ब्रह्मज्ञानी और पुण्यकर्मा दोनों जाते हैं' इत्यादि अर्थवाले श्रुतिवचनको भी समुच्चयविधायक मानना नहीं बनता, कारण कि इस वाक्यमें ज्ञान और कर्मका एक ही पुरुषमें समुच्चयका विधान नहीं है, किन्तु ब्रह्मज्ञानी और पुण्यकर्मा पुरुषोंका दोनों मार्गोंमें योग होनेमें समुच्चयका विधान है। [ज्ञान और कर्म एक ही पुरुषमें आश्रित होकर एक फलके साधन हैं।' इस अर्थमें श्रुतिका तात्पर्य नहीं है, किन्तु जो ब्रह्मज्ञानी तथा जो पुरुष उद्गीथोपासना आदि पुण्यकर्म करनेवाले हैं, वे दोनों भी इसी देवमार्गसे जाते हैं .अर्थात् मार्गमें दोनोंका साथ हो जाता है, इस प्रकार मार्गमें साथ हो जानेमें तात्पर्य है] । कारण कि अन्वाचयार्थक चकारसे निरपेक्ष एक मार्गके साथ प्रत्येकके अन्वयकी उपपत्ति हो सकती है। [अन्वाचयार्थक चकारसे परामृष्ट अर्थोंका परस्पर अपेक्षित होना आवश्यक नहीं है, जैसे 'भिक्षामट गां चानय' इस वाक्यमें यद्यपि—'भिक्षाटन' तथा 'गवानयन' दोनोंका एक ही देवदत्तादिमें कर्तृत्वका सम्बन्ध है, तथापि दोनों कार्य परस्पर निरपेक्ष हैं, वैसे ही प्रकृत 'तेनैति' इत्यादि श्रुतिमें परस्परनिरपेक्ष दोनोंका एकमार्गगामित्व होना उपपन्न है। [निर्गुण-ब्रह्मज्ञानीके गतागतका निषेध होनेसे तथा कर्मकाण्डप्रधान पुरुषोंका धूम्रयानसे जाना प्रतिपादित होनेसे प्रकृत श्रुतिमें श्रुत्यन्तरसे विरोध-परिहारके ब्रह्मवित् और पुण्यकृत् शब्दोंका अर्थ दिखलाते हैं—] 'तेनैति' इत्यादि श्रुतिमें ब्रह्मवित् पदसे सगुण

---

१. यह भारतमें कहा है—'सर्वभूतात्मभूतस्य सम्यक् भूतानि पश्यतः । देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः' 'पदवीकी गवेषणा करनेवाले देवता भी पदवीहीन सर्वात्मभावको प्राप्त हुए ब्रह्मज्ञानीके मार्गमें मोहित होते हैं अर्थात् उसको देख नहीं पाते—इससे ब्रह्मज्ञानीका देवमार्गसे भी जाना निषिद्ध है।

ब्रह्मोपासकोऽभिधीयते, निर्गुणब्रह्मविद उत्तरमार्गेण गमनाभावात्। पुण्यकृच्छब्देन च प्रतीकोपासकोऽभिप्रेतः; केवलकर्मिणां धूमादिमार्गश्रवणात्। ततो ब्रह्मवित्पुण्यकृतोराविद्युल्लोकमुत्तरमार्गे गमनसमुच्चयपरं वचनम्। न च 'तान्याचरथ नियतं सत्यकामाः' इत्यत्र ज्ञानकर्मसमुच्चयविधिः सुसम्पादः, केवलकर्मणामेव श्रवणात्। न च सत्यशब्दो ब्रह्मपरः, 'एष वः पुण्यः सुकृतो ब्रह्मलोकः' इति वाक्यशेषे सत्यलोकाभिधानात्। न च 'सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन' इत्ययं समुच्चयविधिः। नह्यत्र तपःशब्दोऽग्निहोत्रादिकमाचष्टे, किन्तु ध्यानम्; 'मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तपः' इति इति स्मृतेः। तस्मान्न ज्ञानकर्मसमुच्चये मानमस्ति।

ब्रह्मका उपासक लिया जाता है, कारण कि निर्गुण-ब्रह्म-ज्ञानीका उत्तर मार्ग याने देवयानसे गमन नहीं होता है। और पुण्यकृत् शब्दसे प्रतीकोपासक लेनेमें तात्पर्य है, क्योंकि केवल कर्म करनेवालोंके लिए धूममार्गसे जानेका श्रुतिमें विधान है। इससे ब्रह्मज्ञानी और पुण्यकर्मा दोनोंका विद्युल्लोककी प्राप्ति तक उत्तरमार्गमें साथ-साथ गमनमें तात्पर्य रखनेवाला उक्त वचन है।

शङ्का—'सत्यकाम पुरुष उन कर्मोंका अवश्य आचरण करे' इत्याद्यर्थक श्रुतिसे ज्ञान और कर्मके समुच्चयका विधान किया जा सकता है। [अर्थात् सत्यशब्दका अर्थ परब्रह्मरूप प्रसिद्ध ही है, उसकी कामनासे कर्मोंका अनुष्ठान कहा गया है, इससे समुच्चयकी प्रतीति होती है]।

समाधान—ऐसा नहीं, कारण कि श्रुति केवल कर्मवालोंके लिए कहती है। सत्यशब्दका ब्रह्मरूप अर्थ नहीं लेना चाहिए, कारण कि 'यह पुण्य ब्रह्मलोक सुकृतशाली तुम पुण्यकर्माओंके लिए है,] इत्याद्यर्थक वाक्यशेषमें सत्यलोक कहा गया है, ['एष' यह सर्वनाम पूर्व कथित सत्यका परामर्श करता है। इसलिए ब्रह्मका वाचक भी सत्यपद वाक्यशेषके बलसे प्रकृतमें ब्रह्मलोकका ही वाचक है]। 'यह सत्यसे लभ्य है तथा तपसे लभ्य है और सम्यक् ज्ञानसे लभ्य है' इत्याद्यर्थक श्रुति (कर्मवाचक तपके बलसे) समुच्चयविधायक होगी, ऐसा भी नहीं कह सकते, कारण कि उक्त श्रुतिमें तपःशब्द अग्निहोत्रादि कर्मका अभिधान नहीं करता, किन्तु ध्यानको कहता है। 'मन और इन्द्रियोंकी एकाग्रता उत्कृष्ट तप है', ऐसा स्मृतियोंमें कहा गया है। इसलिए ज्ञान और कर्मोंका समुच्चय माननेमें कोई

प्रत्युत 'नास्त्यकृतः कृतेन' 'न कर्मणा न प्रजया' इत्यादिना कर्मणः साक्षान्मोक्षसाधनता निषिध्यते। न च केवलकर्मण एव प्रतिषेध इति वाच्यम्, समुच्चयविधायिप्रमाणाभावे सर्वकर्मणां प्रतिषेधोपपत्तेः; अन्यथा ज्ञानाङ्गतया सर्वकर्मसंन्यासविधानं नोपपद्येत। संन्यासाश्रमधर्मैः समुच्चयोऽस्त्विति चेद्, न; तद्धर्माणां ध्यानादीनां ज्ञानस्वरूपोपकारित्वात् फलसमुच्चयानुपपत्तेः। नित्यकर्मविधानानुपपत्तिरेव ज्ञानसहकारितया नित्यकर्मणां मोक्षफलत्वं कल्पयतीति चेद्, न; प्राभाकरमते तेषां फलनिरपेक्षत्वात्। भाट्टपक्षे विश्वजिन्न्यायेन स्वर्गकल्पनात्। वेदान्तिपक्षे संस्कारविविदिषयोरुक्तत्वात्। ब्रह्मज्ञानमेवेतिकर्त्तव्यतया कर्मणां मोक्षसाधनत्वं कल्प-

---

प्रमाण नहीं है। बल्कि इसके विपरीत 'अकृत—मोक्ष— कृत द्वारा—कर्म द्वारा—प्राप्य नहीं है। (क्योंकि वह तो अकृत है) और 'न प्रजया' (अर्थात् पुत्रोत्पादन आदिसे भी लभ्य नहीं है) इत्यादि वचनोंसे कर्म साक्षात् मोक्षका उपाय नहीं है, इस प्रकार निषेध किया जाता है। केवल (उपासनासे रहित) कर्मका ही निषेध है, यह भी कहना उचित नहीं है, कारण कि समुच्चयका विधायक प्रमाण न होनेसे (अविशेषसे) सभी कर्मोंका निषेध उपपन्न होता है। अन्यथा ज्ञानके अङ्गभूत सकल कर्मोंके संन्यासका (त्यागका) विधान उपपन्न न होगा।

यदि कहो कि संन्यासाश्रमके धर्मोंके साथ समुच्चय मानो, तो वह भी नहीं बनता, कारण कि संन्यासाश्रमके धर्म्मरूप ध्यान आदि ज्ञानके स्वरूपके साधक हैं, अतः फलके साथ समुच्चयकी उपपत्ति नहीं हो सकती।

शङ्का—नित्य कर्मोंके विधानकी अनुपपत्ति ही ज्ञानकी सहकारिता द्वारा नित्य कर्मोंसे मोक्षरूप फल होता है, यह कल्पना करती है।

समाधान—ऐसा नहीं, क्योंकि प्रभाकरके मतमें नित्य कर्मोंको फलकी अपेक्षा नहीं रहती और भट्टके मतमें विश्वजिन्न्यायसे उनके स्वर्गरूप फलकी कल्पना की जाती है। और वेदान्तियोंके मतमें नित्य कर्मोंका फल संस्कार और विविदिषा है, यह कह ही आये हैं।

शङ्का—ब्रह्मज्ञान ही इतिकर्तव्यस्वरूप होनेके कारण कर्मोंमें मोक्षसाधनताकी कल्पना करेगा।

यतीति चेद्, न; शमादिरूपेतिकर्त्तव्यतान्तरस्य सद्भावाद् । 'यज्ञेन विविदिषन्ति' इति विध्युद्देशे करणतया प्रसिद्धानां कर्मणामितिकर्त्तव्यतायां विधिविरोधाच्च । कथञ्चित्तेषां मोक्षसाधनत्वकल्पनेऽप्युदितानुदितहोमवद् ज्ञानकर्मणोर्विकल्प एव किं न स्यात् ? तथा च न समुच्चयसिद्धिः ।

न च समुच्चयवादिना मोक्षे कर्मणोऽध्यासः सुनिरूपः, न तावद् ब्रह्मात्मैकत्वं तत्साध्यम्, तस्य सिद्धस्वभावत्वात् । नाऽप्यविद्यातत्कार्यनिवृत्तिस्तत्साध्या, 'तरति शोकमात्मवित्' इत्यादौ तन्निवृत्तेर्ज्ञानसाध्यत्वश्रवणात् । किं च समुच्चयवादिमते विज्ञानसाध्यमपि फलं न भवति । किं कर्मोपाधिनिवृत्तिर्ज्ञानफलम्, किं वा मिथ्याध्यासनिवृत्तिः, उत तत्प्रवाहनिवृत्तिः, अथवा मिथ्याज्ञानसंस्कारनिवृत्तिः, आहोस्विद् ब्रह्मस्वरूपप्रकाशनम् ? नाऽऽद्यः; कर्मोपाधीनां सत्यवस्तुतया ज्ञानानिवर्त्यत्वात् । न द्वितीयः; मिथ्याध्यासस्य

समाधान—नहीं, कल्पना नहीं करेगा, कारण कि कर्मोंसे अतिरिक्त शम, दम आदिरूप इतिकर्तव्यता विद्यमान है । 'यज्ञ द्वारा ज्ञानेच्छा करनी चाहिए' इत्यादि विधिके उद्देशमें करणकारकरूपसे प्रसिद्ध कर्मोंको इतिकर्तव्य माननेसे विधिके साथ विरोध भी आता है । उनको किसी प्रकार मोक्षका साधन माननेपर भी उदितानुदित होमके समान ज्ञान और कर्मोंका विकल्प—पाक्षिकप्राप्ति—क्यों न मानी जाय ? इससे समुच्चयकी सिद्धि नहीं हो सकती । और समुच्चयवादीके लिए मोक्षमें कर्मोंके अध्यासका—सम्बन्धका—निरूपण करना सरल नहीं है, क्योंकि उन कर्मोंका फल ब्रह्म और जीवका ऐक्य भी नहीं हो सकता, कारण कि वह तो स्वभावसे ही सिद्ध है । अविद्या या उसके कार्योंकी निवृत्ति भी उनका फल नहीं माना जा सकता, कारण कि 'आत्मज्ञानी शोकसे पार हो जाता है—' इत्यादि अर्थवाले श्रुतिवाक्यमें अविद्या या उसके कार्यकी निवृत्ति ज्ञानका फल कहा गया है । और भी दोष आता है कि समुच्चयवादीके मतमें विज्ञानसे साध्य फल भी नहीं हो सकता । क्या कर्मरूप उपाधिकी निवृत्ति ज्ञानका फल है ? अथवा मिथ्या अध्यासकी निवृत्ति ? या उसके प्रवाहकी निवृत्ति ? अथवा मिथ्या अज्ञानके संस्कारकी निवृत्ति ? किं वा ब्रह्मस्वरूपका प्रकाश ? प्रथम पक्ष युक्त नहीं है, क्योंकि सत्यवस्तु होनेसे ज्ञान द्वारा कर्मरूप उपाधिकी निवृत्तिका सम्भव नहीं है । दूसरा पक्ष भी नहीं बनता, क्योंकि मिथ्या अध्यास क्षणिक होता है,

क्षणिकत्वात्स्वयमेव निवृत्तेः । न तृतीयः, प्रवाहस्य प्रवाहिनिवृत्तिमन्तरेण पृथगुच्छेदाभावात् । न चतुर्थः, रजतादिसंस्कारस्य शुक्त्यादिज्ञाननिवर्त्यत्वादर्शनात् । ज्ञानाभ्याससंस्काराद् निवृत्तौ संस्कार एव मुक्तिहेतुः स्यात् । ततो 'ज्ञानादेव कैवल्यम्' इति शास्त्रं विरुध्येत । न पञ्चमः, ब्रह्मणः स्वप्रकाशत्वात् ।

यत्तु भास्करेण प्रलपितं समुच्चयसामर्थ्यादेव धर्मावबोधानन्तरं ब्रह्मावबोध इति, तत्समुच्चयनिराकरणादेव निराकृतम् । सत्यपि वा समुच्चये तत्कथं सिध्येत् , वैपरीत्यप्रसङ्गस्य तत्र दुर्वारत्वात् । तथा हि—ज्ञानवतैवाऽनुष्ठितानि कर्माणि मोक्षं साधयन्तीति प्रथमं ब्रह्मावबोधमुत्पाद्य तद्बोधवतैव ब्रह्मचारिणा धर्मविचारिणा धर्मविचारादि सर्वं कर्त्तुं युक्तमिति विपरीत एव क्रमः स्यात् । कर्मानुष्ठानस्य ब्रह्मावबोधोत्तरकालभावित्वेऽपि धर्मविचारः पूर्वमेव क्रियतामिति चेद्, न; तथा-

---

इसलिए स्वयं निवृत्त हो जाता है। तीसरा पक्ष भी युक्त है नहीं, क्योंकि प्रवाहका प्रवाहीकी निवृत्तिके अतिरिक्त पृथक् कोई उच्छेद—विनाश—नहीं है। चौथा पक्ष भी युक्त नहीं है, क्योंकि रजतादिका संस्कार शुक्ति आदिके ज्ञानसे निवृत्त होते नहीं देखा गया है। ज्ञानके अभ्यास द्वारा उत्पन्न संस्कारसे निवृत्ति माननेमें संस्कारको ही मुक्तिका कारण मानना होगा। इससे 'ज्ञानके द्वारा ही मुक्ति होती है' इस शास्त्रसे विरोध आ जायगा। पांचवां पक्ष भी युक्त नहीं है, कारण कि ब्रह्म स्वयंप्रकाश है।

'समुच्चयकी सामर्थ्यसे ही धर्मनिर्णयके अनन्तर ब्रह्मज्ञान होता है' यह भास्करका प्रलाप समुच्चयका निराकरण करनेसे ही खण्डित हो गया, अथवा समुच्चय सिद्ध होनेपर भी वह—क्रम—कैसे सिद्ध हो सकता है ? कारण कि विपरीत क्रमका (ब्रह्मज्ञानके अनन्तर धर्मज्ञानका) वारण तुमसे (भास्करसे) करते नहीं बनेगा। क्योंकि ज्ञानी पुरुष द्वारा ही किये गये कर्म मोक्षके उपायभूत हैं, यह समझ कर पहले ब्रह्मज्ञान उत्पन्न कर ब्रह्मज्ञानी ब्रह्मचारीको ही (धर्मविचारकी कामनासे) धर्मविचार आदि सब कुछ करना उचित है, इस प्रकार उलटा ही क्रम प्राप्त हो जायगा।

शङ्का—यदि कहो कि यद्यपि कर्मोंका अनुष्ठान ब्रह्मज्ञानके उत्तरकालमें होता है, तथापि धर्मका विचार तो (ब्रह्मज्ञानसे) पूर्व ही करना चाहिए। [इससे विचारमें विपरीत क्रमकी आशङ्का नहीं हो सकती]।

सत्यादावेव मुमुक्षोराधर्मविचारपरिसमाप्तेरनुष्ठीयमानाश्रमकर्मणामानर्थक्यप्रसङ्गात्। न तावत् तेषां भोगः फलम्, पुरुषस्य भोगाद्विरक्तत्वात्। नाऽपि मुक्तिः, ज्ञानाभावेन तस्यामवस्थायां समुच्चयाभावात्। अपूर्वद्वारेणोपकारकत्वे जन्मान्तरानुष्ठितकर्मभिरेव तत्सिद्धौ कृतमिह जन्मनि कर्मानुष्ठानेन। न च धर्मविचारात् पूर्वं मुमुक्षुत्वमेव नाऽस्ति, दृश्यन्ते हि बाल्यमारभ्य मुमुक्षवः। न च मुमुक्ष्वमुमुक्षुसाधारणत्वाद्धर्मविचार एव प्रथमं कर्त्तव्य इति वाच्यम्, त्वन्मते काम्यमानमोक्षहेतुत्वेन साधारणत्वासिद्धेः। अथ नित्याध्ययनविधिप्रयोज्यत्वाद्धर्मविचारः साधारणः, तदापि न तस्य प्राथम्यनियमः; काम्यमानब्रह्मविचारानन्तरमपि नित्यकर्मविचारोपपत्तेः। यद्यध्ययनानन्तरमेव कर्मविचाराननुष्ठाने प्रत्यवायस्तदाऽपि

समाधान—ऐसा भी नहीं कह सकते, कारण कि उपर्युक्त सिद्धान्त (ब्रह्मज्ञानीका धर्मानुष्ठानमें अधिकार) माननेसे मुमुक्षु यतिके धर्मविचारकी परिसमाप्ति तक (ब्रह्मज्ञानके पूर्व तक) किये गये आश्रम कर्म सब व्यर्थ हो जायंगे, क्योंकि उनका भोगरूप फल तो हो नहीं सकता, क्योंकि मुमुक्षु पुरुषको भोगसे विरक्ति रहती है। मुक्ति भी फल नहीं है, कारण कि उस दशामें ज्ञान न होनेसे समुच्चय नहीं है [और आपके मतमें समुच्चय ही मुक्तिका साधन है]। यदि अपूर्व द्वारा उपकारक माने जायँ, तो जन्मान्तरमें किये गये कर्मोंके द्वारा ही अपूर्वकी सिद्धि हो जानेसे इस जन्ममें कर्मोंके अनुष्ठानकी आवश्यकता नहीं रह जाती। धर्मविचारसे पूर्व मुमुक्षत्व नहीं बन सकता, ऐसा भी नहीं माना जा सकता; क्योंकि बहुत लोग बाल्यावस्थासे ही मुमुक्षु होते देखे गये हैं। यह भी कहना उचित नहीं कि 'मुमुक्षु—विरागी— तथा अमुमुक्षु—रागी— दोनोंके लिए साधारण होनेसे धर्मविचार करना ही प्रथम प्राप्त होता है, कारण कि तुम्हारे मतमें धर्मविचार कामनाविषयीभूत मोक्षका साधन है, अतः उसे साधारण नहीं कह सकते, [अतः कामनारहित पुरुषके लिए उक्त साधन नहीं हुआ]।

यदि यह कहो कि नित्यभूत अध्ययनविधिसे प्रयोज्य होनेके कारण धर्मविचार साधारण हो सकता है, तो भी धर्मविचारके प्राथम्यका नियम नहीं बन सकता; कारण कि कामनाविषयीभूत ब्रह्मविचारके अनन्तर भी नित्यभूत कर्मविचारकी उपपत्ति हो सकती है। यदि कहो कि अध्ययनके अनन्तर ही कर्मोंका

तत्परिहारार्थैकं कर्मवाक्यं ब्रह्मबोधात् प्राग्विचारयितव्यम्, अन्यत्तु पश्चात्। तथा सति विदुषाऽनुष्ठीयमानानां ब्रह्मचारिधर्माणामपि मोक्षसाधनत्वलाभात्। अग्निहोत्रादिधर्माणामेव मोक्षसाधनत्वं न ब्रह्मचारिधर्माणामिति चेद्, वेदानुवचनादिषु प्रत्येकं निरपेक्षकरणविभक्तिश्रवणाद् ब्रह्मचारिणोऽध्ययनस्याऽपि मोक्षसाधनत्वोपपत्तेः। अत एव श्रुतिर्ब्रह्मचर्यादेव संन्यासं विधत्ते। तेन ब्रह्मचारिधर्माणां संन्यासधर्माणां वा ज्ञाने समुच्चयोपपत्तौ त्वन्मतेऽग्निहोत्रादीनामननुष्ठानमेव प्रसज्येत। किं च क्रतुविधय एव धर्मविचारप्रयोजकाः, न त्वध्ययनविधिः। अन्यथा ब्रह्मविचारस्याऽप्यध्ययनविधिप्रयोज्यत्वप्रसङ्गात्। 'श्रोतव्यः' इति विध्यन्तरं तत्प्रयोजकमस्तीति चेद्, न; धर्मविचारे क्लृप्तप्रवर्त्तकभावेनाऽध्ययनविधिनैव ब्रह्मविचारस्याऽपि प्रयोगसम्भवे 'श्रोतव्यः' इति विधेरपि प्रवर्त्तकत्वकल्पने

(धर्मका) विचार न करनेसे प्रायश्चित्त होता है, तो भी उस प्रत्यवायके परिहारके लिए किसी भी एक कर्मबोधक वाक्यका ब्रह्मज्ञानसे पूर्व विचार कर लेना चाहिए और दूसरे वाक्योंका (ब्रह्मज्ञानके) पश्चात् विचार करना चाहिए। ऐसा माननेसे तो विद्वान्‌के द्वारा किये जानेवाले ब्रह्मचारीके भैक्षचर्यादि धर्म मोक्षके साधन हो सकते हैं। यदि मानो कि अग्निहोत्र आदि धर्म ही मोक्षके साधन हो सकते हैं, ब्रह्मचारीके धर्म मोक्षके साधन नहीं हो सकते, तो वेदानुवचन आदि प्रत्येकमें परस्पर निरपेक्ष करणकारकार्थ तृतीयाविभक्तिके श्रवणसे ब्रह्मचारीके (वेदानुवचनरूप) वेदाध्ययनमें भी मोक्षसाधनत्वकी उपपत्ति हो सकती है। इसीलिए श्रुति ब्रह्मचर्याश्रमसे ही संन्यासका विधान करती है। इससे ब्रह्मचारीके धर्म और संन्यास-धर्म दोनोंके ज्ञानमें समुच्चयकी उपपत्ति हो जानेसे तुम्हारे मतमें अग्निहोत्रादिका अनुष्ठान न करना ही प्राप्त हो जायगा। और यज्ञविधान ही धर्मविचारके प्रयोजक हैं, अध्ययनका विधान प्रयोजक नहीं है। नहीं तो ब्रह्मविचारकी भी प्रयुक्ति अध्ययनविधिसे प्राप्त होगी।

शङ्का—ब्रह्मविचारका प्रयोजक 'श्रोतव्यः' यह दूसरा विधान है [इसलिए अध्ययनविधिसे उसकी प्रयुक्ति नहीं मानते]।

समाधान—ऐसा नहीं कह सकते, कारण कि धर्मविचारमें माने गये प्रयोजकरूप अध्ययनविधिसे ही ब्रह्मविचारकी भी प्रयुक्तिका सम्भव है, अतः 'श्रोतव्यः' इसको

गौरवात्। ब्रह्मविचारस्य काम्यत्वान्न नित्याध्ययनविधिप्रयोज्यतेति चेद्, नः काम्यक्रतुविचारस्य तत्प्रयोज्यताङ्गीकारात्। न च वाच्यं धर्मविचारादपि ब्रह्मविचारे शमदमोपसदनाद्यङ्गाधिक्याद्विध्यन्तरप्रयोज्यतेति, एकस्यैवाऽध्ययनविधेर्न्यूनाधिकाङ्गौ धर्मब्रह्मविचारौ प्रति प्रयोजकत्वसंभवात्। एक एव हि दर्शपूर्णमासविधिः पुरोडाशहविष्कावाग्नेयाग्नीषोमीययागाववघाताद्यङ्गसहितं [तौ ?] तद्रहितं चाऽऽज्यहविष्कमुपांशुयाजं प्रवर्त्तयति। ननु विधिर्हि सर्वत्रोपादेयस्यैवाऽनुष्ठापकः, शमदमादयस्त्वनुपादेयाः, ब्रह्मविचाराधिकारिविशेषणत्वात्, ततो नाऽध्ययनविधिस्तदनुष्ठापक इति चेद्, नः अध्ययनविध्यधिकारिण उपनीतस्यैव तत्प्रयुक्ते ब्रह्मविचारेऽप्यधिकारितया

पृथक् प्रयोजक माननेमें गौरव है। यह भी नहीं कह सकते कि ब्रह्मविचारके काम्य होनेसे नित्यभूत अध्ययनविधिसे उसकी प्रयुक्ति नहीं हो सकती है, कारण कि काम्य यज्ञोंके विचारकी प्रयुक्ति नित्यभूत अध्ययन विधि द्वारा मानी गयी है।

शङ्का—धर्मविचारकी अपेक्षा ब्रह्मविचारमें शम, दम, उपसदन आदि अङ्गोंके अधिक होनेसे अध्ययनसे अतिरिक्त दूसरी विधिसे प्रयुक्ति मानी जानी चाहिए।

समाधान—उक्त कल्पना नहीं हो सकती, कारण कि एक ही अध्ययनविधान अल्प और अधिक अङ्गवाले धर्मविचार तथा ब्रह्मविचारके प्रति प्रयोजक हो सकता है। दृष्टान्त द्वारा समर्थन करते हैं—एक ही दर्शपूर्णमासका विधान अवघात आदि अङ्गोंके सहित पुरोडाशहविस्वाले आग्नेय और आग्नीषोमीय याग तथा उक्त अङ्गोंसे रहित घृतहविष्क उपांशुयागकी प्रयुक्ति करता है।

शङ्का—विधान सर्वत्र उपादेयका ही अनुष्ठान कराता है। शम, दम आदि तो अनुपादेय हैं, क्योंकि वे ब्रह्मविचारके अधिकारीके विशेषण हैं। इससे अध्ययनविधिको उसका (शमदमादि अङ्गोंका) अनुष्ठापक नहीं मान सकते।

समाधान—ऐसा नहीं, कारण कि अध्ययनविधिका अधिकारी उपनीत पुरुष है, उसी उपनीत पुरुषका ही अध्ययनविधिसे प्रयुक्त ब्रह्मविचारमें भी

शमादीनामतद्विशेषणत्वात् । अन्यथा श्रवणविधेरपि तदनुष्ठापकता न स्यात् । तदेवं भास्करादिसमुच्चयवादिमतानामनेकधा दुष्टत्वाद् धर्मब्रह्मविचारयोः फलैक्यायोगान्न कर्त्रैक्यमिति न तत्प्रयुक्तक्रमार्थोऽथशब्दः ।

नन्वेवमपि पूर्वतन्त्रे द्वादशभिरपि लक्षणैर्धर्म एको जिज्ञास्यस्तत्र यथा लक्षणानां क्रमनियमस्तथा पूर्वोत्तरतन्त्रयोरपि जिज्ञास्यैक्ये क्रमनियमार्थोऽथशब्दः स्यादिति चेद्, न; फलवज्जिज्ञास्यस्याऽपि भिन्नत्वात् । यथा पूर्वतन्त्रेऽनुष्ठानापेक्षोऽभ्युदयः फलम्, तथोत्तरतन्त्रे चाऽनुष्ठानानपेक्षं निःश्रेयसमिति फलभेदः । तथा पूर्वतन्त्रे पुरुषव्यापारतन्त्रो ज्ञानदशायामविद्यमानो धर्मो जिज्ञास्यः, उत्तरतन्त्रे पुरुषव्यापारानपेक्षं ज्ञानकालेऽपि विद्यमानं ब्रह्म जिज्ञास्यम्, अतो वेदार्थत्वाकारेणैक्येऽपि जिज्ञास्यभेदो न वारयितुं शक्यः । प्रमाणैक्ये प्रमेयभेदो न युक्त इति चेद्, न; प्रमा-

---

अधिकार होनेसे शम आदि ब्रह्मविचारके अधिकारीके विशेषण नहीं हैं । इसके विपरीत माननेसे तो श्रवणादि विधिमें भी उसकी अनुष्ठापकता नहीं प्राप्त होगी । इस प्रकार भास्कर आदि समुच्चयवादियोंके मत अनेक प्रकारके दोषोंसे पूर्ण हैं, और धर्म तथा ब्रह्म दोनोंके विचारोंका एक फलसे सम्बन्ध नहीं है, अतः दोनोंका एक ही कर्ता नहीं हो सकता, इसलिए उसके द्वारा प्राप्त होनेवाले क्रमरूप अर्थका वाचक अथशब्द नहीं हो सकता ।

शङ्का—ऐसा माननेपर भी पूर्वमीमांसा शास्त्रमें बारहों लक्षणोंसे एक ही धर्म जिज्ञास्य है, उसमें जैसे लक्षणोंका क्रमनियम है, उसी प्रकार पूर्वोत्तरमीमांसा शास्त्रोंमें भी जिज्ञास्य एक होनेसे क्रमनियमार्थक 'अथ' शब्द लिया जायगा ।

समाधान—ऐसा नहीं, कारण कि फलके समान जिज्ञास्य भी भिन्न-भिन्न हैं । जैसे पूर्वमीमांसामें अनुष्ठानकी अपेक्षा रखनेवाला अभ्युदय फल है, वैसे ही उत्तरमीमांसामें अनुष्ठानकी अपेक्षा न रखनेवाला निःश्रेयस फल है, इस प्रकार फलभेद है । एवं पूर्वमीमांसामें पुरुषव्यापारके अधीन ज्ञानावस्थामें अविद्यमान धर्म जिज्ञास्य है और उत्तरमीमांसामें पुरुषव्यापारकी अपेक्षा न रखता हुआ ज्ञानावस्थामें भी विद्यमान ब्रह्म जिज्ञास्य है । इसलिए वेदार्थ होनेके कारण ऐक्य होनेपर भी जिज्ञास्यभेदका वारण नहीं किया जा सकता । और यह भी नहीं कह सकते कि प्रमाणके एक होनेपर प्रमेयका भेद मानना उचित नहीं है, कारण कि प्रमाणका

णैक्यासिद्धेः। नहि धर्मे ब्रह्मणि वा वेदो वेदाकारेणैव प्रमाणम्, किन्तु चोदनाकारेण धर्मं बोधयति वेदान्तवाक्यरूपेण च ब्रह्मस्वरूपम्। तत्र चोदनेति शब्दभावनां कुर्वाणः शब्दोऽभिधीयते। सा च चोदना अंशत्रय-विशिष्टामर्थभावनां कुर्वती तदनवबोधे पुरुषप्रवृत्त्ययोगात् पुरुषप्रेरणार्थमेवाऽर्थ-भावनां प्रतिपादयति। वेदान्तवाक्यं पुनर्बोधयत्येव, न तु ब्रह्मणि तद्बोधे वा पुरुषं प्रेरयति, ब्रह्मणोऽकार्यस्याऽपुरुषतन्त्रत्वाद् बोधस्य च प्रमाण-प्रमेयतन्त्रस्य पुरुषेच्छाप्रयत्नानधीनत्वात्। अनिच्छतोऽप्रयतमानस्यापि दुर्गन्धादिज्ञानदर्शनात्। तदेवं धर्मब्रह्मणोस्तत्प्रमाणयोश्चाऽत्यन्तविलक्षण-त्वान्नाऽत्र जिज्ञास्यैक्यप्रयुक्तमपि क्रममथशब्दो वक्तुमर्हति। तस्मादान-न्तर्याभिधानमुखेन पुष्कलकारणरूपस्य शास्त्रीयस्याऽधिकारिविशेषणस्य सूचनायैवाऽथशब्दः।

तच्चाऽधिकारिविशेषणं चतुर्धा शास्त्रे प्रसिद्धं नित्याऽनित्यवस्तुविवेक

एक होना सिद्ध ही नहीं है। धर्म और ब्रह्म दोनोंमें वेद वेदरूपसे ही प्रमाण नहीं है, चोदनाके आकारसे वेद धर्मका बोध कराता है और वेदान्तवाक्य-रूपसे ब्रह्मस्वरूपका बोध कराता है। उसमें 'चोदना' शब्दसे भावनाको करनेवाला शब्द कहलाता है और वह चोदना अंशत्रयविशिष्ट अर्थभावनाको करती हुई उसका बोध न होनेमें पुरुषकी प्रवृत्तिका सम्बन्ध न होनेसे पुरुषकी प्रेरणाके ही लिए अर्थभावनाका प्रतिपादन करती है। और वेदान्तवाक्य तो बोध ही कराता है। ब्रह्म तथा उसके बोधमें पुरुषकी प्रेरणा नहीं करता, कारण कि ब्रह्म कार्यरूप न होनेसे पुरुषव्यापारके अधीन नहीं हैं, क्योंकि प्रमाण और प्रमेयके द्वारा उत्पन्न होनेवाला बोध पुरुषकी इच्छा तथा उसके प्रयत्नके अधीन नहीं है। इच्छा न रखने तथा प्रयत्न न करते हुए भी पुरुषको दुर्गन्धादिका ज्ञान होते देखा गया है। इस प्रकार धर्म तथा ब्रह्मका एवं उनके प्रमाणोंका परस्पर अत्यन्त भेद होनेसे प्रकृतमें एक जिज्ञास्य होनेके कारण प्राप्त हुए क्रमरूप अर्थको अथशब्द नहीं कह सकता। इससे आनन्तर्यरूप अर्थका अभिधान करता हुआ पुष्कल कारणरूप (साधनचतुष्टय) अधिकारीके शास्त्रीय विशेषणको सूचन करनेके लिए ही अथशब्दका प्रयोग किया गया है।

और वह अधिकारीका विशेषण शास्त्रमें चार प्रकारका प्रसिद्ध है १ नित्यानित्यवस्तुविवेक, २ ऐहिक या पारलौकिक विषय भोगोंसे विरक्ति,

इहाऽमुत्रार्थफलभोगविरागः, शमदमादिसाधनसंपद्, मुमुक्षुत्वं चेति । तत्र 'सोऽन्वेष्टव्यः' इति विधिप्रकरणे 'तद्यथेह कर्मचितो लोकः क्षीयते' इत्यादिना नित्यानित्यवस्तुविवेको दर्शितः । श्रवणविधिप्रकरणे च 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इतीहामुत्रार्थफलभोगविरागो दर्शितः । 'आत्मन्येवात्मानं पश्येत्' इति दर्शनविधिप्रकरणे 'शान्तो दान्तः' इत्यादिना शमादयो दर्शिताः । 'तद्विजिज्ञासस्व' इति विचारविधिप्रकरणे 'वरुणं पितरमुपससार' इति गुरूपसदनं दर्शितम् । न च मुमुक्षुत्वप्रापकप्रमाणाभावः, सर्वत्र हि फलश्रुतयः कामनोत्पादनद्वारेण मुमुक्षोरधिकारप्रदर्शनार्थाः; अन्यथा साधनानुष्ठानादेव फलसिद्धेस्तत्संकीर्तनवैफल्यात् । यद्यपि शमादयो ज्ञानविधिप्रकरणे पठितास्तथापि तेषां विचाराधिकारिविशेषणत्वमविरुद्धम् । ज्ञानस्य विधातुमशक्यतया तत्साधनस्य विचारस्यैव तत्र विधेयत्वात् । एवमपि प्रतिशाखं विचारविधेर्भिन्नत्वात्तत्र च तान्यधिकारिविशेषणान्यपि व्यवतिष्ठन्ते,

---

३ शम, दम आदि साधनोंकी सम्पत्ति और ४ मुमुक्षुता । उनमें से 'उस ब्रह्मका अन्वेषण करना चाहिए' इस विधिके प्रकरणमें पढ़े गये—'जैसे कर्मोपार्जित स्वर्गादिलोक क्षीण हो जाते हैं'—इत्यादि वाक्य द्वारा नित्यानित्य वस्तुका विवेक दिखलाया गया है । और श्रवणविधिके प्रकरणमें—'आत्माकी कामनासे सब कुछ प्रिय लगता है' इस वाक्यसे ऐहिक और पारलौकिक विषयोंसे वैराग्य दिखलाया गया है, 'आत्मा ही में आत्माका दर्शन करे' (अर्थात् अनात्मामें आत्मदृष्टि न करें) इस दर्शनविधिके प्रकरणमें 'शमयुक्त तथा दमयुक्त हो' इत्यादि वाक्यसे शम, दम आदि दिखलाये गये हैं । 'उसका विचार करो' इस विचारविधिके प्रकरणमें 'अपने पिता वरुणके पास गया' इस वाक्यसे गुरुके समीपमें गमनरूप उपसदन दिखालाया गया है । मुमुक्षुताके प्रापक प्रमाणका अभाव भी नहीं है, कारण कि सर्वत्र कामनाके उत्पादन द्वारा फलश्रुतियां मुमुक्षुका अधिकार दिखलाती हैं । अन्यथा साधनके अनुष्ठानसे ही फलकी सिद्धि हो जायगी, फिर उसका सङ्कीर्तन करना व्यर्थ हो जायगा । यद्यपि ज्ञानविधि-प्रकरणमें शम आदि पढ़े गये हैं, तथापि उनको विचारके अधिकारीके विशेषण माननेमें कोई विरोध नहीं है, कारण कि ज्ञानका विधान करना सम्भव नहीं है, इसलिए उसका साधनभूत विचार ही उस ज्ञानविधिमें विधेय है, ऐसा मानना उचित है ।

शङ्का—इस प्रकार माननेपर भी प्रत्येक शाखामें विचार-विधियाँ भिन्न-

न तु समुच्चीयन्त इति चेद्, न; सर्वशाखाप्रत्ययन्यायेन विचारविधेरेकत्वात् । नानाशाखासु श्रूयमाणस्य ज्योतिष्टोमादिकर्मणः शाखाभेदेन भेदावाप्तौ 'एकं वा संयोगरूपचोदनाख्याविशेषात्' इति सूत्रेण सिद्धान्तितम् । तत्र यथा फलसंयोगस्य द्रव्यदेवतालक्षणरूपस्य 'यजेत' इत्यादिचोदनाया ज्योतिष्टोमादिसंज्ञायाश्च सर्वत्राऽविशेपेण कर्मैक्यं तथा विचारोऽपि सर्वत्रैक एव । स चैको विचारविधिरधिकारमीक्षमाणः प्रकरणसामर्थ्यात् फलसङ्कीर्त्तनवैफल्यपरिहाराच्च वर्णितधर्मकलापमधिकारनिमित्तत्वेन स्वीकरोति । निरधिकारस्य विधेः प्रवृत्तिपर्यन्तत्वायोगात् । नन्वेषु वाक्येषु विचारपदाभावाद्विचारोऽभिधीयत इति कथमवगम्यते ? उच्यते—'स विजिज्ञा-

---

भिन्न हैं, अतः उनमें वे सभी अधिकारीके विशेषण व्यवस्थित हैं, उनका समुच्चय नहीं है ।

समाधान—नहीं, ऐसा नहीं कह सकते, कारण कि सर्वशाखाप्रत्ययन्यायसे विचारविधि एक ही है । अनेक शाखाओंमें पढ़े गये ज्योतिष्टोम आदि यज्ञोंका शाखाओंके भेदसे भेद प्राप्त होनेपर 'एकं वा संयोगरूपचोदनाख्याविशेषात्' (जै० सू० २ अ० ४ पा० १९) (संयोगरूप चोदनामें कोई विशेष न होनेसे) इस सूत्रसे एक होना ही सिद्धान्त किया गया है । उसमें जैसे द्रव्य-देवता-सम्बन्धस्वरूप फलसंयोगका 'यजेत' इत्यादि लिङर्थभूत चोदनासे और ज्योतिष्टोम आदि संज्ञामें सर्वत्र विशेष न होनेसे एक कर्म माना जाता है, वैसे ही विचार भी सब शाखाओंमें एक ही है । वह एक ही विचारविधि अधिकारकी अपेक्षा करती हुई प्रकरणकी सामर्थ्यसे और फलके वर्णनका वैफल्यपरिहार करनेसे वर्णित धर्मसमूहको अधिकारके निमित्तत्वरूपसे स्वीकार करती है । अधिकारशून्य विधानका प्रवृत्तिपर्यन्त सम्बन्ध नहीं हो सकता [अर्थात् निरधिकार विधि केवल पुस्तकोंमें लिखी ही रह जाती है, इससे अधिकारी न होनेसे कोई उसका अनुष्ठान करना अपना कर्तव्य ही नहीं समझता ।]

शङ्का—उक्त वाक्योंमें विचार-पदके न होनेसे विचारका अभिधान होता है, यह कैसे समझा जा सकता है ?

समाधान—सुनिये, कहते हैं—'स विजिज्ञासितव्यः', 'तद् विजिज्ञासस्व' अर्थात् उसकी जिज्ञासा करो इस अर्थवाले उक्त दोनों वाक्योंके अन्तर्गत

सितव्यः' 'तद्विजिज्ञासस्व' इत्यत्राऽन्तर्णीतो विचारो विधीयते, इष्यमाणज्ञानस्येच्छायाश्च विधेयत्वायोगात्। 'श्रोतव्यः' इत्यत्र स्वयमेव विचारो विहितः। 'पश्येत्' इत्यत्र तु पूर्वमेवोक्तम्। तस्मात् सर्वत्र मननिदिध्यासनाभ्यामङ्गाभ्यां श्रवणं नामाऽङ्गि विधीयते इति सिद्धम्।

ननु सर्वत्र फलसाधनविधौ फलकामनैव पुष्कलाधिकारनिमित्तमित्यत्राऽपि मुमुक्षुत्वमेवाऽधिकारिविशेषणं शमदमादिकं त्वनुष्ठेयतया प्रयाजादिवत् फलोपकार्य्यङ्गं भविष्यतीति चेत्, सत्यम्; अङ्गस्याऽप्यधिकारिविशेषणत्वं

विचाररूप अर्थका ही विधान किया जाता है, कारण कि इच्छाके विषयभूत ज्ञान तथा इच्छा दोनों विधेय नहीं हो सकते। 'श्रोतव्यः' इस पदसे स्वयं विचारका विधान किया गया है और 'पश्येत्' इस पदमें तो पहले ही कह आये हैं। ['जिज्ञासितव्यः' या 'विजिज्ञासस्व' इन पदोंमें सन्-प्रकृतिभूत धातुका अर्थ ज्ञान है और सन्‌का अर्थ इच्छा है, 'तव्य' या 'लोट्' प्रत्यय विधिके बोधक हैं। यद्यपि समभिव्याहृत प्रकृतिके अर्थका भी विधान करना न्यायप्राप्त है, परन्तु दोनोंके विधानका सम्भव न होनेसे उसके उपायभूत विचारमें विधिका संक्रमण किया जाता है, इस प्रकार 'विजिज्ञासस्व' आदि पद विचारके अर्थतः वाचक हुए, परन्तु श्रवण तो विचाररूप अर्थमें रूढ़ है, अतः वह स्वतः वाचक पद होनेसे मुख्यतः विचाररूप अर्थको कहता है] इस उक्त निर्णयके बलसे मनन, निदिध्यासन रूप अङ्गोंके द्वारा श्रवण—विचार—रूप अङ्गीका विधान किया जाना सिद्ध होता है।

शङ्का—अन्यत्र सभी स्थलोंमें फलकामना ही पुष्कल—पर्याप्त—अधिकारकी निमित्त—उत्पादक—मानी जाती हैं एवं प्रकृतमें मुमुक्षुता ही अधिकारीकी विशेषण रहे और शम, दम आदि तो अनुष्ठानके विषय-योग्य होनेसे प्रयाजादि यागोंके सदृश फलके उपकारी अङ्ग होंगे, [पुष्कल कारण नहीं होंगे]।

समाधान—यह सच है[1] कि अङ्गको भी अधिकारीका विशेषण मानना विरुद्ध

---

[1] 'पूर्वपक्षे दृढीभूते सत्यमित्युच्यते बुधैः' अर्थात् जहां पूर्वपक्ष कुछ युक्त-सा जंचता है वहां पर समाधान देनेके पूर्व अभियुक्त 'सत्य है' ऐसा कहते हैं, परन्तु इस सत्यपदका यथार्थरूप या अबाधित रूप अर्थ नहीं है।

न विरुध्यते, शमादिगुणको भूत्वा पश्येदित्यादिलिङ्गात् । शास्त्रैकगम्यस्य युक्त्याऽपलापायोगात् । अङ्गभूताया अपि दीक्षाया उत्तरक्रत्वधिकारनिमित्ततादर्शनात् । यद्यपि मुमुक्षुत्वे सत्यन्यधर्माभावापराधेन प्रवृत्त्यभावो न दृष्टचरस्तथापि मुमुक्षुत्वस्वरूपोपाधित्वादन्येषामधिकारनिमित्तत्वमनिवार्यम् । नहि नित्यानित्यवस्तुविवेकाभावे सतीहाऽमुत्रार्थफलभोगविराग उपपद्यते । नाऽपि तस्मिन्नसति शमादियुक्तत्वेन मुमुक्षुत्वं संभवति । अतः पूर्वपूर्व उत्तरोत्तरस्य स्वरूपोपाधिः ।

नन्वेवं सति न कस्याऽपि स्वरूपं सिध्येद्, मूलकारणस्य नित्यानित्यवस्तुविवेकस्याऽसंभवात् । नहि नित्यं नाम किंचिदस्ति यस्याऽ-

---

नहीं है; कारण कि इस अर्थके परिचायक 'शमादि गुणोंसे युक्त होता हुआ दर्शन—विचार—करे' इत्याद्यर्थक वाक्य मिलते हैं, अतः केवल शास्त्रसे ही प्रतीत होनेवाले अर्थका युक्तियोंसे खण्डन नहीं किया जा सकता । [जैसे आंखके सामने छोटी अंगुलीकी आड़ आनेसे ही चन्द्रमाके शास्त्रगम्य परिमाणका निषेध नहीं किया जा सकता] । दृष्टान्त द्वारा उक्तार्थका समर्थन करते हैं—अङ्गभूत दीक्षा भी उत्तर क्रतुओंमें अधिकारकी निमित्त देखी गई है । यद्यपि मुमुक्षुताके प्राप्त हो जानेपर दूसरे 'नित्याऽनित्य वस्तुके विवेक' आदि धर्मोंके न होनेके कारण 'ब्रह्मविचारमें' प्रवृत्ति—अनुष्ठान—का अभाव कभी नहीं देखा जाता तथापि मुमुक्षुत्वस्वरूप उपाधिके—विशेषण—होनेसे अर्थात् अन्य अधिकारि निमित्त आ ही जाते हैं, क्योंकि नित्याऽनित्य वस्तु-विवेकादि अन्य धर्मोंके अभावसे मुमुक्षुता ही नहीं हो सकती, अतः अन्य उक्त तीनों धर्मोंमें अधिकार-निमित्तत्व नहीं हटाया जा सकता । नित्याऽनित्यवस्तुविवेकके अभावके रहते इस लोक और परलोकके विषयोंके भोगसे विरक्ति नहीं हो सकती और उसके न होनेसे शम, दम आदिसे सम्पन्न होकर मोक्षकी इच्छारूप मुमुक्षुता भी नहीं हो सकती । इसलिए पूर्व पूर्व उत्तर उत्तरकी स्वरूपोत्पादकरूप उपाधि है । [अर्थात् नित्याऽनित्यवस्तुविवेकसे सर्वथा विषयविरक्ति और विषयविरक्तिसे शम, दमादि सम्पत्ति और शम, दमादि सम्पत्तिके अनन्तर मुमुक्षुता होती है, यह भाव है] ।

शङ्का—अब तो किसीका भी स्वरूप नहीं बन सकेगा, कारण कि सबके मूलकारणभूत नित्याऽनित्यवस्तुविवेकका सम्भव नहीं है, क्योंकि नित्य

नित्याद्विवेकः स्यात् । न च सर्वानित्यत्वे मानाभावः, विमतं सर्वमनित्यम्, सत्त्वाद्, घटादिवत्, इति चेद्, मैवम्; कार्यजातस्योत्पत्तिविनाशाभ्यामेवोपादानस्यैकस्याऽनादेः कूटस्थस्याऽवधिभूतस्य नित्यत्वसिद्धेः । तथाहि न तावत् कार्यं निरुपादानमुपपद्यते, अनुभवविरोधात् । अत उपादानमङ्गीकार्यम् । उपादानत्वं च कार्यान्तरस्य न संभवति । तथा सति कार्यानुगतस्यैवोपादानत्वनियमात् पूर्वपूर्वकार्यानुवेधस्योत्तरोत्तरकार्येऽभ्युपगन्तव्यत्वाच्चरमे कार्येऽनन्तपूर्वकार्याणामनुगतिः प्रसज्येत । न चैवमुपलभ्यते, अतोऽनाद्येव तदुपादानम् । तस्य चैकस्यैव सर्वकार्योत्पादकत्वसंभवेऽनेकत्वकल्पने गौरवादेकत्वमभ्युपेयम्, कूटस्थत्वं चाऽविकारित्वाद्,

---

पदार्थ कोई है ही नहीं, जिसका अनित्यसे विवेक—पार्थक्यज्ञान—किया जाय और सबको ही अनित्य माननेमें प्रमाणका अभाव भी नहीं है, कारण कि 'विमत सब-कुछ (ब्रह्म आदि) अनित्य है, सत् होनेसे, घट, पट आदिके समान, यह अनुमान प्रमाण है । [घट, पट आदि सभी पदार्थ 'सन् घटः', 'सन् पटः' इत्यादि प्रतीतिके बलसे सत् हैं और विनाशी होनेसे अनित्य हैं, इस व्याप्तिसे सत्-पदार्थभूत ब्रह्म भी अनित्य होगा, यह भाव है ।]

समाधान—ऐसा नहीं, कारण कि सम्पूर्ण कार्योंकी उत्पत्ति और विनाशसे ही कूटस्थ (अविकारी और अपरिणामी) तथा अवधिभूत एक उपादान कारणका नित्य होना सिद्ध होता है । [उपादान कारणकी नित्यता सिद्ध करते हैं]—उपादानरहित कार्यकी तो उत्पत्ति हो ही नहीं सकती, क्योंकि (कार्यको उपादान-रहित माननेमें) अनुभव विरोध आता है; इसलिए उपादानका अङ्गीकार अवश्य करना चाहिए । कार्यान्तर भी उपादान नहीं माना जा सकता 'अर्थात् एक कार्यका दूसरा कार्य उपादान नहीं हो सकता । यदि कार्यान्तर ही कारण माना जाय, तो कार्यानुगत—कार्यमें विद्यमान—को ही उपादान माननेका [जैसे घटमें मिट्टीकी अनुवृत्तिसे मिट्टी उसकी उपादान है] नियम होनेसे पूर्व-पूर्व कार्यका अनुवेध (अनुवृत्तिरूप सम्बन्ध) अग्रिम-अग्रिम कार्यमें मानना ही चाहिए, इस परम्परासे अन्तिम कार्यमें अनन्त पूर्व कार्योंकी अनुवृत्ति आनेका प्रसङ्ग हो जायगा । पर ऐसा अनुभवमें आता नहीं, इस हेतुसे अनादि ही वह उपादान है । अकेले एक उसमें ही सब कार्योंकी उपादानताका सम्भव होनेपर उसकी (उपादानकी) अनेकताकी कल्पना करनेमें गौरव होनेसे एकत्वकी ही

विकारित्वे च कार्यत्वप्रसङ्गात् । तच्च कूटस्थवस्तु विनश्यतो विकारजातस्याऽवधिः । अन्यथा निरवधिकविनाशे सत्युपादानासंभवाद्वर्त्तमानसृष्टिरेव न सिध्येत् । अतः कूटस्थं वस्तु नित्यमिति नित्यानित्यवस्तुविवेकसिद्धौ तत्कार्यो मुमुक्षुत्वान्तो धर्मकलापोऽपि सिध्यन्नाऽधिकारिणं ब्रह्मविचारे प्रवर्त्तयति । यस्तूक्तसाधनसम्पद्विरहेऽपि दैववशात् कुतूहलाद्वा बहुश्रुतत्वबुद्ध्या वा तत्र प्रवर्त्तते, स प्रवृत्तोऽप्यनन्तर्मुखचेता बहिरेवाऽभिनिविशमानो निर्विचिकित्सं ब्रह्मात्मत्वेनाऽवगन्तुं न शक्नोति । तस्माद्वर्णितवस्तुकलापानन्तर्यमथशब्दार्थः ।

अत्र भास्करः प्रललाप, विचारकर्त्तव्यतां प्रतिपद्यमानस्य किल सूत्रकारस्य शमादयो न बुद्धिसमारूढाः । न चाऽबुद्धिसमारूढमर्थमधिकारिविशेषणतयोपादातुमर्हति; धर्मविचारस्तु बुद्ध्यारूढोऽधिकारिविशेषण-

---

कल्पना करना युक्तिसङ्गत है और विकारी न होनेसे ब्रह्म कूटस्थ माना जाता है विकारी होनेसे, तो वह भी कार्य ही हो जायगा । और वही कूटस्थ वस्तु विनाशित्वस्वभाववाले कार्यमात्रकी अवधि है, अन्यथा ध्रुव—केन्द्र—भूत वस्तु न माननेसे निरवधिक विनाशकी प्राप्ति होनेसे (अर्थात् सब-कुछ-का नाश हो जानेसे, उपादानका रहना भी सम्भव नहीं हो सकता, इससे (उपादानके न रहनेसे) वर्तमान सृष्टिका होना ही सिद्ध नहीं हो सकता । इसलिए कूटस्थ वस्तु नित्य है, इससे नित्य वस्तुका सम्भव होनेसे उसका कार्य (नित्यानित्यवस्तुविवेकसे उत्पन्न होनेवाला) मुमुक्षुतापर्यन्त धर्मसमूह (ऐहिक पारलौकिक विषयभोगविराग, शम, दमादिसम्पत्ति तथा मुमुक्षुता) सिद्ध होता हुआ अधिकारीको ब्रह्मविचारमें प्रवृत्त कराता है । जो कोई पुरुष उक्त साधनसम्पत्तिके बिना भी दैववश अथवा उत्सुकतासे या बहुत शास्त्र जाननेकी बुद्धि होनेसे ब्रह्मविचारमें प्रवृत्त होता है, वह बहिर्मुखचित्तप्रवृत्तिवाला होनेसे बाहर ही बाहरका ज्ञान प्राप्त करता है और अन्तःप्रवेश न पाता हुआ ब्रह्मको निर्विचिकित्स—सन्देहशून्य—होकर आत्मरूपसे नहीं जान सकता । इसलिए पूर्वमें जिसका वर्णन किया गया है, ऐसे वस्तुसमूहका आनन्तर्य ही अथशब्दका अर्थ है ।

इस विषयमें भास्करने प्रलाप किया है कि विचारका कर्तव्यरूपसे प्रतिपादन करनेवाले सूत्रकारकी बुद्धिमें शम, दम आदि नहीं आये थे और बुद्धिमें न आया हुआ अर्थ अधिकारीका विशेषण होनेकी योग्यता नहीं रख सकता । और

तयोपादीयत इति। नैतद्युक्तम्; शमादीनां विचारविधिप्रकरणपठिततया संनिहिततराणामनुच्चारोहायोगात्। न च तेषामत्राऽनुपयोगः; विधिप्रयुक्ताधिकार्यनुबन्धान्तःपातित्वात्। दर्शितश्चाऽन्वयव्यतिरेकाभ्यां तेषां विचारोपयोगः। न च तथा धर्मविचारः संनिहिततरः। भिन्नप्रकरणोपात्तधर्मविषयत्वात्। नाऽप्यसावत्रोपयुज्यत इति पूर्वमेव समर्थितम्। तस्मादस्मदुक्त एवाऽथशब्दार्थ इति सिद्धम्।

अतःशब्दो हेत्वर्थः। नन्वथशब्द एवाऽऽनन्तर्याभिधानमुखेन हेतुतया पूर्ववृत्तमर्थं गमयतीत्युक्तं तेन पुनरुक्तिः। न च वाच्यं हेतुत्वं नाऽथशब्देनाऽभिधीयते किन्त्वर्थात् प्रतीयते। अत्र त्वतःशब्देनाऽभिधीयते तेन न पुन-

---

धर्मका विचार तो 'सूत्रकारकी' बुद्धिमें विद्यमान था उसको अधिकारीके विशेषणके रूपमें ले सकते हैं। परन्तु भास्करका उक्त प्रलाप युक्तिपूर्ण नहीं है, क्योंकि विचारविधिके प्रकरणमें पठित होनेसे अत्यन्त संनिहित शम आदि सूत्रकारकी बुद्धिमें नहीं हैं, ऐसा कहनेका अवसर नहीं आ सकता। यह भी नहीं कहा जा सकता कि उनका प्रकृतमें उपयोग नहीं है; कारण कि विधिके कारण प्राप्त हुए अधिकारीके अनुबन्धके अन्तःपाती ही शमादि हैं, 'शमादिके बिना अधिकारसम्पत्ति ही नहीं मिल सकती और अधिकारीके बिना विधि व्यर्थ होती है, इसलिए अधिकारीकी सम्पत्तिमें शम, दम आदि आ जाते हैं, और अन्वय-व्यतिरेक द्वारा शम, दम आदिका विचारमें उपयोग दिखा आये हैं। इस प्रकार (शमादिके तुल्य) धर्मविचार अत्यन्त सन्निहित है भी नहीं। कारण कि वह भिन्न-प्रकरणमें पठित धर्मको विषय करता है और धर्मका प्रकृतमें—ब्रह्मज्ञानमें—उपयोग नहीं है, इसका समर्थन कर आये हैं। इसलिए अथशब्दका हमारा अभिमत अर्थ मानना ही उचित है, यह सिद्ध हुआ।

अतःशब्द हेतुका वाची है,

शङ्का—'आनन्तर्य अर्थका अभिधान करनेसे अथशब्द ही कारणभूत पूर्ववर्ती पदार्थका बोध करा ही देता है' ऐसा कहा है, इससे पुनः अतःशब्दके प्रयोगसे पुनरुक्ति दोष होगा। अथ शब्दसे हेतुस्वरूपका अभिधान नहीं होता, किन्तु अर्थात् प्रतीत होता है और सूत्रमें अतःशब्दके देनेसे हेतुका अभिधान होता है, इससे पुनरुक्ति नहीं है, यह भी नहीं कह सकते, कारण कि

रुक्तिरिति । अर्थात्प्रतीतस्याऽपि तात्पर्यविषयतयाऽथशब्दार्थत्वाद् 'यत्परः शब्दः स शब्दार्थः' इति न्यायात् । न चाऽथशब्दस्याऽऽनन्तर्यमात्रे विधेये तात्पर्यं सम्भवति, वैयर्थ्यप्रसङ्गात् । तस्मादार्थिकेऽपि हेतुत्वेऽथशब्दस्य तात्पर्ये सत्यथातःशब्दयोः पुनरुक्तिर्दुष्परिहरा । नैष दोषः; अथशब्देन साधनचतुष्टयस्य विचारहेतुत्वे परिगृहीते तस्याऽनिर्वाहाशङ्कायां तन्निराकरणेन हेतुत्वनिर्वाहायाऽतः शब्दोपादानात् । तथाहि-स्वर्गादीनां कृतकत्वपरिच्छिन्नत्वादिहेतुभिरनित्यत्वमनुमाय तस्माद-

---

अर्थात् प्रतीत होनेवाला अर्थ भी तात्पर्यका विषय माना जाता है, इससे (हेतुरूप अर्थ) अथशब्दका अर्थ ही हो गया, क्योंकि न्याय है कि 'जिस अर्थमें जिस शब्दका तात्पर्य होता है, उस शब्दका वही अर्थ माना जाता है। और केवल आनन्तर्यरूप अर्थके विधानमें अथशब्दका तात्पर्य मानना सम्भव भी नहीं, कारण कि ऐसा माननेसे अथशब्दका देना ही व्यर्थ हो जायगा। इसलिए अर्थात् प्रतीयमान भी हेतुरूप अर्थमें अथशब्दका तात्पर्य सिद्ध होनेसे 'अथ' और 'अतः' इन दोनों शब्दोंके प्रयोगसे प्राप्त हुई पुनरुक्ति नहीं हटाई जा सकती।

समाधान—उक्त (पुनरुक्त) दोष नहीं आ सकता, कारण कि अथशब्दसे साधनचतुष्टयमें विचारके प्रति कारणता प्रतीत हुई। अनन्तर शङ्का हो सकती है कि साधनचतुष्टयमें अथशब्द द्वारा प्रतीत हुई कारणताका निर्वाह नहीं हो सकता (अर्थात् साधनचतुष्टय विचारके कारण नहीं हो सकते) इस आशङ्काके निराकरण द्वारा कारणताका निर्वाह करनेके लिए अतःशब्दका ग्रहण किया गया है। (अतःशब्दके साधन प्रयोगचतुष्टयमें कारणताका निर्वाहप्रकार दिखलाते हैं)—स्वर्गादिमें कृतकत्व[1] और परिच्छिन्नत्व[2] रूप हेतुओंके द्वारा (कार्य और परिच्छिन्न होनेसे) अनित्यताका अनुमान करके उस स्वर्गादिरूप अनित्य पदार्थसे नित्य पदार्थका विवेक

---

१ जो उत्पाद्य अर्थात् क्रियाकलापसे साध्य है, वह कृतक-कार्य है। जैसे घट, पट आदि।

२ परिच्छेद—किसी भी वस्तुके साथ देश, काल या परिमाण, संख्या आदि विशेषण लगाकर उसके देश-काल आदि या इयत्ताका परिचय देना परिच्छेद कहाता है। और जिसका उक्त प्रकारोंमें से किसी भी प्रकारसे परिचय दिया जाता है वह परिच्छिन्न कहाता है। जैसे इस

नित्यानित्यं विवेक्तव्यम् । न चाऽयं विवेकः सुलभः, उक्तहेतूनां प्रध्वंस-परमाण्वादावनैकान्तिकत्वात् । नित्यत्वं च कर्मफलस्य श्रूयते—'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इत्यादौ । अतः कथं पुरुषार्थात् कर्मफलात् विरज्याऽपुरुषार्थे ब्रह्मज्ञाने पुरुषाः प्रवर्त्तेरन् । यद्यपि ब्रह्मण्यानन्दोऽस्ति तथापि नाऽसौ जीवेनोपभोक्तुं शक्यः, स्वाश्रयसुखोपलब्धेरेवोपभोगत्वात् । न च ब्रह्मधर्मस्य सुखस्य जीवाश्रयतयोपलब्धिः संभवति, लोकेऽन्यसुख-स्याऽन्याश्रयत्वादर्शनात् ।

अथ सुखापरोक्ष्यमात्रस्योपभोगत्वे व्यभिचाराभावात् स्वाश्रयविशेषणं व्यर्थमिति मन्यसे, एवमपि जीवब्रह्मणोर्भेदे ब्रह्मानन्दापरोक्ष्यमनुपपन्नम्, पुरुषा-

---

(पार्थक्यज्ञान) करना चाहिए । और यह विवेक सुलभ—सुगम—नहीं है । कारण कि उक्त हेतु (कार्यत्व और परिच्छिन्नत्व आदि) प्रध्वंस तथा परमाणु आदिमें व्यभिचरित हैं [न्यायपक्षमें प्रध्वंस कार्य होता हुआ भी नित्य है और परमाणु परिच्छिन्न होता हुआ भी नित्य है] । और कर्म द्वारा प्राप्त फलोंकी नित्यता भी 'चातुर्मास्य याग करनेवालेको अक्षय पुण्य होता है' इत्याद्यर्थक श्रुतिमें सुनी जाती है । इसलिए पुरुषार्थभूत स्वर्गादिस्वरूप कर्मोंके फलोंसे विरक्त होकर पुरुषार्थसे बहिष्कृत ब्रह्मज्ञानमें पुरुष कैसे प्रवृत्त हो सकेंगे ? यद्यपि ब्रह्ममें आनन्द है, परन्तु जीव उसका (ब्रह्मानन्दका) भोग नहीं कर सकता, कारण कि अपनेमें सुखकी उपलब्धि होना ही उपभोगपदार्थ है । और ब्रह्ममें विद्यमान सुखरूप धर्मकी जीवाश्रित होकर उपलब्धि नहीं हो सकती है अर्थात् जीव ब्रह्मके सुखका अपनेमें अनुभव नहीं कर सकता है, कारण कि लोकमें दूसरेका सुख दूसरेमें नहीं देखा जाता ।

यदि सुखके आपरोक्ष्य—साक्षात्कार—को ही उपभोग माननेमें व्यभिचार न होनेसे स्वाश्रय (अपनेमें) विशेषण देना व्यर्थ मानते हो, तो भी जीव और ब्रह्ममें भेद होनेसे ब्रह्मानन्दका साक्षात्कार नहीं हो सकता, कारण कि दूसरे पुरुषके सुखका साक्षात्कार दूसरेको होते नहीं

देशमें विद्यमान दस सेर वजनी एक घड़ा इत्यादि । (स्वर्गादि एकदेशविशेष माने जाते हैं, इसलिए उनमें देशपरिच्छेद है और 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इस प्रकार अभियुक्त वचनोंके तथा 'तद्यथेह कर्मचितः' इत्यादि श्रुतिके बलसे पुण्यतारतम्यके अनुसार उनमें कालपरिमाणादिपरिच्छेद भी विद्यमान है और 'स्वर्गकामो यजेत' इत्यादि वचनोंसे वह कार्य भी है) ।

न्तरानन्दस्याऽऽपरोक्ष्यादर्शनात् । जीवब्रह्मणोरभेदस्त्वनुभवविरुद्धः, अतो मोक्षान्निरानन्दाद्विरज्याऽल्पदुःखमिश्रितेऽपि विषयानन्दे पुरुषः प्रवर्त्तते, 'नह्यजीर्णभयादाहारपरित्यागः, किन्तु प्रतिविधातव्यम्' इति न्यायादित्यथशब्दपरिगृहीतोऽर्थो न निर्वहतीत्याशङ्क्येत; सेयमाशङ्का न कर्त्तव्या, यस्माद्वेद एव ब्रह्मव्यतिरिक्तपुरुषार्थजातस्याऽनित्यतां दर्शयति—'तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' इत्यादिः । न चेयं सामान्यश्रुतिश्चातुर्मास्यादिविशेषश्रुतिविषयादन्यत्रैव व्यवतिष्ठतामिति वाच्यम्, तत्र तावच्चातुर्मास्यश्रुतिः सुकृतस्यैवाऽक्षय्यत्वं ब्रूते न तत्फलस्य । न च सुकृताक्षय्यकथनमुखेन तत्फलाक्षय्यत्वे वाक्यतात्पर्यमिति कल्पयितुं

देखा जाता । और भी जीव तथा ब्रह्मका अभेद तो अनुभवसे विरुद्ध है, इसलिए आनन्द—सुख—शून्य मोक्षसे विरक्त होकर पुरुष थोड़ेसे दुःखसे मिश्रित विषयानन्दमें भी प्रवृत्त होता है । [अल्प दुःखके सम्बन्धसे विषयानन्दसे भी विरक्ति हो जानेकी आशङ्काके निवारणके लिए लोकन्याय दिखलाते हैं—] 'अजीर्ण रोगके भयसे भोजन करना नहीं छोड़ा जाता, किन्तु रोगसे बचे रहनेके उपाय किये जाते हैं' इस न्यायसे अथशब्द द्वारा प्रतीत हुए (साधनचतुष्टयमें विचारहेतुतारूप) अर्थका निर्वाह (शङ्का रहित समर्थन) नहीं हो सकता, ऐसी आशङ्का हो सकती है, पर वह नहीं करनी चाहिए, क्योंकि भगवान् वेद ही ब्रह्मसे अतिरिक्त सकल पुरुषार्थकी अनित्यता दिखला रहे हैं—'जैसे इस लोकमें कर्मोंके द्वारा उपार्जित लोक (ग्रामादि धनसम्पत्ति) क्षीण हो जाते हैं वैसे ही परलोकमें पुण्योंके द्वारा प्राप्त किये स्वर्गादि लोक नष्ट हो जाते हैं, इत्यादि । ऐसी व्यवस्था भी नहीं की जा सकती कि उक्त (अनित्यताप्रदर्शक) सामान्य श्रुति चातुर्मास्यादिविषयक विशेष श्रुतिके विषयकी अपेक्षा दूसरे कर्मों द्वारा प्राप्त फलोंकी अनित्यता दिखलाती है (सामान्यतः कर्मफलमात्रकी नहीं), कारण कि वह चातुर्मास्यविषयक विशेष श्रुति सुकृत–पुण्य–को ही अक्षय—नित्य—कहती है, उसके फलको नहीं । सुकृत—पुण्य—के नित्य कथनके द्वारा उसके फलको नित्य कहनेमें तात्पर्य माननेकी कल्पना भी नहीं की जा सकती, कारण कि इस कल्पनामें प्रमाणसे

शक्यम्, प्रमाणविरोधात्। परिच्छिन्नत्वादिहेतुभिः फलानित्यत्वानुमानात्। न च तेषामनैकान्तिकत्वम्, परमाण्वादावपि नित्यत्वासंप्रतिपत्तेः। न चाऽक्षये सुकृते सति तत्फलस्य क्षयानुपपत्तिः, अनुपभोगवदुपपत्तेः। सत्येव हि सुकृते क्वचित् फलं नोपभुज्यते, 'कदाचित् सुकृतं कर्म कूटस्थमिव तिष्ठति' इति स्मृतेः। तथा फलस्य क्षयोऽपि किं न स्यात्? नापि 'हिरण्यदा अमृतत्वं भजन्ते' इत्यादिश्रुत्यन्तरेषु फलनित्यत्वं सुसंपादम्। अत्राऽप्यनुमानानुगृहीतया सामान्यश्रुत्या विरोधस्य तादवस्थ्यात्। तस्मान्नित्यानित्यवस्तुविवेकपूर्वमनित्येभ्यो ब्रह्मव्यतिरिक्तपुरुषार्थेभ्यो वैराग्यमुपपन्नम्।

न च ब्रह्मज्ञानं न पुरुषार्थः; आनन्दसाक्षात्कारत्वात्। जीवब्रह्मणोरभेदस्य प्रथमवर्णके प्रतिबिम्बदृष्टान्तेन साधितत्वात् संभवत्येव

विरोध आता है। [अनुमानरूप प्रमाणसे विरोध दिखलाते हैं—] परिच्छिन्नत्व आदि 'पूर्वोक्त' हेतुओंसे फलमात्रकी अनित्यताका अनुमान किया गया है। यह कहना भी नहीं बनता कि उन हेतुओंमें व्यभिचार आता है, कारण कि परमाणु आदिमें (न्यायमतसिद्ध) नित्यता सर्ववादिसम्मत नहीं है। सुकृत—पुण्य—के अक्षय रहते उसके फलका क्षय होना उपपत्तिशून्य भी नहीं है, कारण कि अनुपभोगके समान क्षय हो सकता है। [जैसे पुण्य रहते भी उसका उपभोग नहीं होता अर्थात् उपभोगका विनाश हो जाता है, वैसे ही सुकृत रहते भी उसके फलका विनाश होनेमें कोई अनुपपत्ति नहीं आ सकती। [सुकृत रहते भी उपभोगके विनाशका शास्त्र द्वारा समर्थन करते हैं]—स्मृति कहती है कि कर्म कूटस्थ—विकारशून्य नित्य—की भाँति (उदासीन) स्थित रहता है—अर्थात् उपभोगात्मक विकारको प्राप्त नहीं होता ऐसे (उपभोगाभावके तुल्य) फलका विनाश भी क्यों न हो जाय? 'हिरण्य—सुवर्ण—देनेवाले अमर (विनाशरहित फलको प्राप्त) हो जाते हैं' इत्यर्थक दूसरी श्रुतियोंमें फलके नित्यत्वका समर्थन करना भी सरल नहीं है, कारण कि इन श्रुतियोंमें भी अनुमान द्वारा अनुगृहीत सामान्यश्रुतिसे विरोध, ज्यों-का-त्यों बना है, इसलिए नित्याऽनित्य-वस्तु-विवेकपूर्वक ब्रह्मसे अतिरिक्त अनित्यभूत पुरुषार्थोंसे विरक्ति होना युक्तियुक्त है।

ब्रह्मज्ञानमें पुरुषार्थत्वका अभाव भी नहीं मान सकते, कारण कि ब्रह्मज्ञान आनन्दका साक्षात्काररूप है। प्रथम वर्णकमें जीव और ब्रह्मके अभेदका प्रतिबिम्ब-दृष्टान्तसे समर्थन कर चुके हैं, अतः उसका साक्षात्कार होना सम्भव ही

तत्साक्षात्कारः। न च नित्ये जीवस्वरूपभूते ब्रह्मानन्दे विवदितव्यम्, जीवे परप्रेमास्पदत्वस्य कदाचिदप्यनपायात्। सुखसाधनानां तदभिव्यक्तिमात्रोपक्षयात्। अन्यथा साधनानां सुखं प्रति जनकत्वमभिव्यञ्जकत्वं चेति गौरवात्। एवं च सकलविषयसुखानां ब्रह्मानन्दलेशतया परमानन्दरूपे ब्रह्मणि दुःखसागरात् संसारे उद्विग्नाः प्रवर्त्तन्ते। तदेवमुक्तशङ्कानिराकरणेनाऽथशब्दार्थनिर्वाहायाऽतःशब्द इत्यनवद्यम्।

ब्रह्मजिज्ञासेति पदेन 'ब्रह्मणो जिज्ञासा' इति षष्ठीसमासोऽवगन्तव्यो न तु धर्माय जिज्ञासा धर्मजिज्ञासेतिवच्चतुर्थीसमासः। तत्र ह्यन्तर्णीतविचारार्थप्राधान्यमाश्रित्य प्रयोजनविवक्षया धर्मायेति चतुर्थीसमास आश्रितः। नहि विचारस्य यत्प्रयोजनं तदेव कर्म, येन धर्मस्येति कर्मणि षष्ठी

है। [इससे पुरुषान्तरके सुखका साक्षात्कार पुरुषान्तर द्वारा न हो सकनेकी आशङ्काका खण्डन हो गया] और नित्य जीव-स्वरूपभूत ब्रह्मानन्दमें विवाद नहीं करना चाहिए, क्योंकि जीवका परम प्रेमास्पदत्व कभी भी विनष्ट नहीं होता। सुखके उपायभूत ऐहिक या पारलौकिक विषय तो सुखकी अभिव्यक्तिमात्र करा देनेमें उपरत होते हैं। [अर्थात् साधनोंकी नित्यता या अनित्यता सुखकी नित्यता या अनित्यतासे सम्बन्ध नहीं रखती, उनका तो सुखकी अभिव्यक्तिमात्रसे उपक्षय होता है।] यदि सुखाभिव्यक्तिके अनन्तर साधनभूत विषय बने रहें, तो साधनोंका सुखके प्रति जनकत्व और अभिव्यञ्जकत्व दोनोंका प्रसङ्गरूप गौरव होगा। इस निर्णयके अनुसार सम्पूर्ण विषयसुख ब्रह्मानन्दके ही लेश हैं, अतः संसारमें दुःखरूपी समुद्रसे घबड़ाये हुए पुरुष परमानन्दरूप ब्रह्ममें प्रवृत्त होते हैं। इस प्रकार उक्त शङ्काका निराकरण करनेसे अथशब्दसे प्राप्त (साधनचतुष्टयकी विचारहेतुतारूप) अर्थका निर्वाह करनेके लिए अतःशब्द दिया गया है। इससे कोई दोष नहीं आता।

अब ब्रह्मजिज्ञासा इस समस्त पदका व्याख्यान करते हैं—'ब्रह्मजिज्ञासा' पदमें ब्रह्मकी जिज्ञासा, ऐसा षष्ठीसमास करना चाहिए। धर्मके लिए जिज्ञासा इस प्रकार धर्मजिज्ञासापदमें जैसा चतुर्थी समास है, वैसा यहां नहीं है। धर्मजिज्ञासापदमें तो अन्तर्भूत विचाररूप अर्थका प्राधान्य लेकर प्रयोजनकी विवक्षासे धर्मके लिए ऐसा चतुर्थी समासका आश्रयण किया गया है, कारण कि जो विचारका प्रयोजन है, वही कर्म नहीं हो सकता, जिससे 'धर्मका'

प्राप्नुयात्। अत्र तु शब्दोपात्तं ज्ञानेच्छाप्राधान्यमाश्रीयते, इच्छायाश्च यदेव कर्म तदेव प्रयोजनम्, तेन कर्मणि षष्ठी तादर्थ्ये चतुर्थी च प्राप्ता। तत्र स्वरूपसिद्धहेतुतया प्राधान्यात् कर्मणि षष्ठीमेवाऽऽश्रित्य समासो दर्शितः।

अत्र वृत्तिकाराः—ब्रह्मशब्देन जातिजीवकमलासनशब्दराशीनामभिधेयतामाशङ्क्येत्थं निराकुर्वन्ति। न खलु जात्यादीनामत्र कर्त्तव्यतया कर्तृतया वाऽन्वयः संभवति। न तावद् ब्राह्मणजातेः कर्मत्वम्, प्रत्यक्षसिद्धतया जिज्ञास्यत्वायोगात्। नाऽपि कर्तृत्वम्, जिज्ञासायास्त्रैवर्णिकाधिकारत्वात्। नाऽपि जीवो जिज्ञास्यः, अहंप्रत्ययसिद्धत्वात्। यद्यपि तस्य कर्तृत्वमस्ति तथापि तदुपादानं व्यर्थम्, अन्यस्य कर्तृत्वप्रसङ्गाभावात्। न च शब्दराशेर्वेदस्याऽचेतनस्य कर्तृत्वं संभवति, नाऽपि तस्य कर्मत्वम्, धर्मजिज्ञासौत्पत्तिकसूत्राभ्यां तस्याऽर्थवत्त्वप्रमाणत्वयोर्निरूपितत्वात्। हिरण्य-

---

इस प्रकार कर्ममें षष्ठी प्राप्त हो सके। और धर्मजिज्ञासापदमें तो शब्दसे कही गई ज्ञानकी इच्छाके प्राधान्यका आश्रयण किया जाता है। और इच्छाका जो कर्म है, वही विचारका प्रयोजन भी है, इसलिए कर्म होनेसे कर्ममें षष्ठी और प्रयोजन होनेसे तादर्थ्यमें चतुर्थी प्राप्त हुई। उनमें स्वरूपसिद्धिका कारण होनेसे प्राधनतया कर्ममें षष्ठीका ही आश्रयण करके समास दिखाया गया है।

इस सूत्रमें ब्रह्मपदसे ब्राह्मणजाति, जीव, कमलासन, चतुर्मुख, ब्रह्मा, या शब्दराशिस्वरूप वेदके बोधकी आशङ्का करके वृत्तिकारने समाधान किया है कि इस शास्त्रमें जाति आदिका कर्तव्य कर्म या कर्तृरूपसे अन्वय होना सम्भव नहीं है, कारण कि ब्राह्मणजातिका कर्म होना सम्भव नहीं, क्योंकि वह तो प्रत्यक्ष सिद्ध है;' इसलिए जिज्ञास्य (कर्म) नहीं हो सकती और न ब्राह्मणजातिका कर्ता होना ही सम्भव है, क्योंकि जिज्ञासामें तीनों वर्णोंका अधिकार है। जीव भी जिज्ञासाका कर्म नहीं है, क्योंकि जीव भी अहंप्रतीतिसे सिद्ध ही है। यद्यपि जीवमें कर्तृत्वका सम्भव है, तथापि उसका उपादान व्यर्थ है, कारण कि दूसरेके कर्तृत्वका प्रसङ्ग नहीं है। और शब्दसमूहात्मक वेद अचेतन होनेसे, कर्ता नहीं हो सकता है और उसके (वेदके) कर्मत्वका भी सम्भव नहीं है, कारण कि धर्मजिज्ञासा और औत्पत्तिक सूत्रोंसे वेदके अर्थवत्त्व और प्रमाणत्व-

गर्भस्याऽपि न जिज्ञास्यत्वं तत्पदादपि विरक्तस्य जिज्ञासोपदेशात्। न च तस्य कर्तृत्वम् , ज्ञानवैराग्ययोः सहसिद्धत्वादिति। सोऽयं वृत्तिकारप्रयासो व्यर्थः, 'जन्माद्यस्य यतः' इति वक्ष्यमाणलक्षणस्य ब्रह्मणो जात्यादि-शङ्काया अनुदयात्।

नन्वेवमपि ब्रह्मण इति नेयं कर्मणि षष्ठी भवितुमर्हति, तथात्वे ब्रह्मस्वरूपमात्रस्य विचार्यत्वेन प्रतिज्ञासिद्धावप्यन्यस्य तदसिद्धेः। यदा तु सम्बन्धसामान्ये षष्ठी परिगृह्यते तदा ब्रह्मसंबन्धिनां स्वरूपप्रमाणयुक्ति-साधनफलानां सर्वेषां विचारप्रतिज्ञा सिध्यति।

अथ मतम्—कर्मणि षष्ठ्यां सत्यां जिज्ञासापेक्षितं जिज्ञास्यं निर्दिष्टं भवति नाऽन्यथा, न च तदन्तरेण जिज्ञासा सुनिरूपेति, तन्न; संबन्धसामान्य-

---

का निरूपण किया गया है। हिरण्यगर्भ भी जिज्ञास्य नहीं हो सकता, हिरण्यगर्भ-पदसे भी विरक्त हुए ब्रह्माके लिए जिज्ञासाका उपदेश है [अर्थात् हिरण्यगर्भको भी ब्रह्मविचार करनेका अधिकार है। ऐसी अवस्थामें वह स्वयं कैसे जिज्ञासाका कर्म होगा ?] उसका कर्ता होना भी सम्भव नहीं है, क्योंकि ज्ञान और वैराग्य उसको हिरण्य-गर्भपदप्राप्तिके साथ-साथ ही प्राप्त हो जाते हैं। [इसलिए 'ब्राह्मणजाति आदि ब्रह्मपदसे नहीं लिये जा सकते' इस वृत्तिकारके मतका खण्डन करते हैं—] इस प्रकारका वृत्तिकारका प्रयास व्यर्थ ही है, कारण कि 'जन्माद्यस्य यतः'—(जिससे इस प्रपञ्चजातका प्रादुर्भाव हुआ है) इस प्रकार वक्ष्यमाण लक्षणवाले ब्रह्मके जात्यादि होनेकी शङ्काका उदय ही नहीं हो सकता।

शङ्का—ऐसा माननेपर भी 'ब्रह्मणः' यह कर्ममें षष्ठी नहीं हो सकती, कारण कि कर्ममें षष्ठी माननेसे ब्रह्मस्वरूपमात्रके विचारविषय होनेकी प्रतिज्ञा तो सिद्ध हो भी सकती है, परन्तु दूसरेके विचारविषय होनेकी प्रतिज्ञाकी सिद्धि नहीं हो सकती। और जब कि सम्बन्धसामान्यमें षष्ठी मानते हैं, तब ब्रह्मके सम्बन्धी—स्वरूप, प्रमाण, युक्ति (कर्म), साधन (उपाय), फल (परमानन्द) सबके ही विचार करनेकी प्रतिज्ञा सिद्ध होती है।

यदि कहो कि कर्ममें षष्ठी माननेमें जिज्ञासासे अपेक्षित जिज्ञास्यका (कर्मका) निर्देश हो जाता है। अन्यथा (सम्बन्धसामान्यमें षष्ठी माननेसे) नहीं होता। कारण कि कर्मका निर्देश किये बिना जिज्ञासाका निरूपण नहीं किया जा सकता।

षष्ठीपक्षेऽपि ब्रह्मणः कर्मत्वलाभात् । नहि सामान्यं विशेषपर्यवसानमन्तरेण व्यवहारमालम्बते । तत्र कोऽसौ विशेष इति वीक्षायां सकर्मिकायां जिज्ञासाक्रियायां कर्मकारकस्याऽभ्यर्हिततया कर्मत्वं पर्यवस्यति । तस्मात्सर्वसंग्रहाय संबन्धसामान्ये षष्ठी ग्राह्या न कर्मणीति चेद्, नाऽयं दोषः; कर्मणि षष्ठ्या प्रधाने जिज्ञासाकर्मभूते ब्रह्मणि निर्दिष्टे तदपेक्षितानां प्रमाणादीनामर्थसिद्धतया पृथगवक्तव्यत्वात् । नहि राजा गच्छतीत्युक्ते तदपेक्षितपरिवारस्य गमनं पृथग्वक्तव्यं भवति । एवं चाऽस्मत्पक्षे मुखतः प्रधानविचारः प्रतिज्ञायतेऽर्थतोऽन्यः । त्वत्पक्षे तु वैपरीत्येन । ततोऽ-

---

तो यह भी उचित नहीं है, सम्बन्धसामान्यपक्षमें भी ब्रह्ममें (ब्रह्मस्वरूपमें) कर्मत्व हो सकता है, कारण कि विशेषमें तात्पर्यबोधन किये बिना सामान्यसे व्यवहार ही नहीं हो सकता। उसमें वह विशेष कौन है ? यह विचार करनेपर सकर्मक जिज्ञासा-क्रियामें कर्मकारकके अभ्यर्हित होनेसे कर्मत्वमें तात्पर्य माना जाता है । [ब्रह्मणः इस पदमें सम्बन्धसामान्यार्थक षष्ठी माननेमें भी सकर्मक जिज्ञासापदको कर्मकी अपेक्षा होनेके कारण सम्बन्धसामान्यार्थक षष्ठीमें भी व्यवहार प्राप्त करनेके लिए सर्वप्रथम कर्मकारकरूप सम्बन्ध ही उपस्थित होगा । अभियुक्तोंका वचन है 'निर्विशेषं न सामान्यम्' ।] इसलिए सबका ही संग्रह करनेके लिए सम्बन्धमें षष्ठी माननी चाहिए, कर्ममें नहीं ।

समाधान—यह दोष (अन्यका असंग्रहरूप) नहीं आता, कर्ममें षष्ठी माननेसे जिज्ञासाके कर्मभूत प्रधान ब्रह्मका निर्देश हो जानेसे उससे अपेक्षित प्रमाणादिका निर्देश भी अर्थात् हो जायगा, अतः पृथक् कहनेकी आवश्यकता नहीं है । 'राजा जाता है' कहनेसे उसके अपेक्षित अङ्गरक्षक आदि परिवारका गमन पृथक् नहीं कहा जाता । इस प्रकार हमारे मतमें साक्षात् शब्द द्वारा प्रधानभूत ब्रह्मविचारकी प्रतिज्ञा की जाती है । और प्रमाणादि अन्यकी प्रतिज्ञा अर्थात् हो जाती है । तुम्हारे पक्षमें तो इसके विपरीत प्रकारसे होती है 'अर्थात् शब्द द्वारा सम्बन्धसामान्यका बोध करानेसे प्रमाणादि विचारकी प्रतिज्ञा शब्दतः सिद्ध हुई और [निर्विशेषं न सामान्यम्' न्याय द्वारा और सकर्मक धातु द्वारा अपेक्षित होनेसे कर्मभूतब्रह्मविचारकी प्रतिज्ञा अर्थात् सिद्ध होती है' इससे हमारा पक्ष ही उत्तम है । 'प्रधानका ही शब्दतः परामर्श करना उचित है ।] और भी हेतु है (कर्ममें ही षष्ठी

स्मत्पक्ष एव श्रेयान्। किं च साधिकारस्य विचारविधेः प्रतिपादके 'तद्विजिज्ञासस्व' इति श्रुतिवाक्ये ब्रह्मणः कर्मकारकत्वनिर्देशात् सूत्रस्य च तदेकार्थतया सूत्रेऽपि ब्रह्मणः कर्मत्वमेव ग्राह्यम्, जिज्ञासापदेन ज्ञातुमिच्छा जिज्ञासेत्यवयवार्थ उपादेयः। तथा चेच्छायाः फलविषयत्वान्निश्चलापरोक्षावगतिफलपर्यन्तता सूत्रिता भवति। न च वाच्यं ब्रह्मण्यवगतेऽनवगते वा न ज्ञानेच्छा प्रसज्यत इति, परोक्षत्वेनाऽप्रतिष्ठितापरोक्षत्वेन वाऽवगते निश्चलापरोक्षावगतये तदिच्छोपपत्तेः।

ननु ज्ञानं नाम प्रमाणफलं संवेदनमिति सुगतप्राभाकरवैशेषिकनैयायिकाः। संविज्जनकप्रमातृव्यापार इति वार्त्तिककारीयाः। आत्मचैतन्यमेवेति क्षपणकलौकायतिकाः। ज्ञायतेऽनेनेति करणव्युत्पत्त्या बुद्धिवृत्तिर्ज्ञानम्,

---

माननी चाहिए) कि अधिकारविशिष्ट विचारविधिके प्रतिपादक 'उसके विज्ञानकी इच्छा करनी चाहिए' इत्याद्यर्थक श्रुतिवाक्यमें ब्रह्मका कर्मकारकरूपसे निर्देश किया गया है, इसलिए 'ब्रह्मजिज्ञासा' सूत्रका भी उक्त श्रुतिवाक्यके ही समान अर्थ होनेसे ब्रह्मको कर्मकारक ही मानना उचित है। और जिज्ञासापदसे 'जाननेकी इच्छा' ऐसा यौगिक अर्थ लेना चाहिए। इस प्रकार इच्छाके फलविषयिणी होनेसे स्थिर साक्षात्काररूप फलपर्यन्त इच्छाका सूत्रमें उपन्यास हो जाता है। ऐसी शङ्का करना भी ठीक नहीं है कि ब्रह्मके ज्ञात होनेपर या न होनेपर भी ब्रह्मज्ञानकी इच्छाका प्रसङ्ग नहीं आ सकता। (ज्ञात होनेपर इच्छा करना व्यर्थ होता है और अज्ञातकी इच्छा हो नहीं सकती) कारण कि 'ब्रह्म है' ऐसा शब्द द्वारा परोक्षज्ञान अथवा अस्थिर प्रत्यक्ष ज्ञान होनेपर भी स्थिर प्रत्यक्ष ज्ञान (साक्षात्कार) होनेके लिए ब्रह्मज्ञानकी उपपत्ति हो सकती है।

शङ्का—सुगत—बौद्धोंके एकदेशी—, प्रभाकरमतानुयायी मीमांसक, वैशेषिक—कणादमत माननेवाले--तथा गौतमानुयायी नैयायिक प्रमाणके—इन्द्रियादिके फलभूत संवेदनको—ज्ञान कहते हैं। और वार्तिककारका मत है कि संवित्—ज्ञान—जनक प्रमाताका व्यापार ज्ञान कहलाता है। आत्मचैतन्य ही ज्ञान है ऐसा क्षणिक—विज्ञानवादी बौद्ध और चार्वाक आदि कहते हैं। 'जिसके द्वारा जाना जाय' इस करणव्युत्पत्तिसे ज्ञानपद बुद्धिकी वृत्तिको कहता है तथा

भावव्युत्पत्त्या तु संवेदनमेवेति सांख्यवेदान्तिनः। तत्र कीदृशं ज्ञानमिष्यत इति चेद्, उच्यते—

न तावत्सुगतादिचतुष्टयस्य लोकायतस्य च पक्ष उपपन्नः, तैर्जन्यस्याऽपि फलभूतसंवेदनस्य कर्तृव्यापारपूर्वकत्वानभ्युपगमात्; विमतं कर्तृव्यापारपूर्वकम्, फलत्वाद्, ग्रामप्राप्तिवदित्यनुमानविरोधात्। एतेन क्षपणकपक्षोऽप्यपास्तः। यद्यपि तत्पक्षे संवेदनं स्वरूपेणाऽजन्यं तथापि विषयावभासित्वोपाधिना तज्जन्माभ्युपेयम्। अन्यथा सर्वदा सर्वविषयावभासप्रसङ्गात्। ननु सर्वगतस्य निरवयवस्याऽऽत्मनो न परिस्पन्दपरिणामौ व्यापारौ युक्तौ। सत्यम्, अत एव वार्तिककारीयं मतमुपेक्षणीयम्। अस्मन्मते त्वध्यासपरिनिष्पन्नान्तःकरणसम्पिण्डितस्याऽऽत्मनो ज्ञानाकारपरिणामो

जाना जाना' इस भावव्युत्पत्तिसे तो संवेदन ही ज्ञान है, ऐसा सांख्य तथा वेदान्तका मत है, इनमें से कैसा ज्ञान इष्ट है ?

समाधान—उक्त विप्रतिपत्तियोंमें प्रथम सुगत आदि चारोंका तथा लौकायतिकका—नास्तिकका—मत युक्तिसङ्गत नहीं है, कारण कि उन वादियोंने उत्पन्न होनेवाले फलभूत (जन्य) ज्ञानको भी कर्तृव्यापार-पूर्वक नहीं माना है; इससे 'विमत याने जन्य कर्ताके व्यापारपूर्वक होता है, फलस्वरूप होनेसे, ग्रामकी प्राप्तिके तुल्य' इस अनुमानसे विरोध होगा। [जैसे किसी गांवमें पहुँचनेके पूर्व जानेवालेका व्यापार अवश्य रहता है, वैसे जन्य घट, पट आदिके ज्ञानमें भी प्रमाताका व्यापार ज्ञान होनेसे पूर्वतक अवश्य रहता है]। इस अनुमानविरोधसे विज्ञानवादीके मतका भी खण्डन हो गया। यद्यपि उसके मतमें ज्ञान स्वरूपतः जन्य नहीं है, तथापि विषयावभासकत्वरूप उपाधिसे तो उसका जन्म मानना ही होगा, [घट, पट आदि विषयका बोध कराना तो उसका जन्मरूप ही है, उस घट, पट आदि आकारवाले जन्य ज्ञानमें विरोध स्पष्ट ही है]। यदि इसको भी जन्य न मानें, तो सदा ही सम्पूर्ण विषयोंके ज्ञानका प्रसङ्ग आ जायगा।

शङ्का—सर्वत्र व्याप्त और अवयवशून्य आत्मामें परिस्पन्द (क्रिया) और परिणाम होना युक्तिविरुद्ध है।

समाधान—ठीक है, इसी कारण तो वार्तिककारका मत उपेक्षणीय है। हमारे मतमें तो अध्यास द्वारा सिद्ध हुए अन्तःकरणके

युज्यते। न च तादृगात्मनः संवेदनाकारेणैव परिणामोऽस्त्विति वाच्यम्, संवेदनस्य स्वरूपतो नित्यसिद्धत्वात्। न चैवं संवेदनस्याऽजन्यस्य फलत्वासंभवः, विषयोपाधिकस्य तस्य जन्माङ्गीकारात्। यद्यप्यन्तः-करणपरिणामाः सर्वेऽपि साक्षिवेद्यत्वादपरोक्षास्तथापि विषयेण सहाऽपरोक्ष-हेतुरन्तःकरणपरिणामोऽपरोक्षज्ञानमितरत्परोक्षमिति तद्विवेकः। तत्रैता-दृशमन्तःकरणपरिणामरूपमपरोक्षज्ञानं सूत्रेऽस्मिन्निष्यमाणतया निर्दिष्टम्।

नन्वेतत्प्रथमसूत्रं यदि शास्त्रेऽन्तर्भूतं तदानीमस्य स्वेनैवाऽऽरम्भसिद्धा-वात्माश्रयतापत्तिः। अन्येन चेदनवस्था। अथाऽनन्तर्भूतं तर्ह्यस्याऽनारम्भ-प्रसङ्ग इति चेद्, नैष दोषः; स्वाध्यायाध्ययनादापातप्रतिपन्नः श्रवणविधि-रेव स्वापेक्षितानुबन्धत्रयविचाराय प्रथमसूत्रमारम्भयति। तथा च वक्ष्य-

---

सम्पर्कको पाकर आत्माका ज्ञानरूपसे परिणाम होना युक्ति-सङ्गत है। यदि कहो कि वैसे ही अन्तःकरणके सम्पर्कको प्राप्त हुए आत्माका संवेदनके रूपमें ही परिणाम मान लिया जाय, तो ऐसा नहीं कह सकते, कारण कि संवेदन स्वरूपतः नित्यसिद्ध है। यदि कहो कि उत्पन्न न होनेवाला 'स्वतः सिद्ध' संवेदन फल नहीं हो सकता है, तो ऐसा भी नहीं कह सकते, कारण कि विषयरूप उपाधिसे युक्त संवेदनका जन्म माना गया है। यद्यपि सम्पूर्ण अन्तःकरणके परिणाम साक्षिवेद्य होनेसे प्रत्यक्ष ही हैं; तथापि विषयके साथ साक्षात्कारका कारणभूत अन्तःकरणपरिणाम ही प्रत्यक्ष कहलाता है और उससे भिन्न परोक्ष कहलाते हैं, इस प्रकार परोक्ष और अपरोक्षका विवेकग्रह होता है। इनमें उक्त प्रकारका (ब्रह्मरूप विषयके साथ साक्षात्कारका जनक) अन्तःकरणपरिणामरूप अपरोक्ष ज्ञान (साक्षात्कारात्मक अनुभव) इस सूत्रमें अभीष्ट माना गया है।

शङ्का—यदि यह प्रथम सूत्र शास्त्रके अन्तर्गत माना जाय, तो उसका अपने ही द्वारा आरम्भ माननेमें आत्माश्रय दोषकी आपत्ति होती है। और यदि दूसरेसे आरम्भ मानें, तो अनवस्था होती है। यदि शास्त्रके अन्तर्गत न माना जाय, तो इस सूत्रका आरम्भ करनेका प्रसङ्ग ही नहीं आ सकता है।

समाधान—यह दोष नहीं आता, कारण कि स्वाध्यायके अध्ययनसे आपततः ज्ञात हुई श्रवणविधि ही अपने लिए अपेक्षित (विषय, सम्बन्ध,

माणकृत्स्नशास्त्रप्रयोजकविधिनैव प्रयोज्यत्वादस्य शास्त्रान्तर्भावः । अपौरुषेयविधिप्रयुक्तत्वान्नाऽनवस्था । श्रवणविधिर्यदि स्वनिर्णयाय प्रथमसूत्रमेवारम्भयेत् तर्ह्युत्तरसूत्रसन्दर्भस्याऽऽरम्भकं किं स्यादिति न शङ्कनीयम्, प्रथमसूत्रनिर्णीतेन तेनैव विधिना तदारम्भोपपत्तेः । अत एव तद्विधिनिर्णयस्य सूत्रस्य शास्त्रादित्वं समन्वयाद्यध्यायसङ्गतिश्चाऽस्य सुलभा, श्रोतव्यादिवाक्यानां स्वार्थे समन्वयद्वारेण विचार्यमाणवेदान्तवाक्यानामपि ब्रह्मणि समन्वयनिमित्तत्वात् । अत्र च सूत्रेऽनुवादपरिहाराय कर्तव्यपदमध्याहृत्येष्यमाणज्ञानस्य फलभूतस्य स्वत एव सम्पाद्यतयाऽवगतस्य विधेयत्वायोगात् । तदुपायमन्तर्णीतविचारमुपलक्ष्य ब्रह्मज्ञानं प्रत्यदृष्टस्याऽपि साधनत्वाद्विधिमुपपाद्येष्टसाधनताविधिपक्षं स्वीकृत्य मुमुक्षुणा ब्रह्मानुभवाय विचारः कर्त्तव्य इति श्रौतो वाक्यार्थः

प्रयोजन या फल रूप) तीन अनुबन्धोंके विचारके लिए प्रथम सूत्रका आरम्भ कराती है, इससे आगे वर्णित सम्पूर्ण शास्त्रकी प्रयोजक श्रवणविधिसे ही इसकी प्रयुक्ति होती है, अतः यह शास्त्रके अन्तर्गत आ जाता है। और अपौरुषेय विधिसे प्रयुक्त होनेके कारण अनवस्था दोष भी नहीं आ सकता। श्रवणविधान अपना निर्णय करानेके लिए यदि प्रथम सूत्रके प्रारम्भकी ही प्रयुक्ति करा सकें, तो उत्तर सूत्रके सन्दर्भका आरम्भ करानेवाला कौन होगा? ऐसी शङ्का भी नहीं करनी चाहिए, कारण कि प्रथम सूत्रसे निर्णीत श्रवणविधिसे ही उसका आरम्भ हो सकेगा। अतएव उस विधिके निर्णायक सूत्रमें वेदान्तशास्त्रकी आदिता और समन्वयादि अध्यायोंकी सङ्गति भी सुलभ है; कारण कि यह सूत्र 'श्रोतव्यः' इत्यादि वाक्योंके स्वार्थमें (विचारविधिमें) समन्वय-सङ्गतिके द्वारा विचारके विषय वेदान्तवाक्योंका भी ब्रह्ममें समन्वय करनेमें निमित्त होता है। और इस प्रथम सूत्रमें अनुवाद दोषका परिहार करनेके लिए कर्तव्यपदका अध्याहार कर फलस्वरूप अपने-आप सम्पादनयोग्यत्वरूपसे अवगत इष्यमाण ज्ञान विधेय नहीं हो सकता, उस ज्ञानके उपायभूत अन्तर्भावित विचारको उपलक्ष्य कर ब्रह्मज्ञानके प्रति अदृष्टके भी कारण होनेसे विधिका उपपादन कर इष्टसाधनतारूप विधिपक्षको स्वीकार करते हुए मुमुक्षु अधिकारीका ब्रह्मसाक्षात्कारके लिए (वेदान्तवाक्योंका) विचार करना चाहिए, इस प्रकार 'श्रोतव्यः'

कथनीयः। कथिते च तस्मिन् संबन्धविषयप्रयोजनान्यर्थादवगम्यन्त इति स्थितम् ॥

इति विवरणप्रमेयसंग्रहे प्रथमसूत्रे तृतीयवर्णकं समाप्तम् ॥

इत्यादि श्रुतिवाक्यका अर्थ करना चाहिए। इस अर्थका प्रतिपादन करनेके अनन्तर सम्बन्ध, विषय और प्रयोजन अर्थात् जाने जाते हैं, ऐसा सिद्धान्त है।

इति श्री पं० ललिताप्रसाद-डबराल-विरचित विवरणोपन्यास-
भाषानुवादका तृतीय वर्णक समाप्त।

अथ चतुर्थं वर्णकम्

तृतीयवर्णके सूत्रपदवाक्यार्थ ईरितः ।
अधिकार्यथशब्देन तत्र साक्षात्प्रसाधितः ॥१॥
सूत्रितं त्रितयं त्वेतत्संबन्धो विषयः फलम् ।
चतुर्थे वर्णके सर्वं तदाक्षिप्य निरूप्यते ॥२॥
प्रथमे वर्णकेऽध्यासमाश्रित्यैतत्प्रसाधितम् ।
अस्मिंस्तु वर्णके साक्षात्तदेवाक्षिप्य साध्यते ॥३॥

ननु ब्रह्मस्वरूपं यदि मानान्तरेण प्रतिपन्नं तदा नाऽस्य शास्त्रस्य

चतुर्थ वर्णक

तृतीय वर्णकमें सूत्रस्थ पदोंका तथा वाक्यका अर्थ कहा गया है। (पद तथा वाक्यार्थका अगले उत्तरार्द्ध तथा दूसरे श्लोकके पूर्वार्द्धसे संकलन करते हैं—) अथशब्द द्वारा अधिकारीकी साक्षात् सिद्धि की गई है ॥ १ ॥

विषय, फल तथा सम्बन्ध—ये तीन अनुबन्ध सम्पूर्ण सूत्रसे कहे गये हैं। [साधनचतुष्टयके आनन्तर्यको कहनेवाले अथशब्दका तात्पर्यार्थ प्रसिद्ध है कि साधनचतुष्टयसम्पन्न ही ब्रह्मविचारका अधिकारी है; और जिज्ञासामें सन्-प्रकृत्यर्थ ज्ञान ही फल है, उसका प्रधान कर्मकारक ब्रह्म विषय है, विषय और फलका सम्बन्ध 'श्रोतव्यः' इत्यादि विधिसे सिद्ध ही है—इस प्रकार 'अथातो ब्रह्मजिज्ञासा' इस सूत्रने तीनोंको अपनेमें गूँथ लिया।]

चतुर्थवर्णककी आवश्यकता दिखलाते हैं—अब चतुर्थवर्णकमें ऊपर कहे अनुबन्धोंका आक्षेप द्वारा निरूपण किया जाता है ॥ २ ॥

प्रथम वर्णकमें निरूपण कर आनेके कारण पुनरुक्ति दोषको हटाते हैं—प्रथम वर्णकमें तो अध्यासका आश्रयण करके इनकी सिद्धि की गई है और अब—इस चौथे वर्णकमें—अनुबन्धोंकी ही स्वतन्त्ररूपसे आक्षेप द्वारा सिद्धि की जाती है ॥ ३ ॥

शङ्का—यदि अन्य प्रत्यक्षादि प्रमाणोंसे ब्रह्मस्वरूप अवगत है तो वह इस

विषयो भवितुमर्हति, अनधिगतार्थत्वाभावात् । नापि तदवगमोऽस्य प्रयोजनम्, एतच्छास्त्रात्प्रागेव सिद्धत्वात् । अथाऽप्रतिपन्नं तदाऽत्यन्तमबुद्ध्यारूढेनाऽर्थेन कथमिदं शास्त्रं संबध्येत । यद्यपि प्रत्यक्षादिकमत्यन्तादृष्टचरेणाऽप्यर्थेन संबध्यमानं दृष्टं तथापि विचारात्मकस्य शास्त्रस्य न तत्संभवति । सर्वत्राऽऽपाततः प्रतिपन्नस्यैव विचारसंबन्धदर्शनादिति चेद्, एवं तर्हि ब्रह्मणोऽप्यध्ययनादापातप्रतिपन्नस्याऽनिर्णीतस्य विषयस्य विचारशास्त्रसंबन्धे सति तदवगमः फलमिति न कोऽपि दोषः ।

ननु विषयप्रयोजनसंबन्धा नाऽत्र प्रतिपादनीया वक्ष्यमाणसमन्वयाध्यायादिभिरेव तत्सिद्धेः । न च तदप्रतिपादने श्रोतॄणामप्रवृत्तिः, शास्त्रप्रणेतृगौरवादेव विषयादिसद्भावनिश्चयेन प्रवृत्तिसंभवात् । मैवम्, सामान्यतो

शास्त्रका विषय नहीं हो सकता है, क्योंकि वह अज्ञानविषय नहीं है, अज्ञात—अपूर्व—ही विषय हो सकता है। और उसका परिज्ञान भी इस शास्त्रका प्रयोजन नहीं हो सकता, क्योंकि उसका तो इस शास्त्रके पहले ही ज्ञान हो चुका है। यदि किसी भी प्रमाणसे सिद्ध नहीं है, तो कभी भी बुद्धिमें न आये हुए अर्थसे इस शास्त्रका सम्बन्ध कैसे होगा ? यद्यपि प्रत्यक्ष आदि ज्ञान पहले कभी भी बुद्धिमें न आये हुए अर्थसे भी सम्बन्ध करते देखे गये हैं, तथापि विचारस्वरूप शास्त्रमें तो ऐसा सम्भव नहीं हो सकता। अन्य स्थलोंमें सर्वत्र आपाततः (किसी न किसी प्रकार) ज्ञात (बुद्धिमें आरूढ़) पदार्थका ही विचार—निर्णय—से सम्बन्ध होते देखा गया है।

समाधान—ऐसा मानो, तो अध्ययन द्वारा आपाततः (शाब्दिक) ज्ञात अनिर्णीत ब्रह्मरूप विषयका भी विचारशास्त्रसे सम्बन्धका सम्भव होनेपर उस (ब्रह्मका) ज्ञान—साक्षात्कार—फल हो सकता है, इसमें कोई दोष नहीं आता।

शङ्का—विषय, प्रयोजन और सम्बन्धका इस सूत्रमें प्रतिपादन नहीं करना चाहिए, कारण कि समन्वयादि अध्यायों द्वारा ही इनका प्रतिपादन सिद्ध हो जाता है। इन तीनोंका प्रतिपादन किये विना श्रोताओंकी प्रवृत्तिका अभाव भी नहीं कह सकते, कारण कि शास्त्रको बनानेवालेके गौरवसे (आदरसे) ही विषयादिका निश्चय कर प्रवृत्ति हो सकती है।

समाधान—ऐसा नहीं कह सकते, कारण कि सामान्यतः विषयादिके सद्भावका

विषयादिसत्त्वनिश्चयेऽपि स्वाभिप्रेतप्रयोजनविशेषानवगमे प्रवृत्त्ययोगात् ।

ननु तर्हि प्रवृत्त्यङ्गतया प्रयोजनविशेष एव वक्तव्यो न विषय-संबन्धौ । अथ विषयोऽपि प्रयोजनसाधनतया प्रवृत्त्यङ्गं तथापि प्रयो-जनावगमादेव सोऽवगम्यते, तत्संबन्धिन एव विषयत्वनियमात् । लोके द्वैधीभावाख्यप्रयोजनसमवायिन एव काष्ठस्य छिदिक्रियाविषयत्वात् । विषयविषयिप्रतीतौ तत्संबन्धोऽपि प्रतीयत एवेति न सोऽपि पृथग्वक्तव्य इति चेत्, मैवम्; तत्र किं प्रयोजनविषयसंबन्धानां स्वरूपतोऽत्यन्तभेदा-भावात् पृथग्वक्तव्यत्वाभावः, किं वाऽन्यतराभिधानेनेतरयोरर्थसिद्धत्वाद्, उत प्रत्येकमेव स्वातन्त्र्येण प्रवृत्तिसमर्थतया संभूय प्रवृत्त्यङ्गत्वाभावात् ? नाऽऽद्यः, पुरुषार्थरूपं प्रयोजनम्, अनन्यथासिद्धो विषयः, एतत्प्रतिपाद्यत्वं

निश्चय होनेपर भी अपने अभीष्ट प्रयोजनविशेषकी प्रतीति न होनेसे प्रवृत्तिका होना संभव नहीं है ।

शङ्का—तब तो प्रवृत्तिका उपकारी होनेसे प्रयोजनविशेषका ही कथन उचित है, विषय और सम्बन्ध नहीं कहने चाहिए । यद्यपि विषय भी प्रयोजनका साधक होनेसे प्रवृत्तिमें उपकारक है, तथापि प्रयोजनके ज्ञात हो जानेसे ही विषयकी प्रतीति हो जाती है, कारण कि प्रयोजनसे सम्बद्ध ही विषय होता है, ऐसा नियम है । लोकमें द्वैधीभाव—दो टुकड़ा होना—रूप प्रयोजनका सम्बन्धी काष्ठ ही छेदन-क्रियाका विषय है । विषय और विषयी—प्रयोजन—की प्रतीति होनेसे उनका सम्बन्ध भी प्रतीत हो ही जाता है; इसलिए उसके भी पृथक् अभिधानकी आवश्यकता नहीं है ।

समाधान—ऐसा नहीं कह सकते, क्योंकि हम विकल्प करेंगे कि क्या विषय, प्रयोजन और सम्बन्ध—इनमें स्वरूपतः अत्यन्त भेदका अभाव है, अतः इनको पृथक् नहीं कहना चाहिए ? या इनमें एकका भी अभिधान हो जानेसे दूसरेकी अर्थात् सिद्धि हो जाती है, अथवा प्रत्येक ही स्वतन्त्ररूपसे [दूसरेकी अपेक्षा न रखकर] प्रवृत्त करानेमें समर्थ हैं, अतः मिलकर सब प्रवृत्तिके अङ्ग नहीं हैं, इसलिए [पृथक्-पृथक् सबका कहना आवश्यक नहीं हैं] प्रथम विकल्प नहीं बन सकता, कारण कि पुरुषार्थरूप तो प्रयोजन—फल—माना गया है, दूसरेसे सिद्ध (निर्णीत) न होनेवाला विषय

संबन्धः इत्येवमेषां भिन्नत्वात्। तत्र विषयत्वमन्ययोगव्यावृत्तिरूपमयोग-व्यावृत्तिरूपश्च संबन्ध इति तयोर्विवेकः। न द्वितीयः, सत्यप्येकस्मिन्नित-राभावदर्शनेनाऽर्थसिद्ध्ययोगात्। दृश्यते हि काकदन्तानां ग्रन्थान्तरेणाऽ-सिद्धतया विषयत्वे प्रतिपादयितुं शक्यतया संबन्धे च सत्यपि तद्विचार-णायां प्रयोजनाभावः। तथा परिपक्वकदलीफलत्वगुत्पाटनादिषु कुठार-दात्रादिना साधयितुं शक्यतया संबन्धे पुरुषैरपेक्ष्यतया प्रयोजने सत्यपि न कुठारादिव्यापारविषयत्वमस्ति, अङ्गुल्यादिभिरेव तदुत्पाटनसिद्धेः। एवं मेर्वादेरन्यैरनानीततया विषयभूतस्य सप्रयोजनस्याऽप्यस्मदादिकर्तृका-नयनव्यापारेण न संबन्धं पश्यामः, अयोग्यत्वात्। तदेवं परस्परव्यभि-

---

चेद्, न; पूर्ववेदसृष्टावपि तथेत्यनवस्थायामन्धपरम्पराप्रसङ्गात्। तस्मात्पौरुषेयत्वे वेदस्य प्रामाण्यं दुःसम्पादम्। अत एव सुगता आर्हताश्चाऽप्रमाणं वेदमाहुरिति चेद्, न; तेषां स्वागमेष्वप्रामाण्यप्रसङ्गात्। अत एव लोकायत आगममात्रं नेच्छतीति चेद्, न; तस्य वाक्यमात्राप्रामाण्ये वादानधिकारः, लौकिकवाक्यप्रामाण्ये किमपराद्धं वेदवाक्यैः। तदेवं पौरुषेयत्वे वेदस्येष्टं प्रामाण्यं प्रभज्येत ? अपौरुषेयत्वे ब्रह्मण उपाध्यायवदसर्वज्ञत्वं प्रसज्येतेति।

धर्म और अधर्म उस कालमें विद्यमान ही हैं, यह मानना भी उचित नहीं है, कारण कि उस पूर्व कल्पके वेदोंकी रचनाकालमें भी पूर्वोक्त प्रकारका [उससे भी पूर्व कल्पमें अनुष्ठित धर्माधर्मोंकी अनुवृत्ति मानना] समाधान देनेसे अनवस्था दोष आ जानेपर अन्धपरम्पराका प्रसङ्ग आ जाता है। इसलिए वेदको पुरुषप्रणीत माननेसे उसके प्रामाण्यका समर्थन नहीं हो सकता। इसी कारणसे बौद्ध तथा जैनमतावलम्बियोंने वेदको प्रमाण नहीं माना, यह कहना भी उचित नहीं है, कारण कि उनको (वेदको अप्रमाण माननेमें पौरुषेयत्व-रूप हेतुसे) अपने (बौद्ध और जैन) शास्त्रोंमें अप्रामाण्य माननेका प्रसङ्ग आ जायगा। [उनके शास्त्र भी तो पौरुषेय हैं, अतः उनको भी अप्रमाण मानना होगा]। यही कारण है कि लोकायत—नास्तिक—आगममात्रको नहीं चाहता। [आगममात्र पुरुषप्रणीत है, अतः वह किसीको भी प्रमाण मानना नहीं चाहता], परन्तु उसका कथन भी उचित नहीं है, कारण कि, वाक्यमात्रको अप्रमाण माननेसे नास्तिकका वादमें—तत्त्वजिज्ञासारूप परस्पर शास्त्रार्थकथामें—अधिकार ही नहीं हो सकता। [वाक्योंको सर्वथा अप्रमाण माननेवाला अपना अभिप्राय किस साधनसे प्रकट कर सकेगा ? और प्रतिवादीका अभिप्राय कैसे समझेगा ? अतः उस प्रलापीके कथनपर कोई भी ध्यान देना उचित न समझेगा।] यदि वह नास्तिक [वादमें अपना अधिकार पानेके लिए] लौकिक वाक्योंमें प्रामाण्य मान ले, तो हम पूछ सकते हैं कि तब वैदिक वाक्योंने क्या अपराध किया है कि वे प्रमाण न माने जायँ ? इस प्रकार वेदको पुरुषप्रणीत माननेमें उसका प्रामाण्य नष्ट होता है। और वेदको पुरुषप्रणीत न माननेसे ब्रह्ममें उपाध्यायके—गुरुके—तुल्य असर्वज्ञत्वका प्रसङ्ग हो जायगा है।

अत्रोच्यते—पौरुषेयत्वं तावन्न सहामहे। तथाहि—किं शब्दार्थतत्संबन्धानां पौरुषेयत्वमुत क्रमावस्थितवाक्यानाम्। आद्येऽपि न तावज्जीवाः कर्तारः। तथा सति कश्चित्सागरं विवक्षित्वा मेरुशब्दमपि वाचकत्वेन प्रयुञ्जीत, स्वतन्त्रत्वात्। नापीश्वरः कर्ता, कल्पादिषु शब्दार्थसंबन्धव्यवहारः पूर्वपूर्वव्यवहारपरम्पराधीनः, अभिधानाभिधेयव्यवहारत्वाद्, इदानीन्तनव्यवहारवत्, इत्यनादित्वानुमानात्। न च डित्थादिसाङ्केतिकशब्देष्वनेकान्तः, तेषां गाव्यादिशब्दवदभिधानाभासत्वात्। न द्वितीयः,

---

समाधान—इस शङ्काके उत्तरमें कहा जाता है कि वेदकी पुरुष द्वारा रचना हम नहीं सह सकते, क्योंकि प्रश्न हो सकता है कि क्या शब्द, अर्थ, तथा उनके सम्बन्धकी रचना पुरुष द्वारा हुई है, ऐसा मानते हो? या क्रमसे रखे गये (पौर्वापर्ययुक्त) वाक्योंकी रचना पुरुष द्वारा हुई, ऐसा मानते हो? [वेद शब्दार्थ तथा उनका सम्बन्ध और पौर्वापर्यविशिष्ट वाक्य दोनों रूपवाला है, इनमें किस रूपकी रचना पुरुष द्वारा मानते हो?' प्रथम पक्ष माननेमें भी जीव तो उसकी रचनाके कर्ता हो नहीं सकते। यदि जीव कर्ता माना जाय, तो कोई जीव समुद्रका बोध करानेकी इच्छा करके मेरुशब्दको भी समुद्ररूप अर्थका वाचक बनाकर उसे प्रयोगमें लावेगा, कारण कि वह शब्दार्थसम्बन्धकी रचनामें स्वतन्त्र है। ईश्वरको भी कर्ता नहीं मान सकते, कारण कि शब्दार्थसम्बन्धमें अनुमानसे अनादित्व सिद्ध होता है। अनुमानप्रयोग इस प्रकार है—'कल्पादिकालोंमें शब्दार्थसम्बन्धरूप व्यवहार पूर्व-पूर्व व्यवहारपरम्पराके अधीन है, अभिधान-अभिधेय-व्यवहार होनेसे, [अभिधान शब्द है और अभिधेय अर्थ है अर्थात् वाच्यवाचकव्यवहार] इस कालमें होनेवाले वाच्यवाचकव्यवहारके तुल्य। 'जैसे वर्तमानमें घट-शब्दार्थसम्बन्ध अनादि है, वैसे ही आदि कालमें भी अनादि ही था। डित्थ आदि संज्ञाशब्दोंमें इसका व्यभिचार नहीं दिया जा सकता, कारण कि वे डित्थादि शब्द गावी आदि अपभ्रंशशब्दोंके तुल्य शब्दाभास माने गये हैं। [साधुशब्द नहीं माने जाते] 'पररीत्या परो बोधनीयः' न्याय लेकर नैयायिक असाधुशब्दोंमें शक्ति नहीं मानते, अतः वे शब्दाभास माने गये हैं। [वस्तुतः डित्थ आदि शब्दोंमें भी अनादि ही वाच्यवाचकभाव है, इसलिए कोई व्यभिचार नहीं आता]। क्रमिक वाक्यरचनारूप द्वितीय

सृष्टिकालीनं वेदाध्ययनं पूर्ववेदाध्ययनानुस्मृतिनिबन्धनम्, वेदाध्ययनत्वाद्, इदानीन्तनवेदाध्ययनवत्, इत्यनादित्वसिद्धेः। न चैवं सर्वेष्वपि ग्रन्थेष्विदमनादित्वं सुसाधमिति वाच्यम्, तैस्तैरेव ग्रन्थैस्तत्कर्तॄणां प्रतिपादनात् तदागमविरोधात्। इहाऽपि श्रुत्यैव वेदस्य कर्ता प्रतिपाद्यत इति चेत्, किं हिरण्यगर्भविषयया 'इदं सर्वमसृजत ऋचो यजूँषि' इत्यादिश्रुत्या किं वेश्वरविषयया 'अस्य महतो भूतस्य निःश्वसितम्, इत्यादिश्रुत्या? नाऽऽद्यः, 'यो ब्रह्माणं विदधाति' इत्यादिश्रुतौ हिरण्यगर्भोत्पत्तेः प्रागेव वेदसद्भावावगमात्। सतामेव वेदानां हिरण्यगर्भबुद्धौ प्राथमिकमाविर्भावमभिप्रेत्याऽसृजतेति श्रुतिरप्युपपन्ना। न द्वितीयः; उपादानप्रकरणपठिता सा श्रुतिः ईश्वरस्य वेदोपा-

---

पक्ष नहीं कह सकते, कारण कि 'सृष्टिकालका वेदाध्ययन पूर्वकालमें किये गये वेदाध्ययनके स्मरण द्वारा हुआ है, वेदाध्ययन होनेसे, वर्तमानकालके वेदाध्ययनके तुल्य' इस अनुमानके द्वारा पौर्वापर्यविशिष्ट वाक्यरूप वेदमें अनादित्व ही सिद्ध होता है।

शङ्का—तब तो इस प्रकारका अनादित्व सभी ग्रन्थोंमें सरलतासे सिद्ध किया जा सकता है।

समाधान—उन्हीं ग्रन्थोंसे अपने-अपने कर्ताओंका—रचयिताओंका—प्रतिपादन होनेसे उन ग्रन्थरूप आगमोंसे विरोध आ जाता है। [इसलिए सभी ग्रन्थ अनादि नहीं हो सकते] यदि कहो कि प्रकृतमें भी श्रुतिके द्वारा ही वेदके कर्ताका प्रतिपादन किया जाता है, तो यह कथन भी युक्त नहीं है, क्योंकि यहांपर प्रश्न होगा कि क्या हिरण्यगर्भको विषय करनेवाली 'इस सबको रचा तथा ऋक् और यजुर्वेदको—' इत्याद्यर्थक श्रुतिसे उसका प्रतिपादन होता है? अथवा ईश्वरका निर्देश करनेवाली 'इस महान् ईश्वरका यह निःश्वास है—' इत्याद्यर्थक श्रुतिसे? इनमें प्रथम पक्ष नहीं माना जा सकता, कारण कि 'जो ब्रह्म हिरण्यगर्भको रचता है'—इत्याद्यर्थक श्रुतिसे हिरण्यगर्भकी उत्पत्तिसे पहले भी वेदके सद्भावका बोध होता है। पूर्वसिद्ध वेदोंका ही हिरण्यगर्भकी—ब्रह्माकी—बुद्धिमें सबसे पहले प्रादुर्भाव हुआ, इसलिए 'असृजत' (बनाया) यह श्रुति भी उपपन्न हो गयी। [हिरण्यगर्भने ही वेदका प्रथम दर्शन (ज्ञान) पाया, इसलिए उपचारतः 'हिरण्यगर्भने वेदको बनाया' ऐसा श्रुतिमें कहा गया है, नूतन रचना नहीं कही गयी है] दूसरा—ईश्वरको विषय करनेवाली श्रुतिके द्वारा कर्ताका निर्देशरूप—पक्ष भी साधक नहीं है, कारण कि उक्त श्रुति उपादान-

दानत्वमेव ब्रूते न तु वेदकर्तृत्वमपि । ईश्वरोपादनत्वमपौरुषेयत्वं च विरुद्धमिति चेद्, न; एतादृशापौरुषेयत्वस्याऽङ्गीकृतत्वात् । भारतादीनां व्यासादिभिर्मानान्तरेणाऽर्थं बुद्ध्वा रचितत्वं पौरुषेयत्वम् । ततो मूलप्रमाणापेक्षं तत्प्रामाण्यम् । वेदो नार्थं बुद्ध्वा रचितः, असर्वज्ञवचनत्वाभावे सति धर्माधर्मब्रह्मप्रमाणत्वात्, परपरिकल्पितेश्वरबुद्धिवत् । तथा च ब्रह्मकार्यस्याऽपि वेदस्य स्वतःसिद्धप्रमाण्ये न काचिद्धानिः । ननु प्रमाणदृष्टवादी ह्याप्तः, तदृष्टस्योत्प्रेक्षितस्य च वक्ता नाऽऽप्तः । तथा च वेदो न प्रमाणम्, आप्ताप्रणीतवाक्यत्वाद्, उन्मत्तवाक्यवत्, इति चेद्,

---

कारणके प्रदर्शक प्रकरणमें पढ़ी गई है, इसलिए ईश्वर वेदका उपादान कारण है, ऐसा ही कहती है, वेदका कर्ता है, ऐसा नहीं कहती है। ईश्वरोपादानकत्व और अपौरुषेयत्व दोनोंका एक स्थलमें होना विरुद्ध है [पुरुषप्रणीत कार्यका ही उपादान कारण होता है, इसलिए सोपादानक पदार्थको पुरुपप्रणीत कार्यके विरुद्ध अपौरुषेय नहीं कह सकते], ऐसा भी नहीं माना जा सकता, कारण कि इस प्रकारका अपौरुषेयत्व—ब्रह्मोपादानकत्व होते हुए भी पुरुषप्रणीतत्वका न होना—स्वीकार ही करते हैं, [इसलिए अपौरुषेय होनेसे वेदोंका स्वतःप्रामाण्य है और जो पुरुषप्रणीत हैं, उनका परतःप्रामाण्य होता है।] जैसे'—भारत आदि ग्रन्थोंका प्रणयन श्रीव्यासजीने दूसरे वेदादि प्रमाणों द्वारा अर्थका निश्चय करके किया है, इसलिए वे ग्रन्थ पौरुषेय माने जाते हैं। अतः मूल (जिसके द्वारा अर्थ ज्ञान करके ग्रन्थोंका प्रणयन किया गया हो, ऐसे) प्रमाणकी अपेक्षा करके उनका प्रामाण्य माना जाता है। 'वेद अर्थज्ञानपूर्वक रचित नहीं है, असर्वज्ञवचन न होता हुआ धर्माधर्ममें प्रमाणस्वरूप होनेसे, नैयायिक आदि दूसरे वादियोंके सम्मत ईश्वरकी बुद्धिके समान'। [इस अनुमानसे वेदमें भारतादिसे वैलक्षण्य सिद्ध होता है] इसलिए ब्रह्मका कार्य होनेपर भी वेदके स्वतःसिद्ध प्रामाण्य माननेमें कोई हानि नहीं है।

शङ्का—प्रमाण द्वारा निश्चित अर्थका वक्ता ही आप्त (शिष्ट) कहलाता है, प्रमाणोंसे अनिश्चित केवल अपनी कल्पनासे कल्पित अर्थका वक्ता आप्त नहीं कहलाता है। इसलिए प्रमाणदृष्ट अर्थका वक्ता न होनेसे वेद प्रमाण नहीं माना जा सकता, कारण कि वह आप्त पुरुष द्वारा नहीं बनाया गया है, उन्मत्त पुरुषके वाक्यके तुल्य।

मेवम् ; वेदः प्रमाणम् , अनाप्तप्रणीतवाक्यत्वात् , मन्वादिवाक्यवत् , इत्यपि प्रयोगात् ।

कथं तर्हि निर्णय इत्युच्यते—प्रामाण्यं स्वतःसिद्धमप्रामाण्यं तु कारणदोषादिति ह्यस्मत्सिद्धान्तः । अत्रोन्मत्तवाक्यस्य भ्रान्त्योत्प्रेक्षया वा दुष्टं ज्ञानं मूलम् , इत्यप्रामाण्यमुचितम् । मन्वादिवाक्यस्य स्वत एव प्रामाण्ये सत्याप्तप्रणीतत्वाख्यो गुणोऽपि प्रतिबन्धककारणदोषनिवारकतयोपयुज्यते । वेदस्य तु प्रतिबन्धासंभवादन्तरेणैव गुणं स्वतः प्रामाण्यं सिध्यति । नन्वाप्तप्रयोगानपेक्षत्वे स्मर्यमाणेनाऽपि घटशब्देन घटः प्रमीयेत ? प्रमीयतां नाम, यत्र-कुत्रचित् पुरोवर्तिनि तु घटरहिते स्थले प्रमाणान्तरविरोधाद् न प्रमास्यते ।

समाधान—नहीं, ऐसा नहीं कह सकते, क्योंकि प्रतिपक्षी अनुमानसे वेदका प्रामाण्य सिद्ध हो सकता है । [अनुमानप्रयोग दिखलाते हैं—] वेद प्रमाणभूत है, क्योंकि वह अनाप्तसे नहीं बनाया गया है, मनु आदिके वाक्यके समान ।

तब निर्णय कैसे होगा ? ऐसी जिज्ञासा होनेपर निर्णयका प्रकार कहा जाता है—वेदका प्रामाण्य तो स्वतःसिद्ध है और अप्रामाण्य कारणके दोषसे होता है, यह हम वेदान्तियोंका सिद्धान्त है । इसमें उन्मत्तवाक्यका मूलभूत ज्ञान भ्रम तथा कल्पना रूपसे दोषसे युक्त है, इसलिए उसको अप्रमाण मानना उचित है । यद्यपि मनु आदिके वाक्यका प्रामाण्य स्वतः ही सिद्ध है, तथापि आप्त द्वारा रचितत्वरूप गुण भी प्रामाण्यके प्रतिबन्धक दोषके निवारणका हेतु होनेसे वह प्रामाण्यबोधनमें उपयुक्त होता है । परन्तु वेदमें तो किसी प्रतिबन्धकके न होनेसे गुणके बिना ही प्रामाण्य स्वतःसिद्ध होता है ।

शङ्का—यदि आप्तप्रयोगकी अपेक्षा न होगी, तो स्मृत घटशब्दसे भी घटकी प्रमा—निश्चय—हो जायगी ।

समाधान—उस स्थलमें निश्चय हो जाय, कोई हानि नहीं है, परन्तु घटशून्य किसी भी सामनेके स्थानपर दूसरे प्रत्यक्षादि प्रमाणोंके साथ विरोध आनेसे 'स्मरणविषयीभूत शब्दसे' घटकी प्रमा न होगी, [इसलिए प्रमाजनक आप्तोपदेश आवश्यक होता है] ।

अथ मतं कस्यचित्कदाचिदसति प्रमाणान्तरोदये तस्मिन्नपि स्थले घटः स्मर्यमाणशब्दाद् प्रमीयते, तर्ह्याप्तप्रयोग एव प्रामाण्ये हेतुरस्तु । स च प्रयोगो द्वेधा निष्पद्यते—मन्वादिवाक्यानि मानान्तरेणाऽर्थमुपलभ्य प्रयुक्तानि । वेदवाक्यानि पूर्वपूर्वप्रयोगाननुस्मृत्य प्रयुक्तानि । उन्मत्तवाक्यानि पुनस्तदुभयाभावादप्रमाणान्येव ।

नन्वेवं वेदे प्रामाण्यमन्धपरम्पराग्रस्तं भवेदिति चेत्तर्ह्येवं व्यवस्थाऽस्तु । स्मर्यमाणशब्देभ्यस्तात्पर्याभावान्नाऽर्थप्रमितिः । वेदे पुनरध्ययनविधितात्पर्यादाप्तप्रयोगाभावेऽपि प्रमितिरुत्पत्स्यत इति। न चाऽध्ययनविधि-

---

शङ्का—यदि कदाचित् किसी देशमें किसी कारणविशेषसे दूसरे विरोधी प्रामाणका उदय नहीं होगा, तो स्मरणविषयीभूत शब्द द्वारा घटादिकी प्रमा हो ही जायगी।

समाधान—उक्त अतिप्रसङ्गका वारण करनेके लिए आप्त पुरुषके प्रयोगको ही प्रामाण्यमें कारण मानिये । और यह प्रामाण्यग्राहक आप्तप्रयोग दो प्रकारका होता है—एक तो प्रमाणान्तरोंसे अर्थज्ञान प्राप्तकर प्रयुक्त हुए मनु आदिके वाक्य अर्थात् मनुस्मृति आदि-स्मृतियाँ तथा पुराण-ग्रन्थ और दूसरा पूर्व पूर्व कल्पके प्रयोगोंका स्मरण करके प्रयुक्त हुए वेदवाक्य । उन्मत्त वाक्योंमें उक्त दोनों प्रकारोंके न होनेसे वे तो अप्रमाण—प्रामाण्य—शून्य—ही हैं ।

शङ्का—इस रीतिसे तो वेदमें अन्धपरम्पराप्राप्त ही प्रामाण्य होगा ।

समाधान—इस दोषके वारणके लिए निम्न प्रकारकी व्यवस्था (निर्णय) मानिये । स्मरणके विषयभूत (स्मृतिमें आये हुए) शब्दोंसे अर्थका निश्चय नहीं हो सकता, कारण कि स्मर्यमाण शब्दोंमें कोई तात्पर्य नहीं रहता । वक्ताका ही तात्पर्य शब्दों द्वारा बोधित होता है, उसके बोधनमें उच्चरित शब्द ही समर्थ होता है, अनुच्चरित नहीं, परन्तु वेदमें तो अध्ययनविधिके द्वारा ही तात्पर्यकी प्रतीति हो जाती है, [अन्यथा तात्पर्यशून्यके अध्ययन-विधानका कोई प्रयोजन ही नहीं रह जायगा], इसलिए आप्तप्रयोगके न होनेपर भी प्रामाण्य—निश्चयजनकत्व—का उदय हो जायगा । अध्ययनविधि-

वाक्यस्य तात्पर्याभावादप्रामाण्यं शङ्कनीयम्, स्वेनैव तात्पर्यसिद्धेः। न चैवमात्माश्रयो दोषः, शब्दशब्दवत्स्वपरनिर्वाहकेष्वविरोधात्। अतो ब्रह्मवद्वेदस्याऽपि पर्यालोचनायामनादित्वं पर्यवस्यति, न तु कालिदासादिग्रन्थवत्पौरुषेयत्वम्। न चाऽनादित्वेऽपि पुराणवाक्यवदन्यथासंनिवेशप्रणयनं शङ्कनीयम्, नियतक्रमविशिष्टानामेव वर्णपदवाक्यप्रकरणकाण्डादीनां वेदशब्दवाच्यानां कल्पादिप्रलययोरप्याविर्भावतिरोभावमात्रभाजां कूटस्थनित्यत्वाङ्गीकारात्।

तर्हि वेदो न ब्रह्मोपादानः, अनादित्वात्, कूटस्थनित्यत्वाच्च, ब्रह्मवदिति चेद्, स्वतन्त्रत्वोपाधिहतत्वात्। वेदस्तु ब्रह्मपरतन्त्रः, ब्रह्मण्यारोपितत्वाद्,

---

वाक्यके तात्पर्यके अभावसे अप्रामाण्यकी शङ्का नहीं की जा सकती, कारण कि स्वयं अपने ही द्वारा तात्पर्यकी सिद्धि हो जाती है। इसी प्रकार आत्माश्रय दोष भी नहीं देना चाहिए, क्योंकि शब्द-शब्दकी भाँति अपने तथा दूसरेके निर्वाहकोंमें आत्माश्रय दोषसे विरोध नहीं आता। [जैसे शब्द-शब्द अपने स्वरूपका भी स्वयं ग्रह कराता है और घट, पट आदि दूसरे शब्दोंका भी बोध कराता है।] इससे ब्रह्मके समान वेदमें भी, विचार करनेपर, अनादित्व निश्चित होता है, कालिदास आदिके बनाये हुये ग्रन्थोंके सदृश पौरुषेयत्व सिद्ध नहीं होता। अनादि माननेपर भी पुराण-वाक्योंके सदृश पौर्वापर्यक्रम तथा पदोंका परिवर्तन करके पुरुष द्वारा उनकी रचनाकी आशङ्का नहीं की जा सकती, कारण कि निश्चित पौर्वापर्यक्रमसे युक्त वर्ण, पद, वाक्य, प्रकरण तथा काण्ड आदि ही वेदशब्दके अर्थ हैं, इसलिए वे कूटस्थ नित्य माने गये हैं। केवल कल्पके आदिमें वेदका प्रादुर्भाव और प्रलयकालमें तिरोभावमात्र होता है [अर्थात् वेद उत्पत्ति और विनाशसे रहित हैं याने वेदका वर्णादिमें से कोई भी क्रम नहीं बदल सकता। यथानुपूर्वीसे ही वेदका प्रादुर्भाव होता है, अतः उसमें पौरुषेयत्वकी किसी प्रकार भी आशङ्का नहीं हो सकती]।

शङ्का—तब तो 'वेद ब्रह्मोपादानक अर्थात् ब्रह्मकार्य नहीं हो सकता, अनादि और कूटस्थ नित्य होनेसे, ब्रह्मके तुल्य' इस अनुमानसे वेदका उपादान ब्रह्म नहीं हो सकता।

समाधान—उक्त अनुमान स्वतन्त्रत्वरूप उपाधि दोषसे दूषित है।

यथा रज्ज्वामारोपितो रज्जुतन्त्रः सर्पः ।

ननु रज्जुसर्पवद्वेदस्य कथं मिथ्यात्वमुच्यते ? निर्वक्तुमशक्यत्वादिति ब्रूमः । तथाहि—किं वर्णमात्रं वेदः किं वा क्रमसहिता वर्णाः ? नाऽऽद्यः, अक्रमव्युत्क्रमोच्चारितेषु वर्णेषु वेदबुद्ध्यभावात् । द्वितीयेऽपि स क्रमः किं वर्णनिष्ठ उच्चारणनिष्ठो वा उपलब्धिनिष्ठो वा ? वर्णनिष्ठत्वेऽपि तावत्क्रमो न देशकृतः संभवति, वर्णानां सर्वगतत्वात् । नाऽपि कालकृतः, नित्यत्वात् । नाऽपि वस्तुकृतः, विरोधात् । नह्येकदैव राजा जारेति जकारस्य पूर्वापरभावो युक्तः । नाऽप्युच्चारणनिष्ठः क्रमो वर्णेषूपरज्यते, उच्चारणतत्क्रमयोः श्रोत्राविषयत्वात् । वेदस्तु वर्णात्मा श्रोत्रग्राह्यः । उपलब्धिनिष्ठोऽपि किं वर्णानां धर्म उत वर्णेष्वारो-

---

दृष्टान्तभूत ब्रह्म स्वतन्त्र है, पक्षभूत वेद स्वतन्त्र नहीं है, क्योंकि वह उपादानभूत ब्रह्ममें आरोपित है, जैसे उपादानस्वरूप रज्जुमें आरोपित रज्जुसर्प रज्जुके अधीन है ।

शङ्का—वेदको रज्जुसर्पकी भांति मिथ्या पदार्थ कैसे कहते हैं ?

समाधान—निर्वचन करना सम्भव न होनेसे मिथ्या कहा जा रहा है, ऐसा हमारा कहना है, [निर्वचनका असम्भव दिखलाते हैं—] क्योंकि क्या केवल वर्ण ही वेद हैं ? अथवा क्रमविशिष्ट वर्ण वेद हैं ? प्रथम कल्प नहीं हो सकता, कारण कि क्रमके विना तथा उलट-पुलट उच्चारण किये गये वर्णोंमें वेदबुद्धि नहीं होती है । दूसरे पक्षमें भी क्या वह क्रम वर्णोंमें है ? या उच्चारणमें ? अथवा उपलब्धि (श्रावण प्रत्यक्ष) में ? वर्णोंमें माननेसे भी वह क्रम देशकृत नहीं हो सकता, क्योंकि वर्ण सर्वत्र व्याप्त हैं । कालकृत भी नहीं हो सकता, क्योंकि वर्ण नित्य हैं । वस्तु द्वारा भी नहीं हो सकता, क्योंकि इसमें विरोध आता है, कारण कि एक ही समयमें राजा—इस क्रमसे युक्त वर्णोंमें—जार ऐसा जकारका आगे पीछे चला जाना युक्तियुक्त नहीं है । उच्चारणमें विद्यमान क्रम वर्णोंमें सम्बन्ध नहीं कर सकता, क्योंकि उच्चारण और उच्चारणका क्रम श्रोत्रेन्द्रियका विषय नहीं है । [वर्ण ही कानके विषय होते हैं, क्रियात्मक उच्चारण नहीं] और वेद तो वर्णस्वरूप और श्रोत्रेन्द्रियग्राह्य है । उपलब्धिमें विद्यमान भी क्या

प्यते किं वा वर्णानामुपलक्षणम् ? नाऽऽद्यः; अन्यनिष्ठस्याऽन्यधर्मत्वानुपपत्तेः । द्वितीयेऽप्यख्यातिवादिनः क्रममात्रस्य वा वर्णमात्रस्य वा वेदशब्दानर्हत्वाद् विशिष्टप्रत्ययस्याऽनङ्गीकाराद् अविवेकमात्रमेव वेद इति अर्थावबोधो न स्यात् । अन्यथाख्यातौ पुनर्विशिष्टप्रत्ययस्याऽनङ्गीकाराद्, (अविवेकमात्रत्वात्) विशिष्टार्थस्य चाऽभावाद् ज्ञानातिरिक्तो वेदो न स्यात् । न तृतीयः, क्रमविशिष्टवर्णप्रत्ययस्य प्रत्यक्षत्वात् ।

वर्णोंका धर्म है अथवा वर्णोंमें आरोपित किया जाता है ? अथवा वर्णोंका उपलक्षण है ? इनमें प्रथम पक्ष नहीं मान सकते, कारण कि अन्यमें रहनेवाला अन्यका धर्म नहीं हो सकता । दूसरे पक्षके माननेमें भी क्रम-मात्र या वर्णमात्र वेद नहीं माना जाता और अख्यातिवादी—मीमांसकके मतमें विशिष्टज्ञान माना नहीं गया है । अतः अविवेक-मात्र ही वेद कहलायेगा, उससे अर्थबोध नहीं हो सकेगा । [यदि वर्णोंमें उपलब्धिगत क्रमका आरोप माना जाय, तो वह अन्यमें अन्य धर्मका प्रतिभास होनारूप भ्रमज्ञान होगा—और अख्यातिवादी मीमांसक उक्त लक्षणलक्षित भ्रमको परोक्षापरोक्ष दोनों ज्ञानोंका विवेक न होना रूप ही मानता है, जैसे कि प्रथम वर्णकके अध्यासवादमें स्पष्टरूपसे दिखलाया गया है । इससे अति-रिक्त विशिष्ट एक ज्ञान नहीं मानता] । अन्यथाख्यातिवादीके—विज्ञानवादी बौद्धैक-देशी, अथवा नैयायिकके—मतमें यद्यपि विशिष्ट ज्ञानका अङ्गीकार है, [तथापि वह ज्ञान तो भ्रममात्र है ।] अतः उक्त विशिष्ट अर्थका अभाव होनेसे विज्ञानसे अतिरिक्त वेद और कुछ न होगा । [बौद्ध आन्तर विज्ञानमय वस्तुका धर्मभूत अनादि वासनासे आरोपित बाह्य वस्तुमें प्रतीत होनेवाले 'इदमिदम्' इत्यादि विशिष्ट ज्ञानको भ्रम मानता है और नैयायिक पुरोवर्ती शुक्ति आदिमें आपणस्थ रजत आदिमें रहनेवाले रजतत्वके आरोप द्वारा उत्पन्न 'यह रजत है' इस विशिष्ट ज्ञानको भ्रम मानते हैं । दोनोंके मतमें बाह्यार्थ शून्य ही भ्रमात्मक विशिष्ट ज्ञान होता है, सामने देशमें वास्तविक बाह्य वस्तुका अभाव ही है । इसलिए यह दूसरा आरोप पक्ष अन्यथाख्याति या अख्याति किसी मतमें भी नहीं बन सकता, इसलिए परिशेषात् उसे अनिर्वचनीय ही मानना होगा] ।

तीसरा पक्ष—उपलक्षण मानना—भी उचित नहीं है, कारण कि क्रमविशिष्ट

अतोऽनिर्वचनीयो वेदः। अनिर्वचनीयस्यापि तुच्छव्यावृत्तत्वात् देहात्मवदर्थक्रियासामर्थ्यमविरुद्धम्। तदेवं ब्रह्मविवर्ततयाऽकार्यस्याऽपि वेदस्याऽनादित्वकूटस्थनित्यत्वाभ्यां मानान्तरादर्थोपलब्धिपूर्वकपुरुषेच्छाधीननिष्पाद्यत्वाभावान्न पौरुषेयत्वदोषः, सर्वार्थप्रकाशकवेदोपादानस्य ब्रह्मण उपाध्यायवैलक्षण्यादसर्वज्ञत्वदोषोऽपि न। न च ब्रह्मणः सर्वप्रकाशस्य सर्वसंसर्गित्वादेव सर्वज्ञतासिद्धौ वेदोपादानत्वेन तत्साधनं व्यर्थमिति वाच्यम्, वाय्वाकाशरसगन्धादिसंसर्गिणः सवितृकिरणस्य तत्प्रकाशकत्वा-

वर्णोंका ज्ञान प्रत्यक्ष होता है। उपलक्षण वह माना जाता है जो कदाचित् रहा हो और इदानीं न रहता हुआ भी परिचायक हो। प्रकृतमें वर्णके साथ क्रमका सम्बन्ध ऐसा नहीं माना जा सकता, क्योंकि वेदमें सर्वदा क्रमविशिष्ट ही वर्ण रहते हैं, क्रमशून्य वर्ण कभी भी नहीं रहते, जिससे क्रम उपलक्षण * माना जाय। इन सब कारणोंसे वेद अनिर्वचनीय है। अनिर्वचनीय होते हुए भी वेदके तुच्छ—वन्ध्यापुत्र आदि अलीक—पदार्थोंसे विलक्षण तथा व्यावहारिक सत्तावान् होनेसे देहमें आत्माभिमानके समान उसे व्यवहार करने करानेकी सामर्थ्यसे युक्त मानना कोई विरुद्ध नहीं है। इस प्रकार ब्रह्मका विवर्तरूप कार्य (अतात्त्विक परिणाम) होनेसे तथा अकार्य—किसी पुरुष द्वारा नहीं रचे हुए—वेदमें अनादित्व और कूटस्थ नित्यताके सिद्ध होनेके कारण प्रमाणान्तरोंसे अर्थज्ञान प्राप्त करके पुरुषकी इच्छाके अनुसार वेदका रचा जाना नहीं हो सकता, इसलिए वेदमें पौरुषेय—पुरुषप्रणीत—होनेका दोष नहीं आ सकता। और सम्पूर्ण अर्थोंका—विषयोंका—प्रकाश करनेवाले वेदके उपादानस्वरूप ब्रह्ममें उपाध्यायकी—आधुनिक गुरुकी—अपेक्षा विलक्षणता आनेके कारण असर्वज्ञ—अल्पज्ञ—होनेका दोष भी नहीं आता। स्वयंप्रकाश ब्रह्मका सकल अर्थजातके साथ सम्बन्ध होनेसे सर्वज्ञ होना सिद्ध हो ही जाता है, पुनः शास्त्रयोनित्व—वेदोपादानत्व—रूप हेतुके द्वारा उसका समर्थन करना व्यर्थ नहीं कहा जाना चाहिए, कारण कि वायु, आकाश, रस, तथा गन्ध आदि पदार्थोंके

* 'यावत्कार्यमवस्थायिभेदे हेतोरुपाधिता। कादाचित्कतया भेदधीहेतुरुपलक्षणम्' यावत्कार्य पर्यन्त भेदका कारण अनन्वयी होता हुआ उपाधि कहलाता है। और यदि कादाचित्क भेदका कारण हो तो उपलक्षण कहलाता है।

दर्शनात् । तस्मात् सर्वार्थप्रकाशनसमर्थसर्ववेदोपादानतयैव सर्वज्ञत्वं साधनीयमिति सूत्रकाराभिप्रायः ।

इति श्रीविद्यारण्यमुनिप्रणीते विवरणप्रमेयसङ्ग्रहे तृतीयसूत्रस्य
प्रथमं वर्णकं समाप्तम् ।

साथ सम्बन्ध रखनेवाली सूर्यकी किरण उन वायु आदि पदार्थोंकी प्रकाशक हो, ऐसा नहीं देखा गया है । [अतः सर्वसंसर्गित्वमात्रसे सर्वज्ञत्व—सर्वप्रकाशकत्व—सिद्ध नहीं हो सकता] इसलिए सम्पूर्ण विषयोंके प्रकाशनमें—ज्ञान करानेमें—समर्थ सम्पूर्ण वेदका उपादान होनेसे ही सर्वज्ञताका साधन करना चाहिए, ऐसा सूत्रकारका अभिप्राय है ।

इति श्री पं० ललिताप्रसादडबराल-विरचित-विवरणोपन्यास-
भाषानुवादमें तृतीयसूत्रका प्रथम वर्णक समाप्त ।

अथ तृतीयसूत्रे द्वितियं वर्णकम्

अथवा द्वितीयसूत्रे लक्षणमभिधायाऽनेन प्रमाणं प्रतिज्ञायते—शास्त्रयोनित्वादिति, वेदप्रमाणकत्वादित्यर्थः। अनेकार्थसूचकत्वं सूत्रस्याऽलङ्कारो न वाक्यदोषमावहति, विश्वतोमुखमिति सूत्रलक्षणे दर्शनात्। ब्रह्मप्रमापकं च वेदवाक्यं 'यतो वा इमानि' इत्यादि। यद्यप्येतत्पूर्वसूत्र एवोदाहृतं तथाप्येतत्सूत्रवैयर्थ्यं नाऽस्ति, एतत्सूत्रप्रतिपाद्यं शास्त्रैकवेद्यत्वं ब्रह्मणोऽभिलक्ष्य पूर्वसूत्रस्याऽऽगमग्रथने तात्पर्याभिधानात्। अन्यथा पूर्वसूत्रस्य युक्त्युपन्यासमात्रे तात्पर्यं को निवारयेत्? युक्त्युपन्यासमात्रत्वे च प्रतिकार्यं

तृतीय सूत्रका द्वितीय वर्णक

[पूर्व वर्णकमें वेदका उपादान कारण होनेके कारण ईश्वर सर्वज्ञ है, ऐसा सिद्ध किया गया, अब द्वितीय सूत्र ही से लक्षणप्रतिपादन द्वारा सर्वज्ञताकी सिद्धि माननेपर भी वस्तुकी सिद्धिके लिए प्रमाणकी भी आवश्यकता होती है, क्योंकि 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः', ऐसा न्याय है, इसलिए इस द्वितीय वर्णकसे तृतीय सूत्रका तात्पर्य दिखलानेके लिए कहते हैं—] अथवा दूसरे सूत्रमें लक्षण दिखलाकर इस तीसरे सूत्रसे प्रमाणकी प्रतिज्ञा करते हैं—शास्त्र योनि याने प्रमाण होनेसे अर्थात् ब्रह्ममें वेद प्रमाण होनेसे, ऐसा अर्थ हुआ। सूत्रका यह भूषण ही है कि वह अनेक प्रकारके अर्थोंका सूचन करे, इससे सूत्रमें (अनेकार्थकत्वरूप) वाक्यदोष नहीं आ सकता, कारण कि सूत्रके लक्षणमें 'विश्वतोमुख' चारों ओर दृष्टि रखनेवाला (अर्थात् अनेक अर्थोंका सूचन करनेमें समर्थ), ऐसा विशेषण देखा गया है। ब्रह्ममें प्रमाणभूत वेदवाक्य 'यतो वा इमानि' (जिस ब्रह्मसे यह सब भूत) इत्यादि लेने या समझने चाहिए। यद्यपि 'यतो वा' इत्यादि वेदवाक्य उदाहरणरूपसे पूर्व सूत्रमें ही दिखलाये गये हैं, तथापि इस सूत्रको (पुनः इन वाक्योंको दृष्टान्त देनेके लिए) निष्प्रयोजन नहीं मान सकते, कारण कि ब्रह्मका केवल शास्त्र द्वारा ही बोध होता है, इस प्रकार इस तीसरे सूत्रके प्रतिपादनीय विषयको लक्ष्य करके ही पूर्व सूत्रका 'यतो वा'—इत्यादि श्रुतिवाक्योंका उद्धरण करनेमें तात्पर्य है, अन्यथा पूर्व सूत्रका केवल युक्ति मात्र दिखलानेमें तात्पर्य है इस अतिप्रसङ्गका निवारण कौन कर सकेगा? और

पृथक्कारणजन्यताया अपि संभवात्सर्वज्ञं सर्वशक्ति ब्रह्म जगत्कारणमित्ययमर्थो न सिध्येत्। न च बृहतेर्धातोरर्थानुगमात्तत्सिद्धिः, बृहत्यर्थवाचिनो ब्रह्मशब्दस्याऽपि वेद एव प्रयोगात्। नहि लोके जगत्कारणे ब्रह्मशब्दः प्रयुज्यते। अतो जन्माद्यस्य यतः शास्त्रैकप्रमाणं तद् ब्रह्मेत्येतावदिदमेकं सूत्रम्, तावता युक्तिमात्रशङ्कानिवृत्तेः। पृथक्करणं तु शास्त्रोपादानत्वेन सर्वज्ञत्वं सुसंपादमिति व्याख्यानान्तरेण कथयितुम्। तस्माज्जगज्जन्मादिनिमित्तोपादानकारणं सर्वज्ञं ब्रह्म शास्त्रैकगम्यमिति सूत्रद्वयेन सिद्धम्।

तत्र बिम्बस्थानीयं ब्रह्म मायाशक्तिमत्कारणं जीवाश्च प्रत्येकमविद्या-

---

केवल युक्तिके प्रदर्शनमें तात्पर्य माननेसे तो प्रत्येक कार्यके पृथक्-पृथक् कारणोंसे उत्पन्न होनेका भी सम्भव होनेसे 'सर्वज्ञ, सकल शक्तिशाली एक ब्रह्म ही सम्पूर्ण संसारका कारण है' इस अभीष्ट अर्थकी सिद्धि नहीं हो सकेगी। बृहि धातुके अर्थानुगम द्वारा भी उक्त अर्थकी सिद्धि नहीं हो सकती, कारण कि बृहि धातुके अर्थके वाचक ब्रह्मशब्दका प्रयोग भी तो वेदमें ही आया है। संसारके कारणभूत किसी वस्तुके लिए लोकमें ब्रह्मशब्दका प्रयोग नहीं किया जाता है, इसलिए 'जिसके द्वारा इस विश्वके जन्म आदि होते हैं, वह ब्रह्म केवल शास्त्रप्रमाणक है' इतने ही अर्थमें तात्पर्य रखनेवाला यह एक तीसरा सूत्र है। इससे युक्तिमात्रकी शङ्का निवृत्त हो जाती है। पृथक् सूत्र करना तो शास्त्रोपादानत्वरूप हेतुसे ब्रह्मके सर्वज्ञत्वका भली भाँति संपादन किया जा सकता है, ऐसा दूसरे व्याख्यानसे कहनेके लिए है। इस निष्कर्षसे संसारके जन्म आदिका निमित्त तथा उपादान-कारणभूत सर्वज्ञ ब्रह्म केवल शास्त्र द्वारा जाना जा सकता है, ऐसा अर्थ दोनों सूत्रोंसे सिद्ध होता है।

[एक शुद्ध ब्रह्म मायावश जगद्रूपमें परिणत होता हुआ कारण माना जाय, तो विद्याके उत्पन्न होनेपर अविद्याका विनाश हो जानेसे संसारकी निवृत्ति हो जानी चाहिए, इससे एककी ही मुक्तिसे सबकी मुक्ति होगी, इस अतिप्रसङ्गका वारण करनेके लिए मतभेद दिखलाते हैं—] बिम्बस्थानीय मायाशक्तिशाली ब्रह्म प्रपञ्चका कारण है और प्रत्येक जीव अपनी-अपनी (प्रारब्ध कर्मोपार्जित) अविद्यासे घिरे हैं, [इससे जिसमें विद्याका उदय होगा उसीमें

नुबन्धा इति केचित् ।

मायाविद्याप्रतिबिम्बितं जगत्कारणं विशुद्धब्रह्मामृतत्वालम्बनं जीवाश्चाऽविद्यानुबन्धा इत्यन्ये ।

प्रथमे पक्षे मायाविद्ययोर्भेदः ब्रह्मणश्च न प्रतिबिम्बता द्वितीये तु तद्वैपरीत्यमिति विशेषः ।

ब्रह्मसिद्धिकारास्त्वेवमाहुः—जीवा एव स्वाविद्यया प्रत्येकं प्रपञ्चाकारेण ब्रह्मणि विभ्राम्यन्ति, ब्रह्म तु मायाविशिष्टं बिम्बरूपं प्रतिबिम्बरूपं वा न जगत्कारणम् । यत्त्वया दृष्टं तन्मया दृष्टमिति संवादस्तु बहुपुरुषावगतद्वितीयचन्द्रवत्सादृश्यादुपपद्यते ।

अविद्याके नष्ट होनेसे उसका ही संसार विलीन होगा, सबका नहीं] ऐसा कोई वादी मानते हैं ।

दूसरे वादियोंका मत है कि मायारूप अविद्यामें प्रतिबिम्बित ब्रह्म विश्वका कारण है और मायारहित शुद्ध ब्रह्म अमृतत्वका—मुक्तिका—स्थान है और जीव अविद्या ही से आवृत रहते हैं । [इस मतमें भी पूर्व मतकी भाँति अविद्याके नानात्वसे समाधान किया जाता है । दोनों मतोंमें भेद दिखलाते हैं—]

प्रथम मतमें माया और अविद्यामें भेद माना गया है और ब्रह्म प्रतिबिम्बरूप नहीं माना गया है । दूसरे मतमें तो इसके विपरीत है (अर्थात् माया और अविद्यामें भेद नहीं माना गया और ब्रह्मका प्रतिबिम्बरूप होना भी माना गया है) ।

[ब्रह्मसिद्धिनामक ग्रन्थके रचयिताका (सुरेश्वराचार्यका) कहना है कि जीव ही अपनी-अपनी अविद्याके बलसे प्रत्येक घट, पट आदि रूप प्रपञ्चके आकारसे ब्रह्मविषयक भ्रममें पड़े रहते हैं (अर्थात् अपनी अविद्या द्वारा ब्रह्मको प्रपञ्चाकारमें प्रकट करते हैं) मायाविशिष्ट बिम्बरूप या प्रतिबिम्बरूप ब्रह्म तो प्रपञ्चका कारण नहीं है । [इस मतमें भी अविद्याका नानात्व और प्रपञ्चभेदसे ही समाधान समझना चाहिए] । [प्रपञ्चभेद माननेमें अतिप्रसङ्गका समाधान करते हैं—] 'जिस (घटादि) को तुमने देखा उस (घटादि) को मैंने देखा' इस प्रकार संवाद—दोनोंके दर्शनके विषय घटादि प्रपञ्चमें एकताकी प्रतीति—तो अनेक पुरुषोंसे ज्ञात हुए दूसरे चन्द्रमाके तुल्य सादृश्यमहिमासे होता है । [जैसे सर्वसम्मतिसे चन्द्रमाका एक होना ही सिद्ध है, परन्तु

स्वरूपेणाऽधिष्ठानत्वमपेक्ष्य ब्रह्मणो जगत्कारणत्वव्यपदेश इतीष्टसिद्धिकाराः प्रकारान्तरेण वर्णयन्ति । ब्रह्मैकमेव स्वाविद्यया जगदाकारेण विवर्त्तते स्वप्नादिवदिति ।

सर्वेऽप्येते सिद्धान्ताः, प्रक्रियाणां तत्त्वावबोधाय कल्पितत्वादिति सर्वं निर्मलम् ।

इति श्रीविद्यारण्यमुनिप्रणीतविवरणप्रमेयसंग्रहे तृतीयसूत्रस्य द्वितीयं वर्णकं समाप्तम् ।

इति तृतीयसूत्रम् ।

पुरुषके अक्षिगत दोषके कारण कभी कभी दो चन्द्रमा दिखलाई पड़ते हैं। वह दूसरा चन्द्रमा केवल दोषसे कल्पित है और दोष सबके पृथक्-पृथक् हैं, इसलिए उन पृथक्-पृथक् दोषोंसे कल्पित चन्द्रमा भी पृथक्-प्रथक् ही हैं, परन्तु सादृश्यके बलसे संवाद हो जाता है एवं प्रतिपुरुषस्थ पृथक्-पृथक् अविद्यासे पृथक्-पृथक् जीवोंने अपने आपमें घट, पट आदि विश्वकी कल्पना की, परन्तु उनमें सादृश्यकी महिमासे ही संवाद—व्यवहार—हो जाता है। इष्टसिद्धिकार पूर्वोक्त मतका ही दूसरे प्रकारसे वर्णन करते हैं—]

स्वरूपतः अधिष्ठानत्वकी अपेक्षा करके ब्रह्म विश्वका कारण है, ऐसा व्यवहार होता है। एक—अद्वितीय—ब्रह्म ही अपनी अविद्याके द्वारा प्रपञ्चके आकारसे विवर्तरूप परिणामको प्राप्त होता है, स्वप्नादिके तुल्य। [जैसे स्वप्न केवल मनका ही विवर्तरूप है, वैसे ही विश्व भी ब्रह्मका विवर्त है।] उक्त प्रकारके सभी सिद्धान्त हैं, और उनकी प्रक्रियाओंकी कल्पना तत्त्वका—रहस्यका—ज्ञान होनेके ही लिए की गई है, अतः सब कुछ निर्मल—दोषरहित—है। [इससे सिद्धान्तोंकी रीतिके भेदसे अद्वैततत्त्वमें हानि नहीं आ सकती, क्योंकि ये तो सब तत्त्वज्ञानके उपायभूत कल्पनामात्र हैं, अतः उपायोंमें रहनेवाला भेद उपेयमें भेद नहीं ला सकता।]

इति श्री पं० ललिताप्रसादडबरालविरचितविवरणोपन्यास-भाषानुवादमें तृतीय सूत्रका द्वितीय वर्णक समाप्त।

अथ चतुर्थं सूत्रम्

तृतीयसूत्रे ब्रह्मणि वेदान्ताः प्रमाणमिति प्रतिज्ञातं चतुर्थसूत्रे तत्प्रामाण्यमुपपाद्यते ।

ननु सूत्रकारवचनविरोधाद्भूतवस्तुप्रतिपादनायोगात्प्रयोजनशून्यत्वादनधिगतार्थत्वाभावाच्च न ब्रह्मणि वेदान्तप्रामाण्यं संभवति । सूत्रकारो हि जैमिनिः 'आम्नायस्य क्रियार्थत्वात्' इति सूत्रेणाऽक्रियार्थानां वेदान्तानामानर्थक्यमेवाऽऽह । यद्यप्यादिमध्यावसानेषु वेदान्तानां ब्रह्मैक्यतात्पर्यदर्शनाद् नाऽऽनर्थक्यसंभवस्तथापि न प्रामाण्यं घटते । ब्रह्मबोधका वेदान्ता न प्रमाणम्, मानान्तरयोग्यत्वे सति मानान्तरानुपलभ्यस्य ब्रह्मणो बोधकत्वात्,

---

अथ चतुर्थ सूत्र

तीसरे सूत्रमें प्रतिज्ञा की गयी कि ब्रह्ममें वेदान्तवाक्य प्रमाण हैं, अब चतुर्थ सूत्रसे उन वेदान्तवाक्योंका प्रामाण्य सिद्ध किया जाता है ।

शङ्का—ब्रह्मका प्रतिपादन करनेमें वेदान्तवाक्योंका प्रामाण्य नहीं हो सकता, कारण कि सूत्रकार—पूर्वमीमांसाकार—जैमिनि मुनिके वचनसे विरोध आता है और सिद्धस्वरूप वस्तुका प्रतिपादन करनेके लिए अवसर ही नहीं आ सकता एवं उसका प्रतिपादन करनेसे कोई प्रयोजन—अभीष्ट—ही सिद्ध नहीं होता है । [तथा उसका प्रतिपादन किन्हीं अपूर्व-प्रमाणान्तरोंसे अज्ञात विषयका प्रतिपादन स्वरूप नहीं होता । प्रामाण्य उन्हीं वाक्योंका माना जाता है, जिनमें उक्त दोष न आते हों । उक्त दोषोंका क्रमशः समन्वय करते हैं—] सूत्रोंके रचयिता जैमिनि मुनिने 'शास्त्र क्रियाके लिए है'—इत्याद्यर्थक सूत्रके द्वारा जो क्रियार्थक नहीं हैं उन वेदान्तवाक्योंको निरर्थक (प्रयोजनशून्य) ही कहा है । यद्यपि आदि (उपक्रम), मध्य (अभ्यास) और अवसान (उपसंहार) में वेदान्तवाक्योंका ब्रह्मकी अद्वितीयतामें तात्पर्य होनेसे वे निरर्थक नहीं हो सकते, तथापि उनका (वेदान्तवाक्योंका) प्रमाण होना संगत नहीं है, [कारण कि अनुमानसे उनका अप्रामाण्य सिद्ध होता है । अनुमानप्रयोग दिखलाते हैं—] 'ब्रह्मका बोध करानेवाले वेदान्त प्रमाण नहीं माने जा सकते, क्योंकि वे दूसरे प्रमाणोंके योग्य होकर

यथा स्पर्शयोग्यस्य स्पर्शाऽनुपलभ्यस्य चित्रगतनिम्नोन्नतभावस्य बोधकं चाक्षुषज्ञानम् । न च विशेषणासिद्धिः, ब्रह्म मानान्तरयोग्यम्, परिनिष्ठितवस्तुत्वाद्, घटादिवद् । न च ब्रह्मैकप्रमाणवेद्यम्, परिनिष्ठितत्वात्, गन्धादिवदिति वाच्यम्, चक्षुःस्पर्शनग्राह्येषु घटादिद्रव्येष्वनैकान्त्यात् । तथापि प्राभाकराभिमतं कार्यं प्रमाणान्तरयोग्यम्, तुच्छव्यावृत्तत्वाद्, घटवत्, इत्याभाससमानत्वमिति चेद्, न; परिनिष्ठितत्वस्योपाधित्वात् । अनुमेय-

---

दूसरे प्रमाण द्वारा न जाने गए ब्रह्मके बोधक हैं, जैसे स्पर्श द्वारा जानने योग्य स्पर्श द्वारा न जाने जाते हुए चित्रमें दिखलाये गये निम्नोन्नतभाव—ऊँचाई-निचाई—का बोध करानेवाला चाक्षुष प्रत्यक्ष । [चाक्षुष प्रत्यक्षसे चित्रमें ऊँचाई-निचाईका ज्ञान होता है और ऊँचाई-निचाई स्पर्शके योग्य भी है, परन्तु वह चित्रमें स्पर्शसे ज्ञात नहीं हो सकती । अतः चित्रमें चक्षुसे ऊँचानीचापनका देखना भ्रम है । यदि यथार्थ होता तो स्पर्शसे भी प्रतीत होता एवं सिद्ध वस्तुभूत ब्रह्म शब्दसे अतिरिक्त प्रमाणोंसे भी जाना जा सकता है, परन्तु जाना जा रहा है केवल वेदान्तरूप शब्द ही से, अतः तादृश शब्द प्रमाके जनक नहीं माने जा सकते, सिद्ध वस्तुको केवल शब्दैकगम्य मानना उचित नहीं है, अतः उसको प्रमाणान्तरयोग्य ही मानना चाहिए] 'मानान्तरयोग्यरूप' विशेषणका न हो सकना भी नहीं माना जा सकता, कारण कि ब्रह्म प्रमाणान्तर योग्य—दूसरे प्रमाणोंसे ज्ञात होने योग्य—है, कारण कि वह घटादि पदार्थोंके सदृश परिनिष्ठित—सिद्ध—वस्तुरूप है । 'ब्रह्म केवल एक प्रमाणके ही द्वारा जाना जा सकता है, परिनिष्ठित होनेसे गन्ध आदि परिनिष्ठित पदार्थोंके तुल्य' ऐसा अनुमान भी नहीं हो सकता, कारण कि चक्षु और स्पर्शके द्वारा प्रतीत होने योग्य घटादि द्रव्योंमें व्यभिचार है ।

शङ्का—[यद्यपि उक्त अनुमानसे सिद्ध वस्तुमें प्रमाणान्तरयोग्यता प्रतिपादित की गई—] तथापि (उक्त अनुमान) प्रभाकरानुयायियोंका सम्मत कार्य प्रमाणान्तर योग्य है, तुच्छसे पृथक् होनेसे, घट आदिके तुल्य, [जैसे घट आदि तुच्छ—वन्ध्यापुत्र आदि अलीक—पदार्थसे विलक्षण हैं, अतः प्रमाणान्तरयोग्य हैं, वैसे कार्य भी हैं] इस अनुमानाभासके समान है (अर्थात् पूर्वोक्त अनुमान भी सदनुमान नहीं है) ।

भविष्यद्वृष्ट्यादौ परिनिष्ठितत्वाभावान्न साध्यव्याप्तिरिति चेद्, एवमपि प्रमाणान्तरयोग्यत्वं प्रति प्रतियोग्यपेक्षस्य तुच्छव्यावृत्तत्वस्य प्रयोजकत्वे गौरवं तन्निरपेक्षस्य परिनिष्ठितत्वस्य प्रयोजकत्वे लाघवमिति नाऽस्त्येव साम्यम्। ब्रह्म शब्दैकगम्यम्, रूपादिभिर्व्याप्तिग्रहादिभिश्च हीनत्वात्, परकीयकार्यवत्, इति चेद्, न; अनुभवगम्यताया अपि भवद्भिरङ्गीकारात्। एवं च सति प्रथमानुमाने हेतुगतं मानान्तरानुपलभ्यस्येति विशेषणमसिद्धमिति चेद्, न; अनुमातॄणां ब्रह्मानुभवासिद्धौ विशेषणासिद्धेः। अतः

समाधान—इस अनुमानके तुल्य पूर्वोक्त अनुमान नहीं है, कारण कि इस अनुमानमें परिनिष्ठितत्वरूप उपाधि है (अर्थात् दृष्टान्तभूत घटादि परिनिष्ठित भी हैं और प्रमाणान्तरयोग्य भी हैं, परन्तु कार्य परिनिष्ठितस्वरूप नहीं है)। (उपाधिमें साध्यव्यापकत्वका व्यभिचार देते हैं—) अनुमानसे प्रतीत होने योग्य होनेवाली वृष्टि आदिमें परिनिष्ठितत्वके न होनेसे साध्यके साथ व्याप्ति नहीं है, इस प्रकार यदि कहा जाय, तो भी प्रमाणान्तरयोग्यत्वके प्रति प्रतियोगीकी अपेक्षा रखनेवाले तुच्छव्यावृत्तत्वको प्रयोजक माननेमें गौरव है और प्रतियोगीकी अपेक्षासे शून्य परिनिष्ठितत्वको प्रयोजक माननेमें लाघव है, इसलिए पूर्वोक्त अनुमानाभासकी समानता नहीं हो सकती। [इस अनुमानमें प्राणान्तरयोग्यत्वका प्रयोजक तुच्छऽयावृत्तत्व कहा गया है, इसमें तुच्छव्यावृत्तत्वग्रहके लिए प्रतियोगिभूत तुच्छके ज्ञानकी अपेक्षासे गौरव होता है। और पूर्वोक्त अनुमानमें प्रकृत साध्यका प्रयोजक परिनिष्ठितत्वरूप हेतु है, इसमें प्रतियोगीके ज्ञानकी अपेक्षा न होनेसे लाघव है] यदि 'ब्रह्म केवल शब्दप्रमाणसे ही प्रतीत होने योग्य है, कारण कि वह रूप आदि और व्याप्तिग्रह आदिसे रहित है, जैसे कि दूसरेके कार्य हैं' ऐसा कहा जाय, तो भी उचित नहीं है, कारण कि आप तो अनुभवयोग्य भी ब्रह्मको मानते हो। यदि कहो कि ऐसा—अनुभवगम्य—माननेसे प्रथम अनुमानमें दिये गये 'मानान्तरसे न जानने योग्यरूप' हेतुके विशेषणकी सिद्धि नहीं हो सकती, तो ऐसा कहना भी नहीं बनता, कारण कि अनुमान करनेवाले वादीके मतमें ब्रह्मविषयक अनुभवकी सिद्धि न होनेसे उक्त विशेषणकी सिद्धि हो जाती है, इसलिए संवादक—सदृश अर्थके प्रमापक—मूल

प्रथमानुमानेन संवादकमूलप्रमाणरहितानां वेदान्तानामप्रामाण्यं सिध्यति। अपौरुषेयवचसां न मूलप्रमाणापेक्षेति चेत्, सत्यम्; तथापि 'अहं मनुष्यः' इति प्रत्यक्षेण बाधितत्वात् 'आदित्यो यूपः' इतिवदप्रामाण्यमेव। उक्तप्रत्यक्षस्य दोषजन्यत्वेन श्रुत्यबाधकत्वेऽपि सिद्धे ब्रह्मणि प्रवृत्तिनिवृत्तिसाध्येष्टप्राप्त्यनिष्टपरिहाररूपप्रयोजनासंभवात् तात्पर्यरहिता वेदान्ता नैव प्रामाण्यं लभन्ते।

अथोच्येत—न प्रयोजनं तात्पर्यं वा प्रामाण्यप्रयोजकं किन्त्वनवगतार्थबोधकत्वमिति। एवमपि मानान्तरायोग्यं कार्यमेव वेदः प्रमापयतु न तु तद्योग्यं सिद्धं ब्रह्म। तस्मादनर्थका वेदान्ताः। अध्ययनविधिपरिगृहीतानामप्रामाण्यमयुक्तमिति चेत्, तर्हि कर्तृरूपस्य जीवस्य देवतारूपस्य ब्रह्मणश्च प्रकाशकत्वेन क्रियाविधिशेषत्वमस्तु, तथा च मन्त्रार्थवादादिवत्प्रामाण्यं सेत्स्यतीति। ब्रह्मविधायकत्वेनैव प्रामाण्यमस्त्विति

प्रमाणोंसे रहित वेदान्तवाक्योंमें प्रामाण्य सिद्ध नहीं होगा। यद्यपि यह कहा जा सकता है कि अपौरुषेय वाक्योंको मूल प्रमाणकी अपेक्षा नहीं है, (वे तो स्वतः प्रमाण हैं) तथापि 'मैं मनुष्य हूँ' इस प्रत्यक्षसे बाधित होनेके कारण 'सूर्य यूप—स्तम्भ—है' इस प्रतीतिके समान इनका अप्रामाण्य ही हो जाता है। यद्यपि उक्त 'अहं मनुष्यः' यह प्रत्यक्ष दोषजनित होनेसे श्रुतिका बाधक नहीं हो सकता, तथापि सिद्धभूत ब्रह्मका प्रतिपादन करनेमें प्रवृत्ति और निवृत्तिसे साध्य इष्टप्राप्ति तथा अनिष्टपरिहाररूप किसी भी प्रयोजनका सम्भव न होनेसे वेदान्तवाक्य तात्पर्यशून्य होकर प्रामाण्यको नहीं पा सकते।

यदि कहा जाय कि प्रयोजन या तात्पर्य प्रामाण्यका प्रयोजक नहीं है, किन्तु अनवगत—दूसरे प्रमाणोंसे अज्ञात—अर्थका बोधक होना ही प्रामाण्यका प्रयोजक है, तो भी प्रमाणान्तरके अयोग्य कार्यकी (कर्मकाण्डकी) ही वेद प्रमा करावेगा, प्रमाणान्तरके योग्य सिद्ध ब्रह्मका निश्चयात्मक ज्ञान नहीं करावेगा, इसलिए वेदान्तवाक्य प्रयोजनशून्य ही ठहरे। यदि कहो कि अध्ययनविधिसे प्रयुक्त हुए वेदान्तवाक्योंको अप्रमाण मानना युक्त नहीं है, तो कर्तास्वरूप जीव तथा देवतारूप ब्रह्मके बोधक होनेसे वेदान्तवाक्योंको क्रियाविधिका (अनुष्ठानात्मक कर्मकलापका) अङ्ग मानिये। इससे मन्त्र और अर्थवादके वाक्योंके समान (विधिशेष होनेसे) उनका भी प्रामाण्य सिद्ध हो

चेद्, न; क्रियाविषयस्य विधेः परिनिष्ठितवस्तुन्यसंभवात् । ननु न तावद्वेदान्ता एकस्य विधेः शेषभूताः, 'सोऽरोदीत्' इत्यादिवत्प्रकरणपाठाभावात् । नाऽपि सर्वविधिसमूहस्य, भिन्नवस्तुप्रतिपादकानां सर्वविधीनामेकवाक्यत्वाभावात् । न च धर्मसामान्यमेकमेव सर्वविधिभिः प्रतिपाद्यमिति वाच्यम्, सामान्यस्याऽनुष्ठानानर्हत्वात् । अथोच्येत यथा सर्वक्रतुसंबन्धिन्या जुह्वाः प्रकृतिद्रव्यं समर्पयत्पर्णमयीवाक्यमनारभ्याधीतमपि सर्वक्रतुवाक्यानां प्रत्येकं शेषभावं भजते तथा कर्त्तुः समर्पका वेदान्ता अपीति । नैतत्सारम्; निर्विशेषप्रधानैर्वेदान्तैरात्मनि स्तूयमाने प्रतिपाद्यमाने वा कर्मप्रवृत्तावनुपयोगात् । न चोपयोगः कल्पयितुं शक्यः, कर्तृत्वादिसर्वविशेषनिराकरणस्य प्रवृत्तिविरोधित्वात् । तस्मान्न क्रिया-

---

जायगा । ब्रह्मके विधायक मानकर (अर्थात् विधिशेष न मानकर) तो उनका प्रामाण्य नहीं बन सकता, कारण कि क्रियाकी विषयभूत विधि सिद्धस्वरूप वस्तुमें नहीं हो सकती । वेदान्तवाक्य किसी एक विधानके अङ्ग तो नहीं माने जा सकते, कारण कि 'वह रोया' इत्याद्यर्थक वाक्यके समान किसी प्रकरणमें उनका पाठ नहीं है । और सम्पूर्ण विधानोंके अङ्ग भी नहीं हो सकते, क्योंकि भिन्न-भिन्न वस्तुके प्रतिपादक सम्पूर्ण विधानोंकी एकवाक्यता नहीं होती। सम्पूर्ण विधियोंसे एक ही धर्मसामान्यका विधान भी नहीं मान सकते, कारण कि सामान्यका अनुष्ठान करना सम्भव नहीं हो सकता, [क्योंकि 'अभियुक्तोंका कथन है—'निर्विशेषं न सामान्यम्' अर्थात् विशेषके विना सामान्य है ही नहीं ।] यदि कहा जाय कि जैसे सम्पूर्ण यागोंसे संवन्ध रखनेवाली जुहूके प्रकृति-द्रव्यका—जिससे वह बनती है उस द्रव्यका—समर्पण करनेवाला 'यस्य पर्णमयी जुहूः' यह वाक्य प्रकरणके बिना यद्यपि पढ़ा गया है, तथापि सम्पूर्ण क्रतुवाक्योंमें वह प्रत्येकका अङ्ग होता है, वैसे ही यज्ञकर्ताका बोध करानेवाले वेदान्तवाक्य भी सब विधियोंके अङ्ग हो जायंगे, तो यह कहना भी सारगर्भित नहीं है, क्योंकि निर्विशेषप्रधान (प्रधानतया विशेषशून्यके प्रतिपादक) वेदान्तवाक्यों द्वारा स्तूयमान अथवा प्रतिपाद्यमान आत्मामें कर्मोंकी प्रवृत्ति होनेपर कोई उपयोग नहीं आता । [कर्मोंकी सफलता और अनुष्ठानयोग्यता तो कर्ता तथा देवता दोनोंके सविशेष होनेसे ही हो सकती है] । उपयोगकी कल्पना भी नहीं की जा सकती, कारण कि कर्तृत्व आदि सम्पूर्ण विशेषोंका

विधिशेषा वेदान्ताः ।

एवं तर्हि सगुणोपासनाविधिशेषा भवन्तु, न चैवं मन्तव्यम् ; उपासनाविधिशेषैरपि वेदान्तैः सर्वज्ञत्वादिगुणविशिष्टं जगत्कारणं परिनिष्ठितं ब्रह्मस्वरूपं न सिध्यति संवादकमूलप्रमाणाभावात् । अत उपास्यासिद्धौ कथमुपासनाविधिः दूरे तच्छेषत्वं वेदान्तानामिति अनुमानादनिर्दिष्टविशेषे जगत्कारणेऽवगते तस्योपासनाविधौ नित्यशुद्धबुद्धसत्यज्ञानानन्तत्वाद्युपास्यगुणारोपेण वेदान्तानामन्वयात् । ननु वेदान्तानामुपासनाविधिपरत्वेन देवताकाण्डेऽन्वयस्तावन्नाऽस्ति, प्रकरणभेदात्; स्वकाण्डे

निराकरण करना प्रवृत्तिका विरोधी है । इसलिए वेदान्तवाक्य क्रियारूप विधिके अङ्गभूत नहीं हो सकते ।

पुनः वादी अपने मतका समर्थन करता है कि वेदान्त क्रियाकलापात्मक विधिके शेष नहीं हो सकते हों, तो मत हों, परन्तु उन्हें सगुण उपासना (जो क्रियाकलापरूप नहीं है, किन्तु केवल बुद्धिपरिणाममात्र है) रूप विधिके अङ्ग माननेमें क्या हानि है ? समाधान किया जाता है कि ऐसा नहीं मानना चाहिए, कारण कि उपासनाविधिके अङ्गभूत वेदान्तवाक्योंके द्वारा भी सर्वज्ञत्व आदि गुणोंसे युक्त और विश्वके कारण सिद्धवस्तुभूत ब्रह्मका स्वरूप सिद्ध नहीं हो सकता, क्योंकि इसमें सम्मति देनेवाला (प्रमापक) मूल प्रमाण नहीं है [मूल प्रमाणभूत वेदान्तवाक्य तो उपासनाविधिके अङ्ग हो जाते हैं, इसलिए उनको अतिरिक्त प्रधान प्रमाणकी आवश्यकता होगी] इसलिए उपास्य देवताकी सिद्धि न होनेसे जब उपासनाका विधान ही सङ्गत नहीं हो सकता है, तब उस उपासनाविधिका वेदान्तोंको अङ्ग मानना तो दूर ही रहा (अर्थात् नहीं बन सकता) । इसलिए विश्व-प्रपञ्चका कारण विशेषशून्य है, ऐसा अनुमानसे जान लेनेपर उसमें उपासनाविधिके उपयुक्त नित्य, शुद्ध, बुद्ध, सत्य, ज्ञान, अनन्तत्व आदि गुणोंके आरोपसे वेदान्तवाक्योंका समन्वय होता है । [तात्पर्य यह है कि उपासनाका अङ्ग होनेसे ब्रह्मस्वरूपकी सिद्धि नहीं की जा रही है, किन्तु अनुमान द्वारा ज्ञात उपास्यमें गुणोंके आरोप द्वारा वेदान्तोंका उपासनाविधिमें समन्वय किया जा रहा है] । इस प्रकारका समन्वय, उपासनाविधिपरक माननेसे, किया जाय, तो देवताकाण्डमें अन्वय तो भिन्न प्रकरण होनेसे हो नहीं सकता, केवल वस्तु-

तु वस्तुमात्रपर्यवसायिनि न कोऽपि विधिः श्रूयते। न च कल्पयितुं शक्यते, 'पूषा प्रपिष्टभागः' इत्यादौ द्रव्यदेवतासंबन्धवदत्र विधिकल्पकस्याऽश्रुतत्वादिति चेद्, मैवम्; अध्ययनविधिपरिग्रहेण प्रामाण्यं परिकल्प्य तत्प्रामाण्यान्यथानुपपत्त्योपासनाविधेः कल्पयितुं शक्यत्वात्। फलं च 'एतावदरे खल्वमृतत्वम्' इत्याद्यर्थवादगतं मोक्षरूपमवगन्तव्यम्। तस्मान्न ब्रह्मणि वेदान्ताः प्रमाणम्, किन्तूपासनायाम्।

इत्येवं पूर्वपक्षे प्राप्ते सूत्रकार आह—'तत्तु समन्वयात्' इति। तुशब्देन पूर्वपक्षो निषिध्यते। तदिति स्वपक्षे प्रतिज्ञा—तद् ब्रह्म वेदान्तैः प्रमीयते इत्यर्थः। कुतः? वेदान्तानां ब्रह्मणि तात्पर्येण सम्यगन्वितत्वात्। तात्पर्यं हि पुरुषधर्मः, स च कथं वेदान्तानां स्यादिति चेद्, मैवम्;

मात्रका प्रतिपादन करनेमें तात्पर्यवाले अपने काण्डमें तो किसी विधिका भी श्रवण नहीं है और न उसकी कल्पना करना ही सम्भव है, कारण कि 'सूर्यका प्रपिष्ट द्रव्य भाग है' इत्याद्यर्थक वाक्यमें द्रव्य तथा देवताके सम्बन्धके तुल्य प्रकृतमें विधिका कल्पक वाक्य श्रुतिमें नहीं आया है,.

समाधान ऐसा नहीं कहा जा सकता, कारण कि अध्ययनविधिके बलसे (वेदान्तवाक्योंके प्रामाण्यकी कल्पना करके उस कल्पित प्रामाण्यकी अन्यथा अनुपपत्तिके आधारपर (अपने काण्डमें भी) उपासनाविधिकी कल्पना की जा सकती है। और उसका फल (अरे उपासक या जिज्ञासु! यही या इतना ही अमृतत्व है) इस अर्थवादके बलसे मोक्षरूप समझना चाहिए। इस निष्कर्षसे सिद्ध होता है कि ब्रह्मका प्रतिपादन करनेसे वेदान्तोंका प्रामाण्य नहीं हो सकता, किन्तु उपासनामें तात्पर्य माननेसे ही हो सकता है।

इस प्रकार पूर्वपक्ष होनेपर सूत्रकार कहते हैं—'तत्तु समन्वयात्' अर्थात् वह ब्रह्म तो वेदान्तवाक्योंसे प्रतिपादित होता है, कारण कि उनका तात्पर्य ब्रह्ममें ही भली भाँति घटता है। 'तु' शब्दसे उक्त पूर्वपक्षका निषेध किया गया है। 'तत्' पदसे अपने पक्षमें प्रतिज्ञा दिखलाई गई है—वह ब्रह्म वेदान्तवाक्योंसे यथार्थज्ञानका विषय किया जाता है, क्योंकि वेदान्तोंका ब्रह्ममें तात्पर्य द्वारा उचित अन्वय किया गया है।

शङ्का—तात्पर्य तो पुरुषका धर्म है, अतः वह पुरुषधर्मस्वरूप तात्पर्य वेदान्तोंका धर्म कैसे हो सकता है?

नहि विवक्षैव तात्पर्यम्, सत्यामपि विवक्षायामप्रयुक्ते शब्दे तात्पर्यव्यवहाराभावात् । नाऽपि पुरुषप्रयोगमात्रम्, उन्मत्तादिप्रयोगे तदभावात् । अतस्तदर्थप्रमितिशेषत्वं तात्पर्यम् । तच्च शब्दधर्म एव । न च तस्मिन्नपि विवक्षैव तत्प्रयोजिकेति वाच्यम्, केवलव्यतिरेकाभावात् । सत्यपि तादर्थ्ये विवक्षाभावापराधेन तात्पर्याभावादर्शनात् । न च विवक्षाव्य-

समाधान—ऐसी शङ्का नहीं की जा सकती, क्योंकि विवक्षा—कहनेकी इच्छामात्र—ही तात्पर्य नहीं कहलाती है, (जिससे कि वह वेदान्तधर्म न हो सके) कारण कि विवक्षाके रहते भी शब्दप्रयोगके विना तात्पर्यव्यवहार नहीं हो सकता । [वक्ताकी इच्छा है घटादिबोधके तात्पर्यसे घटादि पदोंका उच्चारण करे, परन्तु जब तक वह घटादि पदका प्रयोग न करेगा तब तक उसकी विवक्षा तात्पर्यके रूपमें परिणत न होगी, अतः केवल विवक्षा तात्पर्य नहीं है] और पुरुषका—वक्ताका—शब्दप्रयोगमात्र भी तात्पर्य नहीं है, क्योंकि उन्मत्त—प्रमादी—आदि वक्ताके प्रयोगमें तात्पर्य नहीं रहता । इसलिए तदर्थप्रमितिशेषत्व—उस विवक्षित अर्थका यथार्थ ज्ञान करानेकी सामर्थ्य—ही तात्पर्य है । ['स चासौ अर्थः तदर्थस्तस्य प्रमितौ शेषः समर्थः उपकारक इति यावत्, तस्य भावः' इस विग्रहसे उक्त अर्थ सिद्ध होता है ।] और इस प्रकारका तात्पर्य शब्दोंका ही धर्म है, [कारण कि अर्थबोधकी विवक्षासे ही उसके अनुसार अर्थबोध करानेके लिए शब्दप्रयोग किया जाता है, अतः तात्पर्य शब्दधर्म है ।]

[यद्यपि विवक्षाके अनुसार अर्थबोध करानेके लिए किया हुआ प्रयोग शब्दोंका ही धर्म है, परन्तु शब्दप्रयोगकी नियामिका तो विवक्षा ही है, इस आशयसे शङ्का करते हैं—] उस प्रकारके प्रयुक्त रूप शब्दधर्ममें भी तो विवक्षा ही नियामिका है । [इससे विवक्षाको ही तात्पर्य कहना चाहिए और वह पुरुषधर्म है, शब्दधर्म नहीं है] ।

समाधान—ऐसा नहीं कहना चाहिए, कारण कि इसमें केवलव्यतिरेकका अभाव है । (केवलव्यतिरेकका अभाव दिखलाते हैं—) तादर्थ्यके—अर्थकी प्रमिति करानेमें समर्थ शब्दप्रयोगके—रहते (भी) विवक्षाके अभावरूपी अपराधसे तात्पर्यका अभाव नहीं देखा गया है । [इसलिए 'विवक्षाके

1 मूलमें अपि पाठ अधिक ही आ गया है ।

तिरेकेण तात्पर्यगमकाभावः, उपक्रमादीनां भावात् । न च प्रमेयस्य कार्यत्वमेव तात्पर्यगमकम्, 'पुत्रस्ते जातः' इत्यादिष्वसत्यपि कार्यत्वे तात्पर्यदर्शनात् । तत्राऽपि तात्पर्यादेव प्रमेयस्य कार्यपर्यवसानमनुमीयतामिति चेद्, न; कार्यत्वप्रमितितात्पर्ययोरन्योन्याश्रयप्रसङ्गात् । कार्यविषयप्रमितौ सत्यां तत्प्रमितिजननसामर्थ्यलक्षणं तात्पर्यं सिध्यति, सिद्धे च तस्मिँस्तत्प्रमितिसिद्धिरिति । ननु तात्पर्याभावः प्रतीतिप्रतिबन्धकः, 'विषं भुङ्क्ष्व' इत्यादौ वाक्यादेव प्राप्ताया विषभोजनप्रमितेस्तात्पर्याभावेन प्रतिबध्यमानत्वात् । तत्प्रतिबन्धनिवारकं च तात्पर्यम् । तथा च प्रथमतो वाक्यादेव कार्यप्रमितौ सत्यां पश्चात्तथैव कार्यप्रमित्या प्रतिबन्धनिरासि-

---

अभावमें तात्पर्यका अभाव' ऐसा व्यतिरेक नहीं है ।] विवक्षाके अतिरिक्त किसी तात्पर्यकी प्रतीति करानेवालेका अभाव भी नहीं कहा जा सकता, कारण कि तात्पर्यके प्रत्यायक उपक्रमादि विद्यमान हैं । प्रमेयका केवल कार्य होना ही तात्पर्यका सूचक नहीं माना जा सकता, [जिससे कि सिद्धवस्तुप्रमेयक वेदान्तवाक्योंका तात्पर्य न होनेसे उनमें अप्रामाण्य माना जाय], कारण कि 'तेरा पुत्र उत्पन्न हुआ' इत्यादि वाक्यप्रयोगस्थलमें कार्यरूप प्रमेयके न होते हुए भी तात्पर्यकी उपलब्धि होती है । यदि कहो कि ऐसे स्थलोंमें भी तात्पर्यरूप हेतुसे ही प्रमेयमें कार्यत्व अनुमान द्वारा सिद्ध होगा, तो यह कहना उचित नहीं है, कारण कि ऐसा माननेसे कार्यत्वका निश्चय और तात्पर्य—इन दोनोंमें अन्योन्याश्रय दोष आ जायगा, क्योंकि कार्यविषयक प्रमिति—यथार्थ निश्चय—हो जानेके अनन्तर उसकी प्रमितिके उत्पन्न करनेके सामर्थ्यरूप तात्पर्यकी सिद्धि हो सकती है और तादृश तात्पर्यकी सिद्धि हो जानेपर ही कार्यत्वकी प्रमिति हो सकती है ।

[अन्योन्याश्रय दोषके परिहारके आशयसे शङ्का करते हैं—] तात्पर्यका अभाव प्रमितिका प्रतिबन्धक होता है जिसमें तात्पर्य नहीं रहता उसकी प्रमा नहीं हो सकती] जैसे 'विषको खा जाओ' इत्यादि वाक्योंमें केवल वाक्यसे प्राप्त हुई विषभक्षणकी प्रमितिका, उसमें तात्पर्य न होनेसे, प्रतिबन्ध हो जाता है, इसलिए तात्पर्य प्रतिबन्धका निवारण करनेवाला माना गया है । इस सिद्धान्तके अनुसार सर्वप्रथम वाक्यश्रवणमात्रसे कार्यज्ञान हो जाता है, अनन्तर उसी प्रकार उस

तात्पर्यमप्यस्तीत्यवगम्यते। न पुनस्तात्पर्येण कार्यप्रमितिर्भाव्यते ततो नाऽन्योन्याश्रय इति चेत्, सत्यम्; तथापि कार्यत्वं न तात्पर्यलिङ्गम्, 'जर्तिलयवाग्वा वा जुहुयात्', 'गवीधुकयवाग्वा वा' इत्यादिषु सत्यपि कार्ये तात्पर्याभावात्। 'अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च' इत्युत्तरवाक्येनाऽऽरण्यतिलानां गवीधुकानां च निराकरणात्। तस्मादुपक्रमादीन्येव तात्पर्यलिङ्गानि,

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिश्चये॥

इत्युक्तत्वात्। प्रसिद्धानि हि सर्वेष्वपि वेदान्तेषु ब्रह्मण उपक्रमा-

---

वाक्यसे कार्यप्रमितिके द्वारा प्रतिबन्धको दूर करनेमें समर्थ तात्पर्य भी प्रकृतमें है, ऐसा निश्चय किया जाता है। तात्पर्य द्वारा कार्यप्रमितिकी भावना नहीं की जाती, इसलिए अन्योन्याश्रय दोष नहीं आया। ['विष भक्षण करो' इत्यादि स्थलमें प्रथम प्रथम उत्पन्न कार्यप्रमिति अनन्तर बाधित होती है, अतः वह तात्पर्यके उन्नयनमें समर्थ नहीं है, परन्तु अन्यत्र 'घटमानय' (घड़ा लाओ) इत्यादि स्थलमें प्रथम उन्नीत कार्यप्रमितिका अनन्तर भी बाध नहीं होता है, अतः प्रतिबन्ध विनाशक तात्पर्यके प्रत्यायनमें वह स्वतः समर्थ है, अपनी सत्तामें तात्पर्यावगतिकी अपेक्षा नहीं रखती]।

समाधान—वादीकी शङ्का ठीक है, परन्तु इस प्रकार अन्योन्याश्रयका परिहार हो जानेपर भी कार्यत्व तात्पर्यका अनुमापक हेतु नहीं माना जा सकता, कारण कि (अथवा जर्तिल यवागूसे—जंगली तिलोंसे सिद्ध की गई लपसीसे—हवन करे) अथवा (गवीधुक यवागूसे हवन करे) इत्यादि वाक्योंमें कार्यकी प्रतीतिके रहनेपर भी तात्पर्य नहीं है, कारण कि 'जङ्गली तिलसे आहुति नहीं होती है' इस अगले वाक्यसे जङ्गली तिल और गवीधुकका निषेध किया गया है [और अजाक्षीरसे हवनके उपक्रमसे भी विरोध आता है। इसलिए उपक्रम आदि ही तात्पर्यके प्रत्यायक हेतु हैं, (कार्यत्व नहीं)।

शास्त्रमें उपक्रम (प्रारम्भ, प्रतिज्ञा, अधिकार तथा प्रकरण), उपसंहार (निर्वहण या समाप्ति), अभ्यास (पुनः पुनः आवृत्ति), अपूर्वता (प्रमाणान्तरसे असिद्ध अर्थका प्रतिपादन), फल (प्रयोजन), अर्थवाद (स्तुति—प्रशंसा क्वचित् निन्दारूप) और उपपत्ति—(युक्तियां) ये तात्पर्यके निर्णायक हेतु (प्रयोजक) हैं, ऐसा कहा गया है।

दीनि । ततस्तात्पर्येण वेदान्ता ब्रह्मणि समन्विताः ।

अन्वयस्य सम्यक्त्वं नामेतरवैलक्षण्येनाऽर्थप्रतिपादनम् । इतरत्र हि 'गामानय' इत्यादिशब्दाः क्रियाकारकसंसर्गं प्रतिपादयन्ति । 'उद्भिदा यजेत' इत्यत्रोद्भिद्यागशब्दयोरेकार्थत्वेऽपि नियोगाकाङ्क्षा विद्यते । 'नीलमुत्पलम्' इत्यत्र गुणगुणिनोर्भेदाभेदौ प्रतिपाद्यौ । एकार्थप्रतिपादकेष्वप्यन्येषु शब्देषु लिङ्गसंख्ये अवर्जनीये । वेदान्तास्तु न तथा संसर्गं वा साकाङ्क्षार्थं वा भेदाभेदौ वा लिङ्गसंख्याविशिष्टं वा प्रतिपादयन्ति, किन्त्वभिधावृत्त्या लक्षणयोपाधिद्वारा वाऽखण्डैकरसमेव जगत्कारणसामान्यानुवादेन प्रतिपादयन्ति ।

तत्र ज्ञानशब्दोऽनेकविकारयुक्तान्तःकरणवृत्तिप्रतिबिम्बितचैतन्ये व्युत्पन्नः । आनन्दशब्दश्च शुद्धसात्त्विकान्तःकरणवृत्त्यभिव्यक्तायाम-

---

सम्पूर्ण वेदान्तोंमें ब्रह्मके उपक्रम आदि प्रसिद्ध ही हैं । इसलिए तात्पर्य द्वारा वेदान्त ब्रह्ममें भली भाँति अन्वयको प्राप्त होते हैं ।

दूसरे शब्दोंकी अपेक्षा विलक्षण रीति—सरलता—से अर्थ-बोध करा देना ही अन्वयकी सम्यक्ता है । [इतर वाक्योंकी अपेक्षा वेदान्तवाक्योंमें विलक्षणता दिखलाते हैं—] 'गाय ले आवो' इत्यादि शब्द क्रियाकारकभावरूप सम्बन्धात्मक (गाय कर्म और लाओ क्रिया) वाक्यार्थका प्रतिपादन करते हैं । 'उद्भिद् यागसे अपूर्व साधन करे' इत्यादि स्थलमें उद्भिद् और यागका समान अर्थ होनेपर भी नियोगकी आकाङ्क्षा बनी ही रहती है । 'नील कमल' इस वाक्यमें गुण और गुणीका भेद तथा अभेद दोनोंका प्रतिपादन है । एक ही अर्थके प्रतिपादक दूसरे शब्दोंमें भी लिङ्ग और संख्याकी अपेक्षा छोड़ी ही नहीं जा सकती । वेदान्तवाक्य तो उक्त अन्य वाक्योंके समान संसर्ग या आकाङ्क्षायुक्त अर्थ तथा भेदाभेद अथवा लिङ्ग और संख्यासे विशिष्ट अर्थका प्रतिपादन नहीं करते, किन्तु अभिधावृत्ति—प्रथम शब्दशक्ति—से अथवा लक्षणावृत्तिसे उपाधि द्वारा अखण्ड तथा एकरस सर्वात्मा लिङ्ग, संख्यादि रूप विशेषणोंसे भी रहितका ही विश्वके कारणसामान्यके अनुवादसे प्रतिपादन करते हैं ।

इसमें ज्ञानशब्द अनेक विकारोंसे युक्त अन्तःकरणकी वृत्तिमें प्रतिबिम्बित चैतन्यरूप अर्थका वाचक व्युत्पत्तिसिद्ध है और आनन्द शब्द अन्तःकरणकी

त्यनुकूलतया स्फुरन्त्यां कस्यांचिद्व्यक्तौ लोके प्रसिद्धः। तावेतौ ज्ञानानन्दशब्दौ वाक्यान्तरेण नित्यत्वप्रतिपादकेन विरोधाद् वृत्त्यंशं परित्यज्याऽनुकूलतया स्फुरन्तीं व्यक्तिं प्रतिपादयतः। तथा च वृत्तित्यागांशे लक्षणा, इतरांशे तु मुख्यवृत्तिः। एकसत्यानन्तशब्दाः स्वगतभेदाभावमिथ्यात्वाभावसजातीयविजातीयद्वितीयाभावाभिधानद्वारेण तत्र लक्षणया वर्तन्ते। सर्वज्ञः सर्वशक्तिरित्यादिशब्दाश्चाऽनिर्वचनीयप्रपञ्चोपाधितया तत्र वर्तन्ते। 'अयमात्मा ब्रह्म', 'तत्त्वमसि' इत्यादिशब्दाश्च भागत्यागलक्षणया ब्रह्मण्येव वर्त्तन्ते। तदेवं सर्वे वेदान्ता अखण्डैकरसब्रह्मप्रतिपादकाः।

ननु सत्यज्ञानादिशब्दानां भिन्नार्थत्वे कथमखण्डैकरसे वृत्तिः? एकार्थत्वे पुनरुक्तिप्रसङ्गः, नैष दोषः; तात्पर्येण प्रतिपाद्यस्यैकत्वेऽपि व्यावर्त्यानामसत्यजडादीनामनिर्वचनीयार्थानामनेकत्वात्। न चाऽनिर्वच-

---

शुद्ध सात्त्विक वृत्तिमें अभिव्यक्त अनुकूल—सुखास्पद—रूपसे प्रतीत होनेवाली किसी एक चिद्व्यक्ति (चेतन्य) रूप अर्थका वाचक है, ऐसा लोकमें प्रसिद्ध है। कथित ज्ञान और आनन्द शब्द नित्यत्वके प्रतिपादक दूसरे वाक्योंसे विरोध होनेके कारण वृत्तिरूप भागका त्याग करके अनुकूलरूपसे प्रतीत होनेवाली चित्व्यक्तिका ही प्रतिपादन करते हैं। इसलिए वृत्तिभागका त्याग करनेमें लक्षणा और चिद्व्यक्तिरूप दूसरे अंशमें मुख्यवृत्ति—अभिधा—का ही व्यापार है। एक, सत्य और अनन्त शब्द अपनेमें भेदका अभाव, मिथ्यात्वका अभाव, तथा सजातीय-विजातीय-रूप द्वितीयका अभाव प्रतिपादन करते हुए लक्षणा द्वारा उसी चिद्व्यक्तिरूप अर्थके वाचक हैं। सर्वज्ञ और सर्वशक्ति आदि शब्द भी अनिर्वचनीय प्रपञ्चरूप उपाधिके द्वारा उसी चैतन्यके समर्पक हैं। 'यह आत्मा ब्रह्म है वही तुम हो' इत्यर्थक 'अयमात्मा ब्रह्म', 'तत्त्वमसि'—आदि शब्द भी भागत्यागलक्षणासे ब्रह्मके ही वाचक हैं। इस रीतिसे सम्पूर्ण वेदान्त अखण्ड एकरस ब्रह्मके ही प्रतिपादक हैं।

शङ्का—सत्य, ज्ञान आदि शब्दोंका उक्त रीतिसे यदि भिन्न-भिन्न अर्थ है, तो अखण्ड एकरसरूप अर्थमें उनकी शक्ति कैसे होगी? और यदि इनका भिन्न-भिन्न अर्थ न मानकर एक ही अर्थ माना जाय, तो पुनरुक्ति दोषका प्रसङ्ग आ जायगा।

समाधान—यह दोष नहीं आता, कारण कि तात्पर्य द्वारा सबका प्रतिपाद्य अर्थ यद्यपि एक ही है, तथापि व्यावृत्ति—निषेध—के विषयभूत असत्य

नीयपदार्थेन तदभावेन वा परमार्थभावरूपाद्वैतस्य काचित् क्षतिरस्ति। तस्मात् तत्त्वमस्यादिमहावाक्यानि 'सोऽयं देवदत्तः' इत्यादिवाक्यवदखण्डैकरसं प्रतिपादयन्ति। तथाहि—एकं देवदत्तमेकस्मिन् देशे काले च द्वौ पुरुषौ दृष्टवन्तौ, पुनर्देशकालान्तरे तमेव तावेव ददृशतुः। तयोर्मध्ये 'सोऽयं देवदत्तः' इति प्रत्यभिजानात्येकः। अपरस्तु पूर्वदृष्टाद् देवदत्ताद्भिन्नं पश्चाद् दृष्टं मन्यते। तं प्रत्यभिज्ञाहीनमितरो बोधयति 'सोऽयं देवदत्तः' इति। तत्र बोधयिता स्पष्टं भेदेन प्रतीयमानयोस्त त्तद्देशकालयोस्तद्विशिष्टयोर्वा देवदत्तयोरैक्यं न प्रत्यभिजानाति, विरोधात्; किन्तु विशिष्टद्वयोपलक्षित एको देवदत्तः प्रत्यभिज्ञागोचरः।

जड आदि अनिर्वचनीय (मिथ्याभूत) अर्थ अनेक हैं, [इसलिए अनेक व्यावर्त्योंका निषेध करनेके लिए पृथक्-पृथक् सत्य, ज्ञान आदि शब्दोंका उपादान है, इससे पुनरुक्त दोष भी नहीं आता और तात्पर्य द्वारा एक ही अर्थके प्रतिपादक होनेमें असामञ्जस्य भी नहीं रहता]। अनिर्वचनीय (मिथ्या) पदार्थ अथवा उसके अभावके कारण परमार्थ भावरूप अद्वैतकी कोई हानि नहीं हो सकती। इस निष्कर्षकी रीतिसे 'वह तुम हो' इत्याद्यर्थक महावाक्य 'वह यह देवदत्त है' इत्यादि प्रत्यभिज्ञावाक्यके सदृश अखण्ड एकरस (ब्रह्मरूप) अर्थका ही प्रतिपादन करते हैं। समता दिखलाते हैं—जैसे एक देवदत्तको दो पुरुषोंने एक ही देश और एक ही समयमें देखा। कुछ समय बीतनेपर उसी देवदत्तको उन दोनों (पूर्वद्रष्टाओं) ने ही देशकालान्तरमें पुनः देखा। उनमें से एक तो जानता है कि 'यह वही देवदत्त है'। परन्तु दूसरा पुरुष (भूल जानेसे) पूर्व कालमें देखे हुए देवदत्तसे इस समय देखे गये देवदत्तको दूसरा ही समझता है। प्रत्यभिज्ञा (जानकारी) से रहित उस दूसरे पुरुषको ज्ञाता दूसरा पुरुष बोध कराता है कि यह (सामने दिखलाई देनेवाला) देवदत्त वही (पहले देखा हुआ ही) देवदत्त है। ऐसे स्थलमें दूसरेको बोध करानेवाला दूसरा पुरुष भिन्न-भिन्न रूपसे स्पष्ट प्रतीत होनेवाले देश तथा कालका एवं भिन्न-भिन्न देशकालविशिष्ट दोनों देवदत्तोंकी एकताकी प्रत्यभिज्ञा नहीं कर रहा है, कारण कि इसमें प्रत्यक्ष विरोध है, [परोक्ष और अपरोक्ष एक नहीं हो सकता।] किन्तु उसकी प्रत्यभिज्ञा देशकालरूपी दो वैशिष्ट्योंसे उपलक्षित एक ही देवदत्तको विषय करती है। [दोनों भिन्न-भिन्न

तत्र प्रत्यभिज्ञानं देवदत्तस्वरूपैक्यम् । विशिष्टाभिधायिभ्यां 'सोऽयम्' इति पदाभ्यां स्वार्थैकदेशपरित्यागेनैकदेशलक्षणया परस्मै प्रतिपादयति ।

ननु 'सोऽयम्' इति पदार्थयोर्यद्देवदत्तैक्यं तदेव वाक्येनाऽपि प्रतिपाद्यते उताऽन्यत् ? आद्येऽनुवादप्रसङ्गः । न द्वितीयः; ऐक्यान्तरस्याऽभावादिति चेद्, न; प्रत्यभिज्ञाया अप्यनेन न्यायेनाऽप्रामाण्यप्रसङ्गात् । अभिज्ञावगतस्यैवैक्यस्य बोधनेऽनुवादकत्वम्, ऐक्यान्तरं तु नाऽस्तीत्यत्रापि सुवचत्वात् । एकस्य कालद्वयसंबन्धः प्रत्यभिज्ञाप्रमेयमिति चेद्, न; तस्याऽप्यभिज्ञाद्वयेनैव सिद्धत्वात् । अथ प्रत्यभिज्ञा-

---

देश और कालका वैशिष्ट्य उसमें उपलक्षणमात्र है, उपाधि या विशेषण नहीं है, जिससे विरोधियोंकी एककालमें उपस्थिति बाधित हो सके)। वहांपर उक्त प्रत्यभिज्ञासे देवदत्तके स्वरूपकी एकताका, विशिष्ट देवदत्तको कहनेवाले 'सः' (वह), 'अयम् (यह) इन दो पदोंसे स्वार्थके एक भागका त्याग करके एक देशकी लक्षणाके द्वारा, दूसरेके प्रति प्रतिपादन कर रहा है ।

शङ्का—वह और यह—इन दो पदार्थोंमें जो देवदत्तकी एकता प्रतीत हो रही है, वही एकता क्या वाक्यसे भी प्रतिपादित होती है ? या इससे भिन्न दूसरी ? प्रथम पक्षके माननेमें वाक्य अनुवादक हो जायगा । (जिससे उसका प्रामाण्य ही विनष्ट होगा) । दूसरा पक्ष नहीं माना जा सकता, कारण कि दूसरा (भिन्न) ऐक्य है ही नहीं ।

समाधान—उक्त शङ्का उचित नहीं है, कारण कि इस प्रकारके न्यायसे (विकल्प करनेपर) तो प्रत्यभिज्ञामें भी अप्रामाण्यका अवसर आ जायगा, कारण कि प्रत्यभिज्ञा भी अभिज्ञा (प्रथम ज्ञान) से ही प्रतीत हुए एकत्वका बोध करानेमें अनुवादक कहलायेगी और दूसरा भिन्न ऐक्य तो है ही नहीं, ऐसा प्रत्यभिज्ञाके विषयमें भी कहा जा सकता है । भूत तथा वर्तमान दोनों कालोंसे एक वस्तुके सम्बन्धका बोध कराना ही प्रत्यभिज्ञाका प्रमेय—विषय—नहीं माना जा सकता, कारण कि वह दोनों कालोंका सम्बन्ध भी दोनों अभिज्ञाओंसे (भूतकालिक ज्ञान तथा वर्तमानकालिक ज्ञानसे) ही सिद्ध हो जाता है । यदि कहा जाय कि प्रत्यभिज्ञा अपूर्व अर्थकी बोधिका नहीं है, तथापि

नस्याऽनधिगतार्थगन्तृत्वाभावेऽपि भेदभ्रमव्युदासित्वादभिज्ञाभ्यां भेदभ्रमाव्युदासिनीभ्यां फलतो विशेषसद्भावात् प्रामाण्यं तर्हि 'सोऽयम्' इति वाक्यस्याऽप्येवमेव पदाभ्यां विशेषसद्भावात् प्रामाण्यमस्तु। एवं च तत्त्वमसिवाक्यमपि त्वंपदार्थे कर्तृत्वाद्यंशं विरोधिनं परित्यज्य साक्षिमात्रमुपादाय तत्पदार्थे परोक्षाद्यंशपरित्यागेनाऽवशिष्टेन चिन्मात्रेणैक्यं पदार्थप्रतीतिसमये प्रतिपन्नमपि भेदभ्रमव्युदासाय प्रतिपादयति। तदयं प्रयोगः—तत्त्वमस्यादिवाक्यं अखण्डार्थनिष्ठम्, कार्यकरणव्यतिरिक्तद्रव्यनिष्ठत्वे सति समानाधिकरणत्वात्, सोऽयं देवदत्त इति वाक्यवद् इति।

ननु मृद्घटो नीलमुत्पलमित्यादौ पदार्थयोः प्रत्येकमसाधारणमैक्यमेकैकपदप्रमेयं पदार्थयोरितरेतरैक्यं तु वाक्यप्रमेयमित्यनधिगतार्थगन्तृ-

---

भेदरूप भ्रमका निराकरण करती है, इसलिये भेदभ्रमको दूर करनेमें असमर्थ दोनों अभिज्ञाओंसे प्रत्यभिज्ञा विलक्षण है, अतः प्रत्यभिज्ञाका प्रामाण्य माना जाता है, तो 'सोऽयम्—वह यह' इस वाक्यका भी इसी भांति (भेदभ्रम दूर करना रूप विशेष होनेसे) पदों (पदार्थों) की अपेक्षा विशेष होनेके कारण प्रामाण्य मान लिया जायगा। इससे ही 'तत्त्वमसि—वह तू है' यह वाक्य भी त्वं पदार्थमें विद्यमान कर्तृत्वरूप विरोधी अंशका त्याग करके साक्षी (चैतन) मात्र अर्थका ग्रहण करके तत् पदार्थमें परोक्ष आदि अंशको छोड़कर पदार्थप्रतीति कालमें ज्ञात हुए भी शेष चिन्मात्र (चैतन्यमात्र) अर्थके साथ एकत्वका—अभेदका—भेदभ्रम दूर करनेके लिए प्रतिपादन करता है। इससे यों अनुमानके प्रयोगका स्वरूप होता है—'तत्त्वमसि' आदि वाक्य अखण्ड अर्थके बोध करानेमें तात्पर्यवाले हैं, कार्यकारणसे अतिरिक्त द्रव्यपरक होते हुए समानविभक्त्यन्त या एकार्थके प्रतिपादक होनेसे, 'सोऽयं देवदत्तः'—वह यह देवदत्त है' इस प्रत्यभिज्ञा वाक्यके समान।

शङ्का—'मिट्टी घड़ा, नील कमल' इत्यादि स्थलमें मिट्टी और घड़ा आदि पदार्थोंमें प्रत्येकगत असाधारण एकत्व एक-एक पदका प्रतिपाद्य विषय है, दोनों पदार्थोंका परस्पर एकत्व तो वाक्यका ही प्रतिपाद्य प्रमेय है, इसलिए प्रकृत स्थलमें जैसे अपूर्व अर्थका बोधन करनेसे ही उक्त

त्वादेव यथा वाक्यप्रामाण्यं तथाऽत्राप्यस्तु। तथा च भेदभ्रमव्युदासमात्रविशेषात् प्रामाण्यमित्येषा कष्टकल्पना न भविष्यतीति चेद्, न; वैषम्यात्। तत्र हि कार्यकारणयोर्द्रव्यगुणयोश्च भिन्नयोरैक्यं प्रतिपाद्यते 'व्यवहारे भट्टनयः' इति न्यायेन भेदाभेदाभ्युपगमात्। अत्र त्वखण्डैकरसं प्रतिपाद्यत इत्यस्ति महद्वैषम्यम्।

अत्र केचिदाहुः—'य आत्मनि तिष्ठन्' 'एष त आत्मा सर्वान्तरः' इत्यादिशास्त्राज्जीवब्रह्मणोरपि भेदाभेदावभ्युपेयौ। अन्यथा पदार्थवाक्यार्थयोः साङ्कर्यादिति, ते प्रष्टव्याः—तत्र भेदो ज्ञानेन निवर्त्यते न वेति? न चेन्मोक्षो न स्यात्। निवर्त्यते चेत्, तदाऽपि भेदाभेदविषयमेव

वाक्योंका प्रामाण्य माना जाता है, वैसे ही प्रकृत ('तत्त्वमसि' इत्यादि महावाक्य अथवा 'सोऽयं देवदत्तः' इत्यादि प्रत्यभिज्ञावाक्यमें) भी माना जाना चाहिये। इससे भेदभ्रमके दूरीकरणमात्ररूप विशेषके द्वारा इनका प्रामाण्य होता है, ऐसी क्लिष्ट कल्पना नहीं करनी होगी।

समाधान—उक्त कथन उचित नहीं है, कारण कि 'मृद्घटः' इस वाक्यकी अपेक्षा (प्रत्यभिज्ञा और महावाक्योंमें) विषमता है, क्योंकि 'मृद्घटः' इत्यादि वाक्योंसे भिन्न-भिन्न कार्य-कारण तथा गुण-द्रव्यका एकत्व प्रतिपादन किया जाता है। [परस्पर भिन्नोंकी एकताके प्रतिपादनमें आनेवाले विरोधका परिहार करते हैं—] 'व्यवहारमें मीमांसक कुमारिलभट्टका मत माना जाता है' इस न्यायसे (कार्य-कारण और गुण-गुणीमें) भेद और अभेद दोनों माने गये हैं। और प्रकृतमें (महावाक्योंसे) तो अखण्ड एकरस—सर्वथा भेदशून्य—का प्रतिपादन किया जाता है, इसलिए अधिक वैषम्य है।

इस विषयमें भेदाभेदवादी भास्कर आदि किसी व्याख्याताओंका कहना है कि—'जो आत्मामें स्थित होता है', वह यह आत्मा सर्वान्तर—सबका अन्तर्यामी है—' इत्यर्थक शास्त्रसे जीव और ब्रह्ममें भी भेद और अभेद मानना चाहिए—अन्यथा पदार्थ और वाक्यार्थका सांकर्य हो जायगा। इनसे प्रश्न करना है कि यह भेद क्या अभेदज्ञान द्वारा निवृत्त होता है या नहीं? यदि निवृत्त नहीं होता, तो मोक्षकी उपपत्ति नहीं हो सकती। और यदि निवृत्त होता है, तो भी प्रश्न होगा कि भेदाभेदविषयक ही

ज्ञानं तन्निवर्त्तकम् उताऽभेदमात्रविषयं ज्ञानान्तरम्। नाऽऽद्यः, ज्ञानस्य स्वविषयनिरास्यत्वायोगात्। न द्वितीयः, अभेदज्ञानजनकप्रमाणाभावात्। त्वन्मते शास्त्रस्य भेदाभेदविषयत्वात्। शास्त्रजन्यभेदाभेदज्ञानाभ्यासादभेदज्ञानं जायत इति चेद्, एवमपि ज्ञाननिवर्त्त्यत्वे भेदस्य मिथ्यात्वं स्यात्। ज्ञानेनाऽज्ञानं निवर्त्यते, भेदस्तु कर्मभिर्विनश्यतीति चेद्, न; 'ब्रह्म वेद ब्रह्मैव भवति' इत्येवकाराभिधेयभेदनिरासस्य ज्ञानप्रयुक्तत्वावगमात्। अथ ज्ञानप्रागभाववद्भेदस्य ज्ञाननिवर्त्त्यत्वेऽपि न मिथ्यात्वं तथापि किं येनैवाऽऽकारेण जीवस्य ब्रह्मणो भेदस्तेनैवाऽभेदोऽपि उताऽऽकारान्तरेण? आद्ये भेदनिवृत्तावभेदोऽपि निवर्तेत, तत्प्रयोजकाकारस्यैक्यात्। द्वितीये

ज्ञान उसकी निवृत्ति कर देता है? अथवा अभेदमात्रविषयक दूसरा ज्ञान उसकी निवृत्ति करता है?। इनमें प्रथम पक्ष नहीं बन सकता, कारण कि ज्ञान अपने विषयका निवारक नहीं हो सकता है (अर्थात् ज्ञानसे ज्ञानविषयका निराकरण नहीं हो सकता)। दूसरा पक्ष भी युक्त नहीं है, कारण कि अभेद-विषयक अतिरिक्त ज्ञानको उत्पन्न करानेवाला प्रमाण नहीं है। तुम्हारे (भेदाभेदवादीके) मतमें शास्त्रका तो भेदाभेद विषय है। शास्त्र द्वारा उत्पन्न हुए भेदाभेदज्ञानके अभ्यास—पुनः पुनः परिशीलन—से अभेद-विषयक ज्ञान उत्पन्न होता है ऐसा मान लेनेपर भी तो भेदको, ज्ञान द्वारा निवर्त्य मान लेनेसे, मिथ्या मानना होगा। ज्ञानसे अज्ञानकी निवृत्ति की जाती है और कर्मोंके द्वारा भेदका विनाश हो जाता है, ऐसा मानना उचित नहीं है क्योंकि 'ब्रह्म जाननेवाला ब्रह्म ही हो जाता है—' इत्यर्थक वाक्यमें एवकार (एवपद) का वाच्य अर्थभूत भेदका विनाश ज्ञानके द्वारा होता है, ऐसा पाया जाता है। यद्यपि कहा जाय कि ज्ञानके प्रागभावके सदृश भेद ज्ञानसे नष्ट होता है, ऐसा माननेपर भी मिथ्या नहीं कह सकते, तथापि प्रश्न होता है कि जिस आकारसे जीव और ब्रह्मका भेद है, उसी आकारसे अभेद भी है? अथवा दूसरे आकारसे? इनमें प्रथम पक्षके माननेमें भेदकी निवृत्ति होनेपर ही अभेद की भी निवृत्ति हो जायगी [दोनोंका एक ही आकार होनेसे एककी निवृत्ति होनेपर दूसरे की भी निवृत्ति हो जायगी], कारण कि उसका प्रयोजक आकार एक ही है (जो नष्ट हो चुका)।

निरवयवब्रह्मभूतस्य जीवस्य धर्मभूतो भेदो न तावत्कर्मणा निवर्त्तयितुं शक्यते। ज्ञानेन तन्निवृत्तावपि यदि तेन भेदेनोपलक्षितो जीवस्तदा ब्रह्मैव जीवः स्यात्। अथ भेदविशिष्टस्तर्हि भेदनाशे जीवोऽपि नश्येत्। अथ विशिष्टाकारनाशेऽपि विशेष्यांशो जीवो ब्रह्मैक्यरूपं मोक्षमनुभवेत्, तर्हि संसारदशायामपि ब्रह्मतादात्म्यापन्नः स एव विशेष्यांशो जीव इत्यभ्युपेयम्; संसारमोक्षयोर्वैयधिकरण्यायोगात्। एतेनैतदप्यपास्तं यदमृतानन्देनोच्यते न युगपज्जीवब्रह्मणोर्भेदाभेदौ विरोधात्, किन्तु पदार्थत्वदशायामतिरेको वाक्यार्थत्वदशायां चाऽखण्डत्वमिति। 'एकधैवानुद्रष्टव्यं नेह नानाऽस्ति किं चन' इत्यादिश्रुतिविरोधश्च। न च 'य आत्मनि तिष्ठन्' इत्यादिश्रुतिर्भेदाभेदौ प्रतिपादयति, किन्तु भ्रान्तिप्रसिद्धं भेदमनूद्याऽभेदमेव बोधयति। कथं तर्हि पदार्थवाक्यार्थयोः साङ्कर्यपरिहार इति

दूसरे पक्षके माननेमें अवयवशून्य ब्रह्मात्मक जीवका धर्मभूत भेद कर्म द्वारा तो निवृत्त नहीं किया जा सकता। और ज्ञान द्वारा उसकी निवृत्ति होनेपर भी यदि उस भेदसे उपलक्षित जीव माना जाय, तो ब्रह्म ही जीव कहलायेगा। और यदि भेदविशिष्ट जीव है, तो भेदके नष्ट होनेपर जीवका भी विनाश हो जायगा। यदि कहो कि विशिष्ट आकारका नाश होनेपर भी विशेष्यभूत जीवरूप अंश ब्रह्माभेदरूप मोक्षका भागी हो जायगा, तो संसारदशामें भी ब्रह्मके साथ तादात्म्यको प्राप्त हुआ वही विशेष्यभूत अंश जीव है, ऐसा मानना होगा। कारण कि संसार और मोक्षका वैयधिकरण्यसे सम्बन्ध नहीं हो सकता। (अर्थात् जिसको संसार है, उसको ही मोक्ष भी प्राप्त होता है, अन्यथा मोक्ष पुरुषार्थ नहीं माना जायगा)। इससे यह कहना भी खण्डित हो जाता है कि जो अमृतानन्द ने कहा है 'जीव और ब्रह्मका एक कालमें ही विरोध होनेसे भेद और अभेद नहीं हो सकते, किन्तु पदार्थदशामें भेद और वाक्यार्थदशामें अखण्डत्व—अभेद—है, और 'एक ही प्रकारका दर्शन—साक्षात्कारात्मक ज्ञान—करना चाहिए, इसमें अनेक—भेद—कुछ नहीं है' इत्यर्थक श्रुतिसे भी विरोध आता है। 'जो आत्मामें स्थित हो—' इत्यर्थक श्रुति भी भेदाभेदका प्रतिपादन नहीं करती है। किन्तु भ्रमसिद्ध भेदका अनुवाद करके अभेदका ही बोधन करती है।

पदार्थ तथा वाक्यार्थका सङ्कर होना कैसे हटाया जायगा यदि ऐसा प्रश्न करो,

चेद्, उच्यते—तत्र न तावत् पदवाच्यस्य वाक्यार्थेन साङ्कर्यप्रसङ्गोऽस्ति। वाच्यस्याऽविद्याकल्पितोपाधिविशिष्टत्वात्। पदलक्ष्यस्य तु वाक्यार्थत्वमिष्टमेव। तस्मान्महावाक्यस्याऽखण्डार्थतायां न कदाचिदनुपपत्तिः।

तथा 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्याद्यवान्तरवाक्यमप्यखण्डार्थनिष्ठम्, लक्षणवाक्यत्वात्, प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवत्। तत्र कश्चिच्चन्द्रप्रातिपदिकार्थानभिज्ञः कंचित्पप्रच्छ अस्मिन् ज्योतिर्मण्डले कश्चन्द्रो नामेति? सोऽपि चन्द्रप्रातिपदिकमात्रार्थविवक्षया प्रयुङ्क्ते प्रकृष्टप्रकाशश्चन्द्र इति। तत्र प्रकाशशब्दः प्रकाशत्वसामान्याभिधानमुखेन लक्षणया व्यक्तिविशेषे वर्तते। प्रकृष्टशब्दश्च प्रकर्षगुणाभिधानमुखेन लक्षणया प्रकाशविशेषे वर्तते। तत्र गुणसामान्ययोश्चन्द्रपदानभिधेयत्वात्तदुभयं व्युदस्य तत्समवायिप्रकाशविशेष एव चन्द्रपदाभिधेयतया समर्प्यत इति प्रकृष्टप्रकाश-

---

तो उत्तर कहा जाता है—उसमें पदके वाच्यभूत अर्थके साथ तो वाक्यके अर्थका साङ्कर्य प्रसंग नहीं है, कारण कि वाच्य अर्थ अविद्याकल्पित उपाधिसे विशिष्ट है। और पदके लक्ष्यभूत अर्थका वाक्यार्थ होना तो अभीष्ट ही है, इसलिए महावाक्यको अखण्डार्थपरक माननेमें कोई अनुपपत्ति नहीं हो सकती।

[एवं 'सत्य, ज्ञान, और अनन्त ब्रह्म है' इत्याद्यर्थक महावाक्योंका भी अखण्डरूप अर्थके बोधनमें ही तात्पर्य है, कारण कि ये लक्षणवाक्य हैं, 'अधिक प्रकाशवाला चन्द्रमा' इस लक्षणवाक्यके सदृश। (दृष्टान्तमें दिये गये लक्षणवाक्यका अखण्ड अर्थमें तात्पर्य दिखलाते हैं—) चन्द्रपदार्थको न जाननेवाला कोई पुरुष किसीसे प्रश्न करता है कि इस प्रकाशमान ग्रहनक्षत्रमण्डलमें चन्द्रमा कौन है। वह भी (उत्तर देनेवाला पुरुष) चन्द्ररूप प्रातिपदिकके ही अर्थको प्रकट करनेकी इच्छासे कहता है कि इनमें सबसे अधिक प्रकाशवाला चन्द्रमा है। इस वाक्यमें प्रकाशपद प्रकाशत्वसामान्यको कहता हुआ लक्षणाके द्वारा व्यक्तिविशेषका बोधक हो जाता है, और प्रकृष्ट शब्द प्रकर्ष—आधिक्य—गुणका बोध कराता हुआ लक्षणासे प्रकाशविशेषका बोध कराता है। इनमें गुण तथा सामान्य ये दो चन्द्रपदके अभिधेय अर्थ नहीं हैं, इसलिए इन दोनोंका त्यागकर उसमें रहनेवाले प्रकाशविशेषका ही चन्द्रपदके अभिधेय अर्थके रूपमें समर्पण किया जाता है, इसलिए प्रकृष्ट,

चन्द्रशब्दानामेकार्थता सिध्यति। न चैवं पदद्वयवैयर्थ्यम् , अप्रकाश-मेघादिव्यावृत्तौ प्रकाशपदस्याऽल्पप्रकाशनक्षत्रादिव्यावृत्तौ प्रकर्षपदस्य चोपयोगात् । एवं सत्यज्ञानादिवाक्येऽप्यखण्डार्थता योजनीया।

यत्तूक्तं ब्रह्मणः परिनिष्ठितवस्तुतया मानान्तरयोग्यस्याऽपि मानान्त-रेणाऽनुपलभ्यमानत्वात्तद्बोधकानां वेदान्तानां चित्रगतनिम्नोन्नतभावबोध-कचक्षुर्वदप्रामाण्यमिति। तत्र वक्तव्यं किं प्रमाणान्तरयोग्यत्वे सति तद-नुत्पत्तौ विषयस्याऽभावे निश्चिते तत्र शब्दमिथ्यात्वमाशङ्क्यते किं वा प्रमाणान्तरसंभिन्नार्थविषयत्वात् पौरुषेयवचोवत्सापेक्षं प्रामाण्यमिति उत प्रमाणान्तरयोग्यार्थविषयतया तत्सिद्धार्थानुवादाशङ्केति ? नाऽऽद्यः, माना-न्तरानुदयमात्रेण तथात्वे सर्वत्राऽतिप्रसङ्गात्। पौरुषेयवचसां मानान्तर-

---

प्रकाश तथा चन्द्र—इन तीनों शब्दोंका एक ही अर्थ सिद्ध होता है। और दो पदोंका देना भी व्यर्थ नहीं हो सकता, कारण कि प्रकाशशून्य मेघ आदिकी व्यावृत्तिके लिए प्रकाशपदका और कम प्रकाशवाले नक्षत्र आदिकी व्यावृत्तिके लिए प्रकर्षपदका उपयोग है। इसी प्रकार सत्य, ज्ञान आदि वाक्यमें सब पदोंका एक ही अखण्डरूप अर्थके बोधनमें तात्पर्य समझना चाहिए।

पूर्वमें जो यह कहा गया था कि परिनिष्ठित—सिद्ध—वस्तु होनेके कारण प्रत्यक्षादि प्रमाणान्तरके योग्य होते हुए भी ब्रह्मका दूसरे प्रमाणोंसे उपलम्भ (ज्ञान) नहीं होता है, अतः चित्रगत रेखात्मक निम्नोन्नत भावको दिखलानेवाले चक्षुके तुल्य ब्रह्मबोधक वेदान्तवाक्य भी अप्रमाण हैं। यहांपर पूछना यह है कि क्या प्रमाणान्तरके योग्य होते हुए उसके प्रमाणान्तरसे उपलब्ध नहीं हो सकनेपर विषयके अभावका निश्चय हो जानेसे शब्दमिथ्यात्व—अर्थात् वेदान्तवाक्यरूप शब्द प्रमाणके मिथ्या होने—की आशङ्का की जा रही है? या प्रमाणान्तरयोग्य अर्थ-विषयक होनेसे उनका पुरुष द्वारा कथित वचनके सदृश सापेक्ष प्रामाण्य है? अथवा प्रमाणान्तरयोग्य विषय होनेसे उस प्रमाणान्तरसे सिद्ध अर्थके अनु-वादक होनेकी आशङ्का है? इनमें प्रथम पक्ष नहीं बनता, कारण कि दूसरे प्रमाणका केवल उदय न होनेसे ही वैसा (विषयका अभाव) माननेपर सर्वत्र अतिप्रसङ्ग आ जाता है (अर्थात् जिस स्थलमें प्रमाणान्तरकी प्रसिद्धि नहीं होगी वहींपर विषयका अभाव कह देना होगा)। पुरुषकथित वाक्योंमें

सापेक्षत्वेऽपि वेदवचसस्तदयोगात् । न द्वितीयः, मानान्तरसंभिन्नार्थत्वाभावात् । विमतं वेदान्तवाक्यं मानान्तरसंभिन्नार्थम्, भूतार्थविषयत्वाद् नदीतीरफलसत्तावाक्यवदिति चेद्, न; पौरुषेयवचनत्वस्योपाधित्वात् । अनुभूतार्थस्मृतिवदिति निदर्शनेऽपि स्वार्थप्रवृत्तज्ञानान्तरजन्यत्वमुपाधिः । नहि वेदवाक्यं मानान्तरेणाऽर्थमुपलभ्य विरचितं येन साधनव्यापकता स्यात् । अथ मन्यसे—वेदान्तवाक्यस्य भूतार्थविषयत्वान्मानान्तरयोग्यार्थत्वं साधयित्वा तेन च संभिन्नार्थता साधनीयेति, तर्हि विधिवाक्या-

---

मानान्तरकी अपेक्षा रहते हुए भी 'अपौरुषेय वेदवाक्योंमें सापेक्षत्वका सम्बन्ध नहीं आ सकता । दूसरा पक्ष नहीं हो सकता, कारण कि वेदवाक्योंमें मानान्तरसम्भिन्नार्थत्व—दूसरे प्रमाणसे सिद्ध पदार्थका प्रतिपादक होना—नहीं है ।

शङ्का—'विमत वेदान्तवाक्य दूसरे प्रमाणसे सिद्ध अर्थका प्रतिपादन करनेमें तात्पर्यवाले हैं, कारण कि उनका विषय सिद्ध वस्तु है, जैसे कि नदीके तीरमें फलोंकी सत्ताका बोधन करनेवाला वाक्य [इस अनुमानसे वेदान्तवाक्य मानान्तरसंभिन्नार्थताके ही प्रतिपादक माने जायँगे] ।

समाधान—उक्त अनुमानमें पौरुषेयवचनत्वरूप उपाधि है । [दृष्टान्तभूत नदीके तीरमें फलोंकी सत्ताका बोधक वाक्य तो पुरुषवचन है और दार्ष्टान्तिक पक्षभूत वेदान्तवाक्य पुरुषवचन नहीं हैं, इससे साधनाव्यापकत्व हुआ] । यदि नदीतीरफलसत्तावाक्यवत्‌के स्थानपर अनुभूत अर्थके स्मरणके तुल्य ऐसा दृष्टान्त भी दिया जाय, [क्योंकि स्मरणमें पुरुषवचनत्व नहीं है, इससे साध्यव्यापकत्व न होनेसे उक्त उपाधिका अवसर नहीं रहता] तो भी स्वार्थप्रवृत्तज्ञानान्तरजन्यत्व—अपने अर्थका प्रतिपादन करनेके लिए प्रवृत्त दूसरे ज्ञानसे उत्पन्न होना—उपाधि है । [स्मरणमें तो ज्ञानान्तरजन्यत्व (अनुभवजन्यत्व) है] परन्तु वेदवाक्य तो दूसरे प्रमाणों द्वारा विषयका ज्ञान प्राप्त करके नहीं रचे गये हैं, जिससे (उपाधिकी विघटक) साधनव्यापकता आ सके । यदि ऐसा भी मानो कि वेदान्तवाक्यका विषय सिद्ध वस्तु है, अतः उसमें मानान्तरयोग्यार्थत्व—दूसरे प्रमाणोंके योग्य विषयवाला होना—सिद्ध करके उससे ही सम्भिन्नार्थता सिद्ध की

नामपि तुच्छव्यावृत्तार्थत्वान्मानान्तरयोग्यविषयतया संभिन्नार्थता केन वार्यते ? न च विधिवाक्यत्वादेव मानान्तरयोग्यार्थत्वाभावः, लौकिकविधिवाक्येषु मानान्तरयोग्यार्थत्वदर्शनात् । तत्राऽपि तदयोग्यार्थत्वे कार्यसंबन्धग्रहणासंभवाद्वेदेऽपि तत्प्रतिपत्तिर्न स्यात् । अथ वैदिककार्यस्य कालत्रयातीतस्वभावत्वाद् न मानान्तरयोग्यता तर्हि ब्रह्मणोऽपि रूपादिहीनस्वभावत्वादेव मानान्तरयोग्यता न भविष्यति । अस्ति

जायगी, तो विधिवाक्य भी तुच्छसे व्यावृत्त अर्थवाले हैं, अतः मानान्तरयोग्य विषयवाले ही हो जायँगे, इससे इनकी संभिन्नार्थताका वारण कैसे किया जा सकता है । [यहांपर मानान्तरयोग्य और मानान्तरसम्भिन्न दो पद पृथक्-पृथक् दिये गये हैं । मानान्तरयोग्यपदसे केवल इतना ही अर्थ लेना चाहिये कि जिस विषयका प्रतिपादन वेदान्तवाक्य कर रहे हैं, वह विषय चक्षुरादिसे भिन्न प्रमाणोंसे भी जाना जा सकता है, क्योंकि वेदान्तवाक्यका विषय घट, पट आदिके सदृश सिद्धवस्तुभूत ब्रह्म है और घट, पट आदि सिद्ध वस्तु केवल शब्दगम्य नहीं हैं, किन्तु मानान्तरगम्य भी हैं । दूसरे मानान्तरसम्भिन्नपदसे वह अर्थ लिया जाता है जो कि दूसरे प्रमाणोंसे—संभिन्न—सम्बद्ध अर्थात् गृहीत है, वह अर्थ केवल योग्यमात्र ही नहीं, किन्तु उसका ग्रहण भी किया गया है । इससे विधिवाक्योंके विषय केवल शब्दैकगम्य ही माने जायँ, तो शब्दोपकल्पितमात्र वन्ध्या पुत्रादिके समान हो जायँगे । उनसे भेद दिखलानेके लिए मानान्तरयोग्यत्वरूप वैलक्षण्य विधिवाक्यप्रतिपाद्य विषयमें मानना आवश्यक है और जो मानान्तरयोग्य है, उसका मानान्तरसम्भिन्न होना कथमपि असम्भव नहीं है, प्रत्युत सुतरां सम्भव है, इसलिए विधिवाक्योंका भी तात्पर्य मानान्तरगृहीतार्थके बोधनमें ही माननेका अतिप्रसङ्ग आ जायगा, जो इष्ट नहीं है] । विधिवाक्य होनारूप हेतुमात्रसे मानान्तरयोग्यार्थत्वका अभाव नहीं कहा जा सकता, कारण कि लौकिक विधिवाक्यमें (घटमानय इत्यादि स्थलमें) मानान्तरयोग्यार्थत्व देखा जाता है । यदि लौकिक वाक्योंमें मानान्तरयोग्यार्थत्वका अभाव हो, तो कार्यके सम्बन्धज्ञानका होना असम्भव हो जायगा, इससे वेदमें भी उसकी—कार्यसम्बन्धग्रहकी—प्रतिपत्ति न हो सकेगी । यदि वेदविहित कार्यका कालत्रयातीत (तीनों कालोंके अगोचर) स्वभाव होनेसे मानान्तरयोग्य होना नहीं माना जा सकता यह कहा जाय, तो ब्रह्मका स्वभाव भी (स्वरूप भी) रूपादिसे विहीन ही है, इसलिए उसमें मानान्तरके विषय

ब्रह्मणि मानान्तरं स्वरूपचैतन्याख्यमिति चेद् , न; तस्यैव ब्रह्मत्वाद् । स्वरूपचैतन्यस्य ब्रह्मप्रमापकत्वेऽपि तत्संभिन्नार्थत्वमात्रेण न तत्सापेक्षत्वदोषः । स्वप्रकाशपुरुषान्तरसंवेदनगोचरानुमानस्य तत्सापेक्षत्वदोषादर्शनात् । नाऽपि तृतीयः, स्पर्शज्ञानयोग्यद्रव्यविषयस्य चक्षुषोऽनुवादकत्वादर्शनात् । शब्द एवेयमनुवादकतेति चेत्, तथापि विधिवाक्ये तामाशङ्कां कथं परिहरिष्यसि । लौकिकस्य विध्यर्थस्य मानान्तरयोग्यत्वेऽपि वैदिकस्य तदयोग्यत्वादिति चेद् , भूतार्थेऽपि तत्समानम् । न च शब्द-

---

होनेकी योग्यता प्राप्त न होगी । ब्रह्ममें विद्यमान स्वरूपचैतन्यनामक मानान्तर भी नहीं कह सकते, कारण कि वही स्वरूपचैतन्य ब्रह्मरूप है। स्वरूपचैतन्यके ब्रह्मनिश्चायक होनेपर भी उसके सिद्धभूत अर्थ होनेसे ही उससे सापेक्ष होनेका दोष नहीं आ सकता (अर्थात् यद्यपि ब्रह्मप्रमा स्वरूपचैतन्य द्वारा ही होती है, इसलिए स्वरूपचैतन्यरूप अन्य प्रमाणसे सिद्धका ही प्रतिपादन वेदान्तवाक्योंसे होता है, ऐसा मानना ही होगा, तथापि वेदान्तवाक्यसे प्रतिपाद्य ब्रह्मको स्वरूपचैतन्यकी अपेक्षा नहीं है); कारण कि स्वप्रकाशभूत दूसरे पुरुषके ज्ञानविषयक अनुमानमें उससे सापेक्ष होना दोष नहीं देखा गया है। [जैसे सांख्यमतमें परपुरुषविषयक अनुमान स्वप्रकाशरूप पुरुषको विषय करता हुआ भी उसके स्वरूपभूत प्रकाशसे सापेक्ष नहीं माना जाता एवं प्रभाकरमतमें परज्ञान-विषयक अनुमान भी स्वप्रकाशरूप ज्ञानको विषय करता हुआ भी स्वरूपभूत स्वप्रकाशज्ञान-सापेक्ष नहीं है, वैसे ही प्रकृतमें भी ब्रह्मप्रमा स्वरूपचैतन्यको विषय करती हुई भी स्वरूपचैतन्यापेक्ष नहीं है।] तीसरा पक्ष (मानान्तरके योग्य अर्थको विषय करनेसे अनुवादक होनेकी आशङ्कारूप पक्ष) भी नहीं बनता, कारण कि स्पर्शज्ञानके योग्य घटादि द्रव्यको विषय करनेवाले चक्षु आदि प्रमाण अनुवादक नहीं देखे गये हैं। यदि शब्दरूप प्रमाणस्थलमें ही उक्त रीतिसे अनुवादकता मानी जाती है, ऐसा कहो, तो भी विधिवाक्यस्थलमें उक्त आशङ्काका परिहार कैसे किया जा सकेगा। [विधिवाक्य भी शब्द-प्रमाण ही है।] लौकिकविधिवाक्यके प्रतिपाद्य विषयके मानान्तरयोग्य होनेपर भी वैदिक-विधिप्रतिपाद्य अर्थ मानान्तरयोग्य नहीं हो सकता, यदि ऐसा कहा

स्यैवाऽनुवादकत्वशङ्केति नियन्तुं शक्यम्, शब्दावगतेऽर्थे मानान्तरमेवाऽनुवादकमित्यस्याऽपि सुवचत्वात्। तस्माद्भूतार्थनिष्ठमपि वैदिकं वचो निरपेक्षं प्रमाणम्।

ननु सर्वत्रोत्तमवृद्धो मानान्तरेणाऽर्थमुपलभ्य तत्र शब्दं प्रयुङ्क्ते। मध्यमवृद्धश्च तस्माच्छब्दात्तमर्थमवगत्य तत्र प्रवर्त्तते। तां च प्रवृत्तिमुपलभ्य बालो व्युत्पद्यते यथाव्युत्पत्ति च शब्दस्य बोधकत्वम्। ततो मानान्तरसंभिन्नस्यैवाऽर्थस्य शब्दप्रमेयतया कथं वचसो निरपेक्षं प्रामाण्यम्? नैष दोषः; बालो हि स्वयं मानासंभिन्नं घटादिप्रमेयमात्रं प्रत्यक्षादि-

---

जाय, तो सिद्धवस्तुविषयक वेदान्तवाक्योंमें भी उक्त कथन समानरूपसे संगत हो सकता है। [और दूसरा समाधान यह भी हो सकता है कि] शब्दप्रमाण ही अनुवादक है, इस आशङ्काका नियमन नहीं किया जा सकता अर्थात् ऐसा नियम नहीं बनाया जा सकता कि शब्दप्रमाण ही अनुवादक है, क्योंकि ऐसा भी कहा जा सकता है कि शब्दप्रमाणसे ज्ञात अर्थका अन्य प्रमाण ही अनुवादक है। इसलिए सिद्धभूत ब्रह्मके प्रतिपादक वेदान्तवचन निरपेक्ष (दूसरे प्रमाणोंकी अपेक्षा न रखते हुए स्वतन्त्र) प्रमाण हैं।

[शब्द प्रमाणको सापेक्ष सिद्ध करनेके लिए शङ्का करते हैं—] शब्दप्रयोगस्थलमें सर्वत्र देखा गया है कि उत्तम वृद्ध प्रत्यक्षादि दूसरे प्रमाणोंके द्वारा अर्थकी उपलब्धि करके उसका बोध करानेके लिए शब्दका प्रयोग करता है। और मध्यम वृद्ध अर्थात् जिसके प्रति शब्दप्रयोग किया जाता है, वह उस शब्दसे प्रतिपाद्य अर्थका बोध करके उसके अनुसार कार्य करनेमें प्रवृत्त होता है। मध्यम वृद्धकी प्रवृत्तिको देखकर बालकको उस अर्थमें शब्दकी व्युत्पत्तिका ग्रह होता है और व्युत्पत्तिके अनुसार ही शब्द अर्थका बोधक होता है। [व्युत्पत्ति प्रवृत्तिदर्शनसे होती है, प्रवृत्ति शब्दप्रयोगसे होती है और शब्दप्रयोग प्रमाणान्तरसे ज्ञात अर्थकी विवक्षासे किया जाता है, इस परम्परासे शब्द प्रमाण प्रमाणान्तरकी अपेक्षा रखता है, यह सिद्ध होता है—इस आशयसे शङ्काका उपसंहार करते हैं—] इसलिए प्रमाणान्तरसे सिद्ध अर्थ ही शब्दका प्रतिपाद्य प्रमेय होनेसे शब्दप्रमाणमें निरपेक्ष (स्वतन्त्र) प्रामाण्य कैसे हो सकता है?

समाधान—उक्त दोष नहीं आ सकता अर्थात् शब्दमें निरपेक्ष प्रामाण्य है,

भिरवगत्य तत्र प्रवर्त्तमानः स्वदृष्टान्तेन मध्यमवृद्धस्याऽपि मानान्तरामिश्रितशुद्धप्रमेयज्ञानपूर्विकां प्रवृत्तिमनुमाय तस्मिन् प्रमेयमात्रे शब्दस्योत्तमवृद्धप्रयुक्तस्य सामर्थ्यमवगच्छति। न च वाच्यं कार्यस्य केवलस्य शब्दशक्तिविषयत्वेऽपि सिद्धार्थस्य मानान्तरसंभिन्नस्यैव तद्विषयतेति। तत्र तावत् कार्यवाक्यगतसिद्धपदानि मानान्तरासंभिन्नेऽर्थे शक्तिमन्ति कार्यवाक्यगतत्वात्, कार्यपदवत्। तथा च तद्दृष्टान्तेनेतरेषामपि सिद्ध-

---

कारण कि बालक स्वयं दूसरे प्रमाणोंके द्वारा न जाने गये घटादि प्रमेयजातको प्रत्यक्ष आदि प्रमाणोंसे जानकर उन अर्थोंमें प्रवृत्त होता हुआ अपनेको दृष्टान्त बनाकर दूसरे प्रमाणोंसे असंबद्ध शुद्ध प्रमेय ज्ञानके अनन्तर ही मध्यम वृद्धकी भी होनेवाली प्रवृत्तिका अनुमान करके उस प्रमेयमात्रमें (मात्रपदसे मानान्तरसम्भेदका वारण है) उत्तम वृद्ध द्वारा युक्त शब्दकी सामर्थ्य (अर्थबोध करना) समझ लेता है। [व्युत्पित्सु बालक शब्दप्रयोगरूप अथवा घटाहरणादिरूप व्यवहार देखता हुआ स्वयं मानान्तरासंभिन्न शुद्ध घट, पट आदि विषयोंका ज्ञान प्राप्त कर लेता है और यथावसर प्राप्त हुए ज्ञानके बलपर घटाहरणादि अथवा घट आदि शब्दके व्यवहारमें प्रवृत्त होता है एवं मध्यम वृद्धिकी प्रवृत्ति देखकर वह निश्चय कर लेता है कि इस मध्यम वृद्धकी प्रवृत्ति भी मेरे समान ही उत्तम वृद्धके शब्दसे मानान्तरासंभिन्न अर्थको जान करके ही हुई है, अतः उत्तम वृद्धका शब्द केवल मानान्तरासम्भिन्न अर्थका ही प्रतिपादक है, ऐसा निश्चय करता है। इस प्रक्रियासे शब्दका निरपेक्ष प्रामाण्य सिद्ध होता है]। केवल कार्यरूप अर्थको शक्तिका (शब्दशक्तिका) विषय मान भी लें, तो भी सिद्धभूत पदार्थ तो प्रमाणान्तरसे सिद्ध होकर ही शब्दशक्तिका विषय हो सकता है, ऐसा भी नहीं कहा जा सकता, [कारण कि अनुमानसे शब्दोंकी मानान्तरासिद्ध अर्थके बोधनमें सामर्थ्य सिद्ध होती है। [अनुमानप्रयोग दिखलाते हैं—) 'कार्यके प्रतिपादक वाक्यमें पढ़े गये सिद्ध वस्तुपरक पद (पक्ष) मानान्तरसे असम्भिन्न अर्थमें शक्तिशाली (वाचक) हैं (साध्य), कार्यप्रतिपादक वाक्यमें पठित होनेसे (हेतु), कार्यबोधक पदके सदृश (दृष्टान्त)। इस प्रकार उस कार्यपरक वाक्यगत सिद्धवस्तु-

पदानां तत्साधनीयम् । यत्तूत्तमवृद्धस्याऽर्थोपलब्धिहेतुभूतं मानान्तरं तद्विवक्षोत्पादनद्वारा शब्दप्रयोगे हेतुर्न तु शब्दप्रमेयेऽन्तर्भवति तच्च बालस्तदाऽवगमिष्यति यदा स्वयमुत्तमवृद्धो भूत्वा शब्दप्रयोगं करिष्यति ।

अत्र केचिच्चोदयन्ति—व्यर्थोऽयं व्युत्पत्तिनिरूपणप्रयासः । शब्द-स्याऽर्थासंस्पर्शित्वात् । नह्यङ्गुल्यग्रे हस्तियूथशतमास्त इत्यादिशब्दैः कश्चिदर्थः प्रमीयते । यत्राऽप्याप्तवाक्ये प्रमीयते तत्राऽपि मानान्तरनिबन्धना सा प्रमितिर्न शब्दनिबन्धनेति ।

तदेतच्चोद्यं प्राभाकरः परिहरति । यद्यपि पौरुषेयवाक्यैर्नाभिधेय-संसर्गः प्रमीयते तथाप्येवमयं पुरुषो वेदेति वक्तृज्ञानविशेषः प्रमीयते

परक पदको दृष्टान्त करके अन्य भी सिद्ध पदोंका मानान्तरासम्भिन्न अर्थमें शक्तिका होना अनुमान द्वारा सिद्ध कर लिया जायगा । इससे पूर्व उत्तम वृद्धका अर्थज्ञान करनेमें कारणभूत मानान्तरका जो निर्देश किया गया है, वह विवक्षाको उत्पन्न करा कर शब्दप्रयोग करनेमें कारण है । शब्द प्रमेय कोटिमें नहीं आ सकता [विवक्षाके अधीन ही शब्दप्रयोग होता है, और विवक्षा ज्ञात अर्थकी ही होती है, इसलिए मानान्तरसम्भिन्नार्थत्व विवक्षोत्पादन द्वारा प्रयोगमात्रमें हेतु है, शब्द द्वारा अर्थबोध करानेमें हेतु नहीं है] और उस मानान्तरको बालक तब जान सकेगा जब वह स्वयं उत्तम वृद्ध होकर शब्द प्रयोग करेगा ।

शब्दप्रमाणके विषयमें कोई कोई वादी कहते हैं कि उक्त प्रकारसे व्युत्पत्तिके निरूपणका परिश्रम करना व्यर्थ है, कारण कि शब्दका अर्थके साथ कोई सम्बन्ध ही नहीं रहता है । जैसे कि 'अङ्गुलीके अग्रभागमें सैकड़ों हाथियोंका झुंड है' इत्यादि शब्दोंके द्वारा किसी अर्थकी प्रमिति (अबाधित ज्ञान) नहीं होती और जिस आप्त पुरुषके वाक्य-स्थलमें अर्थका अबाधित ज्ञान होता है, उस स्थलमें भी दूसरे प्रमाणोंके द्वारा ही वैसा ज्ञान होता है, शब्दोंके द्वारा नहीं ।

गुरुमतानुयायी इस पूर्वपक्षका समाधान करते हैं कि पौरुषेय वाक्योंसे विधेयका सम्बन्ध यद्यपि निश्चित नहीं हो सकता, तथापि 'यह पुरुष ऐसा जानता है'

एव। अङ्गुल्यग्रादिवाक्येष्वप्यव्यभिचारात्। स च ज्ञानविशेषो ज्ञेयविशेषं कल्पयतीति।

सोऽयं परिहारोऽनुपपन्नः, वैयधिकरण्यात्। शब्दस्याऽर्थासंस्पर्शित्वे चोदिते लिङ्गस्य तत्संस्पर्शित्वं प्रतिपाद्यत इति किं केन सङ्गच्छेत। वक्तृज्ञानद्वारा शब्दार्थसंस्पर्शः प्रतिपाद्यत इति चेद्, न; वक्तृज्ञानस्य शब्दप्रमेयत्वायोगात्। 'गामानय' इत्यादिवाक्येषु वक्तृज्ञानवाचकपदाभावात्। वाक्यार्थस्य पदार्थानतिरेकात्। अतिरेकेऽपि किं वक्तृज्ञानमात्रं वाक्यार्थ उत ज्ञेयविशिष्टम्। आद्ये लौकिकवाक्यादप्रमिते ज्ञेये व्यवहारो न स्यात्। ततो व्युत्पत्त्यभावाद्वैदिकवाक्यस्याऽप्यबोधकत्वप्रसङ्गः। द्वितीये

इस प्रकार वक्ताको ज्ञान विशेषका निश्चय होता ही है। 'अङ्गुलीके अग्रभाग—' आदि वाक्योंमें भी व्यभिचार नहीं है और तादृश ज्ञानविशेष ज्ञेयविशेषकी कल्पना करता है। [जिस पुरुषने 'अङ्गुलीके अग्रभागमें सैकड़ों हाथी रहते हैं', ऐसा वाक्य कहा हो, उसका तो ज्ञान ऐसा मानना ही होगा और उस अनुमित ज्ञानविशेषसे ज्ञेयविशेषका अनुमान द्वारा सम्बन्ध सिद्ध हो ही जाता है, इसलिए शब्दोंका अर्थसे सम्बन्ध हो जानेके कारण व्युत्पत्तिके प्रकारका प्रदर्शन उचित ही है]।

गुरुमतानुयायियोंका उक्त परिहार युक्तियुक्त नहीं है, कारण कि इस समाधानमें वैयधिकरण्य दोष आ जाता है। शब्दका अर्थके साथ सम्बन्धाभावका तो प्रश्न किया गया और हेतुभूत ज्ञानविशेषका अर्थके साथ सम्बन्ध दिखलाया गया, इसलिए किससे कौन सङ्गत हो सकता है। वक्ताके ज्ञान द्वारा शब्द और अर्थके सम्बन्धका प्रतिपादन किया जाता है, ऐसा कहना भी नहीं बनता, कारण कि वक्ताका ज्ञान शब्दका प्रमेयभूत अर्थ नहीं हो सकता, क्योंकि 'गाय ले आओ' इस वाक्यमें वक्ताके ज्ञानका वाचक कोई पद (शब्द) नहीं है, वाक्यका अर्थ पदके अर्थसे अतिरिक्त नहीं होता है? यदि अतिरिक्त मान भी लिया जाय, तो भी प्रश्न होता है कि केवल वक्ताका ज्ञान वाक्यार्थ है? या ज्ञेयसे विशिष्टज्ञान वाक्यार्थ है? प्रथम विकल्पके माननेमें लौकिक वाक्य द्वारा प्रमित न हुए ज्ञेयमें व्यवहारकी सिद्धि नहीं होगी। इससे व्युत्पत्ति न होनेके कारण वैदिक वाक्य भी अर्थबोधक न हो सकेंगे। दूसरे विकल्पके माननेमें भी

ज्ञेयमेव वाक्यात् प्रमीयताम्, वक्तृज्ञानस्य शब्दप्रयोगलक्षणलिङ्गानुमेयतयाऽन्यथासिद्धेः। ननु ज्ञेयमप्यन्यथासिद्धम्, श्रोता हि पदेभ्यः पदार्थानवगत्य नूनमेषां संसर्गोऽस्तीति सहप्रयोगबलादुत्प्रेक्षत इति चेद्, मैवम्; उत्प्रेक्षाया एवाऽत्र वाक्यजन्यप्रमितित्वात्। न तावदियमुत्प्रेक्षा स्मृतिसंशयविपर्यासेष्वन्तर्भवति, संस्कारजन्यत्वकोटिद्वयबाधानामभावात्। प्रमितित्वेऽपि प्रत्यक्षादिकारणान्तराभावाद् वाक्यजन्यत्वं परिशिष्यते। न च वक्तृज्ञानेनाऽनुमितेन ज्ञेयमन्तरेणाऽनुपपद्यमानेन पदार्थसंसर्गः कल्पयितुं शक्यः, तथा सति वेदे वक्तुरभावात्संसर्गप्रमित्यसिद्धेः। तस्माच्छाब्दमेव संसर्गज्ञानम्। अङ्गुल्यग्रादिवाक्यानां त्वनाप्तसंसर्गादर्थास्पर्शित्वम्। अर्थसंस्पर्शिनोऽपि

ज्ञेय अर्थकी ही वाक्यसे प्रमिति मानिये, क्योंकि वक्ताका ज्ञान तो शब्दप्रयोगरूप हेतुसे अनुमेय होनेके कारण अन्यथासिद्ध है।

शङ्का—ज्ञेय अर्थ भी अन्यथासिद्ध है; क्योंकि श्रोता पुरुष पदोंसे पदार्थका ज्ञान करके 'निश्चय इन पद-पदार्थोंका सम्बन्ध है' इस प्रकार सहप्रयोगके बलसे सम्भावना कर लेता है।

समाधान—प्रकृतमें सम्भावनाकी ही वाक्य द्वारा प्रमिति होती है। और उक्त सम्भावना स्मरण, संशय तथा विपर्यय (भ्रम) कोटिमें नहीं आ सकती, कारण कि उसमें संस्कारसे उत्पन्न होना, दो कोटियोंका होना एवं बाधज्ञान—इनमें से कोई भी नहीं है। [यदि उक्त वाक्यसे प्रमित सम्भावना संस्कारजन्य होती, तो स्मरणके अन्तर्गत आ सकती, यदि उसमें (यह वा वह) ऐसी दो कोटियां होती, तो संशय आता तथा उत्तरकालमें 'ऐसा नहीं' इस प्रकार बाधज्ञान होता, तो उसे भ्रम माननेका अवसर आता, इनमें से एक भी नहीं है, अतः वह वाक्यजन्य प्रमिति ही है।] प्रमितिके माननेपर भी वहाँ प्रत्यक्ष आदि दूसरे कारणोंका अभाव है, अतः उसे वाक्यजन्य मानना ही शेष रहता है। यदि कहो कि अनुमानसे सिद्ध वक्ताका ज्ञान ज्ञेयके बिना उपपन्न नहीं होता, अतः वह पदार्थके संसर्गकी कल्पना करता है, तो ऐसा कहना भी उचित नहीं है, कारण कि ऐसी कल्पना करनेपर वेदमें किसी भी वक्ताके न होनेसे पदार्थसंसर्गके निश्चयकी असिद्धि हो जायगी। इसलिए शब्द द्वारा ही संसर्ग-ज्ञान होता है। और 'अङ्गुलीके अग्रभागमें—' इत्यादि वाक्योंका तो आप्तके साथ संसर्ग न होनेसे अर्थके साथ—स्पर्श—सम्बन्ध—

प्रत्यक्षस्य कारणदोषे सति शुक्त्याद्यर्थासंस्पर्शित्वदर्शनात् । नह्यपौरुषेयस्याऽद्वैतागमस्य कश्चिद्दोषसंसर्गः संभवति येनाऽर्थासंस्पर्शित्वमाशङ्क्येत । यदि द्वैतावभासीनि प्रत्यक्षादीनीति तेन विरुध्येरन् तदा तान्येव बाध्यन्ताम् । 'इन्द्रो मायाभिः' इत्यादिना मायाख्यदोषजन्यत्वश्रवणात् । दोषजन्यत्वेऽपि स्वप्नवद्व्यवहाराविसंवादे प्रामाण्यलाभात् । अद्वैतागमोऽपि प्रत्यक्षादिविषयस्य द्वैतस्य तत्त्वांशमेव बाधते न व्यवहारसंवादांशम् । एवं च सति यथा मायाकार्याणामपि प्रत्यक्षादीनां स्वस्वविषयेषु व्यावहारिकपदार्थेषु प्रामाण्यं तथैवाऽद्वैतागमस्य मायाकार्यत्वेऽप्यद्वैते स्वविषये प्रामाण्यं किं न स्यात् ? न चैवं शुक्तिरजतादिज्ञानेऽतिप्रसङ्गः शङ्कनीयः, तत्राऽपि यावद्बाधं प्रातिभासिकेषु रजतादिषु ज्ञानस्य स्वतः प्रामाण्यानिवारणात्, अन्यथा प्रवृत्त्यनुपपत्तेः । विशेषदर्शनकालीनबाध-

---

नहीं है । अर्थसे सम्बन्ध रखनेवाले प्रत्यक्ष प्रमाणका भी इन्द्रियदोष होनेपर शुक्ति आदि अर्थके साथ सम्बन्ध नहीं देखा जाता है । अपौरुषेय अद्वैत शास्त्रमें कोई भी दोषका सम्बन्ध तो है नहीं, जिससे कि अर्थसम्बन्धके अभावकी आशङ्का की जा सके । यदि कहो कि प्रत्यक्ष आदि प्रमाण द्वैतका ज्ञान कराते हैं, अतः प्रत्यक्षादि विरोधी होंगे, तो उन विरुद्ध होनेवाले प्रत्यक्ष आदिका ही बाध कीजिये, क्योंकि 'इन्द्र मायाओंके द्वारा' इत्यादि वाक्योंमें द्वैतका मायानामक दोषसे जन्य होना कहा गया है । दोषके कारण उत्पन्न होनेपर भी स्वप्नके समान व्यवहारका विसंवाद न होनेसे प्रामाण्यका लाभ हो जाता है । अद्वैत-शास्त्र भी प्रत्यक्षादि प्रमाणके विषयभूत द्वैतकी यथार्थताका (सत्यताका) ही बाध करता है, व्यवहारवादका बाध नहीं करता । इस दशामें जैसे मायाके कार्यभूत प्रत्यक्षादि प्रमाणोंका अपने-अपने विषयभूत व्यावहारिक घट, पट आदि पदार्थोंमें प्रामाण्य माना जाता है, वैसे ही मायाकार्य होते हुए भी अद्वैत आगमका अपने विषय अद्वैतमें प्रामाण्य क्यों नहीं माना जायगा ? इस रीतिसे शुक्तिरजतादि (प्रत्यक्ष भ्रमात्मक) ज्ञानमें प्रामाण्य माननेका अतिप्रसङ्ग नहीं दिया जा सकता, कारण कि वहांपर (भ्रमस्थलमें) बाधज्ञानका जबतक उदय न होगा, तबतक प्रतिभाससे सिद्ध शुक्तिरजतादिमें ज्ञानका स्वतःप्रामाण्य नहीं हटाया जा सकता । इसके विपरीत (ज्ञानका स्वतःप्रामाण्य न माननेसे) रजतार्थीकी रजतमें प्रवृत्ति

पर्यालोचनयैवाऽप्रामाण्यव्यवहारात् । न चाऽद्वैतज्ञानस्य कदाचिद्बाधोऽस्ति, येनैतादृशमप्रामाण्यमुच्येत ।

ननु चित्रगतनिम्नोन्नतविषयचाक्षुषज्ञानस्य विषयगतश्यामादिरेखासंनिवेशविशेषाख्याद्दोषादप्रामाण्यं यथा दृष्टं तथाऽत्राप्यद्वैताख्याद्विषयदोषादप्रामाण्यमिति चेद्, न; तत्राऽपि स्पर्शज्ञानबाधादेवाऽप्रामाण्यात् । अनधिगतार्थगन्तृत्वलक्षणस्य प्रामाण्यस्य न संवादापेक्षा शङ्कितुमपि शक्या । न चाऽऽम्नायस्य सर्वस्य क्रियार्थत्वाद्विधिवाक्यानामेव प्रामाण्यमिति वाच्यम्, इतरेतराश्रयत्वात् । विधिवाक्यानामेव प्रामाण्ये सिद्धे

नहीं बनेगी । विशेषज्ञानकालमें उत्पन्न हुए बाधकी पर्यालोचनासे ही पूर्व ज्ञानमें अप्रामाण्यका व्यवहार होता है । और अद्वैतज्ञानका कभी बाध ही नहीं होता, जिससे कि [अद्वैतज्ञानमें] उक्त प्रकारका अप्रामाण्य कहा जा सके ।

शङ्का—जैसे चित्रमें निम्नोन्नतभावका ज्ञान करानेवाले चाक्षुष प्रत्यक्षका अप्रामाण्य उसके विषय—निम्नोन्नत चित्र—गत श्यामादि वर्णकी रेखाओंका विशेष प्रकारसे खींचा जानारूप दोषके द्वारा प्राप्त है, वैसे ही प्रकृतमें भी अद्वैत-नामक विषयके दोषसे ही [अद्वैतप्रतिपादक वेदान्तवाक्योंका] अप्रामाण्य होगा ।

समाधान—उक्त कथन युक्त नहीं है, कारण कि दृष्टान्त-स्थलमें भी स्पर्श-ज्ञान द्वारा बाधका उदय होनेपर ही अप्रामाण्य माना जाता है । अनधिगतार्थ-गन्तृत्व—अपूर्व अर्थका बोधन कराना—रूप प्रामाण्यमें संवादकी अपेक्षा करनेकी शङ्का भी नहीं की जा सकती । [कारण कि प्रमाणका विषयभूत अर्थ यदि दूसरे प्रमाणसे सिद्ध है, तो वह विषय अपूर्व ही नहीं रहा, यदि अपूर्व—दूसरे प्रमाणोंसे अज्ञात—अर्थके बिना उसका बोध किया जा रहा है, तो वह प्रमाण ही नहीं माना जा सकता, इसलिए प्रमाण-प्रमेयमें संवादकी अपेक्षाका अवसर ही नहीं आता] यदि कहो कि वेद-शास्त्र सम्पूर्ण ही क्रियाकलापात्मक कर्मकाण्डका ही प्रतिपादन करनेके लिए हैं, इसलिए विधिवाक्योंका ही प्रामाण्य माना जायगा, तो यह कहना भी नहीं बनता, कारण कि ऐसा माननेसे इतरेतराश्रय दोष आता है । [इतरेतराश्रय दिखलाते हैं—] विधिवाक्योंका प्रामाण्य सिद्ध होनेपर ही

सर्वस्याऽऽम्नायस्य क्रियार्थत्वसिद्धिस्तत्सिद्धौ चेतरसिद्धिरिति। न च प्रवृत्ति-निवृत्तिसाध्ययोरिष्टप्राप्त्यनिष्टपरिहारयोरभावादपुरुषार्थे ब्रह्मणि कथं वेदान्त-प्रामाण्यमिति शङ्कनीयम्; लोको हीष्टप्राप्त्यनिष्टपरिहारावेव साक्षात् प्रार्थयते न प्रवृत्तिनिवृत्ती, तयोरायासात्मकत्वात्। अप्राप्तग्रामादिप्राप्तावपरिहृतरोगादिपरिहारे चाऽऽयासमन्तरेणाऽभिलषितसिद्ध्यभावादायासं पुरुषः सहेताऽपि, यत्र तु प्राप्तमेव कण्ठचामीकरादिकमजानानः पुरुषः पुनः प्राप्तुमिच्छति परिहृतमेव च रज्जुसर्पादिकं परिजिहीर्षति तत्र ज्ञान-मात्रादभीष्टसिद्धौ कुत आयासं सहेत। नहि तत्राऽऽयासोऽपेक्ष्यते, प्रत्युत ज्ञाने सति पूर्वोऽप्यायासः परिह्रियते। एवं च सति नित्यप्राप्तस्य ब्रह्मणः प्राप्तौ नित्यनिवृत्तस्य संसारस्य परिहारे च हेतुभूतं तत्त्वज्ञानं जनयतां

सम्पूर्ण वेदशास्त्रका विधिमें तात्पर्य सिद्ध होगा। और सम्पूर्ण वेदका विधिमें तात्पर्य निर्णीत होनेपर केवल विधिवाक्योंका प्रामाण्य सिद्ध होगा।

शङ्का—प्रवृत्ति और निवृत्तिके द्वारा की जानेवाली अभीष्टकी प्राप्ति और अनिष्टकी निवृत्ति—इन दोनोंके न होनेसे पुरुषार्थशून्य सिद्धभूत ब्रह्मके प्रतिपादनमें वेदान्तवाक्योंका प्रामाण्य कैसे माना जा सकता है?

समाधान—उक्त शङ्का उचित नहीं है, कारण कि संसारमें सभी लोग साक्षात् इष्ट-प्राप्ति और अनिष्टका निराकरण ही चाहते हैं, प्रवृत्ति तथा निवृत्तिको नहीं चाहते; क्योंकि प्रवृत्ति तथा निवृत्ति दोनों परिश्रमस्वरूप हैं। [और परिश्रम कोई नहीं चाहता।] यद्यपि यह हो सकता है कि प्राप्त न हुए गाँवकी प्राप्ति तथा न छूटे हुए रोगको दूर करनेके लिए परिश्रमके बिना अभीष्टकी सिद्धि (ग्रामप्राप्ति और अनभीष्ट रोगकी निवृत्ति) नहीं हो सकती, अतः भले ही वहांपर पुरुष परिश्रम कर ले, तथापि जहां गलेमें पड़ा हुआ सुवर्णका हार प्राप्त ही है, परन्तु उसे न जानकर पुरुष फिर उसको प्राप्त करना चाहता है और जहाँ रज्जुसर्प वस्तुतः है ही नहीं याने वह परिहृत ही है, तथापि उसको भगाना (परिहृत करना) चाहता है, वहाँ तो ज्ञान हो जानेसे ही अभीष्टकी सिद्धि हो जाती है; फिर उसके लिए उस स्थलमें पुरुष परिश्रम क्यों सहेगा? ऐसे स्थलोंमें परिश्रम करनेकी अपेक्षा नहीं रहती, बल्कि ज्ञान हो जानेपर पहलेसे प्रारम्भ किया गया परिश्रम भी छोड़ दिया जाता है। इस सिद्धान्तके अनुसार नित्यप्राप्त ब्रह्मकी प्राप्तिमें और नित्यनिवृत्त संसारके त्यागमें कारणभूत

वेदान्तानां कुतोऽपुरुषार्थपर्यवसायित्वशङ्का । तस्माद्वेदान्तानां ब्रह्मणि प्रामाण्यं केनाऽपि वारयितुं न शक्यम् ।

किञ्च, पुरुषार्थस्य प्रामाण्यप्रयोजकत्वे नित्यनैमित्तिकवाक्यानां प्रामाण्यं गुरुमते दुःसम्पादम् । नहि तत्र फलमस्ति, किन्त्वनुष्ठाने प्रयास एव, अननुष्ठाने तु प्रत्यवायः स्पष्टः । तत उभयथाऽप्यनर्थहेतूनां तेषां कथं प्रामाण्यसिद्धिः । तस्मात्प्रत्यक्षादिवच्छब्दस्याऽप्यनधिगताबाधितासंदिग्धार्थबोधकत्वमात्रं प्रामाण्यनिमित्तम् । तच्च कार्यब्रह्मवाक्ययोः समानम् । तथा च सति पूर्वपक्षिणा वेदान्तानामप्रामाण्यसिद्धये महता प्रयासेन यद्विधिपरत्वकल्पनं तदकाण्डे ताण्डवितम् , तस्मात्सिद्धं ब्रह्मणि वेदान्तानां प्रामाण्यमिति ।

इति श्रीविद्यारण्यमुनिप्रणीते विवरणप्रमेयसंग्रहे चतुर्थसूत्रे प्रथमं वर्णकं समाप्तम् ।

तत्त्वज्ञानके उत्पादक वेदान्तवाक्योंका तात्पर्य पुरुषार्थशून्य पदार्थका बोधन करानेमें कैसे माना जा सकता है ? इसलिए वेदान्तवाक्योंका ब्रह्ममें प्रामाण्य मानना किसीसे भी दूर नहीं किया जा सकता ।

[प्रकारान्तरसे भी समर्थन करते हैं—] और यह भी है कि यदि पुरुषार्थको ही प्रामाण्यका प्रयोजक माना जाय, तो गुरुमतमें (प्रभाकरमतमें) नित्य तथा नैमित्तिक कर्म-बोधक वाक्योंका प्रामाण्य सिद्ध नहीं किया जा सकेगा, कारण कि उनका कोई फल नहीं है, किन्तु उनके करनेमें केवल परिश्रम है और न करनेमें प्रायश्चित्त लगता है। इसलिए करने या न करने—दोनों तरहसे भी अनर्थके उत्पादक उन नित्य-नैमित्तिक विधिवाक्योंका प्रामाण्य कैसे सिद्ध हो सकता है ? इसलिए प्रत्यक्ष आदि प्रमाणोंके सदृश अनधिगत (प्रमाणान्तरागृहीत-अपूर्व), अबाधित (बाधज्ञानरहित) तथा असंदिग्ध (सन्देहसे व्यावृत्त) अर्थका बोधक होना ही प्रामाण्यका प्रयोजक है । ऐसा प्रयोजक विधिवाक्य और ब्रह्मबोधकवाक्य दोनोंमें एक-सा ही है । इस दशामें पूर्वपक्षी लोग वेदान्तोंके अप्रामाण्यकी सिद्धिके लिए इतने बड़े प्रयासके साथ जो यह कल्पना करते हैं कि वेदान्तोंका विधिमें तात्पर्य है, वह तो केवल अनवसरमें नृत्य करनेके समान है । इसलिए वेदान्तवाक्योंका ब्रह्ममें ही प्रामाण्य है ।

चतुर्थ सूत्रमें प्रथम वर्णक समाप्त ।

द्वितीयं वर्णकम्

शब्दानां सिद्धार्थे शक्तिमङ्गीकृत्याऽपि ब्रह्मणि वेदान्तप्रामाण्यं न संभवतीति ये मन्यन्ते तेषां मतं पूर्ववर्णके निरस्तम् । ये पुनः कार्यान्वितस्वार्थे एव शब्दशक्तिरिति मन्यमानाः कार्यशेषतयैव ब्रह्म वेदान्तैः प्रमीयते इति कथयन्ति, तेषां मतमस्मिन्वर्णके निरस्यते ।

ते ह्येवमाहुः—उत्तमवृद्धेन गामानयेत्युक्तेऽनन्तरं मध्यमवृद्धेन क्रियमाणं गवानयनं व्युत्पित्सुर्बालो गवानयनकार्यमनेन वाक्येन बोधितमित्यवगत्य पुनरश्वमानय गां बधानेत्यादिप्रयोगेष्वावापोद्धाराभ्या-

---

द्वितीय वर्णक

सिद्ध अर्थमें शब्दोंकी शक्तिका स्वीकार करनेपर भी ब्रह्ममें वेदान्त-वाक्योंका प्रामाण्य नहीं हो सकता, इस प्रकार जो मानते हैं, उनके मतका खण्डन पूर्व वर्णकमें किया जा चुका है । अब उन प्राभाकरानुयायियोंके मतका खण्डन किया जाता है, जो कार्यसे सम्बद्ध स्वार्थमें ही शब्दकी शक्ति मानकर विधिके अङ्गरूपसे ही वेदान्तवाक्यों द्वारा ब्रह्मका प्रतिपादन होता है, ऐसा कहते हैं ।

वे यों कहते हैं—उत्तम वृद्धने (आज्ञा देनेवाले प्रयोजक पुरुषने) 'गऊ लाओ' ऐसा कहा, तदनन्तर मध्यम वृद्ध (जिससे काम करनेको कहा गया उस पुरुष) द्वारा किये गये गऊके आनयन (लाना) रूप कार्यको देखकर व्युत्पत्तिग्रहकी (जाननेकी) इच्छा रखनेवाला बालक निश्चय करता है कि उक्त वाक्यसे गाय लानारूप कार्य (क्रिया) ही बोधित होता है । तदनन्तर 'घोड़ा लाओ' और 'गाय बांधो' इत्यादि प्रयोगोंमें आवाप और उद्वापसे [अर्थात् अन्वयव्यतिरेकसे पूर्व वाक्यमें जो 'गाय' और 'लाओ' पद थे उन दोनों पदोंके श्रवणसे गायका लाना कार्य किया गया । 'अब घोड़ा लाओ' कहनेसे दूसरे पदार्थका लाना हुआ, और 'गाय बांधो' वाक्यसे गायके साथ दूसरी क्रिया हुई, इस तरह 'गाय लाओ' और 'गाय बांधो' इन दोनों वाक्योंमें 'गाय' पद समान है, क्रियाका कर्म पदार्थ भी गायरूप समान है, इसलिए 'गाय' पदका अर्थ यही सास्नादिमान् पदार्थ है, परन्तु दोनों स्थलोंमें वह कार्यान्वित ही दीख पड़ता है, अतः देखनेवाले बालकने निश्चय किया कि कार्यान्वितमें ही शब्दोंकी शक्ति होती

मेकैकस्य पदस्य कार्यान्वितस्वार्थे सामर्थ्यं प्रतिपद्यते। न चेष्टसाधने व्युत्पत्तिः संभवति, अतीते इष्टसाधनादौ मध्यमवृद्धप्रवृत्त्यभावात्। कृतियोग्ये इष्टसाधने प्रवृत्तिरस्तीति चेत्, तर्ह्यव्यभिचारात्कार्यमेव व्युत्पत्तिप्रयोजकं भविष्यति। अव्यभिचारित्वमात्रेण कार्यस्य प्रयोजकत्वे कार्यगतलौकिकत्वस्याप्यव्यभिचाराद् व्युत्पत्तौ प्रयोजकत्वं प्रसज्येत। तथा च वेदे नियोगप्रतिपत्तिर्न स्यादिति चेद्, न; कार्यं परित्यज्याऽन्वितस्वार्थमात्रस्य प्रयोजकत्वाङ्गीकारे केनाऽन्वित इति साकाङ्क्षत्वप्रसङ्गात्। न च लौकिकत्वपरित्यागे बाधोऽस्ति। ननु सिद्धपदानां कार्यान्वितस्वार्थसंभवेऽपि कार्यपदस्य न तत्संभवः कार्यान्तराभावादिति चेद्, न; धात्वर्थस्याऽपि कार्यतया तदन्वितयोगे कार्यपदस्य व्युत्पत्तेः। यद्यपि

है, एवं 'आनय' पदमें आवाप और उद्वापको देखकर उसका भी अर्थनिर्णय किया, इससे] एक एक पदकी कार्यान्वित स्वार्थमें सामर्थ्यका (शक्तिका) निर्द्धारण करता है। इष्टसाधनमें व्युत्पत्तिग्रह नहीं हो सकता, कारण कि भूतकालिक इष्टसाधनमें मध्यम वृद्धकी प्रवृत्ति नहीं हो सकती। यदि कृति (क्रिया) के योग्य इष्टसाधनमें प्रवृत्ति होती है, ऐसा माना जाय, तो व्यभिचारशून्य होनेसे कार्य ही व्युत्पत्तिका प्रयोजक (शब्दकी शक्तिका ग्राहक) मान लिया जायगा।

शङ्का—यदि व्यभिचारशून्य होनेसे ही कार्यको व्युत्पत्तिका प्रयोजक माना जाय, तो कार्यमें लौकिकत्वका भी व्यभिचार नहीं है, अतः उस कार्यमें रहनेवाले लौकिकत्वको भी व्युत्पत्तिका प्रयोजक मानना होगा। इससे वेदमें नियोगकी प्रतीति नहीं हो सकेगी।

समाधान—यदि कार्यको छोड़कर अन्वित स्वार्थमात्रमें (लौकिकत्वमें) ही प्रयोजकत्व माना जाय, तो वह किससे अन्वित है ? इस प्रकार साकाङ्क्ष होनेका प्रसङ्ग आ जायगा। और लौकिकत्वके छोड़नेमें कोई बाध भी नहीं है।

शङ्का—सिद्ध पदार्थके प्रतिपादक 'गो' आदि पदोंकी शक्ति कार्ययुक्त स्वार्थमें सम्भव होनेपर भी कार्यबोधक 'लाओ' आदि पदका वैसा—कार्यान्वित अर्थका बोधन करना—सम्भव नहीं है।

समाधान—धातुका अर्थ कार्यरूप होनेसे उस कार्यसे युक्त नियोगमें

लोके 'फलितो द्रुमः' इत्यादिवाक्यानि कार्यरहितान्यपि प्रयुज्यन्ते तथापि तत्र 'तं पश्य' इत्यादिकार्याध्याहारोऽवगन्तव्यः, कार्यान्विते व्युत्पन्नस्य पदस्य कार्यमन्तरेणाऽबोधकत्वात् । अतः प्रवृत्तिनिवृत्तिसाध्यप्रयोजनमन्तरेण वाक्यप्रयोगानुपपत्तेर्नियोगनिष्ठा वेदान्ताः । न च रज्जुसर्पकण्ठचामीकरादाविव तत्त्वज्ञानमात्रेण प्रयोजनमुपलभामहे । न चैतच्छास्त्रीयम्, तथा सति श्रवणोत्तरकालीनयोर्मनननिदिध्यासनयोरविधिप्रसङ्गात् । न च सर्वस्य वेदस्य विधिनिष्ठत्वे सत्येकैव मीमांसा षोडशलक्षणी स्यादिति शङ्कनीयम्, क्रियाविधिप्रतिपत्तिविधिरूपाभ्यां तद्भेदसिद्धेः । यानि वेदान्तवाक्यानि ब्रह्मस्वरूपप्रतिपादकानि 'सदेव सोम्येदम्' इत्यादीनि तानि सर्वाणि 'सोऽन्वेष्टव्यः' इत्यादिविधिषु कोऽसावात्मेत्याकाङ्क्षायां तच्छेषतयैवाऽऽत्मविशेषं समर्पयन्ति । तस्मादनन्यशेषाद्वितीयप्रतिपादकत्वं वेदान्तानां नाऽस्तीति ।

कार्यपदकी व्युत्पत्ति सिद्ध हो सकती है। यद्यपि लोकमें (फला हुआ पेड़) इत्यादि वाक्य कार्यशून्य अर्थका भी प्रतिपादन करते ही हैं, तथापि ऐसे वाक्योंमें 'उसको (फलित पेड़को) देखो, इत्यादि प्रकारसे कार्यका अध्याहार समझना चाहिए, कारण कि कार्यान्वित पदार्थमें शक्तिशाली पद कार्यके बिना बोधक नहीं हो सकते। इसलिए प्रवृत्ति या निवृत्तिसे साध्य प्रयोजनके बिना वाक्यका प्रयोग नहीं हो सकनेसे नियोगके बोधनमें ही वेदान्तोंका तात्पर्य है। रज्जुसर्प या गलेके हारके समान तत्त्वज्ञानमात्रसे ही प्रयोजनका सिद्ध होना नहीं माना जा सकता, कारण कि उक्त प्रयोजन शास्त्रका तात्पर्यविषय नहीं है। यदि इसको शास्त्रीय प्रयोजन मान लिया जाय, तो श्रवणके बाद होनेवाले मनन और निदिध्यासनको विधि न माननेका प्रसङ्ग आ जायगा। यदि कहो कि सभी वेद विधिपरक होंगे, तो सोलह अध्यायकी एक ही मीमांसा हो जायगी, तो यह कहना भी उचित नहीं है, कारण कि क्रियाविधि और प्रतिपत्ति (ज्ञान) विधिके भेदसे उन दोनोंका भेद ही है। 'सदेव सोम्य०' इत्यादि जो ब्रह्मस्वरूपके प्रतिपादक वाक्य हैं, वे सब 'सोऽन्वेष्टव्यः' इत्यादि विधियोंमें 'आत्मा कौन है ?' इस प्रकारकी आत्मविषयक जिज्ञासा होनेपर उसके अङ्गरूपसे विशेष आत्माका समर्पण करते हैं ? इससे वेदान्त अनन्यशेष अद्वितीय आत्माके प्रतिपादक नहीं हैं।

अत्रोच्यते—न तावन्नियोगब्रह्मणी उभे अपि वेदान्तैः प्रमातुं शक्येते, विरुद्धत्रिकद्वयापत्तिप्रसङ्गात् । तच्च प्रथमसूत्रद्वितीयवर्णके विस्तृतम् । नाऽपि नियोगमात्रं प्रमातुं शक्यम्, विधेयानिरूपणात् । न तावच्छाब्दं ब्रह्मज्ञानं विधेयम्, तस्याऽऽपातिकस्याऽध्ययनादेव निष्पत्तेः । निर्णयश्च विचारजन्यः । अन्यथाऽग्निहोत्रादिज्ञानस्याऽपि तद्वावाक्याध्ययन-तद्विचाराभ्यामसिद्धिप्रसङ्गात् । नाऽपि शब्दावगते ब्रह्मणि स्मृतिसन्तानो विधेयः, तद्विधेरदृष्टफलत्वे स्वर्गादिवन्मोक्षस्याऽपि कर्मजन्यत्वेनाऽनित्यत्वप्रसङ्गात् । अथाऽङ्गमर्दनप्रवाहेण शरीरे सुखप्रवाहोत्पत्तिवदभीष्टब्रह्मविषयस्मृतिसन्तानेनाऽपि सुखसन्तानो दृष्टफलं भवेत्, तर्ह्यन्वयव्यतिरेकाभ्यां तत्सिद्धेर्विधिवैयर्थ्यम् । अस्तु तर्हि स्मर्यमाणस्य साक्षात्करणं स्मृति-

इस प्रकारके पूर्वपक्षके उत्तरमें कहा जाता है—नियोग और ब्रह्म—इन दोनोंका निश्चय तो वेदान्तवाक्योंके द्वारा नहीं किया जा सकता, कारण कि इसमें विरुद्ध दो त्रिकोंकी आपत्तिका प्रसङ्ग होगा । इसका वर्णन विस्तारपूर्वक प्रथम सूत्रके द्वितीय वर्णकमें किया गया है । केवल नियोगका निश्चय भी नहीं किया जा सकता, क्योंकि इस नियोगके विधेयका निरूपण नहीं होता—शब्द द्वारा उत्पन्न ब्रह्मज्ञान तो विधेय हो नहीं सकता, कारण कि विचारके पूर्व भी वेदान्तवाक्योंके केवल पठनसे शब्दजनित ब्रह्मज्ञानकी सिद्धि हो सकती है । और निर्णय तो विचारसे उत्पन्न होता है । यदि ऐसा न माना जाय, तो उन अग्निहोत्रादिके प्रतिपादक वाक्योंके पढ़ने तथा विचार करने से अग्निहोत्रादिके ज्ञानकी भी असिद्धिका प्रसङ्ग आ जायगा । [इसलिए शब्दज्ञानका पठनसे ही और निर्णयका विचारसे ही अस्तित्व मानना होगा] और शब्द द्वारा जाने गये ब्रह्ममें स्मृतिसन्तान (ब्रह्मकी निरन्तर स्मृतिकी उत्पत्ति होते रहना) भी विधेय नहीं हो सकता, कारण कि उस ब्रह्मविषयक स्मृतिसन्तानविधिके अदृष्टफलक होनेके कारण स्वर्गादिके तुल्य मोक्षमें भी, कर्मजन्य होनेसे, अनित्यत्वका प्रसङ्ग आ जायगा । शरीरकी मालिसके निरन्तर चालू रहनेसे शरीरमें जैसे सुखप्रवाहकी उत्पत्ति होतीर हती है, वैसे ही अभीष्ट ब्रह्मविषयक स्मृतिके सन्तानसे (प्रवाहसे) भी निरन्तर सुख होते रहना-रूप इष्ट फल यदि उस विधिका कहा जाय, तो यह फल अन्वय-व्यतिरेक द्वारा ही सिद्ध हो सकता है, इसलिए उस फलकी सिद्धिके लिए विधिवाक्यका होना

संतानविधेः प्रयोजनमिति चेत्, तदापि किं स्मृतिसन्तानः स्वयमेव साक्षात्कारं जनयेत् उताऽदृष्टद्वारा अथवा विज्ञानान्तरद्वारा ? नाऽऽद्यः, नहि स्मृतिरूपस्य परोक्षज्ञानस्य सन्तानो विषयसाक्षात्कारं जनयितुमुत्सहते । अन्यथाऽनुमानज्ञानसन्तानोऽप्यनुमेयसाक्षात्कारमुत्पादयेत् । द्वितीयेऽपि न तावत् स्मृतिसन्तानजन्यमदृष्टमात्रं साक्षात्कारोत्पादने प्रभवति; साक्षात्कारस्य प्रमाणजन्यत्वात् । प्रमाणस्याऽप्यदृष्टसहकारित्वे प्रमाणेनैव साक्षात्कारोत्पत्तावदृष्टवैयर्थ्यम् । न तृतीयः, स्मृतिसन्तानजन्यं तद्विज्ञानान्तरं स्वयमेव साक्षात्कारजनकम् उताऽदृष्टद्वारेत्यादिविकल्पदोषप्रसङ्गात् ।

ननु तर्हि शब्दावगते ब्रह्मणि ध्यानं विधीयताम् । न च स्मृति-

व्यर्थ है । [वही विधिवाक्य चरितार्थ होता है, जो अनन्यसिद्ध फलकी सिद्धिके लिए विधानका प्रतिपादन करे] । यदि कहो कि स्मृतिके विषयभूत (ब्रह्मका) साक्षात् (प्रत्यक्ष दर्शन) करना ही स्मृतिसन्तानविधिका फल माना जाय, तो इसपर विकल्प होंगे कि क्या स्मृतिसन्तान स्वयं साक्षात्कारको उत्पन्न करेगा ? अथवा अदृष्टके द्वारा या दूसरे विज्ञानके द्वारा ? इनमें प्रथम विकल्प नहीं हो सकता, कारण कि स्मृतिस्वरूप परोक्ष ज्ञानका सन्तान (प्रवाह) विषयके साक्षात्कारको (प्रत्यक्ष ज्ञानको) उत्पन्न करनेका साहस नहीं कर सकता । अन्यथा (यदि परोक्ष ज्ञानको प्रत्यक्ष ज्ञानके उत्पादनमें समर्थ मान लिया जाय, तो) अनुमानस्वरूप ज्ञानप्रवाह भी अपने विषय अनुमेयका साक्षात्कार करा देगा । दूसरे विकल्पके माननेमें भी प्रथम तो स्मृतिप्रवाहसे उत्पन्न हुआ अदृष्ट ही साक्षात्कारको उत्पन्न करानेमें समर्थ नहीं हो सकता, कारण कि साक्षात्कार तो प्रमाण द्वारा उत्पन्न होता है । प्रमाणका भी यदि अदृष्ट उपकारी माना जाय, तो प्रमाण द्वारा ही साक्षात्कारकी उत्पत्ति हो जानेपर उसके लिए अदृष्टका मानना ही व्यर्थ है । तीसरा विकल्प भी नहीं बन सकता, क्योंकि इसमें भी स्मृतिप्रवाहसे उत्पन्न हुआ वह दूसरा विज्ञान क्या स्वयं ही साक्षात्कारका उत्पादक है ? या अदृष्टके द्वारा ? इत्यादि विकल्पदोषोंका प्रसङ्ग विद्यमान ही है ।

शङ्का—तब तो शब्द द्वारा जाने गये ब्रह्ममें ध्यानका विधान करना

सन्तान एव ध्यानम्, स्मृतिसन्तानस्य वस्तुगोचरत्वाद् ध्यानस्याऽऽरोपितविषयतयाऽपि संभवात्। न च प्रयोजनाभावः, ब्रह्मापरोक्षस्य प्रयोजनत्वात्। दृश्यते हि ध्यानाभ्यासप्रचयसामर्थ्यान्मृतपुत्राद्यापरोक्ष्यम्। न च तद्वदेव ब्रह्माऽऽपरोक्ष्यस्य भ्रान्तत्वप्रसङ्गः, शब्दप्रमाणसंवादसद्भावात्। स्वप्नवस्तुसाक्षात्कारस्याऽपि कस्यचिज्जागरणज्ञानसंवादे प्रामाण्यदर्शनात्, नैतत्सारम्; स्वतःप्रामाण्यहानिप्रसङ्गात्। न च स्वप्ने चक्षुरादिप्रवृत्तिमन्तरेण वस्तुसाक्षात्कारः संभवति। जागरणसंवादस्तु सादृश्यादुपपद्यते। अथ स्मृतिसन्तानध्यानयोरविधेयत्वेऽपि

उचित है। और स्मृतिप्रवाह ही ध्यान नहीं कहा जा सकता, कारण कि स्मृतिसन्तान तो वास्तव वस्तुको विषय करता है और ध्यानका विषय तो आरोपित (अवास्तव) भी हो सकता है। प्रयोजनका अभाव भी (अर्थात् ध्यानका कोई फल नहीं है, ऐसा भी) नहीं कह सकते, क्योंकि उससे ब्रह्मसाक्षात्काररूप फल हो सकता है। ध्यानके अभ्यासके आधिक्यसे मरे हुए पुत्र आदिका साक्षात्कार देखा भी जाता है। और मृतपुत्र आदिके ध्यानके बलसे उत्पन्न साक्षात्कारकी भाँति ब्रह्मसाक्षात्कारको भ्रम माननेका प्रसङ्ग भी नहीं आ सकता, कारण कि ब्रह्मसाक्षात्कारमें वेदान्तवाक्यरूप शब्द-प्रमाणका संवाद सम्भव है। [और मृत पुत्र आदिके साक्षात्कारमें ध्यानसे अतिरिक्त प्रमाणान्तरका संवाद नहीं मिलता] स्वप्नमें उत्पन्न हुए प्रत्यक्षका जागरणावस्थाके ज्ञानके साथ संवाद मिलनेसे प्रामाण्य देखा गया है।

समाधान—ध्यानका विधान करनेवाली युक्तियाँ सारभूत नहीं हैं, कारण कि इससे ज्ञानके स्वतःप्रामाण्यकी हानिका प्रसङ्ग होता है। और स्वप्नमें तो चक्षु आदि प्रमाणोंके व्यापारके बिना वस्तुका साक्षात्कार सम्भव ही नहीं है। जागरणमें संवाद तो केवल सादृश्यसे होता है। [आशय यह है कि यदि ध्यानसन्तानाधिक्यसे उत्पन्न हुआ साक्षात्कार (प्रत्यक्षज्ञान) शब्द-प्रमाणके साथ संवाद मिलनेसे प्रमाण माना जाय, तो ज्ञानोंके स्वतःप्रामाण्यकी हानि होगी! यदि प्रमाणान्तर-संवादसे प्रमाणित न किया जाय, तो वह मृत पुत्र आदिके साक्षात्कारके तुल्य भ्रम माना जायगा। इस प्रकार उक्त युक्तियाँ उभयथा दोषग्रस्त हैं। स्वप्नसाक्षात्कारको प्रमाणान्तरके संवादसे प्रमाण माननेका

शाब्दज्ञानादन्यदेव ज्ञानमलौकिकं श्रवणमननादिकरणकं वेदानुवचनादीतिकर्त्तव्यताकं ब्रह्मापरोक्ष्यफलकं मोक्षकामः कुर्यादिति विधीयत इति चेद्, मैवम्; वेदान्तानां ब्रह्मप्रमापके विधेयज्ञाने प्रामाण्यकल्पनाद् ब्रह्मण्येव साक्षात्प्रामाण्यकल्पनाया लघीयस्त्वात्। न च विधिसंस्पर्शित्वं प्रामाण्यकारणम्, किन्तु प्रमितिजननम्। अन्यथा अग्निहोत्रादिवाक्यं दर्शपूर्णमासविधिनिष्ठमपि स्याद्, विधिसंस्पर्शाविशेषात्। प्रमितिश्च सत्य-

---

प्रतिपादन करना तो बनता ही नहीं, क्योंकि स्वप्नमें वस्तुका साक्षात्कार होता ही नहीं, साक्षात्कार तो चक्षुरादि इन्द्रियोंसे जन्य ही हो सकता है, स्वप्नमें बहिरिन्द्रियाँ निर्व्यापार रहती हैं, अतः स्वप्नमें प्रतीयमान सब भ्रम ही है, जागरणसंवाद तो केवल सादृश्य द्वारा है।]

शङ्का—यद्यपि स्मृतिसंतान और ध्यान विधेय नहीं हैं, तथापि शब्द-जनित (शाब्दबोधरूप) ज्ञानकी अपेक्षा दूसरे अलौकिक श्रवण, मनन आदि साधनोंसे उत्पन्न होनेवाले ज्ञानका, जिसकी इतिकर्त्तव्यता वेदानुवचनादि हैं, और ब्रह्मका साक्षात्कार फल है, मोक्षकी इच्छा रखनेवाला विधान करे, इस प्रकारकी ज्ञानविधि मानेंगे।

समाधान—ऐसा नहीं कह सकते, कारण कि वेदान्तोंका ब्रह्मनिश्चायक विधेयरूप ज्ञानमें प्रामाण्यकल्पनाकी अपेक्षा साक्षात् ब्रह्ममें ही प्रामाण्यकी कल्पना करनेमें लाघव है, विधिके साथ सम्बन्ध होना प्रामाण्यका कारण नहीं है, किन्तु प्रमितिका (निश्चयात्मक ज्ञानका) उत्पन्न करना ही प्रामाण्यका कारण है, [इससे ब्रह्मनिश्चायक होनेसे ही वेदान्तोंका प्रामाण्य हो सकता है, उसमें प्रामाण्य माननेके लिए विधिके संसर्गकी कल्पना करनेकी आवश्यकता नहीं है] अन्यथा (यदि विधिके सम्बन्धसे ही वाक्योंका प्रामाण्य माना जाय, तो) अग्निहोत्रवाक्य दर्शपूर्णमासके विधेयवाक्यमें भी माना जायगा, विधिके साथ सम्बन्ध समान है। [अग्निहोत्र-वाक्यमें दर्शपौर्णमासके नियोगकी प्रतीति तो होती नहीं, इसलिए उसमें उसका प्रामाण्य भी नहीं माना जा सकता, इसलिए जिस वाक्यमें जिस नियोगकी प्रतीति हो वह उसमें ही प्रमाण हो सकता है, इसलिए दर्शपूर्णमासनियोग-बोधक वाक्यमें ही अग्निहोत्रका प्रामाण्य होना चाहिए।] और निश्चयात्मक ज्ञान तो सत्य, ज्ञान

ज्ञानादिवाक्येभ्यो ब्रह्मण्येव जायते, न विधौ। न च लौकिकात् प्रामाण्यादन्यदेव वैदिकं प्रामाण्यं विधिसंसृष्टमिति शङ्कनीयम्, यथा शब्दार्था य एव लौकिकास्त एव वैदिकास्तथा प्रामाण्यस्याऽपि लोकवेदयोरेकत्वात्। तदेवं वेदान्तेषु न किञ्चिद्विधेयं निरूपयितुं शक्यम्।

नाऽपि नियोगः सुनिरूपः। लोके ह्याचार्यः शिष्यं नियुङ्क्ते इत्यादावुत्कृष्टस्य पुरुषस्याऽवरपुरुषप्रेरणात्मकोऽभिप्रायभेदो नियोगत्वेनाऽभिमतः। न चाऽसावपौरुषेये वेदे संभवति। ननु नियोगो नाम प्रवर्त्तकः, प्रवर्त्तकत्वं कार्यबुद्धिगम्ये वस्तुनि प्रतिष्ठितमिति चेत्, किमिदं कार्यं नाम किं कृतिसंसृष्टं किंवा कृतियोग्यम् अथवा कृतियोग्यत्वे सति क्रियाकारकफलविलक्षणं किञ्चिदलौकिकम्? नाऽऽद्यः, कृतिर्हि पुरुषप्रवृत्तिः, कार्यं च प्रवृत्तिनिमित्तम्। न च प्रवृत्तिसंसृष्टस्य प्रवृत्तिनिमित्तत्वं

आदि वाक्योंसे ब्रह्मविषयक ही होता है, विधिविषयक नहीं होता। लौकिक प्रामाण्यकी अपेक्षा भिन्न ही विधिसे सम्बद्ध वैदिक प्रामाण्य है, ऐसा मानना भी नहीं बन सकता, कारण कि जो लौकिक शब्दार्थ हैं, वे ही वैदिक शब्दार्थ हैं, इस प्रकारका प्रामाण्य भी लोक और वेद दोनोंमें समान (एक ही) है, इसलिए वेदान्तोंमें किसी विधेयका निरूपण नहीं किया जा सकता।

और नियोगका निरूपण करना भी सरल नहीं है, कारण कि लोकमें 'आचार्य शिष्यको नियुक्त करता है' इत्यादि स्थलमें उत्तम पुरुषका अपकृष्ट पुरुषकी प्रेरणारूप एक अभिप्रायविशेष ही नियोग माना गया है। इस अभिप्रायविशेषरूप नियोगका अपौरुषेय वेदमें सम्भव नहीं हो सकता।

शङ्का—नियोग तो प्रवृत्ति करानेवालेको कहते हैं और प्रवर्तकत्व (प्रवृत्ति कराना) तो कार्यबुद्धिसे प्रतीयमान वस्तुमें स्थित रहता है।

समाधान—इस कार्यबुद्धिमें कार्य क्या वस्तु है? कृतिसे (क्रियासे) सम्बन्ध रखनेवाला कार्य है या कृतिके (क्रियाके) योग्यको कार्य कहते हो अथवा कृतिके योग्य होते हुए क्रिया-कारकफलसे विलक्षण कुछ अलौकिक ही कार्य है? इनमें प्रथम पक्ष नहीं बन सकता, कारण कि कृति तो पुरुषकी प्रवृत्ति—व्यापार—है और कार्य प्रवृत्तिका निमित्त है। और प्रवृत्तिके साथ

संभवति। अंशतः, आत्माश्रयत्वात्। न द्वितीयः; दुःखसाधनानामपि कृतियोग्यतया कार्यत्वे सति प्रवर्त्तकत्वप्रसङ्गात्। न तृतीयः, तस्य प्रत्यक्षाद्यगोचरस्य व्युत्पत्त्ययोग्यस्य शब्दप्रतिपाद्यत्वासंभवात्। न च पराभिमतकार्यानङ्गीकारे प्रवर्त्तकाभावः, कृतियोग्येष्टसाधनस्य प्रवर्त्तकत्वात्। कृतियोग्यत्वविशेषणोपादानान्न चन्द्रोदयादौ व्यभिचारः। यद्यपि कृतियोग्यस्य फलस्याऽपि प्रवर्त्तकत्वमस्ति, तथापि बालस्य व्युत्पत्तिनिमित्ततया मध्यमवृद्धप्रवृत्तिहेतुभूतं गवानयनादिलक्षणमिष्टसाधनमेव। अतश्च येयं महता प्रयासेन कार्यव्युत्पत्तिः साधिता सा नाऽस्माकमनिष्टा, इष्टसाधनस्यैव कृतियोग्यस्य कार्यत्वाभ्युपगमात्। एकमेव हि वस्तु

संसर्गवाली वस्तु प्रवृत्तिका निमित्त नहीं हो सकती, कारण कि इसमें अंशतः आत्माश्रय दोष आ जाता है। (अर्थात् कार्यबुद्धिके अनन्तर ही क्रियासंसर्गकी प्रतीति होगी और क्रियासंसर्गकी बुद्धि होनेपर ही कार्यबुद्धि हो सकती है, इस प्रकार अन्योन्याश्रय ही अंशतः आत्माश्रय कहा गया है)। दूसरा कल्प भी संगत नहीं है, कारण कि दुःखके साधनीभूत आघात आदि भी कृतिके योग्य हो सकते हैं। अतः उनके प्रवर्तक होनेका प्रसङ्ग आ जायगा। तीसरा पक्ष भी नहीं बनता, कारण कि प्रत्यक्ष आदिका विषय न होनेसे तथा व्युत्पत्तिके योग्य न होनेसे उस कार्यका शब्द द्वारा प्रतिपादन करना सम्भव नहीं हो सकता। मीमांसकके माने हुए कार्यका अङ्गीकार न करनेसे प्रवृत्तिजनकका अभाव भी नहीं हो सकता, कारण कि कृतियोग्य इष्टसाधन प्रवृत्तिका जनक माना जा सकता है। 'कृतियोग्य' ऐसा विशेषण देनेसे चन्द्रोदय आदिमें व्यभिचार नहीं आ सकता, क्योंकि चन्द्रोदयादि इष्टसाधन होते हुए भी कृतियोग्य नहीं हैं।] यद्यपि कृतियोग्य फल भी प्रवृत्तिजनक हो सकता है, तथापि बालककी व्युत्पत्तिका निमित्त होनेसे मध्यम वृद्धकी प्रवृत्तिका कारण गायका ले आना आदिरूप इष्टसाधन ही प्रवर्तक हैं। इसलिए यह जो आपने बड़े परिश्रमके साथ कार्यको व्युत्पत्तिका साधन कहा, उससे हमारा कोई अनिष्ट नहीं सिद्ध होता, कारण कि उससे कृतियोग्य इष्टसाधन ही कार्यका स्वरूप माना गया है। एक ही वस्तु

कृतिनिरूप्यतया कार्यमित्युच्यते इष्टनिरूप्यतया चेष्टसाधनमिति। न च पराभिमतालौकिककार्ये इवेष्टसाधनेऽपि कृतियोग्येऽननुभूते प्रमाणाभावः शङ्कनीयः, अतीतेष्वन्नपानादिष्वन्वयव्यतिरेकाभ्यामिष्टसाधनत्वमवगत्याऽनागतेष्वपि तेषु तदनुमानात्। न चैवं परकीयकार्यमनुमातुं शक्यम्, अलौकिकत्वव्याघातात्। तस्मात् कृतियोग्येष्टसाधनमेव विध्यर्थो न तु नियोगः। न चैतादृशोऽपि विधिर्वेदान्तेषु सम्भवति। तत्राऽविद्यानिवृत्तिलक्षणो मोक्ष इष्टस्तस्य च साधनं ब्रह्मात्मैक्यतत्त्वज्ञानम्। सोऽयं साध्यसाधनभावो लोकसिद्धः। शुक्तित्वज्ञानेन तदविद्यानिवृत्ति-

---

कृतिके द्वारा निरूप्यमाण होनेसे कार्य कहलाती है और वही वस्तु इष्टसे निरूपित होनेपर इष्टसाधन कही जाती है। वस्तु एक ही है।

शङ्का—मीमांसकके अभीष्ट अलौकिक कार्यके समान इष्टसाधनमें भी, जिसका कि कृतियोग्यरूपसे अनुभव नहीं हो सकता, प्रमाणाभाव है।

समाधान—अन्न, पान आदिरूप किये गये भूतकालिक उपभोगोंमें अन्वय-व्यतिरेक द्वारा इष्टसाधनत्वकी प्रतीति करनेके अनन्तर आगामी उपभोगोंमें भी इष्टसाधनत्वका अनुमान हो सकता है। और उक्त रीतिके अनुसार दूसरेके कार्योंका अनुमान नहीं किया जा सकता है, कारण कि इस प्रकार अनुमानसे कार्यज्ञान करनेपर उसकी अलौकिकताका व्याघात हो जायगा। [जैसे हम अन्वयव्यतिरेक द्वारा उपभुक्त अन्न, पान आदिमें अनुभूत इष्टसाधनत्वका आगामी अन्न, पानादिमें भी अनुमान द्वारा ग्रह करके प्रवृत्ति मानते हैं, वैसे ही यदि आप भी कार्यके विषयमें युक्ति कहें, तो आपको अपसिद्धान्त दोष लगेगा, क्योंकि आप तो उस कार्यको अलौकिक मानते हैं और उक्त प्रकारसे तो वह अलौकिक सिद्ध नहीं हो सकता है।] इसलिए कृतियोग्य इष्टसाधन ही विधिका अर्थ हो सकता है, नियोग नहीं। और इस प्रकारका (कृतियोग्य इष्टसाधनरूप) भी विधान वेदान्तोंमें नहीं हो सकता, कारण कि उनमें अविद्याकी निवृत्तिरूप ही मोक्ष इष्ट है और उसका साधन—कारण—जीव ब्रह्मको एक तत्त्व समझना (अद्वैत ज्ञान) ही है। इस रीतिका कार्यकारण—साध्यसाधन—भाव तो लोकसे ही सिद्ध है, क्योंकि शुक्तिके तत्त्व (यथार्थ) ज्ञानसे (उसमें रजतज्ञानकी उत्पादिका)

दर्शनात्। अतस्तद्विधिपरत्वे वेदान्तानामनुवादकत्वप्रसङ्गः। ननु सिद्धे व्युत्पत्त्यभावाद् ब्रह्मपरत्वमपि न सम्भवतीति चेद्, न; 'प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति' इत्यादावप्रसिद्धमधुकरपदार्थस्य पुरुषस्य प्रसिद्धपदसमभिव्याहारेण सिद्धार्थेऽपि व्युत्पत्तिदर्शनात्। न च तत्र कार्याध्याहारः कल्पनीयः, प्रयोजनप्रमाणयोरभावात्। न च व्युत्पत्तेः कार्याव्यभिचारः प्रयोजनम्, तस्यैवाऽद्याप्यसम्प्रतिपत्तेः। तस्माद् ब्रह्मण्येव वेदान्तप्रामाण्यम्।

अत्र केचिन्मन्यन्ते—न खलु जीवब्रह्मणोरैक्यमस्ति, 'यदतः परो दिवो ज्योतिर्दीप्यते' इति ज्योतिःशब्दाभिधेयस्य ब्रह्मणो ब्रह्माण्डाद्बहिरवस्थानश्रवणात्। यदि सर्वगत्वश्रुतिः कुप्येत, तर्हि सर्वत्र

अविद्याकी निवृत्ति देखी जाती है। इसलिए उसके विधानमें तात्पर्य माननेसे वेदान्तोंमें अनुवादकत्वका प्रसङ्ग होता है, वह इष्ट नहीं है।

शङ्का—सिद्ध पदार्थमें व्युत्पत्तिका सम्भव न होनेसे वेदान्तोंका ब्रह्ममें भी तात्पर्य नहीं माना जा सकता।

समाधान—उक्त कथन उचित नहीं है, कारण कि 'खिले हुए कमलके बीचमें मधुकर मधुका पान करता है' इत्यादि वाक्योंमें मधुकर पदार्थको न जाननेवाले व्युत्पित्सु पुरुषको मधु आदि प्रसिद्ध पदके समभिव्याहार (सांनिध्य) से (भ्रमररूप) सिद्ध अर्थमें भी व्युत्पत्ति होती है, यह देखा जाता है। उक्त स्थलमें कार्यका अध्याहार करना भी सम्भव नहीं है, क्योंकि कार्यके अध्याहार करनेका उसमें कोई प्रयोजन या प्रमाण नहीं है। व्युत्पत्तिका कार्यके साथ व्यभिचार न होना भी फल नहीं माना जा सकता, कारण कि उसकी (व्युत्पत्तिका कार्यके साथ व्यभिचार न होनेकी) अब तक सिद्धि नहीं हो पायी है। [इसलिए व्युत्पत्तिका कार्याव्यभिचार स्वीकृत नहीं हो सकता] अतएव ब्रह्ममें ही वेदान्तवाक्योंका प्रामाण्य मानना चाहिए।

इस विषयमें कुछ एकवादियोंका मत है—जीव और ब्रह्मका अभेद (ऐक्य) हो ही नहीं सकता, कारण कि 'जो इस ब्रह्माण्डसे अन्यत्र ज्योति दीप्त हो रही है' इत्यादि श्रुतिमें 'ज्योतिः'शब्दवाच्य पदार्थस्वरूप ब्रह्मकी ब्रह्माण्डसे बाहर अवस्थिति प्रतीत होती है। यदि इसमें ब्रह्मको सर्वत्र व्यापक

वर्त्तमानमपि ब्रह्म जीवैर्वा प्रपञ्चेन वा न संस्पृश्यते, 'असङ्गो ह्ययं पुरुषः' इति श्रुतेः। 'अहं ब्रह्मास्मि' इति श्रुतिस्त्वारोपिततादात्म्यरूपेणोपासनं विदधाति। तस्माच्चोपासनान्मोक्षः फलिष्यति यागादिव स्वर्गः। न च वेदान्तानामुपासनाविधिपरत्वे ब्रह्मस्वरूपासिद्धिः, देवताधिकरण-न्यायेन मानान्तरसिद्धिविरोधयोरभावे स्वार्थेऽपि प्रामाण्यसम्भवात्। न च जीवाद्भिन्ने ब्रह्मण्यद्वैतश्रुतिव्याकोपः, तस्याः श्रुतेर्विकारातीत-ब्रह्मविषयत्वात्। तस्य चैकत्वाभ्युपगमात्। न च नैयोगिकफलत्वे मोक्षस्य स्वर्गादिवदनित्यता, 'न स पुनरावर्त्तते' इति श्रुत्याऽनुमानस्य बाधादिति।

नैतत्सारम्, आद्यन्तशून्यस्य मोक्षस्योपासनात्मकक्रियासाध्यत्वा-योगात्। 'विमुक्तश्च विमुच्यते', 'ब्रह्मैव सन् ब्रह्माप्येति' इत्यादिश्रुतिर्मोक्ष-

---

कहनेवाली श्रुतिसे विरोध आता हो, तो सर्वत्र वर्तमान (व्यापक) भी ब्रह्म जीव अथवा प्रपञ्चसे सम्बद्ध नहीं होता, कारण कि श्रुति कहती है—'वह ब्रह्मरूप पुरुष असङ्ग—सङ्गवर्जित—है'। 'मैं ब्रह्म हूँ' इत्यर्थक श्रुति तो आरोपित अभेद द्वारा उपासनाका विधान करती है, इसलिए जैसे याग द्वारा स्वर्ग फलित होता है, वैसे ही उपासनासे मोक्षकी सिद्धि होती है। वेदान्त-वाक्योंका उपासनाविधिमें तात्पर्य माननेसे ब्रह्मस्वरूपकी असिद्धि होनेका दोष भी नहीं आ सकता, कारण कि देवताधिकरणन्यायसे दूसरे प्रमाणोंसे सिद्धि और विरोधके न आनेसे स्वार्थमें (ब्रह्मस्वरूपमें) भी प्रामाण्य मानना सम्भव हो सकता है। जीवसे ब्रह्मको भिन्न माननेसे अद्वैतकी प्रतिपादक श्रुतिसे विरोध भी नहीं आता, कारण कि उस श्रुतिका विषय विकारशून्य ब्रह्म है और उसका एक होना माना ही गया है, मोक्षको नियोगका फल माननेसे स्वर्गादिके तुल्य वह अनित्य होगा, इस प्रकार दोष भी नहीं कह सकते, क्योंकि 'वह ब्रह्मज्ञानी पुनः इस संसारमें नहीं लौटता' इत्यर्थक श्रुतिसे अनुमानका बाध हो जायगा।

[इस मतका खण्डन करते हैं—] उक्त कथन सार—युक्ति—शून्य है। आदि—प्रारम्भ—और अन्त—विनाश—से शून्य मोक्ष उपासनारूप क्रियाके द्वारा साध्य है, ऐसा माननेका अवसर नहीं आ सकता, क्योंकि 'विमुक्त—मोक्षको प्राप्त हुआ—मुक्त हो जाता है', 'ब्रह्म ही होता हुआ ब्रह्मको प्राप्त करता है' इत्याद्यर्थक

स्याऽनादितामाह। 'विद्ययाऽमृतमश्नुते', 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्यादिका चाऽविनाशितां प्रतिपादयति। तथा तदनुग्राहको न्यायोऽप्यनुसंधेयः। सादित्वे च मोक्षस्याऽन्तवत्त्वं स्यात्। अन्तवत्त्वे च पुनर्बन्धान्मोक्षशब्द-स्योपचरितार्थत्वप्रसङ्गः। तथा क्रियासाध्यत्वेऽभ्युदयफलवच्छरीरेन्द्रि-यादिसम्बन्ध उपचयापचयत्वं च केन वार्येत। कर्मफलस्य वैचित्र्य-दर्शनाच्छरीरादिरहितो मोक्षोऽपि तत्फलं भविष्यतीति चेद्, न; शरीरा-दिराहित्यस्य स्वाभाविकत्वात्। तथाहि—न तावदात्मनो देहेन संयोग उपपद्यते, निरवयवत्वात्। नाऽपि समवायः, देहं प्रति समवायिकरण-त्वाभावात् सामान्यादिरूपत्वाभावाच्च। एवं तादात्म्यादिनिराकरणमूह्यम्। ततो वास्तवसम्बन्धाभावे सत्यशरीरत्वं स्वाभाविकं सशरीरत्वं तु मिथ्या-ज्ञानकृतमित्यभ्युपेयम्।

श्रुतियाँ मोक्षको अनादि कहती हैं। और 'विद्या द्वारा अमृतत्वका (मरण-शून्यत्वका) उपभोग होता है', 'ब्रह्मनिष्ठ अमृतत्वको प्राप्त करता है' इत्याद्यर्थक श्रुतियाँ मोक्षको विनाश रहित कहती हैं। एवं इन श्रुतियोंके द्वारा प्रतिपादित अर्थके पोषक न्यायका (अनुमानादिका) अनुसन्धान भी करना चाहिए। यदि मोक्ष सादि माना जाय, तो उसको विनाशी भी मानना होगा। और उसको अन्तवान् (विनाशशाली) माननेसे मोक्षशब्दमें उपचरितार्थकत्वका (लाक्षणिक अर्थका प्रतिपादक होनेका) प्रसङ्ग आ जायगा। एवं मोक्षको क्रियासाध्य माननेसे अभ्युदयरूप फलके ऐसे शरीरेन्द्रियादिका सम्बन्ध होनेसे उसमें उपचय या अपचय होनेका प्रसङ्ग कौन हटा सकेगा? कर्मके फलोंकी विचित्रता देखनेसे शरीरादिसे रहित मोक्ष भी उसका फल हो सकेगा, यह कहना भी नहीं बनता, कारण कि उसका शरीरादिसे शून्य होना स्वाभाविक है। आत्माका देहके साथ संयोग होना उपपन्न नहीं हो सकता, क्योंकि आत्मा अवयवशून्य है। [और निरवयवसे संयोग नहीं बनता]। समवाय सम्बन्ध भी नहीं हो सकता, कारण कि आत्मा शरीरके प्रति समवायी कारण नहीं है और आत्मा सामान्यादि-रूप भी नहीं है। [समवाय सम्बन्ध या तो समवायिकारणसे होता है अथवा जाति, गुण पदार्थोंसे ही हो सकता है, आत्मा देहका दोनों पदार्थ नहीं है]। इसी रीतिसे तादात्म्य आदि सम्बन्धोंका भी न हो सकना समझना चाहिए। इसलिए संयोगादि वास्तव सम्बन्ध न हो सकनेसे आत्माका शरीर रहित होना

न च मिथ्याज्ञानं कर्मभिर्निवर्त्तते ? नाऽप्यशरीर एव मोक्षः कर्मभिरन्यथा परिणम्यत इति वक्तुं शक्यम् , कूटस्थस्य परिणामायोगात् । नन्वेवमप्युपासनासाध्यत्वमात्रेण मोक्षस्य कथमुपचयादिप्राप्तिरिति चेद् , उच्यते—तत्रोपासनस्य स्वरूपतः संख्यातः कालतो वा परिमितिरस्ति न वा ? न चेत् , तर्ह्यनिर्धारितविशेषस्योपासनस्याऽनुष्ठानमशक्यं स्यात् । अस्ति चेत् , तर्हि सा प्रदर्शनीया ? नहि साङ्गदर्शपूर्णमासपरिमितिवदेतावदिदमित्युपासनास्वरूपपरिमितिः प्रदर्शयितुं शक्यते । न च संख्यातः परिमाणमस्ति । सहस्रं लक्षं वा प्रत्ययानां मोक्षसाधनमित्येतादृशस्य नियामकस्याऽदर्शनात् । नाऽपि कालतः परिमाणमस्ति, एकं शतं सहस्रं वा संवत्सराणामुपासीनस्य मोक्ष इति नियमप्रमाणाभावात् । मरण-

---

स्वभावसिद्ध है । और शरीरसे सम्बन्धका होना तो मिथ्या अज्ञानके द्वारा हुआ है, यह समझना चाहिए ।

और वह मिथ्या (अवास्तव) अज्ञान कर्मकलापके अनुष्ठाताओंके द्वारा नहीं नष्ट किया जा सकता और शरीरके सम्बन्धसे विरहित मोक्षको ही कर्मकाण्डी अन्यथा परिणत कर सकते हैं, क्योंकि कूटस्थका—निर्विकार अर्थात् परिणामशून्यका परिणाम होना सम्भव नहीं है ।

शङ्का—ऐसा माननेपर भी उपासनासे ही साध्य होनेके कारण मोक्षमें उपचयादिकी प्राप्ति कैसे संगत हो सकती है ?

समाधान—कहा जाता है कि उस उपासनाका स्वरूप, संख्या तथा कालके द्वारा परिच्छेद है या नहीं ? यदि नहीं है, ऐसा मानो, तो विशेषरूपसे निर्द्धारण न हो सकनेसे उस उपासनाका अनुष्ठान करना असम्भव होगा । [विशेषशून्य सामान्यमात्रका तो परिज्ञान भी असम्भव है, इस परिस्थितिमें अनुष्ठान तो दूर रहा] । यदि है, तो वह परिच्छेद दिखलाना होगा । अङ्गसहित दर्शपूर्णमासके परिच्छेदकी भाँति 'इतना यह है' इस प्रकार उपासनाके स्वरूपका परिमाण नहीं किया जा सकता । और संख्याके द्वारा भी परिमाण नहीं है, क्योंकि हजार या लाख उपासनात्मक ज्ञान मोक्षके साधन हैं, ऐसा कोई नियम करनेवाला प्रमाण नहीं है । एवं कालके कारण भी परिच्छेद नहीं हो सकता, कारण कि एक या सौ अथवा हजार वर्षों तक उपासना करनेवालेको मोक्षरूप फल मिलेगा, ऐसा कोई नियम-

मेवाऽवधिरिति चेत्, तथापि दर्शपूर्णमासवदेकाकारा साधनपरिमितिर्न लभ्यते। एकेन दशभिः शतेन सहस्रेण वा कालेन कस्यचिन्मरणात् पुरुषभेदेषूपचयापचयप्रसङ्गात्। उपास्यापरोक्ष्यमवधिरिति चेत्, तथापि कस्यचित्केनचित्कालेनाऽऽपरोक्ष्यात्साधनोपचयापचयौ तदवस्थावेव। अतस्तत्फले मोक्षेऽप्युपचयापचयौ दुर्वारौ। लोके वेदे च क्रियातारतम्यात् तत्फलेऽपि तारतम्यदर्शनात्। न चोपासनैकरूप्याभावेऽपि फलैकरूप्यं शास्त्राद्भविष्यतीति शङ्कनीयम्, शास्त्रस्याऽन्यथाऽनुपपत्तौ न्यायविरुद्ध-कल्पनायोगात्। अतो 'यत्कृतकं तदनित्यम्' इत्यादिन्यायानुसारेणाऽनित्यत्वा-दिकं मोक्षस्य प्राप्नोति।

कारक प्रमाण नहीं मिलता। यदि मरण (देहावसान) कालकी अवधि—परिच्छेद—माना जाय, तो भी दर्शपूर्णमासके तुल्य एक आकारसे ही साधनका परिमाण नहीं पाया जा सकता। और एक, दस या हजार (दिन, मास या वर्ष आदि) कालमें किसीका मरण होनेसे पुरुषभेदोंमें उपचय और अपचय आनेका प्रसङ्ग आ ही जायगा। (अर्थात् किसी पुरुषका एक, किसीका दो एवं किसीका सौ तथा हजार वर्षमें मरण होनेसे इस प्रकार पुरुषविशेषोंमें कालकृत परिमिति माननेसे कालकृत उपचय तथा अपचय अवश्य आ जायगा। यदि उपास्य (उपासनाका कर्मभूत) ब्रह्मका साक्षात्कार ही अवधि माना जाय, तो भी किसीको कुछ कालमें उपास्यका आपरोक्ष्य होता है, अतः पूर्वोक्त रीतिसे (पूर्वोक्त दोषके तुल्य) साधनगत उपचय तथा अपचयके होनेका प्रसङ्ग बना ही है। इस रीतिसे उस साधनके फलभूत मोक्षमें भी उपचय तथा अपचय आनेका दोष नहीं हटाया जा सकता, कारण कि लोक या वेद दोनों स्थलोंमें क्रियाके तारतम्यसे उसके फलमें तारतम्य (उपचय-अपचय—कमी-वेशी) देखा जाता है। उपासनाका एक-सा रूप (आकार) न होनेपर भी फलकी एकता (एकाकारता) शास्त्र द्वारा सिद्ध हो जानेकी आशङ्का भी नहीं की जा सकती। शास्त्रकी दूसरे प्रकारसे भी सङ्गति होनेपर न्यायविरुद्ध कल्पना करनेका अवसर नहीं आ सकता, इसलिए (जो कृतक—क्रियाजन्य—है वह अनित्य है) इस व्याप्तिसे केवल मोक्षमें अनित्यत्व आदि दोषोंका प्रसङ्ग प्राप्त होता है।

यत्तूक्तमपुनरावृत्तिश्रुतिबाधितोऽयं न्याय इति, तदसत्। तत्र किं 'ब्रह्म लोकमभिसंपद्यते' 'न स पुनरावर्त्तते' इत्येषा श्रुतिर्बाधिका उत'एषैव देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त' इत्येषा श्रुतिः ? नाऽऽद्यः, अप्रसक्तप्रतिषेधात्। नहि ब्रह्मलोकाभिसंपत्तिसमये पुनरावृत्तिः प्रसक्ता, अथ न स पुनरावर्त्तिष्यत इति वाक्यार्थः कल्प्येत, तन्न; 'तद्यथेह कर्मजितः' इत्यादिश्रुत्याऽनुमानेन च विरोधे सति श्रुतार्थपरित्यागेनाऽश्रुतार्थकल्पना-सम्भवात्। द्वितीये त्विममिति विशेषणं मानवान्तरे पुनरावृत्तिं दर्शयति। नन्वस्मिन् कल्पेऽनावृत्तिं प्रतिपादयतो वाक्यस्य कल्पान्तरे पुनरावृत्ति-

---

यह जो कहा गया कि पुनरावृत्तिका निषेध करनेवाली श्रुतिसे यह न्याय (मोक्षमें कृतकत्वरूप हेतुसे अनित्यत्वप्रतिपादक अनुमानप्रयोग-रूप न्याय) बाधित हो जाता है। [अर्थात् उस श्रुतिके बलसे मोक्षके कृतकत्व माननेपर भी अनित्यत्व आदि दोष नहीं आ सकते], यह भी सङ्गत नहीं है, कारण कि इसमें विकल्प किया जायगा कि उक्त न्यायका 'ब्रह्मलोकको प्राप्त करता है और वह पुनः लौटता नहीं' इत्यर्थक 'ब्रह्मलोकम्'— इत्यादि श्रुतिसे बाध होता है ? अथवा 'यही देव मार्ग है यही ब्रह्ममार्ग है, इस मार्गसे जानेवाले मानवसृष्टिमें पुनः नहीं आते) एतदर्थक श्रुति उस न्यायका बाध होता है ? इसमें प्रथम कल्प युक्त नहीं है, कारण कि ऐसा माननेसे अप्राप्तका ही निषेध प्राप्त होता है, क्योंकि ब्रह्मलोककी प्राप्ति-कालमें पुनः आवृत्ति (लौटना) प्राप्त ही नहीं है। (ब्रह्मलोककी प्राप्तिके कालमें लौटनेकी प्रसक्ति कैसे हो सकती है ?) यदि 'वह पुनः नहीं लौटेगा' इस प्रकार (भविष्यमें पुनरावृत्ति करना निषेधपरक) वाक्यकी कल्पना करना भी उचित नहीं है, कारण कि 'जैसे कर्मोंसे अर्जित'—इत्यादि अर्थवाली श्रुति और अनुमान (पूर्वोक्त कृतकत्वरूप-हेतुमूलक) से विरोध होनेपर श्रुत अर्थका परित्याग करके अश्रुत अर्थकी कल्पना करना सम्भव नहीं है। दूसरे कल्पमें तो 'इमम्' यह विशेषण दूसरी मानव-सृष्टिमें पुनरावृत्तिका प्रदर्शन करा रहा है। [अर्थात् इस मानवसृष्टिमें (जिससे वह गया है, उसमें) नहीं आता। परन्तु इससे दूसरे मानवमें नहीं लौटना तो सिद्ध नहीं होता]।

शङ्का—इस कल्पमें पुनरावृत्तिका निषेध करनेवाले वाक्यका दूसरे

प्रतिपादनेऽपि तात्पर्ये वाक्यभेद इति चेद्, न; पुनरावृत्तेरार्थिकत्वात्। अन्यथा सर्वत्र सविशेषणवाक्येष्वस्य चोद्यस्य दुष्परिहरत्वात्। नन्वेषा श्रुतिः कल्पे कल्पे प्रवर्त्तमाना तत्र तत्राऽऽवृत्तिं निषेधति ततोऽर्थादनावृत्तेरात्यन्तिकत्वसिद्धिरिति चेद्, न; प्रतिपत्तृभेदात्। अस्मिन् कल्पे प्रतिपन्नानामागामिकल्पे पुनरावृत्तिस्तत्र प्रतिपन्नानां तत उपरिकल्पे पुनरावृत्तिरित्यभ्युपेयम्। अन्यथा विशेषणवैयर्थ्यात्।

कल्पमें आवृत्ति (लौट आने) के प्रतिपादनमें भी तात्पर्य होनेसे वाक्यभेद होनेका प्रसङ्ग आता है। [इसलिए कल्पान्तरमें पुनरावृत्तिपरक वाक्य नहीं माना जायगा।]

समाधान—उक्त दोष नहीं आ सकता, कारण कि पुनरावृत्ति अर्थात् सिद्ध हो जाती है। [अर्थात् सिद्ध हुए अर्थके लिए वाक्यभेदकी कल्पनाकी आवश्यकता नहीं है] अन्यथा (यदि आर्थिक अर्थका बोध करानेके लिए अतिरिक्त वाक्यकी आवश्यकता हो, तो) विशेषणविशिष्ट सभी वाक्योंमें उक्त दोषका (वाक्यभेद होनेका) समाधान नहीं हो सकता। [किसीने कहा 'मधुर वचन कहा करो' इस वाक्यमें मधुर विशेषणसे अर्थात् प्रतीत होता है कि 'कटु वचन न कहना'। यदि वाक्यके बिना इसकी प्रतीति न हो सके, तो इसके लिए भी 'कटु वचन न कहो' वाक्यभेदका प्रसङ्ग आ जायगा, अतः आर्थिक अर्थकी प्रतीतिके लिए वाक्यभेदकी आवश्यकता नहीं होती और ऐसा भी नहीं है कि अर्थतः प्रतीत होनेवाला कोई अर्थ ही नहीं है, वह तो प्रतीत होता ही है।

शङ्का—यह पुनरावृत्तिका निषेध करनेवाली श्रुति प्रतिकल्पमें प्रवृत्त होती हुई (अपना अर्थबोध कराती हुई) पुनरावृत्तिका प्रत्येक कल्पमें निषेध करती है, इस प्रकार अर्थतः सिद्ध हो जाता है कि पुनरावृत्तिका निषेध नित्य (अव्यभिचरित) है।

समाधान—उक्त युक्ति उचित नहीं है, कारण कि इसमें प्रतिपत्ताओंका (मुक्तोंका) भेद है। (ऐसी व्यवस्था माननी ही होगी) इस कल्पमें ब्रह्मप्राप्ति करनेवालोंकी आनेवाले कल्पमें पुनरावृत्ति होगी और आनेवाले कल्पमें ब्रह्मप्राप्ति करनेवालोंकी उससे आगेके कल्पमें पुनरावृत्ति होगी, ऐसा मानना ही होगा। नहीं तो 'इमम्' या 'इह' दोनों विशेषण व्यर्थ होंगे।

नन्वस्तु तर्ह्यनित्य एव मोक्षः, अनित्यस्याऽपि स्वर्गादेः पुरुषार्थत्वदर्शनात्। तथा चोपासनक्रियासाध्यो मोक्षो भविष्यतीति चेत्, किं न्यायानुसारेणैवमुच्यते किंवा श्रुत्यनुसारेण? नाऽऽद्यः, न्यायविच्चाभिमा-

शङ्का—अच्छा तो अनित्य ही मोक्ष रहे। अनित्य होते हुए भी स्वर्गादिको पुरुषार्थ मानना देखा ही गया है, इसलिए उपासनारूप क्रियाका साध्य फल मोक्ष माना जायगा।

समाधान—ऐसा मानना क्या न्यायका अनुसरण करके कहा जा रहा है? अथवा श्रुतिका अनुसरण करके? प्रथम पक्ष नहीं माना जायगा, कारण कि न्यायोंका परिज्ञान रखनेके अभिमानशाली सांख्य, योग, वैशेषिक, नैयायिक,

(१) सांख्य तथा योगशास्त्रकी प्रक्रिया है—द्रष्टा-पुरुष-और दृश्य-अनात्मा प्रकृतिका-अविवेक-पार्थक्येन ज्ञान न होना—ही अविद्या है। वह अनादि कालसे प्रवृत्त है, उसका विनाश तत्त्वज्ञान (विवेकज्ञान) द्वारा ही होता है। उसके विनाशके अनन्तर—अविद्या, अस्मिता, राग, द्वेष तथा अभिनिवेशरूप क्लेश नष्ट हो जाते हैं। तदन्तर किसी प्रकारकी प्रवृत्ति न होनेसे मोक्ष होता है। इन मतोंमें अविद्यानिवृत्ति ही नित्य मोक्ष होना माना गया।

एवं वैशेषिककी प्रक्रियासे भी सिद्ध है—द्रव्य, गुण, कर्म, सामान्य, विशेष, समवायरूप पदार्थोंमें साधर्म्य और वैधर्म्य द्वारा यथार्थ ज्ञानके न हो सकनेसे प्रवृत्त हुआ अनादि मिथ्याज्ञान यथार्थरूपसे तत्त्वज्ञान होनेसे निवृत्त होता है। तदनन्तर नैयायिकप्रक्रियाके अनुसार दोषादिकी निवृत्तिसे क्रमशः मोक्षसिद्धि होती है।

नैयायिकोंकी प्रक्रिया संक्षेपमें इस प्रकार है—आत्मा, शरीर, इन्द्रिय, पृथ्वी आदि विषय, बुद्धि, मन, प्रवृत्ति, दोष, मरण, सुख, दुःख और अपवर्ग—इन बारह पदार्थोंमें अनादि-प्रवाहरूपसे चला हुआ अज्ञान तत्त्वज्ञानके द्वारा निवृत्त हो जाता है। तदनन्तर उसके कार्यस्वरूप राग-द्वेष-मोहात्मक दोषोंकी निवृत्ति हो जातीं है और दोषोंकी निवृत्ति हो जानेसे सुख-दुःखको उत्पन्न करनेवाली तन्मूलक प्रवृत्ति या निवृत्तिरूप प्रवृत्तियोंका होना सम्भव नहीं हो सकता। तदनन्तर प्रवृत्ति-निवृत्ति द्वारा उत्पन्न होनेवाले शुभाशुभ-कर्म-जनित स्थावर जङ्गम किसी भी योनिमें जन्म नहीं मिलता। इसलिए शरीरसम्बन्ध न होनेसे आत्यन्तिक दुःखका ध्वंस सुतरां सिद्ध हो जाता है। इससे नैयायिक मतमें भी तत्त्वज्ञानसे मिथ्याज्ञानकी निवृत्ति ही प्रधानरूप मोक्षकी प्रयोजक सिद्ध होती है।

बौद्धोंकी प्रक्रिया है कि—स्थायी माननेकी कल्पनाके द्वारा प्रवृत्ति या प्रवृत्तिजनित सुख, दुःख, जन्म, बन्ध आदि फल पर्यन्त राग, द्वेष आदि दोषोंसे विज्ञान दूषित हो जाते हैं। उन दूषित विज्ञानोंमें क्षणिकत्व तथा शून्यत्व रूप दुःखात्मत्वरूप अपने यथार्थ स्वरूपका परिचिन्तन करनेसे स्थायित्व आदि सब विभ्रम मिथ्याज्ञान निवृत्त हो जाते हैं। तदन्तर विशुद्ध विज्ञानके अन्तिम क्षणका उदय होता है, उसीका नाम मोक्ष है। इस मतमें भी मिथ्याज्ञानकी निवृत्तिसे ही मोक्ष माना गया है।

निभिरेव सांख्ययोगवैशेषिकनैयायिकबौद्धादिभिः सर्वैः स्वस्वप्रक्रियानुसारेणाऽनादिमिथ्याज्ञानस्य तत्त्वज्ञानेन निवृत्तौ मोक्षो भवति स च नित्य इत्येवाऽङ्गीकारात् । न द्वितीयः, 'य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति', 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे', 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि', 'भूयश्चान्ते विश्वमायानिवृत्तिः', 'य एतद्विदुरमृतास्ते भवन्ति' इत्याद्याः श्रुतयो ब्रह्मात्मत्वदर्शनसमकालमेवाऽविद्यानिवृत्तावविनाशिनं मोक्षं दर्शयन्त्यो न क्रियानुप्रवेशशङ्कामपि सहन्ते ।

ननु अहं 'ब्रह्मास्मि' इत्यादिशास्त्रं न ब्रह्मात्मैकत्वपरं किन्तु जीवविलक्षणे प्रमाणान्तराविरुद्धे ब्रह्मणि शास्त्रप्रतिपन्ने सम्पदध्यासक्रियायोगसंस्कारेष्वन्यतममपरं भविष्यति । तत्र संपद् नामाल्पे वस्तुन्यालम्बने महद्वस्तुदर्शनम् । यथाऽल्पे मनसि वृत्त्यनन्तत्वसाम्येनाऽनन्तविश्वेदेवसंपादनं कृत्वा

तथा बौद्ध आदि सभी वादियोंने अपनी अपनी प्रक्रियाके अनुसार 'अनादि मिथ्याज्ञानकी तत्त्वज्ञानसे निवृत्ति होनेपर मोक्ष होता है और वह नित्य है' ऐसा सिद्धान्त माना है । दूसरा पक्ष नहीं बनता, कारण कि 'जो ऐसा जानता है कि मैं ब्रह्म हूँ वह यह सब कुछ हो जाता है', 'यह समझकर वामदेव ऋषिको प्राप्त हुए', 'तुम हमारे पिता (शोकनिवारक) हो जो अविद्याके उस पारको पहुँचा देते हैं । (अर्थात् अविद्या—मिथ्या अज्ञानकी अत्यन्त निवृत्ति करा देते हैं) 'अन्तमें बिलकुल (सर्वात्मना) यह विश्वमाया—प्रपञ्चजात—की निवृत्ति हो जाती है' और 'जो इसको जानते हैं, वे अमर हो जाते हैं' इत्याद्यर्थक श्रुतियां ब्रह्मसाक्षात्कारके समान कालमें ही अविद्याकी निवृत्ति होनेसे अविनाशी मोक्षका प्रतिपादन करती हुई क्रियाके सम्बन्धको नहीं सह सकतीं ।

शङ्का—'मैं ब्रह्म हूँ' एतदर्थक अनेक वेदान्तवाक्योंका तात्पर्य जीव और ब्रह्मके अभेदबोधनमें नहीं है, किन्तु जीवसे विलक्षण—अतिरिक्त और दूसरे प्रमाणसे विरुद्ध न होनेवाले तथा शास्त्रसिद्ध ब्रह्ममें सम्पद्, अध्यास, क्रियायोग तथा संस्कार इनमें से किसी एकका प्रतिपादन करनेमें तात्पर्य होगा । इनमें से छोटी वस्तुमें बड़ी वस्तुका दर्शन करना सम्पद् कहलाता है । जैसे छोटेसे मनमें वृत्तियोंके अनन्तत्वकी समानता लेकर अनन्त विश्वेदेवों-

अनन्तलोकजयः । 'अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' इति श्रुतेः । तथा जीवे चिद्रूपसाम्येन ब्रह्मरूपसम्पादनं कृत्वा ब्रह्मफलमवाप्यते । अध्यासस्त्वन्यस्मिन्नन्यत्वदृष्टिः । यथा 'आदित्यो ब्रह्म' इति श्रुतिवशादब्रह्मरूप आदित्ये ब्रह्मदृष्टिस्तथाऽत्राप्यब्रह्मरूपे जीवे ब्रह्मदृष्टिः । तत्राऽऽलम्बनमविद्यमानसमं कृत्वा सम्पाद्यस्यैव प्राधान्येन चिन्तनं संपद्, आलम्बनस्यैव प्राधान्येन चिन्तनमध्यास इति तद्विवेकः । क्रियायोगस्तु यथा 'वायुर्वाव संवर्गः' इति श्रुतावग्न्यादीन् संवृणोतीति संवरणक्रिया-सम्बन्धाद् द्वयोः संवर्गगुणत्वेनोपासनं तथा जीवस्य स्वगतेन बृहत्यर्थ-योगेन ब्रह्मगुणतयोपासनम् । संस्कारश्च कर्माङ्गस्य व्रीह्याज्यादेः प्रोक्षणा-वेक्षणादिना यथा भवति तथा कर्तृतया कर्मगुणभूतस्याऽऽत्मनो ब्रह्मदृष्ट्या संस्कारः क्रियत इति ।

की सम्पत्ति करके अनन्त लोकोंका जय होता है, क्योंकि 'मन अनन्त है और विश्वेदेव भी अनन्त हैं, अतः उसके द्वारा वह अनन्त लोकका जय करता है' ऐसी श्रुति है । एवं चिद्रूपसे जीवमें ब्रह्मकी समानता होनेसे उसमें ब्रह्मरूपकी सम्पत्ति करके ब्रह्मरूप फल पाया जाता है । और दूसरे पदार्थमें दूसरे पदार्थकी बुद्धि होना तो अध्यास कहलाता है । जैसे 'सूर्य ब्रह्म है' इत्यर्थक श्रुतिके बलसे ब्रह्मस्वरूपसे भिन्न सूर्यमें ब्रह्मबुद्धि की जाती है, वैसे ही ब्रह्मसे अतिरिक्त स्वरूपवाले जीवमें ब्रह्म-दृष्टि की जाती है । इनमें आलम्बनभूत वस्तुको अविद्यमानके समान करके (जिसकी उस आलम्बन-भूत वस्तुमें सम्पत्ति की हो) उस सम्पाद्यका ही प्रधानरूपसे चिन्तन करना सम्पद् है और आलम्बनका ही प्रधानरूपसे चिन्तन करना अध्यास है, ऐसा दोनोंका विवेक है । क्रियायोग तो जैसे 'वायु ही संवर्ग है' इत्यर्थक श्रुतिमें वायु, अग्नि आदिका संवरण करता है, अतः संवरण क्रियाके सम्बन्धसे दोनोंकी संवर्गरूप गुणसे उपासना होती है, वैसे ही जीवकी अपनेमें रहनेवाले बृंहणरूप बृह धातुके अर्थके सम्बन्धसे ब्रह्मगुणरूपसे उपासना होती है । और संस्कार जैसे कर्मके अङ्गभूत व्रीहि तथा घृत आदिके प्रोक्षण तथा अवेक्षण आदिसे होता है, वैसे ही कर्ता होनेके कारण कर्मके अङ्गभूत आत्माका ब्रह्मदृष्टिके द्वारा संस्कार किया जाता है ।

नैतत्सारम् ; किं जीवब्रह्मभेदप्रतिभासविरोधभयात् सम्पदादिपरत्वं वेदान्तानां कल्प्यते ? किं वा जीवब्रह्मैक्ये तात्पर्याभावाद् ? उत फलानुसारात् ? नाऽऽद्यः, अभेदेऽपि विम्बप्रतिबिम्बवद्भेदप्रतिभासोपपत्तेः । न द्वितीयः, 'अहं ब्रह्मास्मि' इत्युक्तस्यैक्यस्य 'स एष इह प्रविष्टः' इति प्रवेशार्थवादेन 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद' इति भेदनिन्दया चोपपादितत्वात् । एवं सर्वश्रुतिष्वप्यैक्यतात्पर्यलिङ्गप्रवेशादिकमवगन्तव्यम् । न तृतीयः, अविद्यानिवृत्तिब्रह्मात्मभावश्च फलं श्रूयते । न च संपदादिपरत्वे तदुपपद्यते, संपदादीनामयथावस्तुत्वेनाऽप्रमाणज्ञानानामविद्यानिवर्त्तकत्वासम्भवात् । अन्यस्याऽन्यात्मत्वविरोधाच्च । तस्मादैक्यपरं शास्त्रम् ।

अत्र कश्चिदाह—ब्रह्मणो भिन्नाभिन्नो जीवः । ततश्च ब्रह्मणो

समाधान—उक्त कथन सारगर्भित नहीं है; क्या आप जीव और ब्रह्मके भेदकी प्रतीतिके विरोधके भयसे वेदान्तवाक्योंका सम्पद् आदिमें तात्पर्य माननेकी कल्पना करते हैं ? अथवा जीव और ब्रह्मके अभेदमें उनका तात्पर्य न होनेसे ? या फलके बलसे ? इनमें प्रथम कल्प उचित नहीं है, कारण कि अभेद रहनेपर भी बिम्ब और प्रतिबिम्बके समान भेदप्रतीतिकी उपपत्ति हो सकती है। दूसरा कल्प भी युक्त नहीं है, कारण कि 'मैं ब्रह्म हूँ' इत्यर्थक श्रुतिसे प्रतिपादित ऐक्यका (अभेदका)—'वह यह इसमें प्रविष्ट हो गया' इत्याद्यर्थक प्रवेशके अर्थवादसे और 'जो अन्य देवताकी उपासना करता है (अर्थात् यों भेद मानता है) कि वह दूसरा है और मैं दूसरा हूँ वह ज्ञानी नहीं कहा जा सकता' इस प्रकार भेदकी निन्दासे—उपपादन किया गया है। इस रीतिसे सब श्रुतियोंमें भी ऐक्यमें तात्पर्यके लिङ्ग, प्रवेश आदि समझने चाहिएँ। तीसरा पक्ष भी नहीं बनता, कारण कि अविद्यानिवृत्ति और ब्रह्मभावापत्तिरूप फलका श्रवण है। वेदान्तोंका सम्पद् आदिमें तात्पर्य माननेसे उक्त फलकी उपपत्ति नहीं हो सकती, कारण कि सम्पद् आदि सभी मिथ्याभूत वस्तु हैं, इसलिए अप्रमाण ज्ञान अविद्याका निवर्तक नहीं हो सकता और दूसरेके दूसरेका स्वरूप होनेमें भी विरोध आता है, इसलिए सिद्ध है कि वेदान्तशास्त्रका तात्पर्य जीवब्रह्मकी एकतामें—अभेदमें—ही है।

किसीका (भास्करका) कहना है कि जीव ब्रह्मसे भिन्न और अभिन्न दोनों

नित्यमुक्तता जीवस्य नित्यबद्धता च व्यवस्थामश्नुते । अत्यन्ताभेदे तु ब्रह्मैव स्वसंसराय कथं जगदुत्पादयेत् । विरुद्धा च विशुद्धस्याऽशुद्धताप्रतिपत्तिरिति ।

अत्रोच्यते—न तावत् जीवब्रह्मणोर्जातिव्यक्तिभावो गुणगुणिभावः कार्यकारणभावो विशिष्टस्वरूपत्वमंशांशिभावो वा विद्यते, मानाभावात् । न च तदभावे क्वचिद्भेदाभेदौ दृश्येते, 'ममैवांशो जीवलोके' इति स्मृतेरंशांशितेति चेद्, न; 'निष्कलम्' इति निरंशत्वप्रतिपादकश्रुतिविरोधात् । 'पादोऽस्य विश्वा भूतानि' इति श्रुतिर्नांशांशिभावं ब्रूते, किन्तु ब्रह्मानन्त्यप्रतिपादनाय जीवस्याऽल्पतामात्रमाह । अन्यथा सांशस्य ब्रह्मणो घटादिवदवयवारभ्यत्वप्रसङ्गात् । ननु स्वाभाविकी निरवयवता बुद्ध्याद्युपाधिनिमित्तं सांशत्वमिति नोक्तदोष इति चेद्, एवमपि वास्तवभेदो न सिध्येत् ।

प्रकारका है । इससे ब्रह्मका नित्यमुक्त रहना और जीवका नित्यबद्ध रहना व्यवस्थित हो सकता है । यदि ब्रह्मका और जीवका अत्यन्त अभेद माना जाय, तो स्वयं ब्रह्म अपने संसार—बन्धन—के लिए संसारको क्यों उत्पन्न करेगा ? और विशुद्ध ब्रह्मका अशुद्ध होना विरुद्ध भी होता है ।

इस भास्करके कथनपर कहा जाता है कि जीव और ब्रह्ममें जातिव्यक्तिभाव, गुणगुणिभाव, कार्यकारणभाव या विशिष्टस्वरूपत्व तथा अंशांशिभाव नहीं हैं, क्योंकि इनके होनेमें कोई प्रमाण नहीं है । और इनके न रहनेपर कहीं भी भेद और अभेद नहीं देखे जाते हैं । यदि शङ्का हो कि 'यह जीव संसारमें मेरा (ब्रह्मका) ही अंश है' इस स्मृतिसे जीव और ब्रह्ममें अंशांशिभाव सिद्ध होता है, तो यह भी उचित नहीं है, कारण कि इसमें 'वह निष्कल—निरवयव—है' इत्यर्थक अवयवशून्यताप्रतिपादक श्रुतियोंसे विरोध आता है । 'सम्पूर्ण भूत इसके पाद हैं' एतदर्थक श्रुति तो अंशांशिभाव—अवयवावयविभाव—का बोध नहीं करा रही है, किन्तु ब्रह्मकी अनन्तताका प्रतिपादन करनेके लिए जीवकी केवल अल्पताको कहती है । अन्यथा (ब्रह्मको सावयव माननेमें) सावयव ब्रह्ममें भी घटादिके सदृश अवयवोंसे आरभ्य होनेका प्रसङ्ग आ जायगा । यदि ब्रह्ममें स्वभावसिद्ध अवयवशून्यता और बुद्धि आदि उपाधिके कारण सावयवता है ऐसा माननेपर उक्त दोष नहीं है, तो भी वास्तविक भेद

नहि निरवयवमाकाशं खड्गधारादिभिर्वस्तुतो भेत्तुं शक्यम् । अथाऽन्तःकरणोपाधीनां वस्तुतो ब्रह्मविदारणसामर्थ्यमस्ति तर्हि ब्रह्म स्वस्याऽनर्थाय कथमुपाधीन् सृजेत् । न च जीवार्था तत्सृष्टिः, तत्सृष्टेः प्राग् जीवविभागासिद्धेः । न च कर्माविद्यासंस्कारा अन्तःकरणोत्पत्तेः प्राग्विद्यमाना अपि जीवं विभजन्ते, अन्तःकरणद्रव्यस्यैव जीवोपाधित्वाङ्गीकारात् । ननु नीलपीतादिवद्भेदः स्वाभाविको द्रव्यत्वादिजातिनिबन्धनश्चाऽभेद इति चेत्, तर्हि 'अयमात्मा ब्रह्म' इति सामानाधिकरण्यं न स्यात्, नीलं पीतमिति सामानाधिकरण्याभावात् । अथ न निष्पन्नो भेदो नाऽप्यनादिः किन्तूपाधिनिबन्धनः केवलं ब्रह्मणि प्रकाशते । स तर्ह्यतस्मिंस्तदारोपो विभ्रम एव

सिद्ध नहीं होता, क्योंकि खड्गकी धारसे अवयवरहित आकाशके वस्तुतः टुकड़े नहीं किये जा सकते। यदि कहा जाय कि अन्तःकरणमें ऐसी सामर्थ्य है कि वह ब्रह्मका वस्तुतः विदारण—टुकड़े—कर सकता है, तो ब्रह्म अपने अनर्थके लिए उपाधिकी सृष्टि क्यों करेगा? उपाधिकी सृष्टि जीवके लिए भी नहीं मान सकते, कारण कि उपाधिकी सृष्टिके पूर्व जीवरूप भेदकी ही सिद्धि नहीं है। [अर्थात् उपाधिके द्वारा ही जीव और ब्रह्म ऐसा विभाग बनता है, इससे पूर्व तो अद्वैत ब्रह्म ही है।] अन्तःकरणकी उत्पत्तिसे पूर्वमें रहनेवाले कर्म, अविद्या तथा संस्कार द्वारा भी जीवरूप विभागकी सिद्धि नहीं हो सकती, क्योंकि अन्तःकरणरूप द्रव्य ही जीवभेदमें प्रयोजक उपाधि माना गया है।

शङ्का—नील, पीत आदि भेदोंके सदृश जीवभेद भी स्वभावसिद्ध ही है (इससे उपाधिसृष्टिके पूर्व भी जीव विद्यमान रह सकता है) और द्रव्यत्व आदि जातिके कारण अभेद होगा।

समाधान—ऐसा माननेपर 'यह जीवात्मा ब्रह्म है' ऐसा सामानाधिकरण्य नहीं बनेगा। [द्रव्यत्व आदि जातिके कारण सामानाधिकरण्य नहीं हो सकता] क्योंकि 'नील पीत है' ऐसा सामानाधिकरण्य कहीं नहीं देखा जाता। (नील, पीतके साथ घटत्वादि या पदार्थत्वका सम्बन्ध है ही)। यदि कहा जाय कि भेद सिद्ध नहीं है और अनादि भी नहीं है, किन्तु उपाधिके कारण केवल ब्रह्ममें प्रकाशित होता है, तो वह भेद अन्यमें अन्यका आरोप-

स्यात् । प्रामाणिकस्य भेदस्य कथं विभ्रमत्वमिति चेद्, न; जीवब्रह्मभेदे प्रत्यक्षादीनामप्रसरात् । आगमस्तु न भेदं प्रतिपादयति प्रत्युत 'एष त आत्माऽन्तर्याम्यमृत' इत्यभेदं प्रतिपाद्य 'नान्योऽतोऽस्ति द्रष्टा' इति भेदं प्रतिषेधति । न च संसारित्वासंसारित्वव्यवस्थानुपपत्तिर्भेदे मानम्, अभेदस्याऽप्यङ्गीकृतत्वेनाऽव्यवस्थातादवस्थ्यात् । नह्याकाशं घटेनाऽवच्छिद्य तदन्तर्धूमादिसमावेशे सत्याकाशस्य धूमादिसंयोगः परिहर्तुं शक्यते, घटावच्छिन्नभागसहितस्यैवाऽऽकाशत्वात् । अथाऽपि भेदांशमुपजीव्य व्यवस्थोच्येत तर्ह्यस्मन्मतेऽपि ब्रह्मण्यविद्यादिसंसर्गासंसर्गाभ्यां व्यवस्था किं न स्यात् । एकस्मिन्नेव वस्तुनि संसर्गस्य

रूप (बिना भेदवालेमें भेदका आरोपरूप) भ्रममात्र ही होगा । प्रमाणसिद्ध भेद भ्रम नहीं हो सकता, यह कहना भी उचित नहीं है, कारण कि जीव और ब्रह्मके भेदमें प्रत्यक्ष आदि प्रमाणोंका प्रसङ्ग नहीं है । शास्त्र तो भेदका प्रतिपादन नहीं करता, परन्तु उसके विपरीत 'यह तुम्हारा आत्मा अन्तर्यामी अमृतरूप है' इस प्रकार अभेदका प्रतिपादन करके 'इससे अतिरिक्त कोई द्रष्टा नहीं है' इन वाक्योंसे भेदका निषेध करता है । संसारित्व—बद्ध—और असंसारित्व—मुक्त—की व्यवस्थाका न बनना ही भेदकी सिद्धिमें प्रमाण है, ऐसा भी नहीं कहा जा सकता; कारण कि अभेदका भी अङ्गीकार कर लेनेसे व्यवस्थाका न बनना वैसे ही है । आकाशको घटरूप उपाधिके द्वारा भिन्न करके (महाकाशसे घटाकाशका भेद सिद्ध करके) उस उपाधिके अन्दर धूमादिका समावेश होनेपर उस उपाध्यवच्छिन्न आकाशके साथ भी धूमादिके संयोगका परिहार नहीं किया जा सकता, क्योंकि घटावच्छिन्न भाग सहित ही आकाश है । [अर्थात् अवश्य ही घटान्तर्गत आकाशके साथ धूमका संयोग होनेसे शुद्ध अवच्छिन्नका अभेद माननेवालेके मतमें आकाशसे भी धूमका संयोग है ही । एवं ब्रह्मका अन्तःकरणरूप उपाधिके द्वारा जीवभेद होनेके अनन्तर उस अवच्छिन्नसे संसारका सम्बन्ध होनेसे अवश्य ही ब्रह्मका भी संसारसे सम्बन्ध हो गया । इससे ब्रह्म नित्यमुक्त है यह व्यवस्था नहीं बनेगी ।] यदि भेदभागको लेकर व्यवस्था बनायी जाय, तो हमारे मतसे भी ब्रह्मके साथ अविद्याके संसर्ग तथा संसर्गके अभावसे व्यवस्था क्यों नहीं हो सकेगी । [ब्रह्मके साथ अविद्याका सम्बन्ध होनेसे संसारित्व और संसर्ग छूटनेसे मुक्तत्व व्यवस्था होनेमें कोई असामञ्जस्य नहीं है ।] एक ही पदार्थमें संसर्ग-सम्बन्धका होना और न होना दोनों

भावाभावौ विरुद्धाविति चेद्, न; भेदस्य भावाभावयोरेकत्र त्वयाऽभ्युपगमात्। अभेदो नाम न भेदाभावः, किन्त्वैक्याख्यं धर्मान्तरमिति चेत्, तथापि भेदाभेदौ विरुद्धावेव परस्परनिवर्तकत्वात्। 'अहं मनुष्यः' इति प्रतीतं देहात्मैक्यं 'नाऽहं मनुष्योऽपि तु ब्रह्मास्मि' इत्यनेन देहात्मभेदभानेन निवर्त्तते। तथा द्वौ चन्द्राविति प्रतीतो भेदश्चन्द्रैक्यज्ञानेन निवर्त्तते। अतो विरोधभीतस्त्वं कथं भेदाभेदावङ्गीकुर्वीथाः। तदङ्गीकारे वा ब्रह्मण्यविद्यासंसर्गेण तयोर्बिम्बप्रतिबिम्बदृष्टान्तेनोपपादयितुं सुशकयोः कस्तव प्रद्वेषः। न चांऽशभूते जीवे संसारिणि सत्यंशिनो ब्रह्मणस्तदभावे तवाऽस्ति कश्चिद् दृष्टान्तः। नहि वस्त्रैकदेशे देहैकदेशे वा चण्डालसूतिकादिभिरुपस्पृष्टे कृत्स्नौ वस्त्रदेहावप्रक्षालनीयौ भवतः। अतो न त्वन्मते ब्रह्मणोऽसंसारित्वं प्रत्युत सर्वजीवैः

विरुद्ध नहीं रह सकते, यह कहना भी उचित नहीं है, कारण कि एकमें ही भेदका होना और न होना दोनों तुम भी मानते आये हो। यदि कहा जाय कि अभेद भेदका अभावरूप पदार्थ नहीं है, किन्तु (अधर्मके सदृश) अभेद एक दूसरा धर्म ही है। तथापि भेद और अभेद एक दूसरेके विरोधी तो हैं ही, कारण कि इनमें एक दूसरा एक दूसरेका निवर्तक है। 'मैं मनुष्य हूँ' इस प्रतीतिसे सिद्ध हुआ देह और आत्माका अभेद 'मैं मनुष्य नहीं हूँ, प्रत्युत ब्रह्म हूँ' इस प्रतीतिके द्वारा देह और आत्मामें भेदका प्रतिभास होनेसे निवृत्त हो जाता है; इसी प्रकार दो चन्द्र हैं, इस प्रकार प्रतीत हुआ चन्द्रमाका भेद चन्द्रके ऐक्यज्ञानसे निवृत्त होता है। इसलिए विरोधसे भयभीत तुम भेद और अभेद दोनोंकी एकमें स्थिति कैसे मान रहे हो? और यदि विरोधसे न डरकर परस्पर विरुद्धोंकी भी एकमें स्थिति मान सकते हो, तो ब्रह्ममें अविद्याके सम्बन्धसे उन दोको—ब्रह्ममें अविद्याके संसर्ग और उसके अभावको जिनका बिम्बप्रतिबिम्बदृष्टान्तसे उपपादन करना सरल है, माननेमें कौन तुम्हारा द्वेष है। और अंशभूत जीवके संसारी होते हुए अंशी—अवयवीस्वरूप—ब्रह्म संसारी नहीं है, इसमें तुम्हारे पास कौन-सा दृष्टान्त है। ऐसा नहीं देखा गया कि वस्त्रका एक भाग अथवा देहके किसी एक अवयवसे चाण्डाल आदि अस्पृश्य जातिका स्पर्श हो जानेसे वह सारा वस्त्र और सम्पूर्ण देह शुद्ध न की जाय। [एक देशमें भी अशुद्धि आ जानेसे सम्पूर्ण अवयवीको ही अशुद्ध मान कर उस अवयवी भरकी शुद्धि की जाती है।] इसलिए तुम्हारे मतमें ब्रह्ममें असंसारित्व (नित्यमुक्तत्व) नहीं बन सकता। प्रत्युत इसके विपरीत

सर्वप्रपञ्चेन चाऽभिन्नतया सर्वं दोषजातं स्वात्मन्येव ब्रह्म पश्येत्। तथा च तादृशब्रह्मप्राप्तेरपुरुषार्थतया शास्त्रारम्भादिकमनुपपन्नं स्यात्। नहि ज्ञानध्यानादिभिः स्वोपाधौ कथंचित्प्रविलापितेऽप्यशेषजीवोपाधयः प्रविलापयितुं शक्यन्ते येन ब्रह्मणि सर्वो दोषः परिह्रियेत। अस्मन्मते तु ब्रह्मणि न कश्चिद्दोषः, प्रतिविम्बश्यामत्वादीनां विम्बसंबन्धादर्शनात्। तत्त्वज्ञानेन सर्वोपाधिविनिर्मोक्षश्चोपपद्यते। स्वप्नकल्पितवस्तूनां सर्वेषामपि प्रबोधे निवृत्तिदर्शनात्। शुकवामदेवादितत्त्वज्ञानेन सर्वोपाधिनिवृत्ताविदानीं संसारानुपलब्धिः प्रसज्येतेति चेद्, न; त्वत्पक्षेऽपि समानत्वात्। एकैकस्य जीवस्यैकैक-

समस्त जीव तथा सम्पूर्ण प्रपञ्चके साथ अभेद होनेसे ब्रह्म सम्पूर्ण दोषसमूहको अपनेमें ही समझेगा। इस परिस्थितिमें नित्यबद्ध ब्रह्मकी प्राप्तिमें पुरुषार्थत्व सङ्गत न होनेसे उसके लिए वेदान्त या विचारशास्त्रोंका आरम्भ करना युक्तियुक्त न होगा। ज्ञान या ध्यान आदिसे अपनी उपाधिका किसी प्रकार विलय (विनाश) कर देनेपर सम्पूर्ण जीवोंकी उपाधियोंका विनाश नहीं किया जा सकता, जिससे कि ब्रह्ममें दिये जानेवाले समस्त दोषोंका परिहार हो सके। [जिसको ज्ञान हुआ है और जिसने ध्यानादि या मनन किया है, उसकी उपाधियोंकी निवृत्ति होनेसे अन्य पामर प्राणियोंकी सब उपाधियाँ नष्ट नहीं हो सकतीं और वे प्राणी भी ब्रह्माऽभिन्न ही हैं, अतः उनके द्वारा ब्रह्म दूषित बना ही रह जायगा, ब्रह्म तो प्राणियोंके भेदसे भिन्न नहीं है, जिससे कि ज्ञानी और ध्यानीके द्वारा प्राप्त ब्रह्मको निर्दोष कह सकें एवं सदोषकी प्राप्ति कथमपि पुरुषार्थ नहीं हो सकती।] और हमारे मतमें तो ब्रह्ममें कोई दोष ही नहीं है, क्योंकि प्रतिविम्बगत श्यामत्व आदि दोषोंका सम्बन्ध विम्बके साथ नहीं देखा जाता है। [इससे उपाधिकृत दोषका संसर्ग प्रतिविम्बस्थानीय जीवके साथ ही होगा ब्रह्मके साथ नहीं होगा।] और तत्त्वज्ञानके द्वारा समस्त उपाधियोंसे छुटकारा पा जाना सम्भव है। देखा जाता है कि स्वप्नमें कल्पित सभी पदार्थोंका (जागरणावस्थामें) बोध होनेपर विनाश हो जाता है। हमको श्रीशुकदेवजी तथा श्रीवामदेव मुनिजीको हुए तत्त्वज्ञानके द्वारा समस्त उपाधिके विलय हो जानेपर इस समय संसारकी उपलब्धि नहीं होनी चाहिए, इस प्रकार दूषण देना भी उचित नहीं है, कारण कि यह दोष तो तुमको भी समान ही है। [जो दोष दोनोंको समान होता है, उसका उत्तर करनेके लिए एक ही बाध्य

स्मिन् कल्पे मुक्तावप्यनन्तजीवानामतीतानन्तकल्पेषु मुक्तौ कथं संसार उपलभ्येत । अनुभवमवलम्ब्येदानीन्तनसंसारसमाधानमुभयोः समानम् । उपपत्तिस्त्वेकात्मवादिभिरस्माभिरेव कथञ्चिद्वक्तुं शक्यते । तथाहि—यस्त्वं मां प्रति बन्धमोक्षव्यवस्थां पृच्छसि स त्वमेक एव सर्वकल्पनाधिष्ठानभूतश्चिदेकरस आत्मा त्वदन्ये मुक्ता मुच्यमाना मोक्ष्यमाणाश्च सर्वे जीवास्त्वदविद्यया स्वप्न इव कल्पिताः । वामदेवादिमुक्तिश्रुतिश्च त्वत्प्ररोचनाय ब्रह्मविद्याप्रशंसार्था । एवं च सति कस्य बन्धमोक्षावित्येष संदेहस्तव तावत् संसारदशायां मोक्षदशायां वा न जायते । एवं प्रत्येकं तत्तत्पुरुषदृष्ट्या

नहीं होगा ।] क्योंकि तुम्हारे मतमें भी एक एक जीवकी (ज्ञानी ध्यानीकी) एक-एक कल्पमें मुक्ति हो जानेसे अनन्त जीवोंकी अनन्त कल्पोंमें मुक्ति हो जानेके कारण संसार कैसे उपलब्ध हो सकेगा ? अनुभवके बलपर इस समय यदि दीख पड़नेवाले इस संसारकी स्थितिका समाधान किया जाय, तो यह समाधान दोनोंके लिए एक-सा ही होगा (अर्थात् हम भी अनुभवके बलसे संसारकी स्थिति कहेंगे) । [यदि दोनों पक्षोंमें शङ्का और समाधान समान ही हैं, तो आपका ही मत क्यों माना जाय ? इस आशङ्कासे अपने मतके समर्थनमें विनिगमक देते हैं—] एकात्मवादी हमारे मतमें ही उपपत्ति हो सकती है । [वस्तुतः हमारे मतमें अनिर्वचनीय ख्याति है, परन्तु यज्ञानुरूप एवं बलि तुष्यतु दुर्जनन्यायसे कुछ भी निर्वचन हो सकता है, तो हमारे ही मतमें हो सकता है, इस आशयसे 'कथञ्चित्' कहा' उपपत्ति इस प्रकार है—] जो तुम हमसे बन्ध और मोक्षकी व्यवस्था पूँछ रहे हो, वह तुम अकेले ही समस्त कल्पनाओंके अधिष्ठानभूत चिद्रूप आत्मा हो और तुमसे अतिरिक्त मुक्त हुये या मुक्त होनेकी अवस्थाको प्राप्त हुए अथवा आगे मुक्त होनेवाले सभी जीव तुम्हारी अविद्यासे स्वप्न सदृश कल्पित हैं । और वामदेव आदिकी मुक्ति कहनेवाली श्रुति तो तुमको प्ररोचन करनेके लिए या ब्रह्मविद्याकी प्रशंसाके निमित्त है । इस प्रकार सिद्धान्त निश्चित होनेपर किसको बन्ध तथा मोक्ष होता है, यह सन्देह तुमको तो न संसारदशामें और न मोक्षदशामें हो सकता है । इस प्रकार तत्-तत् पुरुषकी दृष्टिसे वही वही (स्वयं) आत्मा है ।

---

१ यश्चोभयोः समो दोषः परिहारस्तयोः समः । नैकस्तत्रानुयोक्तव्यः ।

स स एवाऽऽत्मेति गुरुशास्त्राभ्यां बोधिते सति न कस्याऽपि संदेह उदेतीति किमत्राऽनुपपन्नम् । अतोऽखण्डैकरसात्मवादेऽनुपपत्त्यभावात् तत्तत्परेण शास्त्रेणाऽऽत्मतत्त्वे बोधिते सद्य एवाऽविद्यातत्कार्ययोः स्वप्नवत् प्रविलीनयोः सतोरद्वितीये ब्रह्मणि संपदादिरूपेणोपास्तिक्रियायाः कोऽवसरः । अत एव श्रुतिर्ब्रह्मण उपास्यत्वं निषेधति—'यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति । न च वेद्यत्ववदुपास्यत्वमपि स्यादिति मन्तव्यम्, 'अन्यदेव तद्विदितादथो अविदितादधि' इति श्रुत्या वेद्यत्वस्याऽपि निषेधात् । अवेद्यत्वेऽप्यखण्डैकरसब्रह्माकारान्तःकरणवृत्त्या चैतन्याभिव्यक्तियुक्तया शास्त्रजन्यया विद्ययाऽविद्यातत्कार्यनिवृत्तेर्ब्रह्मणः शास्त्रवेद्यत्वमुपचर्यते । एतां वृत्तिं प्रति संनिधिमात्रेणाऽखण्डैकरसत्व-

---

ऐसा गुरु तथा शास्त्र द्वारा उपदेश होनेपर किसीको भी सन्देह नहीं हो सकता, फिर कहो कि इसमें क्या अनुपपत्ति है ? इसलिए आत्माके अखण्ड (निरवयव) और एकरस माननेके पक्षमें किसी प्रकारकी अनुपपत्ति न होनेसे तादृश आत्माके बोधनमें तात्पर्यवाले शास्त्र द्वारा आत्मतत्त्वका बोधन हो जानेपर तुरत ही स्वप्नकी भाँति अविद्या तथा उसके कार्यभूत प्रपञ्चका विलय हो जानेसे अद्वितीय ब्रह्ममें पूर्वोक्त, सम्पदादि रूपसे उपासना क्रियाका अवसर कैसे आ सकता है ? इसीलिए तो श्रुति ब्रह्मके उपासनाविषय होनेका निषेध करती है। 'जिसका मनसे मनन नहीं किया जाता, प्रत्युत जिसके द्वारा मन मनन करनेवाला कहलाता है, वही ब्रह्म है, उसको तुम ब्रह्म जानो, यह ब्रह्म नहीं है, जिसकी कि उपासना की जाती है' इत्यर्थक श्रुति उपासनाका निषेध करती है। वेद्यत्व (ब्रह्म-विद्याविषयत्व) की भाँति ब्रह्मका उपासना विषय होना भी नहीं मानना चाहिए, कारण कि 'वह ब्रह्म ज्ञानविषयसे भी अतिरिक्त है और ज्ञानके अविषयसे भी परे है' एतदर्थक श्रुतिसे ब्रह्मका वेद्य—ज्ञानविषय—होना निषिद्ध किया गया है। [ब्रह्ममें शास्त्रवेद्यत्वकी उपपत्ति दिखलाते हैं—] ब्रह्मके वस्तुतः अवेद्य होनेपर भी चैतन्यकी अभिव्यक्तिसे युक्त तथा शास्त्रसे उत्पन्न ब्रह्मविद्यात्मक अखण्डैकरस ब्रह्माकार अन्तःकरणकी वृत्तिके द्वारा अविद्या तथा उसके कार्यस्वरूप प्रपञ्चकी निवृत्ति होनेसे ब्रह्ममें शास्त्रवेद्यत्वका गौण व्यवहार होता है। इस पूर्वोक्त अखण्डैकरस ब्रह्माकारवृत्तिके प्रति

लक्षणस्वाकारसमर्पकतया स्वस्वाकारसमर्पकघटादिवद्वृत्तिव्याप्यत्वलक्षणं विषयत्वं ब्रह्मणोऽभिप्रेत्य 'मनसैवानुद्रष्टव्यम्', 'एषोऽणुरात्मा वेदितव्यः', 'तं त्वौपनिषदं पुरुषम्' इत्याद्याः श्रुतयः प्रवृत्ताः । जडेषु घटादिष्विव प्रमाण-

---

अपने केवल सन्निधानसे अखण्डैकरसस्वरूप अपने आकारका समर्पण करनेसे अपने अपने आकारका समर्पण करनेवाले घटादिके सदृश वृत्तिव्याप्यत्वरूप विषयत्व ब्रह्ममें मानकर 'मनके द्वारा ही साक्षात्कार करना चाहिए', 'यह अणु सूक्ष्मातिसूक्ष्मरूप आत्मा ज्ञेय—जानने योग्य—है' और उस उपनिषदोंके द्वारा जानने योग्य पुरुष—चेतनशक्ति—को' एतदर्थक श्रुतियां प्रवृत्त होती हैं। [यद्यपि ब्रह्म अप्रमेय एवं अवेद्य और अव्यपदेश्य है, इसलिए वह वास्तवमें न तो श्रुतिसे वेद्य और न गुरुके उपदेशसे ज्ञेय हो सकता है। ऐसी दशामें ब्रह्मको शास्त्रवेद्य कैसे कहा जाय ? इस शङ्काके समाधानका आशय है कि वस्तुतः ब्रह्म वेद्य नहीं है, परन्तु जैसे स्वप्रकाश भी सूर्य घनीभूत बादलों या धूलीपटलसे आच्छन्न हुआ प्रकाशित नहीं होता, परन्तु उस आवरक मेघमण्डल एवं धूलीपटलके प्रचण्ड वायु द्वारा या अन्य कारणोंसे हट जानेपर अपने स्वरूपसे प्रकाशित होता हुआ दृष्टिगोचर होता है, वैसे ही स्वप्रकाश तथा विशुद्ध भी ब्रह्मात्मा अनादि अविद्या तथा उसके कार्यों द्वारा आच्छन्न हुआ अप्रकाशित-सा रहता है। उस आवरणके अपनयनके लिए प्रचण्ड वायुस्थानीय अन्यविषयव्यावृत्त अन्तःकरणकी शुद्ध वृत्तिकी अपेक्षा होती है। यह वृत्ति अत्यन्त निर्मल होनेसे सन्निहितकी अभिव्यक्ति करती है और उसके आकारको भी ग्रहण कर लेती है, ब्रह्म सर्वव्यापक होनेसे सर्वत्र सन्निहित है, श्रवण, मनन आदि अन्तःकरणकी वृत्तिमें कोई अन्य विषयोंका ज्ञेय शेष नहीं रहता, अतः स्वच्छ अखण्डैकरसकी अभिव्यक्ति तथा उसका आकार लेना ही उस वृत्तिको स्वतः प्राप्त हो जाता है। यही ब्रह्मका विषय होता है, जिसके कारण सम्पूर्ण आवरण नष्ट हो जाते हैं और स्वरूपसिद्ध स्वतःप्रकाश ब्रह्मका साक्षात्कार हो जाता है, एतावता ब्रह्म शास्त्रवेद्य भी कहा गया है। जड़ पदार्थ घटादिकी वृत्ति द्वारा प्रकाश और ब्रह्मप्रकाशमें भेद दिखलाते हैं—] जड़ पदार्थ घट आदिमें प्रमाण द्वारा उत्पन्न

कृतस्फुरणातिशयस्य स्वप्रकाशे ब्रह्मण्यसंभवात् फलव्याप्यत्वाभावलक्षण-मविषयत्वं च 'यतो वाचो निवर्त्तन्ते' इत्याद्याः श्रुतयः प्रत्यपीपदन् । न चाऽत्राऽत्यन्तं फलाभावः, अन्तःकरणवृत्त्यभिव्यक्तत्वोपाधिना ब्रह्मचैतन्यस्यैव फलत्वोपचारात् । घटादिष्वप्यस्यैव फलत्वव्यवहारात् । तदुक्तम्—

'परागर्थप्रमेयेषु या फलत्वेन संमता ।
संवित् सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥' इति ॥

अतो ब्रह्मचैतन्यमुपान्त्यक्षणेऽवच्छिन्नतया फलावस्थं भूत्वा चरमक्षणे स्वावच्छेदिकां वृत्तिं निवर्त्तयति । तत उपर्यवच्छेदकाभावात् फलावस्थतां परित्यज्य निर्विकल्पकचैतन्यमात्रं मोक्षदशायां परिशिष्यते । एवं च सति नित्यमुक्तं ब्रह्मैव स्वाविद्यादिप्रतिबिम्बितं सज्जीव-

---

किये गये प्रकाशरूप अतिशयका स्वप्रकाशरूप ब्रह्ममें सम्भव नहीं है [क्योंकि ब्रह्म तो स्वयंप्रकाशरूप है, उसमें प्रकाशरूप अतिशय उत्पन्न करानेके लिए किसी प्रमाणजनित वृत्ति आदि दूसरे कारणकी अपेक्षा नहीं है] । इसलिए फल-व्याप्यत्वरूप विषयत्वके अभावका भी 'जिस ब्रह्मरूप अवधिसे वाणी निवृत्त हो जाती है' एतदर्थक श्रुतियोंने प्रतिपादन किया है । यहाँ फलका अत्यन्त अभाव है, ऐसा भी नहीं कहा जा सकता; कारण कि अन्तःकरणकी उक्त वृत्तिमें अभिव्यक्त होना रूप उपाधिके द्वारा ब्रह्मचैतन्यमें ही फलत्वका गौणरूपसे व्यवहार होता है, क्योंकि घटादि स्थलोंमें भी इसीका फलरूपसे व्यवहार होता है [अर्थात् घटाकार अन्तःकरणकी वृत्तिमें अभिव्यक्त चैतन्य ही घटावच्छिन्न चैतन्यके नामसे फल कहलाता है] । इस विषयमें कहा भी गया है—

'बहिर्भूत घट, पट आदि विषयस्थलोंमें जिस संवित्‌को फल माना गया है, वही संवित् ही प्रकृत वेदान्तवाक्यरूप शब्द प्रमाण द्वारा प्रमेय अर्थ है [अर्थात् वेदान्तवाक्योंका भी घटावच्छिन्न चैतन्यप्रकाशके तुल्य संविद्रूप ब्रह्मचैतन्य प्रकाश ही प्रमेय है] ।

इसलिए ब्रह्मचैतन्य अन्तिम क्षणके पूर्वक्षणमें अवच्छिन्न होनेसे फलावस्थामें विद्यमान होकर अन्तिम क्षणमें अपनी अवच्छेदिका—उपाधिरूप—वृत्तिमात्रको भी नष्ट कर देता है । तदनन्तर अवच्छेदकारक उपाधिके न रह जानेसे फलावस्थाका त्यागकर निर्विकल्पक चैतन्यमात्र मोक्ष-दशामें अवशिष्ट रह जाता है । इस सिद्धान्तके निर्णीत होनेपर (इस प्रकार व्यवस्था बननेपर) नित्य-

भावमापाद्य संसरति स्वविद्यया च विमुच्यत इत्युक्तं भवति ।

नन्वेवं जीवस्यैव ब्रह्मत्वे 'तत्त्वमसि' आदिमहावाक्येषु पदद्वयस्य पुनरुक्तिः स्यात्, तत्परिहाराय भेदाभेदावभ्युपेयाविति चेद्, न; तथा सति वाक्यार्थज्ञानेन शरीरेन्द्रियादिसंसारस्य निवृत्त्यसिद्धेः। तथाहि—किमुपपत्तितस्तन्निवृत्तिः साध्यते ? उत 'भिद्यते हृदयग्रन्थि०' इत्याद्यागमात् ? नाऽऽद्यः, त्वन्मते देहादिविशिष्टस्यैव जीवस्य ब्रह्मणा सह भेदाभेदयोर्वास्तवयोर्महावाक्यार्थतया तद्गोचरज्ञानेन देहादिनिवृत्त्ययोगात् । न द्वितीयः, वर्त्तमानापदेशिन आगमस्य योग्यानुपलब्धिविरोधेऽर्थवादत्वात् । अथ मोक्ष-

---

मुक्तस्वरूप ब्रह्म ही अपनी अविद्या आदिमें प्रतिबिम्बित होता हुआ जीवभावको प्राप्त कर संसारी हो जाता है और पुनः वही अपनी ही विद्याके द्वारा मुक्त हो जाता है, ऐसा निष्कर्ष निकलता है ।

शङ्का—यदि उक्त रीतिसे जीवको ही ब्रह्मभाव प्राप्त है, तो 'वह तू है' इत्याद्यर्थक महावाक्योंमें (वह तू) ऐसे दो पदोंका देना पुनरुक्त होगा (जो कि दोष माना जाता है) इस दोषका वारण करनेके लिए भेद और अभेद दोनोंका माना जाना उचित ही है ।

समाधान—ऐसा (भेद और अभेद दोनोंके) माननेपर वाक्यार्थज्ञान द्वारा शरीरेन्द्रिय आदि संसारकी निवृत्तिकी सिद्धि नहीं हो सकती, क्योंकि विकल्प हो सकते हैं—क्या उपपत्ति—अनुमानप्रयोग—से देहादिकी निवृत्ति सिद्ध की जायगी ? अथवा 'हृदयग्रन्थि टूट जाती है' एतदर्थक शास्त्रके द्वारा ? इनमें प्रथम विकल्प युक्त नहीं हो सकता, क्योंकि तुम्हारे मतमें देहेन्द्रिय आदिसे विशिष्ट जीवका ही ब्रह्मके साथ वास्तव भेदाऽभेद महावाक्योंका अर्थ माना गया है, इस दशामें उन महावाक्योंके वास्तविक भेदाऽभेदविषयक ज्ञानसे देह आदिकी निवृत्तिका होना सम्भव नहीं है । दूसरा कल्प भी युक्त नहीं है, कारण कि 'भिद्यते' इस वर्तमान पदसे व्यवहार करनेवाले शास्त्रको योग्यकी अनुपलब्धिके कारण विरोध आनेसे अर्थवाद माना जायगा । [शास्त्र वर्तमानमें निवृत्ति कहता है और इस कालमें योग्यानुपलब्धिरूप निवृत्ति है नहीं, इसलिए विरोध आनेसे शास्त्रको ब्रह्मविद्याका प्रशंसक ही मानना होगा, स्वार्थपरक नहीं मान सकते । यद्यपि मोक्षावस्थामें देहादिकी निवृत्तिके बोधनमें शास्त्रका तात्पर्य

दशायां देहादिनिवृत्तावागमस्य तात्पर्यं तथापि यदि मोक्षदशायां जीवस्य भेदांशो न निवर्त्तेत तदा तन्निर्वाहाय देहेन्द्रियान्तःकरणाद्युपाधिरप्यभ्युपेयः । ततो न संसाराद्विशेषः । यदि च भेदांशनिवृत्तिः, तदापि न तत्त्वज्ञानात्तन्निवृत्तिः, तस्य स्वविषयानिवर्त्तकत्वात् । त्वन्मते भेदस्याऽपि तत्त्वज्ञानविषयत्वात् । नाऽपि कर्मभिस्तन्निवृत्तिः; आगमविरोधात् । आगमस्य सार्वकालिकभेदाभेदप्रतिपादकत्वाङ्गीकारात् । न च भेदाभेदवादे तत्त्वंपदार्थौ सुनिरूपौ, तत्र कोऽसौ त्वंपदार्थो जीवः[1] किं भेदाभेदाभ्यामंशाभ्यामंशी किं वांऽशद्वयसमुदाय उतांऽशद्वयमेव ? आद्येऽपि यद्यभेदांशो

माना जा सकता है, तथापि यदि मोक्षावस्थामें जीवके भेदरूप अंशकी निवृत्ति नहीं होती, तो उस अवस्थामें उस भेदकी स्थितिके निर्वाहके निमित्त देह, इन्द्रिय तथा अन्तःकरण आदि उपाधिका सद्भाव मानना ही होगा। [इससे मोक्षावस्थामें भी निवृत्तिबोधनमें तात्पर्य माननेसे शास्त्र अबाधित नहीं हो सकता] ऐसी दशामें संसारावस्था तथा मोक्षावस्थामें कोई भेद नहीं आ सकता। और यदि भेदरूप अंशकी निवृत्ति मान भी ली जाय, तो भी तत्त्वज्ञानके द्वारा उस भेदकी निवृत्ति नहीं हो सकती 'अर्थात् उस कालमें भेदका निवर्तक न होनेसे भेदकी निवृत्ति हो नहीं सकती, कारण कि वह तत्त्वज्ञान अपने विषय भ्रमात्मक भेदका निवर्तक नहीं बन सकता। तुम्हारे मतमें भेद भी तत्त्वज्ञानका विषय है। और कर्मोंके द्वारा भी भेदकी निवृत्ति नहीं हो सकती, क्योंकि इसमें शास्त्रोंका विरोध आता है। कारण कि तुम्हारे मतमें सदैव रहनेवाले भेद और अभेद दोनोंका प्रतिपादन करनेवाले शास्त्र माने गये हैं। और यह भी दोष आता है कि भेदाऽभेदवादीके मतमें 'तत्' और 'त्वम्' पदार्थोंका निरूपण करना भी सरल नहीं होगा, कारण कि इस अवसरपर पूछा जायगा कि यह जीवरूप 'त्वं' पदार्थ कौन वस्तु है ? क्या भेद और अभेद—इन दोनों अंशोंसे युक्त एक अतिरिक्त अवयवी है या केवल दोनों अंशोंका समुदायरूप ? अथवा केवल दोनों अंश ही है ? प्रथम कल्प माननेमें भी यदि अभेद अंश ब्रह्मरूप है, तो

१—यद्यपि प्रथम सूत्रमें ही कई-एक स्थानपर जीवस्वरूपका वर्णन किया गया है, तथापि त्वंपदार्थभूत जीवके स्वरूपका मोहवश भेदाऽभेदको माननेवाले भास्करके मतका निरूपण करना असम्भव होनेसे उसका मत असङ्गत है, ऐसा प्रतिपादन करनेके लिए जीवस्वरूपविषयक प्रश्नका अवसर आता है।

ब्रह्म तदा ब्रह्मणो जीवांशत्वं जीवस्य च सावयवत्वमापद्येत। अथाऽभेदांशो न ब्रह्म तर्ह्यत्यन्तभेद एव स्यात्। न द्वितीयः; जीवस्याऽवस्तुत्वप्रसङ्गात्। समुदायिव्यतिरिक्तसमुदायानिरूपणात्। तृतीयेऽपि किमभेदांश एव जीवः किं वा भेदांश एव उतांऽशद्वयं प्रत्येकम् अथवांऽशद्वयं परस्परमभिन्नम् अहोस्वित्परस्परमपि भिन्नाभिन्नम्? नाऽऽद्यः, ब्रह्मण एव जीवत्वप्रसङ्गात्। न द्वितीयः, अत्यन्तभेदप्रसङ्गात्। तथाच तत्त्वज्ञानेन मोक्षादिव्यवहारासिद्धिः। न तृतीयः, जीवद्वयप्रसङ्गात्। न चतुर्थः, तदा ब्रह्मैव जीव इति बन्धमोक्षव्यवहारासिद्धेः। न पञ्चमः, भेदाभेदानवस्थाप्रसङ्गात्। कस्य चाऽयं शास्त्रोपदेशः। न तावदभेदांशस्योपदेशः, ब्रह्म-

---

